सँस्कार भास्कर

वामांगेवी लिखत्
प्रमाणे पत्र २३५

पं. यादवनाथशर्म्मणः

॥ अथ संस्कारभास्करप्रारम्भः ॥

इस पुस्तकका रजिस्टरी सब हक सन् १८६७ का एक्ट २५ के बमूजब यन्त्राधिकारीने स्वाधीन रक्खा है.



यादवनाथस्य

अथ संस्कारभास्करग्रंथस्यविषयानुक्रमणिकाप्रारंभः।

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
मंगलाचरणम्	१	१	२	परिभाषा	,,	२	१	करणेचप्रायश्चित्तम्	,,	२	७
ग्रंथकारनाम	,,	,,	६	संकल्पेनविनाकर्मक-				धौतवस्त्रधारणम्	,,	,,	८
संस्कारसंख्या	,,	२	१	रणेदोषः	,,	,,	२	वाग्यमलोपेप्राय०	,,	,,	९
द्विजाः	२	१	१०	संकल्पप्रकारः	,,	,,	३	आहतवस्त्रलक्षणम्	,,	,,	१०
शूद्रसंस्काराः	,,	२	३	स्वशाखोक्तकर्माक-				कंबलपट्टवस्त्रेचनीलि-			
कन्यासंस्काराः	,,	,,	,,	रणेदोषः	,,	,,	४	रागःशस्तः	४	१	१२
संस्काराणांफलानि	,,	,,	७	अन्यथाकर्मकरणेदोषः	,,	,,	५	उदकोपस्पर्शकारणानि	,,	,,	६
विशेषकर्माणि	३	१	७	प्रधानकर्माकरणेतदंग-				अनुक्तांगेअंगं	,,	,,	९

प्रकरणानि	पत्रं	पृष्ठं	पं०
अदिङ्नियमे	४	२	१
आसीनाद्यवनियमे	,,	२	२
ब्रह्मविष्टरनिर्णयः	,,	,,	३
पवित्रप्रमाणम्	,,	,,	५
पवित्रेदर्भसंख्या	,,	,,	६
दर्भकुशलक्षणम्	,,	,,	९
अयातयामानि	,,	,,	१०
निर्माल्यकुशाः	५	१	२
पवित्रधारणस्थानंलक्षणंच	,,	,,	३
स्वर्णपवित्रप्रमाणम्	,,	,,	६
पवित्राभावेदर्भाः	,,	,,	९
उपवीतिनाबद्धशिखेनचविनाकर्मकरणेदोषः	,,	२	१
यज्ञोपवीतनिवीतिप्राचीनावीतिलक्षणम्	,,	,,	४
मंगलेतिलकानिश्चयः	,,	,,	७
आहुतिकालः	,,	,,	८
वन्हिजायालक्षणम्	,,	,,	९
याज्ञियवृक्षाः	६	१	१
समित्प्रमाणं	,,	,,	३
ग्राह्याग्राह्यविचारश्च	,,	,,	५
शूद्रानीतसमिदादीनांदोषः	,,	,,	९
देवपितृकर्मकंडनादीनि.	६	२	१
असमिद्धाग्नौहोमेदोषः	,,	,,	३
अग्निधमनविचारः	,,	,,	४
सामान्यग्रहहोमाहुतिप्रमाणम्	,,	,,	७
स्वगृह्योक्तकर्मनिश्चयः	,,	२	८
अन्यथाकर्मकरणेविचारः	,,	,,	१०
उक्तवस्त्वभावेअन्यग्र-			

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
हर्णविचारः	७	१	३	पंचरत्नानि	,,	२	२	पंचरंगाः	,,	,,	३
मूलमंत्रोच्चारप्रकारः	,,	,,	६	मांगल्याभरणानि	,,	,,	५	दशांगधूपः	,,	,,	६
द्रव्याद्यलाभेप्रतिनिधिः	,,	,,	७	पंचगव्यं	,,	,,	६	धातुमयकलशाः	,,	,,	८
प्राजापत्यादितीर्थ-				मधुरत्रयम्	९	१	२	कलशप्रमाणम्	१०	१	१
निर्णयः	,,	२	१	पंचमृतानि	,,	,,	,,	कलशेपूर्णपात्रं	,,	,,	४
आहुतिद्रव्यग्रहणमानं	,,	,,	२	पंचभंगा	,,	,,	३	सप्तधान्यानि	,,	,,	५
स्रुवेणहवनद्रव्याणि	,,	,,	४	यक्षकर्दमः	,,	,,	५	सप्तमृदः	,,	,,	६
द्रव्यभेदेनआहुतिमानं	,,	,,	७	सर्वगंधाः	,,	,,	७	द्रव्यमानं	,,	,,	८
एकाहुत्यांकुशदूर्वासं०	८	१	४	सर्वौषधयः	,,	,,	८	ताम्रस्योन्मानं	,,	२	३
मृगीमुद्रालक्षणम्	,,	,,	४	अर्घद्रव्याणि	,,	२	१	धान्यमानं	,,	,,	८
ऋषिच्छंदअज्ञानेदोषः	,,	,,	६	सप्तधातवः	,,	,,	२	स्मार्तकर्मक्रमः	११	१	१०

प्रकरणानि	पत्रं	पृष्ठं	पं०
दशप्रणवाः	११	२	५
कर्मविशेषेअग्निनामानि	,,	,,	९
कर्मांगस्वस्तिवाचनदेवताः	१२	१	८
कर्मादौप्रणवोच्चारणं	,,	२	,,
इक्ष्वादिभक्षणेपिकर्माधिकारः	,,	,,	९
स्नानोत्तरंकर्माधिकारः	,,	,,	१०
मुख्य स्नानं	१३	१	२
संध्यावंदनंविनाअशुचि	,,	,,	३
सर्वकर्मसुयोग्यताकर्माणि.	१३	१	४
कर्मांगस्नानेविशेषः	,,	,,	६
मंगलस्नानम्	,,	,,	९
आर्द्रशुष्कवासोनिर्णयः	,,	२	२
सप्तवाताहतवस्त्रंशुष्कं	,,	,,	४
दग्धजीर्णादिवस्त्रपरिधानेनिषेधः	,,	,,	,,
वर्जवस्त्राणि	,,	,,	६
धौतवस्त्रप्रसारणनिर्णयः	,,	२	१०
अन्यद्वासः	१४	१	२
धौतवस्त्राभावेवस्त्राणि	,,	,,	३
नीलरक्तवस्त्रनिषेधः	,,	,,	५
एकवस्त्रपरिधानेनिषेधः	,,	,,	७
एकवस्त्रनिर्णयः	,,	,,	९
कच्छत्रयनिर्णयः	,,	,,	१०
धर्मकार्येवर्ज्यवस्त्रं	,,	२	४
आसुरीकक्षानिषेधः	,,	,,	५
यज्ञोपवीतधारणसंख्या	,,	,,	७
शिखाबंधननिर्णयः	,,	,,	९
विशिखनिर्णयः	१५	१	२
कर्मकालेनिंद्यशब्दाः	,,	,,	४
उपांशुलक्षणम्	,,	,,	६

प्रकरणानि	पत्रं	पृष्ठं	पं०
स्पष्टतरवर्णोच्चारः	,,	,,	७
षोडशोपचाराः	,,	,,	९
पंचोपचाराः	,,	२	२
राजोपचाराः	,,	,,	३
धनिकादीनांदक्षिणादानेयत्ता	,,	,,	६
धनिकादिलक्षणम्	,,	,,	७
धनिकादीनांमध्येकेनकियद्देयमित्यस्यनिर्णयः	१६	१	६
मुख्यकल्पशक्तौअनु-			
कल्पेनकर्मकरणेदोषः	१६	२	५
दक्षिणाप्रतिनिधिः	,,	,,	८
रजतमुद्रादक्षिणादाननिषे०	,,	,,	९
सर्वकर्मसुब्राह्मणभोजनसंख्या	,,	२	१०
सफलानिकर्माणि	१७	१	४
सप्तगोत्राणि	,,	,,	६
एकोत्तरशतकुलानि	,,	,,	७
इतिपरिभाषाप्रकरणं	,,	,,	१०
अग्निचक्रंविनाकर्माणि	,,	२	२
नारदोक्तरजोदर्शनशांतिक्रमः	,,	,,	७
शांतिप्रयोगानुक्रमः	१९	२	२
मंगलस्नानविधिः	२०	१	७
वस्त्रपरिधानादि	,,	२	३
शांतिपाठमंत्राः	२१	१	८
कर्मारंभेगणेशादिस्मर०	२२	२	५
प्रधानसंकल्पः	२३	२	१
कलशादिपूजनं	२४	१	५
गणपतिपूजनं	२५	१	४
स्वतिपुण्याहवाचन०	३१	२	२

प्रकरणानि	पत्रं	पृष्ठं	पं०
पुण्याहवाचनांगवरुणपूजनं	३१	२	८
अथपुण्याहवाचनं	३३	,,	३
अथाभिषेकः	३४	,,	२
नीराजनं	४०	,,	६
मातृकास्थापनक्रमः	४२	१	३
मातृकापूजनं	,,	,,	,,
गृहमध्येअविघ्नकलशशमातृशूर्पस्थापनं	४६	१	६
वसोर्धाराकरणं		२	८
आयुष्यमंत्रजपः	,,	,,	३
मंडपेसंस्काराः	४६	२	५
मंडपंविनामातृकापूजनाभावः	,,	,,	७
नांदीश्राद्धकालः	,,	,,	९
नांदीश्राद्धमध्येद्वितीयनांदीश्राद्धनिषेधः	४७	२	१
अथजीवत्पितृकेवृद्धिश्राद्धनि०	४७	२	१
अथसांकल्पविधिनानांदीश्राद्धप्रयोगः	४९	१	५
ब्रह्माचार्यऋत्विग्वरणानि	५१	१	६
आचार्यादीनांप्रार्थना	५३	१	८
दिग्रक्षणम्	५४	१	३
पंचगव्यकरणं	५५	१	८
भूमिपूजनम्	५५	२	६
पंचभूसंस्कारकरणं	५७	१	२
अग्निस्थापनं	,,	१	७
ऋतुशांतौविशेषः	५८	१	१
मूर्तीनांअग्न्युत्तारणं	,,	२	२
प्राणप्रतिष्ठा	५९	२	३
सूर्यावाहनं	६०	१	३

प्रकरणानि	पत्रं	पृष्ठं	पं०
इंद्रावाहनं	६०	१	६
इंद्राण्यावाहनं	,,	,,	७
भुवनेश्वर्यावाहनं	,,	२	३
सूर्यादिदेवतापूजनं	,,	,,	७
सूर्यप्रार्थनाक्षमापनंच	,,	,,	८
इंद्रप्रार्थनाक्षमापनंच	६१	१	१
इंद्राणीप्रार्थनाक्षमापनंच	,,	,,	३
भुवनेश्वरीप्रार्थनाक्षमा.	,,	,,	६
स्वर्णकदलीस्थापनं	,,	,,	९
सूर्यादीनांसूक्तजपः	,,	२	५
ग्रहमंडलदेवतास्थापनप्र०	६१	२	७
ग्रहनामानि	,,	,,	८
ग्रहवर्णाः	,,	,,	१०
ग्रहप्रतिमानिर्माणधातवः	६२	२	१
ग्रहप्रतिमानिर्माणप्रकारः	,,	,,	४
ग्रहदेशाः	,,	२	५
ग्रहगोत्राणि	,,	,,	६
ग्रहस्थानानि	,,	,,	१०
ग्रहमंडलव्यासः	६३	१	२
ग्रहदिङ्मुखानि	,,	,,	७
यजमानाभिमुखग्रहाणांस्थापनं	,,	,,	१०
अधिदेवताप्रत्यधिदेवतास्थानानि.	,,	२	१
अधिदेवतानामानि.	,,	,,	२
प्रत्यधिदेवतानामानि	,,	,,	४
गणेशदुर्गादीनांस्थानानि	,,	,,	६
इंद्रादिदिक्पालानांस्थाना०	,,	,,	८

प्रकरणानि	पत्रं	पृष्ठं	पं॰	प्रकरणानि	पत्रं	पृष्ठं	पं॰	प्रकरणानि	पत्रं	पृष्ठं	पं॰
ग्रहाणांवस्त्राणि-				भागाहुतिसं॰	६४	२	५	धारणा॰	,,	२	३
पुष्पाणिच	६४	१	१	त्रिविधग्रहमखाः	,,	,,	६	ग्रहमंडलेगणपतिदुर्गा-			
ग्रहाणांगंधाः	,,	,,	,,	त्रिविधग्रहमखेषुग्र-				क्षेत्रपालावाहनं	६६	१	४
ग्रहाणांधूपाः	,,	,,	३	हाणांआहुतिसंख्या.	,,	,,	७	ग्रहाणांस्थापनं	,,	२	२
ग्रहाणांनैवेद्यानि.	,,	,,	५	व्याहृतिहोमसंख्या-				ग्रहपूजा.	७२	२	१
हविर्द्रव्याणि.	,,	,,	९	पूरणा॰	,,	,,	१०	ग्रहाणांप्रार्थनामंत्राः	,,	,,	४
ग्रहाणांसमिधः	,,	,,	१०	अधिप्रत्यधिदेवता-				रुद्रकलशस्थापनं	७३	१	६
कांडानुसमयः	,,	२	२	हुतिसं॰	६५	१	६	कुशकंडिकाव्याख्या.	,,	२	२
पदार्थानुसमयः	,,	,,	३	पूर्णाहुतिमंत्रक्रमः	,,	,,	८	वारुणपात्रलक्षणं	,,	,,	९
गणेशायवराहुतिः	,,	,,	४	पूर्णाहुत्याज्यसंस्कारः	,,	,,	१०	चमसलक्षणं.	७४	१	१
आघारावाज्य-				पूर्णाहुतिहोमस्रुव-				परिस्तरणलक्षणं	,,	,,	,,

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
आसादनीयपात्र-				तंदुलक्षालनप्रकारः	७५	१	८	उपांशुप्रकारः	७६	२	९
मध्यतरं.	७४	१	७	क्षालनप्रकारः	,,	,,	९	अन्वारंभप्रकारः	,,	,,	१०
आज्यस्थालीलक्षणं	,,	२	१	श्रपणलक्षणं.	,,	२	२	स्रुवधारणप्रकारः	७७	१	१
चरुस्थालीलक्षणम्	,,	,,	३	पर्यग्निकरणंतत्कारणंच	,,	,,	४	स्रुवहोमेएवत्यागः	,,	,,	५
संमार्गकुशलक्षणं	,,	,,	४	स्रुवसंमार्जनप्रकारः	,,	,,	६	अनेकस्रुवसाध्य-			
उपयमनकुशलक्षणं	,,	,,	५	उद्वासनस्थानं	,,	,,	९	होमप्र०	,,	,,	६
स्रुवलक्षणम्	,,	,,	६	उत्पुनातिकरणंअवेक्षण				अग्निपूजास्थानं	,,	,,	९
पवित्रच्छेदनलक्षणम्	,,	,,	१०	लक्षणंच	७६	१	३	स्विष्टकृदाहुतिनिर्णयः	,,	२	२
उत्पवनोद्दिंगनलक्षणं	७५	१	१	प्रदक्षिणपर्युक्षणकारणं.	,,	,,	८	अन्वाधाननिर्णयः	,,	,,	८
प्रोक्षणेकारणमाह	,,	,,	३	आधारावाज्याहुति-				कुशकंडिका	,,	,,	१०
असंचरस्थानम्	,,	,,	७	प्रकारः	,,	२	१	आहुतिदानसमयः	८०	१	१

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
मुख्यहविः	८०	१	७	क्षेत्रपालमहाबलि०	८५	१	१	तिलपात्रदानम्	९३	१	७
हवनारंभआहुतिसंख्या	८१	१	४	दुर्ब्राह्मणलक्षणम्	८६	२	९	हेमकदलीदानं	,,	,,	८
मृडाग्नेरुत्तरपूजनं				पूर्णाहुतिहोमः	८७	१	८	मूर्तिदानम्	,,	२	३
लक्षणंच	,,	२	१	वसोर्धारामंत्राः	,,	२	१	अभिषेकमंत्रा	,,	,,	७
भूराद्यानवाहुतयः	८२	१	२	वसोर्धाराब्राह्मणं	८९	२	३	अभिषेकेपौराणमंत्राः	९६	१	२
दिक्पालानांबलिदानम्	,,	२	९	आयुषकरणं	९१	२	४	आज्यावलोकनं	,,	२	६
गणेशदुर्गाक्षेत्रपालानांब				श्रेयःसंपादनं	९२	१	४	ब्राह्मणभोजनसंकल्पः	९७	१	३
लिदानम्	८३	१	२	आचार्यपूजनं	,,	२	८	आचार्यादीनांदक्षि-			
ग्रहाणांबलिदानम्	८४	१	४	स्वर्णदानं	,,	,,	१०	णादानम्	,,	१	४
मातृणांबलिदानम्	८५	१	३	गोदानं	९३	१	२	देवताविसर्जनम्	,,	१	६
प्रधानदेवताबलिदानम्	,,	,,	५	भूमिदानं	,,	,,	४	अग्निविसर्जनं	,,	१	९

प्रकरणानि	पत्रं	पृष्ठं	पं०
कर्मेश्वरार्पणम्	९७	२	६
गर्भाधानसंस्कारनिर्ण०	९८	१	२
प्रथमर्त्तौशिष्टाचारात्कर्त०	,,	,,	४
सर्वर्तुसाधारणेविशेष	,,	,,	९
रजस्वलाशुद्धिप्रकारः	,,	२	३
गर्भाधानकालः	,,	,,	५
स्त्रीणांयौगपद्येनऋतौगमन०	,,	,,	७
अगमनेदोषः	९९	,,	१
गर्भाधानाकरणेप्राय०	,,	,,	४
ऋतावऋतौचगमनेशुद्धिप्र०	९९	२	९
रजोदर्शनात्प्रागस्त्रीगमनेदो०	१००	१	१
गर्भाधानेमलमासादिनिर्ण०	,,	,,	३
गर्भाधाननिर्णयः	,,	,,	४
गर्भाधानप्रयोगानुक्र०	,,	,,	६
गर्भाधानप्रयोगः	,,	,,	,,
गर्भधारणार्थमौषधं	१०२	१	२
पुंसवननिर्णयः	,,	१	७
पुंसवनप्रयोगः	१०३	१	१
गर्भिणीधर्माः	,,	१	८
गर्भिणीपतिधर्माः	१०५	१	३
गर्भवृद्ध्युपायः	१०७	२	३
गर्भरक्षोपायः	,,	,,	५
गर्भस्त्रावहरोपायः	,,	२	९
सीमंतोन्नयननिर्णयः	१०८	१	७
सीमंतोन्नयनप्रयोगानु०	,,	२	६
सीमंतोन्नयनप्रयोगः	,,	,,	९
औदुंबरादिपंचकबंधनं	११०	२	७
गर्भाधानाद्यकरणेप्राय०	१११	१	८

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकराणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं.
शीघ्रप्रसवोपायमंत्रः	१११	१	१०	वात्सप्रमंत्राः	११४	१	७	जातकर्मकरणनिर्णयः	११७	१	५
शीघ्रप्रसवार्थमंत्रितंजलं	,,	२	३	कुमारमातुस्तनाभि				बालस्यदुष्टदृष्टिदोषार			
कुयोगादिशातिप्राप्तौ-				मंत्रणमं०	११५	२	४	क्षाविधिः	,,	,,	१०
स्नानानि०	११२	१	५	कुमारायस्तनप्रदानमंत्रः	,,	,,	५	बालरोदनपरिहारार्थयंत्रं	,,	२	७
जातकर्मसंस्कारनिर्णयः	,,	२	१	उदकपूर्णकलशस्था-				अथषष्ठीपूनकारिकाक्रम	११८	१	३
जातकर्मांगनांदीश्राद्धानि	,,	,,	२	पनमं०	,,	,,	९	षष्ठीपूजनप्रकारः	,,	२	२
नालच्छेदनेकालावधिः	,,	,,	६	अग्निस्थापनम्	११६	१	३	षष्ठीप्रार्थना.	१२१	२	४
नालछेदनप्रकारः	,,	,,	७	हवनमंत्राः	,,	,,	७	सूतिकागृहेबलिदानमंत्रः	१२२	,,	७
जातकर्मक्रमःप्रयोगश्च	,,	,,	८	बालग्रहःकुमारमुप-				द्वारमातृका.	,,	,,	९
मेधाजननं	११३	१	९	द्रवेतदामं०	,,	२	३	रात्रिवर्ग(शांतिपाठ)			
आयुष्यकरणम्	,,	२	३	ग्रहणेजाताशौचमध्येच-				मंत्रक०	,,	२	७

प्रकरणानि	पत्रं	पृष्ठं	पं०
अथनामकरणसंस्कारनि०	१२३	१	५
नामकरणप्रयोगः	१२४	,,	८
उपांशुलक्षणम्	१२६	१	२
आयुष्यकरणमंत्राः	,,	,,	४
आंदोलारोहणम्	,,	२	१०
पयःपानम्	१२७	१	५
अथनिष्क्रमणसंस्कारः	,,	,,	७
कुमारायसूर्यदर्शनं.	,,	२	४
भूम्युपवेशनं	१२८	१	४
अथान्नप्राशनसंस्कारः	,,	२	४
शौनकोक्तदत्तकप्रतिग्रहविधाननिर्णयः	१३०	१	४
दत्तकेविशेषः	,,	२	५
कन्यादत्तकग्रहणेविशेषः	,,	२	१०
स्त्रीशूद्रयोस्तुविशेषः	१३१	१	१
पुत्रप्रतिग्रहप्रयोगः	,,	,,	७
कन्याविषयेविशेषः	,,	२	२
पुत्रदानसंकल्पः	१३२	१	१
कन्यादानेसंकल्पः	,,	,,	३
हवनविधिः	१३३	१	८
अंतरितसंस्कारेप्रायश्चित्तं.	१३४	२	३
संक्षिप्तांतरितसंस्कारप्रयो०	१३५	२	२
अथांतरितसंस्कारेअवश्यकर्त्तव्यानि	१३६	१	५
अथचूडाकरणसंस्कारनिर्णयः	,,	२	४
चूडाकरणक्रमःप्रयोगश्च	१३७	२	७
स्पृष्टास्पृष्टेशुद्धिप्रकारः	१४१	१	६
कर्णवेधः	,,	,,	९
कर्णक्षालनप्रकारः	१४२	१	५

प्रकरणानि	पत्रं	पृष्ठं	पं०
स्त्रीणांजातादिसंस्कारानि०	”	”	८
वर्धापननिर्णयः	”	२	१
वर्धापनप्रयोगः	”	”	६
अथाक्षरलेखनारंभनिर्ण०	१४५	२	९
अक्षरारंभप्रयोगानुक्रमः	१४६	१	४
अक्षरारंभप्रयोगः	”	२	६
अथोपनयनं	१४८	१	१
उपनयनेकालः	”	१	३
उपनयनशब्दार्थः	”	”	६
ब्राह्मणादीनांवसंतादिऋतुग्रहणनिर्णयः	”	२	४
ज्येष्ठमासनिर्णयः	”	”	५
जन्मनक्षत्रादिवर्ज्यनिर्ण०	”	”	७
ज्येष्ठमासापवादः	”	”	८
जन्ममासादीनामपवादः	१४८	२	९
उपनयनेतिथ्यादि	१४९	१	६
नैमित्तिकानध्यायोपिकालार्तस्यवटोर्ग्रहणविचारः	”	२	२
प्रायश्चित्तनिमित्तमेखलाबंधनेविशेषनिर्णयः	”	”	८
नष्टचंद्रेअष्टमशुक्रेनिरंशेभास्करेचव्रतंशस्तं.	१५०	१	२
निरंशस्वरूपम्	”	”	३
युगाद्यनध्यायानांप्रतिप्रसवः	”	१	७
त्रयोदश्यादितिथिवर्ज्यत्वं	”	१	१०
तत्रापवादश्च.	”	२	१
अनध्यायस्यपूर्वापरदिनवर्ज्य०	”	”	३
सोपपदानिषेधोया-	.		

प्रकरणानि	पत्रं	पृष्ठं	पं०
जुषांवि०	”	”	५
सोपपदातिथयः	”	”	८
वारानिर्णयः	”	”	१०
शाखाधिपबलाभावदोष	१५१	१	७
वर्णाधिपतिस्तद्बलंच.	”	”	१०
संकटेचंद्रताराद्य-			
भावेदानं	”	२	६
गुरुबलालाभेनिर्णयः	”	”	८
दुष्टस्थानस्थेगुरौशांत्या			
पिनोपनयनाधिकारः	”	”	१०
अतिसंकटेवत्सरा			

प्रकरणानि	पत्रं	पृष्ठं	पं०
तिक्रमेचनिर्णयः	१५२	१	४
राशिविशेषस्थेगुरौअनि			
ष्टस्थानस्थेपिनदोषः	”	”	६
रव्यादिग्रहाणांउच्चस्था०	”	”	८
अनिष्टगुरुरेकब्द्यर्च-			
नाच्छुभः	”	२	२
चतुर्थाष्टमादिगुरौनदोषः	१५२	२	५
उपनयनेनक्षत्राणि.	”	”	९
वेदविशेषेनक्षत्रविशेषाः	१५३	१	४
उपनयनेयोगाः	”	”	९
उपनयनेकरणानि.	१५४	१	३

प्रकरणानि	पत्रं	पृष्ठं	पं०
उपनयनेदिनभाग			
व्यवस्था.	”	”	४
उपनयनेनिमित्तविशे			
षेणानिषेधः	”	”	६
निषेधापवादाः	”	”	९
चंद्रसूर्यग्रहणेवर्ज्य-			
दिनानि.	”	”	१०
अकालवृष्ट्यादौ-			
कार्याकार्यवि०	१५४	२	१०
उपनयनोत्तरंसूतक-			
प्राप्तौवि०	१५५	२	३

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
लग्नकालाः	१५५	२	७	परिहारोपायः	”	”	५	सर्वसाधारणसंभाराः	”	”	४
उपनयनाधिकारिणः	१५६	१	१	उपनयनसंभाराः	”	”	७	उपनयनप्रयोगः	”	”	९
आचार्यादीनांकर्म-				अजिनप्रकारः	”	२	१	उपनयनदिनेकृत्यं	१६२	२	१
निर्णयः	”	”	५	मेखलानिर्माणप्रकारः	१५९	१	७	प्रतिष्ठामंत्राः	१६३	२	१०
अधिकारसिद्धये-				यज्ञोपवीतनिर्माणप्रकारः	१६०	१	१०	प्रेषादिकर्म.	१६५	१	४
प्रायश्चितम्	१५६	२	१	दंडप्रकारः	”	२	७	ब्रह्मचारिणेव्रतोपदेशः	१६८	१	७
मंडपनिर्माणप्रकारः	”	”	४	उपनयनेमात्रासहभो				गायत्र्युपदेशादिकर्म	”	२	४
वेदिनिर्माणप्रकारः	”	”	९	जननि०	१६१	१	१	समिदाधानम्	१६९	२	५
घटीयंत्रप्रकारः	१५७	२	३	मातृभोजनात्पूर्वंमातरि				मुखविमार्जनं	१७०	१	१
घटीगमनादिक्पालर्बानि०	१५८	१	२	रजस्वलायांनिर्णयः	”	१	७	अंगालंभनम्	”	”	६
अनिष्टदिग्गतघटीदोष				उपनयनक्रमकारिका.	”	२	२	अभिवादनं	”	२	५

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
संध्यावंदनाधिकारः	१७१	१	१०	विकलांगाद्युपनयनप्रकारः	१८०	२	५	वेदारंभप्रयोगः	१८७	१	३
भिक्षाचरणं	,,	२	१	पुनरुपनयनकारणंतद्विधिश्च	१८१	१	१०	वेदारंभाहुतयः	,,	१	१०
ब्रह्मचारियमनियमाः	१७२	१	६	अथयजुर्वेदिनांप्रायश्चित्तैःसहपुनरुपनयनप्रयोगः	१८३	१	९	वेदाध्ययनारंभः	१८८	१	१
अथाशीर्वादब्राह्मणमंत्राः	,,	२	९	अथब्रह्मचारिव्रतलोपेप्रायश्चित्तम्	१८५	१	२	अथकेशांतसंस्कारः	१८९	१	२
ब्रह्मचारिनित्योपासना.	१७७	१	३	वेदारंभनिर्णयः	१८६	१	३	अथसमावर्तनसंस्कारः	१९१	१	५
यमलजातपुत्रयोरुपनयनप्रयोगेविशेषः	१७८	२	६	वेदारंभप्रयोगानुक्रमः	,,	२	१०	समावर्तनप्रयोगानुक्रमःप्रयोगश्च	,,	२	९
अथकर्माधिकारदानं	१७९	२	५					स्नानार्थमष्टोदकुंभस्था०स्ना०	१९४	१	१०
अथयमलजातकन्यकोद्वाहप्र०	१८०	१	४					आदित्योपस्थानमंत्रः	१९५	१	६
								दधिप्राशनादिकर्म	१९५	१	१०

प्रकरणानि	पत्रं	पृष्ठं	पं०
अथचंदनवस्त्रवज्ञोपवीतादिधारणमंत्राः	,,	२	४
स्नातस्यनियमाः	१९७	१	५
स्नातस्यअहोरात्रत्रयव्रतचर्योंच्यते	१९८	२	१
अथक्रमप्राप्तोविवाहः	१९९	२	५
तत्रादौअनाश्रमिनिर्णयःप्रायश्चित्तंच	,,	,,	९
प्राजापत्यकृच्छ्रप्रकारः तत्प्रत्याम्नायाश्च	२००	१	५
अतिकृच्छ्रप्रकारः	,,	,,	६
तत्प्रत्याम्नाय०	,,	,,	६
कृच्छ्रातिकृच्छ्रप्रकारः तत्प्र०	२००	,,	८
चांद्रायणप्रकारःतत्प्रत्याम्नाया०	,,	,,	१०
प्रथमाब्देप्राजापत्यकृच्छ्रव्रतेसंकल्पः	,,	२	४
द्वितीयाब्देअतिकृच्छ्रव्रतेसंकल्पादि	,,	,,	१०
तृतीयाब्देकृच्छ्रातिकृच्छ्रव्रतेसं०	२०१	१	४
विवाहोपयोगिकन्यादिप्रकार०	,,	,,	६
कन्यालक्षणपरीक्षा.	,,	२	३
कन्यादोषाः	२०२	१	८
अथवरगुणाः	,,	,,	१०
अथवरदोषाः	,,	२	५
अथसापिंड्यनिर्णयः	२०३	१	१
अथदत्तकसापिंड्यनि०	,,	२	९
अथगोत्रप्रवरनिर्णयः	२०५	१	५
अथदत्तकस्यगोत्रादि	२०६	१	५
अथप्रत्युद्वाहादिनिषेधः	,,	२	१

प्रकरणानि	पत्रं	पृष्ठं	पं०
अथसोदरकन्यापुत्रयोर्विवाहनि०	२०७	१	४
प्रवेशादेकवर्षेनिर्गमनि०	,,	२	४
एकवत्सरेसमानोदरकन्ययोःवरयोश्चविवाहनिषेधः	२०८	१	१
तत्रविशेषः	,,	,,	५
एकवासरेयमलजाताविवाहानिषेधः	२०९	१	७
स्त्रीणांउपनयनस्थानेविवाहोक्तानिषेधः	,,	१	१०
एकवत्सरेकन्यापुत्रयोर्विवाहोपनयनानिर्णयः	,,	२	१
कन्यापुत्रयोःपरिवेत्रीत्वपरिवेतृत्वनिर्णयः	२१०	१	९
प्रवेशानिर्गमानिर्णयः	,,	२	१
नांदीश्राद्धोत्तरनिषिद्धकर्मा०	,,	,,	५
मुंडनद्वयनिर्णयः	२११	१	३
पुत्रोद्वाहात्कन्याविवाहानिर्णय०	,,	,,	७
अथशोभनसान्निपातनिर्णयः	,,	२	७
मंडनमुंडनविचारः	२१२	२	३
चत्वारिमुंडनानि,	,,	,,	९
अथगुरुलघुमंगलनि०	२१३	२	१
सीमंताद्यन्नप्राशनांतसंस्कारेगुरुशुक्रास्ताधिमासादिनिर्णयः	२१४	१	८
परिवेत्रादिनिर्णयःप्राय०	,,	२	९
अथाग्रेदिधिषूपत्यादेर्विशेषः	२१५	२	३
परिवेदनदोषस्यापवादः	,,	,,	७

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०
विवाहेआशौचप्राप्तौ-				नोत्पत्तौनिर्णयः	२१८	१	९	शांतिः	,,	,,	७
निर्णयः	२१६	२	२	अथकन्यारजोदोषनि०	,,	२	७	वाङ्निश्चयोत्तरंसूतक-			
मुहूर्तांतरालाभेसाम-				अथविवाहहोमकालेक				प्राप्तौनिर्णयः	२२१	१	२
ग्र्यांकृतायांसूतकिनो-				न्याऋतुमतीचेत्तत्रानि०	२१९	,,	८	त्रिपुरुषांतर्गतेमृतेप्रति-			
प्यधिकारोपा०	२१७	१	५	अथप्रतिकूलनिर्णयः	,,	२	४	कूलदोषनिर्णयः	,,	११	८
आरंभोत्तरंसूतकेप्राप्ते-				अथसंकटेप्रवृत्तिप्रका-				अथचूडोपनयनोद्वाहना			
विशेषः	,,	२	१	रमा०	२२०	१	१	रंभोतरजननाशौचप्राप्तौ			
संकल्पितान्नभोजननि०	२१७	२	२	प्रतिकूलेपिविवाहकर्त-				कूष्मांडीहोमप्रकारः			
अथविवाहेवधूवरजन-				व्यतानि०	,,	,,	१०	अथविवाहहोमकालेक	२२१	२	९
नीरजोदोषेनिर्णयः	,,	,,	१०	संकटेविनायकशांतिः	,,	२	५	न्याऋतुमतीचेत्तत्रहो-			
नांदीश्राद्धोत्तररजोदर्श-				प्रतिकूलदोषेविनायक-							

प्रकरणानि	पत्रं	पृष्ठं	पं०
मप्रयोगः	२२३	१	६
अथश्रीशांतिप्रयोगः	२२४	१	६
अथविनायकशांतिका.	,,	२	१०
अथविनायकशांतिसं०	२२५	१	३
विनायकशांतिप्रयोगः	,,	२	८
अथकन्यावरयोर्गुर्वकेंबलनि०	२३३	१	९
अथबृहस्पतिशांतिः	२३४	१	६
बृहस्पतिशांतिप्रयोगः	,,	,,	,,
अथाष्टौविवाहभेदाः	,,	२	६
कन्याविवाहकालः	२३५	२	९
कन्यादानाधिकारिणः	२३६	१	८
विवाहदिनात्प्राक्विवाहांगकर्मानि०	२३७	१	२
अथब्राह्मविवाहांगवाग्दानविधिः	,,	२	१
तैलहरिद्रारोपणंगोधूमपूजनंच,	२३९	१	६
विवाहदिनात्पूर्वदिनेकर्तव्यमुच्यते	२३९	२	१
घटीगमनादिकफलानि	२४०	१	६
अथगौरीहरपूजनम्	,,	,,	१
सीमंतिकार्चनम्	२४१	१	२
वरप्रस्थानकृत्यं	२४२	१	८
मधुपर्कक्रमकारिकाः	,,	२	५
अथमधुपर्कप्रयोगः	२४३	१	२
अथगबालंभनंतत्प्रयोग	२४५	२	६
अथवरायगंधाद्युपचारदानं	२४६	१	८
विवाहवेद्युपरिअग्निस्थापना०	,,	,,	५
वधूवरांतरालेअंतःपटधारणंमंगलसूक्तादिपठनंच	२४७	१	४

प्रकरणानि	पत्रं	पृष्ठं	पं०
वरकंठेपुष्पमालार्पणं.	,,	,,	८
वधूवरयोःप्रत्यक्प्राङ्मुखोपवेशनम्	,,	,,	९
प्रतिष्ठामंत्राः	,,	,,	,,
अथवरोवध्वैपरिधानार्थंवस्त्राद्यर्प०	,,	२	५
मांगल्यतंतुबंधनं	२४८	१	७
अथसूत्रवेष्टनमंत्राः	,,	२	१
अथकन्यादानसंकल्पः	२४९	१	३
कन्यादानेगोदानादि	२५२	१	२
गोदानमंत्रः	,,	११	३
अंगुलीयकदानमंत्रः	,,	,,	४
कुंडलदानमंत्रः	,,	,,	६
वलयदानमंत्रः	,,	,,	७
ताम्रपात्रजलपात्रदान०मंत्रः	,,	,,	८
कांस्यपात्रदानमंत्रः	२५१	१	१०
रौप्यपात्रदानमंत्र	,,	२	१
तांबूलदानमंत्रः	,,	,,	२
दीपदानमंत्रः	,,	,,	४
वरायोपदेशः	,,	,,	७
अथसुवर्णाभिषेकमंत्राः	२५२	१	७
वरप्रार्थनादि.	२५५	२	१०
अथगणपतिपूजनंकंकणबंधनादि	२५६	२	१
वधूवरयोरग्निसमीपेगमनादि.	२५७	१	२
दक्षिणतोब्रह्मासनादि उपकल्पनीयानिच-	२५७	२	६
आघारावाज्यभागौभूराद्यष्टाहुतयश्च	२५८	१	१
अथराष्ट्रभृद्धोमः	,,	,,	७
अथजयाहोमः	२५९	२	४

प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पृष्ठं	पं०	प्रकरणानि	पत्रं	पष्टं	पं.
अथाभ्यातानहोमः	२६०	१	६	वधूमूर्धन्यभिषेकादिकर्म	२६५	२	६	विवाहादारभ्यत्रिरात्रं			
अथाग्निरित्यादिपंचक-				अथाशीर्वादमंत्राः	२६७	१	६	वरनिय०	,,	,,	४
होमः	२६१	२	७	वधूवरयोर्मंत्रपठन				अथऐरणोप्रदानं	,,	,,	१०
अथलाजहोमः	२६२	२	१	कारिका-	२६८	१	८	अथऐरणीपूजनम्	२७०	१	५
वरेणवधूहस्तग्रहणमंत्रः	२६२	२	८	अथविवाहेमंत्राधि-				ऐरणीप्रार्थना.	,,	२	३
अथाश्मारोहणम्	२६३	१	४	कारिणः	,,	२	७	वरमात्रेऐरणीदानं	,,	,,	७
अथगाथागानं	,,	,,	६	अथविवाहहोमेआहुति				वरगोत्रजादीनांवस्त्रा			
अथाग्निपरिक्रमणादि	,,	२	१	त्यागादिकारिका-	,,	,,	७	दिभिःपूजनंप्रार्थनाच	२७१	१	७
अथसप्तपदी	२६४	१	२	अभ्रातृकर्कन्योद्वाहे				ऐरणीवंशपात्रस्थवरगो-			
सप्ताचलपूजनं	,,	,,	६	निर्णयः	२६९	१	९	त्रजादीनांशिरसिधारणं	,,	,,	१०
अथकन्याप्रतिज्ञामंत्राः	,,	२	८	अथग्रामवचनार्थः	,,	२	२	कन्यानिवेदनं	,,	२	२

प्रकरणानि	पत्रं	पृष्ठं	पं०
वसिष्ठारुंधतीपूजनंअर्घ्यदानंप्रार्थनाच	,,	२	६
वायनदानादि	२७१	१	३
वरहस्तेकन्यानिवेदनं	,,	,,	६
अथवधूप्रवेशनिर्णयः	,,	२	४
वधूप्रवेशांगगणपातिपूजनादि	२७३	१	५
अथप्रथमाब्देवधूनिवासः	,,	२	१
अथचतुर्थीकर्मक्रमः	,,	,,	४
चतुर्थीकर्मप्रयोगः	२७४	१	२
अथदेवकोत्थापनमंडपोद्वासननिर्णयः	२७५	२	३
देवकोत्थापनप्रयोगः	२७५	१	३
अथद्विरागमनं	२७७	२	१
विवाहभार्ययासहभोजन०	२७८	१	१
देवकोत्थापनपर्यंतंनिषिद्धकर्माणि	,,	,,	५
अथमातृविसर्जनानंतरंअब्दपर्यंतंनिषेधमाहअत्रापवा०	,,	२	२
कन्यागृहेभोजननिषेधः	,,	,,	९
अथवरस्यमृतभार्यत्वपरिहारोपायकर्मक्रमः	२७९	१	६
अथप्रयोगः	२७९	२	२
अथैकभार्याविद्यमानत्वेद्वितीयविवाहअधिवदनीयकार०	१८०	२	३
अधिवेदनकालप्रतीक्षामाह	,,	,,	६
विवाहांतरेविशेषमाह	,,	,,	७
अथस्त्रीनिधनेद्वितीयपरिणयकालमाह	२८१	२	१
अथकन्याविषयोत्पन्नाचेद्वैधव्ययोगहरकुंभविवाहनि.	,,	,,	३
अथकुंभविवाहप्रयोगः	२८१	२	७
अथबालवैधव्यहरविष्णुमूर्तिदानम्	२८२	२	६
अथार्कीविवाहनिर्णयः	२८३	२	४
अत्रशौनकोक्तहोमप्रकारः	२८५	२	१
अथार्कीविवाहप्रयोगः	२८६	१	६
अथार्कीविवाहांगहोमः	२८७	२	७
अनादिष्टप्रायश्चित्तानि०	२८८	१	८
अनादिष्टप्रायश्चित्तप्रयोगः	२८९	२	९

इतिसंस्कारभास्करग्रंथविषयानुक्रमणिका
समाप्ता

प्रस्तावना।

विज्ञापयावो विविधानवद्यवेदविधिविद्याविशारदविद्वद्वर्यान्—पूर्वं श्रीमन्नारायणानुशासनाद्ब्रह्मणा परमेष्ठिना समष्टिव्यष्टिरूपेण यदा सृष्टिः सृष्टा तदाच स्ववर्ष्मतो वर्णचतुष्टयं वष्टचोत्पादितवानिति प्रसिद्धमेव यथोक्तं मनुना—

लोकानां तु विवृद्धचर्थं मुखबाहूरुपादतः। ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवतर्यदिति॥

तथा च स्वकीयदेहं द्विधा निर्माय स्त्रीपुरुषे उत्पाद्य बीजतः सृष्टिक्रममुपाक्रमत तेषां सर्वेषां पुरुषार्थसाधनार्थं धर्मान् प्रकथ्य तदनुकूलं स बीजोत्पन्नदेहादिशुद्धचर्थं संस्कारानृषिमुखेभ्योस्मिञ्जगति प्रावर्तयत् एते च संस्कारा मुख्यतया शिष्यानुशिष्यकथनेन मन्वादिभिः परम्परया भूमौ भूयोभूयः प्रसिद्धिं प्रापिताः॥ प्रसिद्धमेतत्॥ उक्ताश्चावश्यसंस्कारा ब्रह्मर्षिणा याज्ञवल्क्येन ऋषिजनेभ्यो यथा—

ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयो द्विजाः । निषेकाद्याः श्मशानांतास्तेषां वै मन्त्रतः क्रियाः ॥
गर्भाधानमृतौ पुंसःसवनं स्यन्दनात्पुरा । षष्ठेष्टमे वा सीमन्तो मास्येते जातकर्म च ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेन्नप्राशनं मासि चूडा कार्या यथाकुलम् ॥
एवमेनः शमं याति बीजगर्भसमुद्भवम् । तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ॥

गर्भाष्टमेष्टमे वाब्दे ब्राह्मणस्योपनायनमित्यादि—

मुख्यतया सर्वत्र विद्वद्भिरेते षोडश प्रगण्यन्ते । गौतमेन चत्वारिंशत्कथिताः ॥ अङ्गिरास्तु पञ्चविंशतिमगिरत् । एवं वैकल्प्यात्प्रायः स्वस्वस्वगृह्यसूत्रगृहीतानेव संस्कारान्गृण्हन्ति ॥ एवंरीत्यैव माध्यन्दिनानां स्वगृह्यानुसारेण गर्भाधानादिविवाहान्ताः षोडशसंस्कारा भवन्ति उक्तं च—

गर्भाधानमतश्च पुंसवनकं सीमन्तजाताभिधे नामाख्यं सह निष्क्रमेण च तथान्नप्राशनं कर्म च ॥
चूडाख्यं व्रतबन्धकोप्यथ चतुर्वेदव्रतानां पुरः केशान्तः सविसर्गकः परिणयः स्यात्षोडशी कर्मणाम् ॥१॥

एते षोडश संस्काराः सर्वेषां द्विजातीनाम् । शूद्राणां तु तूष्णीमेवात्रत्याः केचन संस्काराः संस्करणे

नियुक्ताः ॥ उक्तं च स्मृत्यन्तरे १ शूद्रोप्येवंविधः कार्यो विना मन्त्रेण संस्कृतइत्यादि ॥ एतांश्च संस्कारान् धर्मशास्त्रपारावारावगाहनिपुणजनैः स्वस्वशाखानुसारेण स्वस्वमन्त्रैः प्रयुक्ताः प्रयोगरत्नाकरादिग्रन्थतो जानन्ति सज्जना ऋग्वेदिनः । एवमेवायमेकः संस्कारभास्करसंस्कारप्रयोगग्रन्थो वाजसनेयिनां वरीवर्ति । प्रस्तौवः किंचिदत्र– आसीच्चास्तिकविप्रजनशास्त्रप्रश्रयसंस्कारसंस्करणकुशलो धर्मशास्त्रनिपुणाग्रगण्यः प्रमाणीकृतार्षग्रन्थगणः पुण्यजनकदनाय जनकनन्दिन्या सौमित्रिणा च सहागतेन दाशरथिना स्नानपानादिना कृतमोदाया गोदाया उदक्तनकूले कलुषाशिनि नासिकेतिप्रसिद्धे सिद्धक्षेत्रे क्षत्राग्रवर्णज ऋषिरिवान्य ऋषिभट्टो नाम कश्चिन्निश्चयज्ञानी । तेन माध्यंदिनयजुर्वेदशाखाध्यायिनां संस्काराणां सुलभतयालाभायायं संस्कारभास्करो नाम ग्रन्थः १६२१ तमे शालिवाहने शाके ग्रथितः यं च केचन कर्तृनाम्ना ऋषिभट्टीत्यपि वदन्ति सन्तः । पूर्वमयमत्रत्यैर्द्विपश्चिदग्रैर्मयूरात्मजरामकृष्णाख्यैर्विद्वदाश्रयेण मध्ये निर्णयसिंधुधर्माब्ध्यादिधर्मशास्त्रग्रन्थतः प्रयोगाब्ध्यादिप्रयोगग्रन्थतः प्रमाणान्युपसंगृह्य संस्कारावश्यसर्ववस्तूनि लक्षणादिना परिभाषाविषयेण च विशिष्य सर्वोपकरणैः पुस्तकन्यूनता-

मपनीय नूतनइव संपादितोयं ग्रंथः सम्यक्परिशोधितश्च । आज्ञापितं चावां मुद्रणाय॥तदावाभ्यां शिलायन्त्रेणाङ्कित्वा सकलामलगुणैरलंपूर्णेषु गुणिसज्जनगणेषु प्रसिद्धीकृतः ॥ तत्पुस्तकस्य समस्ताअपि प्रतिमा अस्मदप्रतिमग्राहकगणैरर्थाश्रयेण नीत्वात्राभावं प्रापिताः ॥ एतेन जानन्तु सज्जना एतत्संस्कारभास्करप्रभाम् । अथ पुनःसोयमेव पूर्वंतनमुद्रणसमयस्थिताशुद्धमपास्याच्छं संशोध्य प्रमाणान्तरैष्टिप्पणीभिश्च सनाथीकृत्य पुनः शीसकमुद्राभिः पुष्टपत्रेषु मुद्रितो भवतां भवतामग्रे प्रभवति । अस्मिन्ग्रन्थे षोडशसंस्काराः सविधानं सप्रमाणं सम्यक्प्रयुक्ता उपरितनाइति ज्ञायतामेव सुजनैः ॥ एतद्ग्रन्थस्य पुनर्मुद्रणादिसर्वेऽधिकारा उक्तवि॰भट्टरामकृष्णतो गृहीत्वाऽस्माभिः स्वाधीना रक्षिता इति ज्ञेयम् ॥

श्रीकृष्णदासात्मजोगङ्गाविष्णुः,खेमराजश्च

श्रीवेङ्कटेश्वराख्यमङ्कनालयम् । मुम्बय्याम्

श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ ॥ श्रीगुरुभ्योनमः ॥ श्रीलक्ष्मीनारायणाभ्यांनमः ॥ अथसंस्कारभास्करप्रारंभः ॥ ॥ तत्रादौमंगलाचरणं ॥ ॥ वात्सल्यात्पितरौकपोलयुगुलंस्वस्यागतौचुंबितुंदृष्ट्वाकुंचितमास्यपद्ममलंसेषत्स्मितंसत्वरं ॥ अन्योन्यंशिवयोस्ततःसुवदने युक्तेअभूतांतयोरित्थंयेनविनोदितौसभगवान्बालोगजास्योवतु ॥ १ ॥ श्रीगणेशंशारदांचलक्ष्मीनारायणंगुरुं ॥ नवग्रहांश्चदिक्पालान्नमस्कृत्यपुनःपुनः ॥ २ ॥ योभूच्छौचोपनामाबुधमुकुटमणिर्विश्वनाथः प्रसिद्धस्तज्ज्ञोगंगाधराख्यः क्षितिसुरमहितः सर्ववेदार्थवेत्ता ॥ तत्पुत्रःसाधुशीलः शतपथनिपुणोयाज्ञिकैर्वंद्यमानः पुण्यात्मासर्वकालेजयतिऋषिबुधः शिष्यसंघार्चितांघ्रिः ॥ ३ ॥ करोतिविदुषांप्रीत्यैसर्वसंस्कारभास्करं ॥ सूत्रंहरिहरंकर्कंवासुदेवींसमाहितः ॥ ४ ॥ आलोक्यसम्यङ्मनसासरलंसुगमंनवं ॥ यस्यावलोकनेनैवस्फुरंतिहृं

दितत्क्षणात् ॥ ५ ॥ तत्रतावत् ॥ गौतमेनचत्वारिंशत्संस्काराः कथिताः ॥ तेयथा ॥ ॥ गर्भाधानंपुंसवनंसीमंतोन्नयनंजातकर्मनामकर्मनिष्क्रमणमन्नप्राशनंचौलोपनयनेचत्वारिवेदव्रतानिकेशांतस्नानेसहधर्मचारिणीसंयोगः ॥ पंचमहायज्ञाऽष्टकापार्वणश्राद्धानिश्रावण्याग्रहायणीचैत्रीआश्वयुजीतिसप्तपाकसंस्थाः ॥ अग्न्याधेयमग्निहोत्रंदर्शपौर्णमासौचातुर्मास्याग्रयणेष्टिर्निरूढपशुः सौत्रामणीतिसप्तहविर्यज्ञसंस्थाः ॥ अग्निष्टोमअत्यग्निष्टोमउक्थ्यषोडशीवाजपेयोतिरात्रआप्तोर्यामइतिसप्तसोमयज्ञसंस्थाः ॥ उपाकर्मोत्सर्जनंपैतृमेधिकंच ॥ ॥ इत्येतेचत्वारिंशत्संस्काराः ॥ ॥ अंगिरास्तुपंचविंशतिसंस्कारानुक्तवान् ॥ तेयथा ॥ गर्भाधानंपुंसवनंसीमंतो बलि[१]रेवच ॥ जातकर्मनामकर्मनिष्क्रमोन्नाशनंपरं ॥ चौलकर्मोपनयनंतद्व्रता

---

[१] बलिर्विष्णुबलिः ।

नाचतुष्टयं ॥ तच्छब्देनप्रसिद्धत्वाद्वेदग्रहणेतद्व्रतानांचतुर्वेदव्रतानामित्यर्थः ॥ स्नानोद्वाहौचाग्रयणमष्टकाश्चयथातथं ॥ श्रावण्यामाश्वयुज्यांचमार्गशीर्ष्यांचपार्वणं ॥ उत्सर्गश्चाप्युपाकर्ममहायज्ञाश्चनित्यशः ॥संस्कारानियताह्येतेब्राह्मणस्यविशेषतः ॥ इति ॥ एषांप्रयोगाः ग्रंथविस्तारभयान्नात्रलिखिताः ॥ परिज्ञानार्थंकेवलंनामानिलिखितानि ॥ अधुनास्वगृह्योक्तगर्भाधानादिविवाहांताः षोडशसंस्काराः मुख्याः मयाऽस्मिन्ग्रंथेपरिगृहीताः ॥ तेचगौतमेनप्राक्कथिताः ॥ ॥ तथाचस्मृत्यंतरे ॥ ॥ गर्भाधानमतश्चपुंसवनकंसीमंतजाताभिधेनामाख्यंसहनिष्क्रमेणचतथान्नप्राशनंकर्मच ॥ चूडाख्यंव्रतबंधकोप्यथचतुर्वेदव्रतानांपुरः केशांतः सविसर्गकः परिणयः स्यात्षोडशीकर्मणां ॥ १ ॥ एतेगर्भाधानादिषोडशसंस्काराः सर्वेषामेव ॥ एतेचद्विजानामेवसमंत्रकाः ॥ ॥ यथाहयाज्ञवल्क्यः ॥ ॥ब्रह्मक्षत्रियविट्शूद्रावर्णा

स्त्वाद्यास्त्रयोद्विजाः ॥ निषेका[1]दिस्मशानां[2]तास्तेषांवैमंत्रतः क्रियाइति ॥ ॥ अतएवषोडशसंस्कारानधिकृत्य तेषांप्रयोगाः समंत्रकाः प्राग्दर्शितग्रंथाभिप्रायेणात्र लिखिताः ॥ ॥ यमः ॥ शूद्रोप्येवंविधः कार्योविनामंत्रेणसंस्कृतइति ॥ ॥ कन्यकायाश्चगर्भाधानादिचौलांताः अष्टसंस्काराः अमंत्रकाः॥ विवाहस्तुपुंस्त्र्युभयसंयोगेवर्णन्यायेनयथाविधिकार्यः ॥ ॥ तथाचस्मृत्यंतरे ॥ स्त्रीणांचौलांतसंस्काराः प्रकर्तव्या अमंत्रकाः ॥ पुंस्त्रीरुभययोगस्तुविवाहःसयथाविधीति ॥ अथसंस्काराणांफलानिस्मृतिसंग्रहे ॥ निषेकाद्बैजिकंचैनोगार्भिकंचापमृज्यते ॥ क्षेत्रसंस्कारसिद्धिश्चगर्भाधानफलंस्मृतं ॥ गर्भाद्भवेच्चपुंसू[3]तेः पुंस्त्वस्यप्रतिपादनं ॥ निषे[4]कफलवत्ज्ञेयंफलंसीमंतकर्मणः ॥ गर्भांबुपानजोदोषोजाता[5]त्सर्वोपिनश्यति ॥ अपिशब्दस्यदो

---

१ निषेकः गर्भाधानं । २ स्मशानं । विवाहश्च । ३ पुंसूतिः पुंसवनं । ४ निषेको गर्भाधानं । ५ जातात् जातकर्मानुष्ठानात् ।

षशब्देनान्वयः ॥ आयुर्वर्चोंभिवृद्धिश्चसिद्धिर्व्यवहृतिस्तथा ॥ व्यवहृतिर्व्यवहारस्तस्यसिद्धिरित्यर्थः॥ नामकर्मफलंत्वेतत्समुद्दिष्टंमनीषिभिः॥ सूर्यावलोकनादायुरभिवृद्धिर्भवेत्ध्रुवा॥निष्क्रमादायुःश्रीवृद्धिरप्युद्दिष्टामनीषिभिः॥ अन्नाशनान्मातृगर्भेमलाशीचापिशुध्यति ॥ बलायुर्वर्चोंवृद्धिश्चचूडाकर्मफलंस्मृतं ॥ उपनीतेः फलंत्वेतत् द्विजतासिद्धिपूर्विका॥ वेदाधीत्यधिकारस्यसिद्धिर्ऋषिभिरीरितेति ॥ यत्रयत्रनापि श्रूयतेतत्रतत्रबैजिकगार्भिकैनोविनाशोपिफलंज्ञेयं ॥ अन्येपिकर्णवेधादयः संस्काराः शास्त्रांतरोक्तास्तत्रतत्रवक्ष्यंते ॥ इतिसंस्काराः ॥ ॥ तथाविशेषावश्यकानि कर्माणिशिष्टाचारयुतानिचात्रगृहीतानि ॥ तानियथा ॥ षष्ठीपूजनदोलारोहणतथा गोदुग्धपानंशिशोर्भूमीषुस्थितिदत्तकप्रतिग्रहःकर्णस्यवेधस्तथा ॥ श्रीवर्धापनमक्षरप्रलिखनंकौमारधीवृद्धयेकन्यारिष्टहरोघटः परिणयश्चार्कस्तथापौरुषे ॥ १ ॥ ए

षांप्रयोगाः षोडशसंस्काराणांमध्येसमयानुसारंअग्रेलिखिताः ॥ ॥ तत्रादौपरि
भाषा ॥ ॥ संकल्पेनविनाकर्मकरणेदोषउक्तोभाविष्ये ॥ संकल्पेनविनाकर्मय
त्किंचित्कुरुतेनरः ॥ फलंचाप्यल्पकंतस्यधर्मस्यार्धक्षयोभवेत् ॥ १ ॥ संकीर्त्यमा
सपक्षादीन्निमित्तानितथैवच ॥ इदंकर्मकरिष्येहमितिसंकल्पमाचरेत् ॥ २ ॥ अनु
ल्लंघ्यस्वशाखोक्तविधिंकर्मसमाचरेत् ॥ कर्मान्यथाकृतंज्ञात्वातावदेवपुनश्चरेत् ॥
॥ ३ ॥ प्रधानस्याक्रियायांतुसांगंतत्पुनराचरेत् ॥ तदंगाकरणेप्रायश्चित्तमेवनकर्म
तत् ॥ ४ ॥ वामनपुराणे ॥ ॥ सर्वमंगलमांगल्यंवरेण्यंवरदंशुभं ॥ नारायणंनम
स्कृत्यसर्वकर्माणिकारयेत् ॥ १ ॥ ॥ वशिष्ठः ॥ जपहोमोपवासेषुधौतवस्त्रध
रोभवेत् ॥ अलंकृतःशुचिर्मौनीश्रद्धावान्विजितेंद्रियः ॥ १ ॥ यदिवाग्यमलोपः
स्यात्जपादिषुकथंचन ॥ व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं ॥ २ ॥ अहतवस्त्र

लक्षणमुक्तंस्मृतिरत्नावल्यां ॥ ॥ ईषद्धौतंनवंश्वेतंसदशंयन्नधारितं ॥ अहततंद्वि
जानीयात्सर्वकर्मसुपावनं ॥ १ ॥ ईषद्धौतंअरजकादिनासकृद्धौतमितिनागान्हिके
व्याख्यातं ॥ कश्यपेनत्वन्यथोक्तं ॥ अहतंयंत्रनिर्मुक्तंवासः प्रोक्तंस्वयंभुवा ॥ शस्तं
तन्मांगलिक्येषुतावत्कालंनसर्वदेति ॥ १ ॥ (कंबलेपट्टवस्त्रेचनीलीरागोनदुष्यति
॥ २ ॥) क्षौमेवस्त्रेऽहतेपत्नीचेतिसूत्रे अनंतयाज्ञिकैरप्येवंव्याख्यातं ॥ ॥ वसिष्ठः
॥ रौद्रपित्रासुरान्मंत्रान्तथाचैवाभिचारकान् ॥ व्याहृत्यालभ्यचात्मानमपःस्पृष्ट्वा
न्यदाचरेत् ॥ १ ॥ ॥ कात्यायनः ॥ पित्र्यमंत्रानुब्रुवाणे[1]आत्मालंभोधमेक्षणे ॥
अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे ॥ १ ॥ मार्जारमूषकस्पर्शेआक्रुष्टेक्रोधसंभवे ॥
निमित्तेष्वेषुसर्वेषुकर्मकुर्वन्नपःस्पृशेत् ॥ २ ॥ ॥ स्मृत्यर्थसारे ॥ कर्त्रंगानामनुक्तौ

---

[1] आत्मालंभः हृदयालंभः ।

तुदक्षिणांगंभवेत्सदा ॥ ॥छंदोगपरिशिष्टे ॥ यत्रदिङ्नियमोनास्तिजपादिषुकथं
चन ॥ तिस्रस्तत्रादिशःप्रोक्ताऐंद्रीसौम्यापराजिता ॥ १ ॥ तत्रैव ॥ आसीनः प्रव्हऊ
र्ध्वोवानियमोयत्रनेदृशः ॥ तदासीनेनकर्तव्यंनप्रव्हेणनतिष्ठतेति ॥ १ ॥ पंचाश
द्भिर्भवेद्ब्रह्मातदर्धेनतुविष्टरः ॥ दक्षिणावर्तकोब्रह्मावामावर्तस्तुविष्टरः ॥ १ ॥ वेण्या
वावर्तुलंकृत्वावेण्यग्रेग्रंथिबंधनं ॥ अनंतगर्भकंसाग्रंकौशंद्विदलमेवच ॥ २ ॥ प्रादेश
मात्रंविज्ञेयंपवित्रंयत्रकुत्रचित ॥ पवित्रेदर्भसंख्यामाह मार्कंडेयः ॥ चतुर्भि
र्दर्भपिंजूलैर्ब्राह्मणस्यपवित्रकं ॥ एकैकंन्यूनमुद्दिष्टंवर्णेवर्णेयथाक्रमं ॥ १ ॥ सर्वेषां
वाभवेद्वाभ्यांपवित्रंग्रंथितंनवा ॥ चतुर्भिःशांतिकेकार्यंपौष्टिकेपंचभिस्तथा ॥ २ ॥
सप्तपत्राःशुभादर्भास्तिलक्षेत्रसमुद्भवाः ॥ अप्रसूताः स्मृतादर्भाः प्रसूतास्तुकुशाः
स्मृताः ॥ ३ ॥ समूलाः कुतपाः प्रोक्ताश्छिन्नाग्रास्तृणसंज्ञिताः ॥ दर्भाः कृष्णाजि

नंमंत्राब्राह्मणाहविरग्नयः ॥ ४ ॥ अयातयामान्येतानिनियोज्यानिपुनः पुनः ॥ चि
तौदर्भाःपथिदर्भायेदर्भायज्ञभूमिषु ॥ ५ ॥ स्तरणासनापिंडेषुषट्कुशान्परिवर्जयेत्
॥ रत्नावल्यां ॥ द्वयोस्तुपर्वणोर्मध्येपवित्रंधारयेद्बुधः ॥ अनामिकाग्रपर्वेतुनिस
र्गेतुपवित्रकं ॥ १ ॥ नोच्छिष्टंतत्पवित्रंस्याद्भुक्तोच्छिष्टंविवर्जयेत् ॥ द्व्यंगुलंमूलवल
यंग्रंथिरेकांगुलोभवेत् ॥ २ ॥ चतुरंगुलमग्रंस्यात्पवित्रंस्यात्प्रमाणतः ॥ नागान्हि
के ॥ ॥ अन्यान्यपिपवित्राणिकुशदूर्वामयानिच ॥ हेमात्मकपवित्रस्यकलांनार्ह
तिषोडशीं ॥ १ ॥ माषाणांषोडशादूर्ध्वंकुर्याद्धेमपवित्रकं ॥ तेभ्यःस्वल्पतरंन्यूनंन
कुर्वीतकदाचन ॥ २ ॥] हीनकर्माणिचोच्छिष्टेकुशधृतपवित्रकं ॥ निर्माल्यंतेषुसंप्रा
प्तिर्नहेम्नश्चपवित्रके ॥ ३ ॥ पवित्राभावेसुमंतुः ॥ ॥ समूलाग्रौविगर्भौतुकुशौद्वौद
क्षिणेकरे ॥ सव्येचैवतथात्रीन्वैबिभृयात्सर्वकर्मसु ॥ १ ॥ ॥ बौधायनः ॥ ॥ हस्त

योरुभयोर्द्वौद्वावासनोपितथैवच ॥ ॥ तथा ॥ ॥ सदोपवीतिनाभाव्यंसदाबद्धशिखेन च॥विशिखोव्युपवीतश्चयत्करोतिनतत्कृतं॥१॥अनेनहिदधिखदिरादिवत्‌उपवीतित्वस्यबद्धशिखत्वस्यचक्रतुपुरुषोभयार्थत्वमवगम्यते ॥ ॥ हेमाद्रौभरद्वाजः ॥ ॥ दक्षिणंबाहुमुद्धृत्यवामस्कंधेनिवेशितं ॥ यज्ञोपवीतमित्युक्तंदेवकार्येषुशस्यते ॥ १ ॥ कंठावलंबितंचैवब्रह्मसूत्रंयदाभवेत् ॥ तन्निवीतमितिख्यातंशस्तंकर्मणिमानुषे ॥ २ ॥ उत्क्षिप्तेवामबाहौतुदक्षिणस्कंधमाश्रितं ॥ प्राचीनावीतमित्युक्तंतत्पित्र्येष्वेवकर्मसु इति ॥ ३ ॥ विष्णुधर्मोत्तरे ॥ तिलकंकुंकुमेनैवसदामंगलकर्मणि ॥ कारयित्वासुमतिमान्नश्वेतचंदनंमृदा ॥ १ ॥ ॥ मंत्रेणोंकारपूतेनस्वाहांतेनविचक्षणः ॥ स्वाहावसानेजुहुयात्ध्यायन्वैमंत्रदेवतां ॥१॥ मंत्रांतेयावन्हिजायासातुमंत्रस्वरूपिणी॥ तदंतेन्यांप्रयुंजीतसाकर्मांगतयास्मृता ॥ २ ॥ आदौद्रव्यपरित्यागःपश्चाद्धोमोवि

धीयते ॥इतिदेवयाज्ञिकः ॥ ॥ ब्राह्मे ॥ ॥ शमीपलाशन्यग्रोधप्लक्षवैकंकतोद्भवा
॥ अश्वत्थोदुंबरौबिल्वश्चंदनःसरलस्तथा ॥ १ ॥ शालश्चदेवदारुश्चखादिरश्चेतिया
ज्ञिकाः ॥ ॥ कर्मप्रदीपे ॥ ॥ नांगुष्ठादधिकाकार्यासमित्स्थूलतराक्कचित् ॥
नवियुक्तात्वचाचैवनसकीटानस्फाटिता ॥ प्रादेशमात्रान्नाधिकानतथास्याद्विशा
खिका ॥ नसपर्णासमित्कार्याहोमकर्मसुजानता ॥ २ ॥ प्रागग्राःसमिधोग्राह्या
अखर्वानेत्रफाटिताः ॥ काम्येषुवश्यकर्मादौविपरीताजिघांसतः ॥ ३ ॥ विशीर्णा
विफला–ह्रस्वावक्राबहुशिखाःकृशाः ॥ दीर्घाः स्थूलाघुणैर्जुष्टाःकर्मसिद्धिविनाश
काः ॥ ४ ॥ होतव्यामधुसर्पिभ्यांदध्नाक्षीरेणसंयुताः॥ प्रादेशमात्राःसमिधअशाखाअ
पलाशिनीः ॥ ५ ॥ ॥शंखः॥ ॥ समित्पुष्पकुशादीनिब्राह्मणः स्वयमाहरेत् ॥

---

१ नेत्रंजटामूलंचकथितं ।

शूद्रानीतैः क्रयक्रीतैः कर्मकुर्वन्व्रजत्यधः ॥ १ ॥ ॥ वायुपुराणे ॥ ॥ कंडनंपेष
णंचैवतथैवोल्लेखनंतथा ॥ सकृद्देवपितॄणांस्याद्देवानांतत्त्रिरुच्यते ॥ ॥ कात्याय
नः॥योनर्चिषिजुहोत्यग्नौऽव्यंगारिणिचमानवः॥ मंदाग्निरामयावीचदरिद्रश्चैवजायते
तस्मात्सामिद्धेहोतव्यंनासमिद्धेकथंचन ॥ नवस्त्रवायुनाकुर्यात्पाणिशूर्पस्त्रुवादिभिः
॥ २ ॥ नकुर्यादग्निधमनंनकुर्याद्व्यजनादिना ॥मुखेनैवधमेदग्निंमुखदेशाद्व्यजायत
॥ ३ ॥ अंधोबुधःसधूमेतुजुहुयाद्योहुताशने ॥ यजमानोभवेदंधःसपुत्रइतिचश्रुतिः
॥ मात्स्ये ॥ ॥ होमादिग्रहपूजायांशतमष्टोत्तरंभवेत् ॥ अष्टाविंशतिरष्टौवा
यथाशक्तिविधीयते ॥ छंदोगपरिशिष्टे ॥ यन्नाम्नातंस्वशाखायांपारक्यमविरोधि
यत् ॥ विद्वद्भिस्तदनुष्ठेयंअग्निहोत्रादिकर्मवत् ॥ १ बव्हल्पंवास्वगृह्योक्तंयस्यकर्म
प्रकीर्तितं ॥ ततस्यतावशास्त्रार्थेकृतेसर्वंकृतंभवेत् ॥ २ ॥ प्रवृत्तमन्यथाकुर्याद्यदिमो

हात्कथंचन ॥ यतस्तदन्यथांभूतंततएवसमापयेत् ॥ ॥ समाप्तेयदिजानीयान्मयैतदन्यथाकृतं ॥ तावदेवपुनःकुर्यान्नावृत्तिःसर्वकर्मणः॥प्रधानस्याक्रियायत्रसांगंतत्क्रियतेपुनः ॥ तदंगस्याक्रियायांतुनावृत्तिर्न्नैचतत्क्रिया ॥ ॥ ब्राह्मे ॥ ॥ यथोक्तवस्त्वसंपत्तौग्राह्यंतदनुकारियत् ॥ यवानामिवगोधूमाव्रीहीणामिवशालयः ॥ १ ॥आज्यंद्रव्यं[2]मनादेशेजुहोतिषुविधीयते ॥ मंत्रस्यदेवतायाश्चप्रजापतिरितिस्थितिः ॥ २ ॥समस्तव्याहृतयइतिमदनः ॥ प्रणवादिनमोंतंचचतुर्थ्यंतंचसत्तम ॥ देवतायाःस्वकंनाममूलमंत्रउदाहृतः ॥ ॥ विष्णुधर्मोत्तरे ॥ दध्यलाभेपयःकार्यंमध्वलाभेतथागुडः ॥ घृतप्रतिनिधिंकुर्यात्पयोवादधिवानृप ॥ १ ॥ ॥ बौधायनः ॥ ॥ आज्यहोमेषुसर्वेषुगव्यमेवघृतंभवेत् ॥ तदभावेमाहिष्यास्तुआजमाविकमेवच ॥ तदभावेतुतैलंस्यात्तदभावेतुजा[3]

---

१ अन्यथाभूतंविपर्यस्तं २ अनादेशेअविधानेप्राजापत्योमंत्रः ३ तारळे किंवा खुरासनीचें तेल।

तिलं॥तदभावेतुकौसुंभंतदभावेतुसार्षपं॥ २॥ ॥याज्ञवल्क्यः॥ ॥कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच ॥ प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥ १ ॥ पाण्याहुतिर्द्वादशपर्वपूरिकारसादिनाचेत्स्रुचिपर्वपूरिका ॥ दैवेनतीर्थेनचहूयतेहविः स्वंगारिणिस्वर्चिषितच्चपावके॥आज्यपयआदिद्रव्याणिस्रुवेण॥समिधोमूलतोद्व्यंगुलंविहायमध्यमानामिकांगुष्ठैर्जुहुयात्॥चरुंग्राससमंपाणिनैवजुहुयात् ॥आज्यंस्रुवेणैवजुहुयात्॥तदभावेयज्ञियवृक्षपर्णेन॥ द्रव्यभेदेनाहुतिमानंसिद्धांतशेखरे ॥ कर्षप्रमाणमाज्यंस्यान्मधुक्षीरंचतत्समं ॥ तंडुलानांशुक्तिमात्रंपायसंप्रसृतेःसमं ॥ ४ ॥ कर्षमात्राणिभक्ष्याणिलाजामुष्टिमितामलाः ॥ अन्नंग्राससमंग्राह्यंशाकंग्रासार्धमात्रकं ॥ ५॥ मूलानांतुत्रिभागःस्यात्कंदानामष्टमांशकः ॥ इक्षोःपर्वप्रमाणंस्यादंगुलद्वितयंलता ॥

---

[१] देशिनीतर्जनी।

॥ ६ ॥ प्रादेशमात्राःसमिधोव्रीहीणामंजलेःसमं ॥ तिलसक्तुकणादीनांमृगीमुद्राप्रमाणतः ॥ ७ ॥ पत्रपुष्पफलादीनांसमानाहुतिरुच्यते ॥ चंदनश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः॥हरिमंथ[1]समाःप्रोक्तागुग्गुलोबदरीसमः ॥ आहुतीनामिदंमानंकथितंवेदवादिभिः ॥ तिसृभिर्दूर्वाभिरेकाहुतिः ॥ कुशेषुत्रिपत्रेणैकेति ॥ मृगीमुद्रालक्षणं ॥ मीलितानामिकांगुष्ठमध्यमांगुलीयोजयेत् ॥ शेषांगुलीउच्छ्रितेतिमृगीमुद्रेयमीरिता ॥ याज्ञवल्क्यः ॥ ॥ आर्षंछंदश्चदैवत्यंविनियोगस्तथैवच ॥ वेदितव्यंप्रयत्नेनब्राह्मणेनविशेषतः॥अविदित्वातुयःकुर्याद्याजनाध्ययनंजपं ॥होममंतर्जलादीनितस्यचाल्पफलंभवेत् ॥ अत्रापवादः कृष्णभट्टीये ॥ नचस्मरेदृषिंछंदःश्राद्धेवैतानिकेमखे ॥ अन्यत्र॥अग्निहोत्रेवैश्वदेवे विवाहादिविधौतथा॥होमकालेनदृश्यंतेप्रायश्छंदर्षिदेव

---

[1] चणकः।

ताः ॥ शांतिकादिषुकार्येषुमंत्रपाठजपादिषु ॥ होमेनैवप्रकर्तव्याःकदाचिदृषिदेवताः ॥ ॥ स्मृत्यंतरे ॥ ॥ कनकं[1]कुलिशंनीलंपद्मरागंचमौक्तिकं ॥ एतानिपंचरत्नानिरत्नशास्त्रविदोविदुः ॥ १ ॥ विष्णुधर्मोत्तरे ॥ ॥ वज्रमाणिक्यवैडूर्यपुष्परागेंद्रनीलकं ॥ पंचरत्नमितिख्यातंनारदेनमहर्षिणा ॥ १ ॥ ॥ मदनरत्नेस्कांदे ॥ ॥ हरिद्राकुंकुमंचैवसिंदूरंकज्जलंतथा ॥ कूर्पासं[2]कंचतांबूलंमांगल्याभरणंशुभं ॥ पंचगव्यंस्मृतिदर्पणे ॥ गायत्र्यादायगोमूत्रंगंधद्वारेतिगोमयं ॥ आप्यायस्वेतिचक्षीरंदधिक्राव्णेतिवैदधि ॥ १ ॥ तेजोसिशुक्रमित्याज्यंदेवस्यत्वाकुशोदकं ॥ एभिस्तुपंचभिर्युक्तंपंचगव्यमितिस्मृतं ॥ तत्रताम्रपात्रेपलाशपत्रपुटेवाताम्रायागोर्मूत्रंअष्टमाषप्रमाणं ॥ श्वेतगोःशकृत्षोडशमाषं ॥ पीतगोःक्षीरंद्वादशमाषं ॥ ॥ कृ

---

[1] हीरकः [2] कंचुकी ।

षणगोर्घृतंअष्टमाषं ॥ कुशोदकंचतुर्माषं ॥ अत्र माषःपंचगुंजात्मकइतिधर्मसिंधौ ॥ मदनरत्नेकात्यायनः ॥ ॥ आज्यंक्षीरंमधुतथामधुरत्रयमुच्यते ॥ पयोदधिघृतंचैवमधुशर्करयायुतं ॥ पंचामृतमिदंप्रोक्तंसर्वदेवप्रसादकं ॥ ॥ ब्राह्मे ॥ ॥ अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः ॥ पंचभंगाइतिप्रोक्ताःसर्वकर्मसुशोभनाः ॥ १ ॥ अश्वत्थोदुंबरब्राह्मइतिपाठभेदः ॥ तथाच ॥ प्लक्षः ॥ ॥ यक्षकर्दमउक्तोगारुडे ॥ कर्पूरमगरुश्चैवकस्तूरीचंदनंतथा ॥ कंकोलंचभवेदेभिःपंचभिर्यक्षकर्द्दमः ॥ तथा ॥ कर्पूरंचंदनंदर्प[2]कुंकुमंचसमांशकं ॥ सर्वगंधमितिप्रोक्तंसमस्तसुरवल्लभं ॥ १ ॥ कुंकुमं केशरं ॥ ॥ कुंष्ठमांसीहरिद्रेद्वेमुरांशैलेयचंदनं ॥ वचांचंपकमुस्तांचसवौंषध्योदश

---

१ पिंपरी पारोसापिंपळ इतिप्रसिद्धः २ दर्पंकस्तुरी ३ कुष्ठंकोष्ठ ४ मांसीजटामांसी ५ हरिद्रेद्वेआंबीहळद व हळद ६ मुरामोरवेळ अथवावाळा ७ शैलेयंशिलाजित ८चंदनप्रसिद्ध ९ वचावेखंड १० मुस्ताभद्रमोथ

स्मृताः ॥ १ ॥ भविष्यपुराणे ॥ ॥ आपःक्षीरंकुशाग्राणिदध्यक्षततिलास्तथा ॥ यवाःसिद्धार्थ[1]काश्चैवअर्घो[2]ष्टांगःप्रकीर्तितः ॥ १ ॥ तत्रैव ॥ ॥ सुवर्णरजतंताम्रमारकूटं[3]तथैवच ॥ लोहंत्रपुं[4]तथासीसंधातवःसप्तकीर्तिताः ॥ १ ॥ पंचरात्रे ॥ रजांसिपंचवर्णानिमंडलार्थंतुकारयेत् ॥ शालितंडुलचूर्णेनशुक्लंवायवसंभवं ॥ रक्तंकुसुंभसिंदूरगैरिका[5]दिसमुद्भवं ॥ हरितालोद्भवंपीतंरजनीसंभवंतुवा ॥ कृष्णंदग्धयवैश्चापिहरितंपीतमिश्रितं ॥ दशांगधूपउक्तोमदनरत्ने ॥ षड्भागकुष्ठंद्विगुणोगुडश्चलाक्षा[6]त्रयंपंचनख[7]स्यभागः ॥ ॥ हरीतकीसर्ज[8]रसंसमांशंभागैकमेकंत्रिलवंशिलाजं ॥ १ ॥ घनस्य[9]चत्वारिपुर[10]स्यचैकोधूपोदशांगःकथितोमुनींद्रैः ॥ विष्णुधर्मोत्तरे ॥ हेमराजतताम्राश्चमृन्मयालक्षणान्विताः ॥ यात्रोद्वाहप्रतिष्ठासुकुंभाःस्युरभिषेचने ॥

हलदी

---

१ सफेतशीरीस २ अष्टांग ३ सोनपितळ ४ कथिल ५ सोनगेरू ६ लाख ७ नखला ८ राळ ९ नागरमोथ १० गुग्गुळ ।

॥ १ ॥ पंचाशांगुलवैपुल्यंउत्सेधःषोडशांगुलः ॥ द्वादशांगुलमूलंस्यान्मुखमष्टांगुलंभवेत् ॥ २ ॥ पंचचआशाश्चपंचाशाःआशादश ॥ पंचाधिकशतमंगुलानिवैपुल्यमितिकेचित् ॥ पंचदशतावान्वैपुल्यंव्यासइतितुयुक्तं ॥ धातुजंमृन्मयंवापिकलशंयत्प्रतिष्ठितं ॥ तद्वत्प्रादेशदीर्घंचचतुरंगुलमुच्छ्रितं ॥ सिततंडुलपूर्णेनपात्रेणापिहिताननमिति ॥ ॥ षट्त्रिंशन्मते ॥ ॥ यं[1]वगोधूमधान्यानितिलाःकंगु[2]श्चमुद्गकाः ॥ श्या[3]मकाश्चणकाश्चैवसप्तधान्यमुदाहृतं ॥ १ ॥ अश्वस्थानाद्गजस्थानाद्व[4]ल्मीकात्संग[5]माद्ध्रदात् ॥ राजद्वाराच्चगोष्ठाच्चमृदमानीयनिक्षिपेत् ॥ द्रव्यमानमाह याज्ञवल्क्यः ॥ ॥ जालसूर्यमरीचिस्थंत्रसरेणुरजःस्मृतं ॥ तेष्टौलिक्षास्तुतास्तिस्रोराजसर्षप उच्यते ॥ १ ॥ गौरस्तुतेत्रयःषट्तेयवोमध्यश्चतेत्रयः ॥ कृष्णालपंचतेमाषस्तेसुवर्णस्तु

---

[1] प्रसिद्धः [2] राळे [3] सांवे [4] वारुळ [5] महानदीसागरसंगमात् ।

षोडश ॥ २ ॥ पलंसुवर्णाश्चत्वारःपंचवापिप्रकीर्तिताः ॥ द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते ॥ ३ ॥ शतमानंतुदशभिर्धरणैःपलमेवतु ॥ निष्कंसुवर्णाश्चत्वारइति ॥ ॥ ताम्रस्योन्मानं ॥ पलचतुर्थांशेनकर्षेणोन्मितःकार्षिकस्ताम्रसंबंधीपणोभवति ॥ कर्षसंज्ञानिघंटातेषोडशाक्षःकर्षोस्त्रीपलंकर्षचतुष्टयमितितेषोडशमाषाअक्षः सएवकर्षइत्यर्थः ॥ कार्षापणसंज्ञश्चनारदेनोक्तः ॥ कार्षापणोदक्षिणस्यांदिशिरौप्यःप्रवर्तते ॥ पणैर्निबद्धःपूर्वस्यांषोडशैवपणाःसतु ॥ ॥ लीलावत्यां ॥ ॥ वराटकानांदशकद्वयंयत्साकाकिणीताश्चपणश्चतस्रः॥ तेषोडशद्रम्मइहावगम्योद्रम्मैस्तथाषोडशभिश्चनिष्कः॥ १ ॥अशीतिगुंजात्मकःकर्षः ॥ चत्वारःकर्षानिष्कामितिधर्मसिंधौ ॥ ॥ धान्यमानंभविष्ये ॥ पलद्वयंतुप्रसृतंद्विगुणंकुडवंमतं ॥ चतुर्भिःकुडवैःप्रस्थःप्रस्थाश्चत्वारआढकः ॥ आढकैस्तैश्चतुर्भिश्चद्रोणस्तुकथितोबुधैः ॥ कुंभोद्रोणद्वयंशूर्पःखारीद्रोणा

स्तुषोडश ॥ ॥ गोपथे ॥ ॥ पंचकृष्णलकोमाषस्तैश्चतुःषष्टिभिःपलं ॥ पलैर्द्वादशभिःप्रस्थोमागधेषुप्रकीर्तितः ॥ १ ॥ आढकस्तैश्चतुर्भिश्चद्रोणःस्याच्चतुराढकः ॥ ॥ विष्णुधर्मोत्तरे ॥ ॥ पलंचकुडवःप्रस्थआढकोद्रोणएवच ॥ धान्यमानेषुबोद्धव्याः क्रमशोमीचतुर्गुणाः ॥ १ ॥ द्रोणैःषोडशभिःखारीविंशत्याकुंभउच्यते ॥ विंशतिरित्यंत्रद्रोणैरितिसंबध्यते ॥ ॥ तथाच ॥ ॥ कुंभोद्रोणइतिपक्षाद्विंशतिद्रोणमितःकुंभइतिपक्षांतरं ॥ पलसहस्रमितःकुंभइतिपक्षांतरं ॥ ॥ वाराहे ॥ ॥ पलद्वयंतुप्रसृतंमुष्टिरेकपलंस्मृतं ॥ अष्टमुष्टिभवेत्किंचित्किंचिदष्टौतुपुष्कलं ॥ १ ॥ पुष्कलानिचचत्वारिआढकःपरिकीर्तितः ॥ चतुराढकोभवेत्द्रोणइत्येतन्मानलक्षणं॥एतत्पक्षाणांशक्तिकालाद्यपेक्षयाव्यवस्था॥ ॥स्मार्तकर्मक्रमउक्तोधर्मसिंधौ ॥ ॥ संकल्पःस्वस्तिवाक्विप्रवरणंभूतनिःसृतिः ॥ पंचगव्यैर्भू

मिशुद्धिर्मुख्यदैवतपूजनं ॥ अग्निप्रतिष्ठासूर्यादिग्रहस्थापनपूजनं ॥ देवतान्वाहितिः पात्रासादनंहविर्षाकृतिः ॥ यथाक्रमंत्यागहोमावितिपूर्वांगकःक्रमः ॥ पूजास्विष्टं नत्राहुत्योबलिःपूर्णाहुतिस्तथा पूर्णपात्रविमोकाद्यग्न्यर्चनांतेऽभिषेचनं ॥ मानस्तोकेतिभूतिश्चदेवपूजाविसर्जने ॥ श्रेयोग्रहोदक्षिणादिदानंकर्मेश्वरार्पणं ॥ क्रमोयमुत्तरांगानांप्रायः स्मार्तेष्वितिस्थितिः ॥ ॥ दशप्रणवाउक्ताः शांतिकमलाकरे ॥ आदौप्रणवमुच्चार्य व्याहृतीःप्रणवान्विताः ॥ मंत्रादौप्रणवःकार्योमंत्रांतेप्रणवःपुनः ॥ ततोव्याहृतिसंयुक्तस्त्वंतेचप्रणवःसदा ॥ ॥ अथवा ॥ आदौप्रणवमुच्चार्यसप्तव्याहृतयस्ततः॥ मंत्रादौप्रणवःकार्योमंत्रांतेप्रणवःपुनः॥अंतर्विसर्गकंकुर्याच्छ्रौतेस्मार्तेचकर्मणि ॥ मंत्रादौप्रणवस्तद्वत्देवस्वामीयभाषणात् ॥ कर्मविशेषेअग्निनामान्युक्तानि धर्मसिंधौ ॥ ॥ अग्निस्तुमारुतोनामगर्भाधानेविधीयते॥पावमानःपुंसवनेसीमंतेमंग

लाभिधः ॥ प्रबलोजातसंस्कारेपार्थिवोनामकर्मणि ॥ अन्नाशनेशुचिःप्रोक्तःसभ्यःस्याच्चौलकर्मणि ॥ व्रतादेशेसमुद्भवोगोदानादौसूर्यः विवाहेयोजकः ॥ ॥ आवसथ्येद्विजोनामप्रायश्चित्तेविटः ॥ पाकयज्ञेषुपावकः ॥ पैतृकेकव्यवाहनः ॥ दैव्येहव्यवाहनः ॥ शांतिकेवरदः ॥ पौष्टिकेबलवर्धनः ॥ मृतदाहेक्रव्यादः ॥ पूर्णाहुत्यांमृडः ॥ अभिचारेक्रोधोग्निः ॥ वश्यार्थेपावकः ॥ वनदाहेदूषकः ॥ कुक्षौजठरः ॥ वैश्वदेवेरुक्मः ॥ लक्षहोमेवन्हिः ॥ कोटिहोमेहुताशनः ॥ समुद्रेवाडवः ॥ अग्निहोत्रेगार्हपत्योदक्षिणाग्निराहवनीयश्चेतित्रयः ॥ ज्ञात्वैवमग्निनामानिसर्वकर्माणिकारयेत् ॥ ॥ कर्मदेवतानामान्याहबौधायनः ॥ पुण्याहंवाचयिष्यन्नामगृण्हीयादसौप्रीयतामितिविवाहस्याग्निरौपासनस्याग्निसूर्यप्रजापतयः ॥ स्थालीपाकस्याग्निगर्भोगर्भाधानस्यचब्रह्मा ॥पुंसवनस्यप्रजापतिः॥असावित्यस्यस्थानेप्रजापतिर्दैवतेत्यर्थः

॥तथाचसंग्रहे॥ ॥स्वस्तिवाचनमंत्रेतुकर्मेकर्मेयथातथं॥पृथक्पृथक्प्रकुर्वीतदेवतानांसमर्पणं ॥ औपासनाग्निःसूर्यश्चविवाहेचप्रजापतिः ॥ स्थालीपाकेग्निगर्भश्चआधानेब्रह्मणस्तथा ॥ प्रजापतिःपुंसवनेधातासीमंतकेप्यथ ॥ सविताजातकर्मेषुनामकर्मेप्रजापतिः ॥ निष्क्रमेन्नप्राशनेचसवितापरिकीर्तितः ॥ चौलेतथैवकेशांतेप्रजापतिरितिस्मृतः॥ इंद्रस्तथोपनयनेव्रततुर्येअपापकः ॥ श्रद्धामेधेविसर्गेचसुश्रवाःपरिकीर्तितः॥ उपाकर्मेतुसविताविवाहेषुप्रजापतिरिति॥सोमयागगर्भाधानसीमंतोन्नयनाधानादिकर्मांगभूतेवृद्धिश्राद्धेक्रतुदक्षसंज्ञकाःविश्वेदेवाअन्यत्रसत्यवसुसंज्ञकाः ॥ ॥आपस्तंबः ॥ ॥ त्रिमात्रस्तुप्रयोक्तव्यःकर्मारंभेषुसर्वशः ॥ त्रिमात्रःप्रणवः ॥ ॥ मार्कंडेयः ॥ ॥ इक्षुरापःपयोमूलंताबूलंफलमौषधं॥ भक्षयित्वापिकर्तव्याःस्नानदानादिकाःक्रियाः ॥ स्नानमप्यधिकारितावच्छेदकं ॥ तदुक्तंहेमाद्रौप्रचेतसा ॥ स्नातो

धिकारीभवतिदैवेपित्र्येचकर्माणि ॥ पवित्राङ्गस्तथाजाप्येदानेचविधिचोदिते ॥
आग्नेये ॥ स्नानानामपिसर्वेषांवारुणेनचमानवः ॥ कर्तुमर्हतिकर्माणिविधिवत्सर्वदा
द्विजः ॥ संध्यावंदनंविनाकर्मनकर्तव्यमित्युक्तंतत्रैव ॥ संध्याहीनोऽशुचिर्नित्य
मनर्हःसर्वकर्मसु ॥ यदन्यत्कुरुतेकर्मनतस्यफलमश्नुते ॥ ॥ वाराहे ॥ ॥ सुस्ना
तःसम्यगाचांतःकृतसंध्यादिकक्रियः ॥ कामक्रोधविहीनश्चपाखंडस्पर्शवर्जितः ॥
जितेंद्रियःसत्यवादीसर्वकर्मसुशस्यते ॥ ॥ कर्मांगस्नानेविशेषोमार्कंडेयपुराणे ॥
शिरःस्नानंप्रकुर्वीतदैवंपित्र्यमथापिवा ॥ प्राङ्मुखोदङ्मुखोवापिश्मश्रुकर्मचकार
येत् ॥ तत्रादौश्मश्रुकर्मततःशिरःस्नानं॥अन्यथाऽशुचित्वापत्त्यापुनःस्नानापत्तेः॥
तच्चस्नानंमंगलकृत्यादौतिलामलकादिनोद्वर्त्याभ्यंगस्नानपूर्वकंकार्यं ॥ तदुक्तंपरशु
रामेण ॥ ततःस्वगृहमागत्यमंगलंस्नानमाचरेत् ॥ सर्वौषधीगंधचूर्णैर्युक्तैःकृष्णाति

लामलैः ॥ उद्वर्त्यांगानितैलेनचंपकादिसुगंधिना ॥ तैलेनमंगलस्नानंकुर्वीतब्राह्मणैःसहेति ॥ ॥ आपस्तंबः ॥ ॥ आर्द्रवासास्तुयःकुर्याज्जपहोमपरिग्रहान् ॥ सर्वंतद्राक्षसंविंद्याद्बहिर्जानुचयत्कृतं ॥ यज्जलेशुष्कवस्त्रेणस्थलेचैवार्द्रवाससा ॥ जपहोमस्तथादानंतत्सर्वंनिष्फलंभवेत् ॥ सप्तवाताहतमपिशुष्कं ॥ नस्यूतेननदग्धेनपारक्येणविशेषतः ॥ मूषकोत्कीर्णजीर्णैर्नकर्मकुर्याद्विचक्षणइतिभारतात् ॥ ॥ बौधायनः ॥ ॥ काषायवासाःकुरुतेजपहोमप्रतिग्रहान् ॥ नतद्देवागमंकर्महव्यकव्येष्वथोहविरिति ॥ भवेदितिशेषः ॥ ॥ आचारादर्शे ॥ ॥ नरक्तमुल्बणंवासोननीलंचप्रशस्यते ॥ मलाक्तंचसदाहीनंवर्जयेदंबरंबुधइति॥व्याघ्रपादः॥ ॥काषायंकृष्णवस्त्रंचमलिनंकेशदूषितं॥जीर्णंचसंधितंवापिपारक्यंमैथुनेधृतं॥ छिन्नाग्रमुपवस्त्रंचकुत्सितंधर्मतोविदुरिति॥अयंचानिषेधःसतिसंभवेबोध्यः॥ ॥व्रतहेमाद्रौ॥ ॥प्रागग्रमुदगग्रं

वाधौतंवासःप्रसारयेत् ॥ पश्चिमाग्रंदक्षिणाग्रंपुनःप्रक्षालनाच्छुचीतिमार्कंडेयः ॥ ॥ अन्यदेवभवेद्वासःशयनीयेनराधिप ॥ अन्यदेवचदेवानामर्चायामन्यदेवहि ॥ ॥ अन्यच्चलोकयात्रायामन्यदीश्वरदर्शने॥ ॥योगीयाज्ञवल्क्यः॥ ॥अभावेधौतवस्त्रस्यशाणक्षौमादिकानिच ॥ कुतपंयोगपट्टंवाविवासायेनवैभवेत् ॥ कुतपोनेपालकंबलः ॥ ॥ भविष्ये ॥ ॥ नीलीरक्तेनवस्त्रेणयत्कर्मकुरुतेद्विजः ॥ स्नानंदानंतपोहोमःस्वाध्यायःपितृतर्पणं ॥ वृथातस्यमहायज्ञानीलीरक्तस्यधारणात् ॥ व्याघ्रपादः ॥ नैकवस्त्रोद्विजःकुर्याद्भोजनंचसुरार्चनं ॥ तत्सर्वमसुरेंद्राणांब्रह्माभागमकल्पयत्॥ ॥ विष्णुपुराणे ॥ ॥ होमदेवार्चनाद्यासुक्रियास्वाचमनेतथा ॥ नैकवस्त्रःप्रवर्तेतद्विजवाचनिकेतथा ॥ द्विजवाचनेस्वस्तिवाचने ॥ ॥ शातातपः ॥ ॥ सव्यादंसात्परिभ्रष्टंकटिदेशेधृतांबरं ॥ एकवस्त्रंतुतद्विद्याद्दैवेपित्र्येविवर्जयेत् ॥ ॥ संग्रहे ॥ ॥ वामेपृष्ठे

तथानाभौकच्छत्रयमुदाहृतं ॥ त्रिभिःकच्छैःपरिज्ञेयोविप्रोयःसशुचिर्भवेत् ॥ आदौकच्छस्ततोनीवीनाभिमध्येचवाससी ॥ नीवीदक्षिणतःस्थाप्याएतत्त्रिकच्छलक्षणं ॥ शयनंचार्द्रपादेनशुष्कपादेनभोजनं ॥ नोत्तरीयमधःकुर्याद्रात्रिवासस्तथादिने ॥ ॥ कटिवेष्ट्यंतुयद्वस्त्रंपुरीषोयेनवाकृतः ॥ मूत्रमैथुनकृद्वस्त्रंधर्मकार्येविवर्जयेत् ॥ दानहेमाद्रौगौतमः ॥ ॥ स्नानेदानेजपेहोमेदैवेपित्र्येचकर्मणि ॥ बध्नीयान्नासुरींकक्षांशेषकालेयथारुचि ॥ ॥ तत्रैवयाज्ञवल्क्यः ॥ ॥ परिधानाद्बहिःकक्षानिबद्धाचासुरीमता ॥ धर्मकर्मणिविद्वद्भिर्वर्जनीयाप्रयत्नतः ॥ ॥ विश्वामित्रः ॥ ॥ यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि ॥ तृतीयमुत्तरीयार्थेवस्त्राभावेतदिष्यते ॥ उत्तरीयवस्त्राभावे॥पारस्करगृह्ये ॥ एकंचेत्पूर्वस्योत्तरवर्गेणप्रच्छादयीतेति ॥ ॥ शिखाबंधश्चोक्तश्चतुर्विंशतिमते ॥ ॥ मध्येतुबह्वृचाश्चैवनिबध्नीयुःशिखांततः ॥ मध्यंदिनाश्चये

विप्राःपार्श्वेदक्षिणतः क्रमात् ॥ वामपार्श्वेतुबध्नीयुर्यौविप्राः सामगायनाः ॥ ॥ संग्रहे ॥ ॥ खल्वाटत्वादिदोषेणविशिखश्चेन्नरोभवेत् ॥ कौशींतदाधारयीतब्रह्मग्रंथियुतांशिखां ॥ १ ॥ ॥ मार्कंडेयः ॥ ॥ कुशपाणिःसदातिष्ठेद्ब्राह्मणोदंभवर्जितः ॥ सनित्यंहंतिपापानितूलराशिमिवानलः ॥ ॥ याज्ञवल्क्यः ॥ ॥ पेषणादिकयंत्रेषुशब्दोयावत्प्रवर्तते ॥ पतितांत्यजचांडालादीनांयावच्चशब्दकः ॥ तावत्कर्मनकर्तव्यंतथासंध्याद्वयेपिच ॥ उपांशुलक्षणं ॥ ॥ बृहद्याज्ञवल्क्यः ॥ विनाशब्दंजपोयस्तुचलज्जिह्वाद्विजच्छदः ॥ उपांशुतंजपंप्राहुर्मनसामानसंबुधाः ॥ स्पष्टतरवर्णोच्चारस्तु ॥ वर्णःस्पष्टतरोच्चार्योनासाश्वासावधीतिवा ॥ सुखश्वासावधीशृण्वन्नभिषेकार्चनेषुचेति ॥ आचारमयूखे ॥ ॥ कर्मप्रदीपे ॥ ॥ आवाहनासनंपाद्यमर्घमाचमनीयकं ॥ स्नानंवस्त्रोपवीतंचगंधमाल्यान्यनुक्रमात् ॥ १ ॥ धूपंदीपंचनैवेद्यंतांबूलं

चप्रदक्षिणा ॥ पुष्पांजलिरितिप्रोक्ताउपचारास्तुषोडश ॥ २ ॥ फलेनसुफलावाप्तिः सांगतादक्षिणार्पणं ॥ ॥ पंचोपचारास्तु ॥ ॥ गंधपुष्पेधूपदीपौनैवेद्यइतिपंचकं ॥ पंचोपचारमाख्यातंपूजनेतत्वविद्बुधैः ॥ १ ॥ ॥ राजोपचारास्तु ॥ ॥ ततःपंचामृताभ्यंगमंगस्योद्वर्त्तनंतथा ॥ मधुपर्कं परिमलद्रव्याणिविविधानिच ॥ १ ॥ पादुकांदोलनादर्शंव्यजनंछत्रचामरे ॥ वाद्यार्तिक्यंनृत्यगीतशय्याराजोपचारकाः ॥ २ ॥ ॥ अथधनिकादिप्रदेयदक्षिणार्थंद्रव्येयत्ताव्यवस्थामाह ॥ तत्रादौधनिकादिलक्षणं ॥ ॥ वाराहे ॥ ॥ वर्धयित्वाधनंयस्तुतस्माद्ग्रासमपीहयः ॥ नखादेत्संग्रहपरोधनिकःसउदाहृतः ॥ १ ॥ पोषणीयकुटुंबस्यनिर्वाहोयावताभवेत् ॥ तादेवेवसुखंयस्तुलभतेप्रतिवार्षिकं ॥ ऋणंयस्यतुनास्त्येवसमध्यमउदाहृतः ॥ २ ॥ धनंपूर्वापरंयस्यवर्तते बहुसंख्यया ॥ अधिकस्यार्जकोयःस्यात्समहाधनउच्यते ॥ सदाचाररतोविप्रोधना

र्जनपराङ्मुखः॥कुटुंबयत्नमतिकःसदरिद्रइतिस्मृतः ॥ यस्यस्यादशनाभावःसदाचाररतस्यहि ॥ महादरिद्रःसभवेद्दासोधान्यविवर्जितः ॥ वर्धयित्वाधनंयस्तुग्रासंवार्षिकमर्जयेत् ॥ सवैधन्यइतिप्रोक्तश्चैकवर्षेणयःपुमान् ॥ वर्षद्वयमितंग्रासंसाहिधन्यतरःस्मृतः ॥ अधिकस्यार्जकोयःस्यात्सधन्यतमईरितः ॥ धनेनैवविनायस्तुग्रासंवार्षिकमार्जयेत् ॥ सवैधीरइतिप्रोक्तस्तारतम्यंचपूर्ववत्इति ॥ अथैतेषुमध्येकेनकियद्देयंइत्याकांक्षायांवाराहे ॥ ॥ लक्षनमस्कारहोमंप्रकृत्य ॥ व्याहृतीनांसहस्रस्यहोमेशुल्कंद्विजेर्पयेत् ॥ माषमात्रंसुवर्णंतुलक्षहोमेशतंयवाइत्युक्तं ॥ धनिकोद्विगुणंदद्यात्त्रिगुणंतुमहाधनः॥यवार्धंतुदरिद्रेणदातव्यंपुण्यलब्धये ॥ दद्यान्महादरिद्रस्तुतदर्धंशुल्कमेवचेति ॥ मध्यमादिभिस्तुधनिकाद्यपेक्षयाकिंचिन्न्यूनदरिद्राद्यपेक्षयाकिंचिदधिकंदेयमित्यर्थात्तारतम्येनकल्पनीयं ॥ धीरेणापिदरिद्रतोपिन्यूनंस

मंवालाभानुसारेणकल्पनीयं ॥ एतच्चसुवर्णादिद्रव्यविषयमेवनतुगवादिविषयं ॥ सुवर्णप्रकृत्यैवद्वैगुण्यादेरुक्तत्वात् ॥ एतत्सर्वंनित्यकर्मविषयंअनुक्तपरिमाणविषयकंचज्ञेयं ॥ काम्येउक्तपरिमाणेचकर्मणितुयथावदेवदेयं ॥ धनिकादिस्तुदारिद्र्यमितिप्रख्यापयन्यथावन्नददातिसकर्मफलंनैवाप्नोति ॥ तथाचमनुः ॥ ॥ प्रभुः प्रथमकल्पस्ययोनुकल्पेनवर्तते ॥ सनाप्नोतिफलंतस्यपरत्रेतिश्रुतिःस्मृतिरितिपुराणांतरेपि वित्तशाठ्यंनरोयस्तुधनेसतिकरोतिहि ॥ सनाप्नोतिफलंतत्रचौरएवप्रकीर्तितइति ॥ एवंस्वल्पकालसाध्यबहुकालसाध्यकर्मसुश्रमाद्यनुरोधेनद्रव्येयत्ताकल्पनीया ॥ भारते ॥ ॥ वेदोपनिषदेचैवसर्वकर्मसुदक्षिणा ॥ सर्वत्रैवतुचोद्दिष्टाभूमिर्गावोथकांचनं ॥ वैजवापः ॥ ॥ शिवनेत्रोद्भवंयस्मात्तस्मात्तत्पितृवल्लभं ॥ अमंगलंतद्यत्नेनदेवकार्येविवर्जयेत् ॥ सर्वकर्मसुब्राह्मणभोजनसंख्यामाहगदाधरः ॥ गर्भाधानादिसंस्कारेब्रा

ह्मणान्भोजयेद्दश ॥ शतंविवाहसंस्कारेपंचाशन्मेखलाविधौ ॥ आवसथ्येत्रयस्त्रिंशच्छ्रौताधानेशतात्परं ॥ अष्टकंभोजयेद्भक्त्यातत्तत्संस्कारसिद्धये ॥ आग्रयणेप्रायश्चित्तेब्राह्मणान्दशपंचचेति ॥ कृतंकर्मईश्वरार्पणंकार्यमित्युक्तंबृहन्नारदीये ॥ विष्णवर्पितानिकर्माणिसफलानिभवंतिहि ॥ अनर्पितानिकर्माणिभस्मनीवहुतंहविः ॥ नित्यंनैमित्तिकंकाम्यंयच्चान्यन्मोक्षसाधनं ॥ विष्णोःसमर्पितंसर्वंसात्विकंफलदंभवेत् ॥ ॥ सप्तगोत्राणियथा ॥ ॥ पितुर्मातुश्चभार्यायाभगिन्यादुहितुस्तथा ॥ पितृष्वसृमातृष्वस्रोर्गोत्राणांसप्तकंस्मृतमिति ॥ एकोत्तरशतकुलानियथा ॥ चतुर्विंशतिविंशश्चषोडशद्वादशानिह ॥ रुद्रादशवसुश्चैवकुलमेकोत्तरंशतामिति ॥ आस्यनासाक्षिकर्णौचनाभिहृत्कंभुजौस्पृशेत् ॥ एवमाचमनंकृत्वासाक्षान्नारायणोभवेत् ॥ ॥ इतिपरिभाषाप्रकरणम् ॥ ॥अथगर्भाधानं॥तत्रप्रथमरजोदर्शनेत्रयोदशदोषाःज्योतिः

शास्त्रेउक्तास्तेसंकल्पेवक्ष्यामःतत्रदोषाणांनिबर्हणार्थंनारदोक्तविधिनाशांतिंकृत्वाग
र्भाधानंकार्यं ॥ शांतिकर्मण्यग्निचक्रंचावश्यंतथापिअग्निचक्रंविनाकर्माणिनिर्णीता
नि॥ज्योतिर्निबंधे॥ ॥दुर्गाहोमविधौविवाहसमयेसीमंतपुत्रोत्सवेगर्भाधानविधौचवा
स्तुसमयेविष्णोःप्रतिष्ठादिषु ॥ मौंजीबंधनवैश्वदेवकरणेसंस्कारनैमित्तिकेहोमोनि
त्यभवेन्नदोषकथितंचक्रंचवन्हेरपीति॥ नारदीयेवसिष्ठेचवाराहेचविशेषतः॥कात्या
यनोक्तग्रंथेस्युस्त्रयशांतिर्यजुःस्मृता ॥ तस्मात्कातीयैस्क्तउक्तशांतित्रयेन्यतमाविधे
या ॥ ॥ अथनारदोक्तगर्भाधानादौरजोदर्शनशांतिः ॥ ॥ निंद्यर्क्षतिथिवारेषुयदि
पुष्पंप्रदृश्यते ॥ अशुभंचेद्रजःस्त्रीणांनिंद्यस्थानंचवाससी ॥ १ ॥ तत्रशांतिंप्रकुर्वीत
ग्रहयज्ञपुरःसरं ॥ सुमुहूर्तेतुसंप्राप्तेकुर्याच्छांतिंयथाविधि ॥ २ ॥ विधानंतत्रकर्त
व्यमरिष्टघ्नंविशेषतः ॥ दंपत्योःप्रातरेवस्यान्मंगलस्नानमुत्तमं॥३॥ पंचमेदिवसेस्ना

त्वाद्वाभ्यामप्यत्रमंगलैः॥तिलतैलेनशुद्धेनशुभकल्केनवापुनः ॥ ४॥ उष्णैश्चवारिभिः
श्रेष्ठैःपंचपल्लवसंयुतैः ॥ आन्हिकंविधिवत्कृत्वाविधानंनूनमाचरेत्॥५॥ शुभाचारस
मायुक्तःश्रद्धयापरयायुतः ॥ तिथिश्रवणकंकुर्याच्छांतिसंकल्पपूर्वकं ॥ ६ ॥ पुण्याहं
वाचयेत्पश्चात्ब्राह्मणैर्वेदपारगैः ॥ कृत्वाभ्युदयिकंश्राद्धमाचार्यंवरयेत्ततः ॥७॥ स्थं
डिलंचततःकृत्वाअग्निंसंस्थापयेत्ततः ॥ ईशान्यांचतुरःकुंभान्स्थापयेद्वारिपूरितान्
॥८॥ पंचपल्लवसंयुक्तान्सर्वौषधिसमन्वितान् ॥ पंचरत्नसमायुक्तान्पंक्तिरूपेणसाधये
त्॥९॥कुंभोपरिन्यसेत्पात्रंशालितंदुलपूरितं॥पात्रोपरिन्यसेद्वस्त्रंप्रतिकुंभंपृथक्पृथक्
॥१०॥ सूर्यंचविन्यसेदाद्येइंद्रेंद्राण्यौततःपरं ॥ चतुर्थेविन्यसेद्विद्वान्प्रतिमांभुवनेश्वरीं
॥११॥ततोग्रहांश्चसंपूज्ययथाविधिविधानतः॥ सूर्यकुंभंतुसंस्पृष्ट्वासूर्यसूक्तंजपेद्विजः
॥१२॥ रुद्रैकादशिनीचापिजपेत्तत्रसमाहितः ॥ प्रधानंपायसंप्रोक्तंसघृतंचसशर्करं ॥

॥१३॥अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा॥प्रत्येकंदेवतानांचजुहुयात्तिलसर्पिषा॥१४॥
आकृष्णेनेतिसूर्यंचइंद्रंत्रातारमिंद्रतः॥इंद्राणींतुतथादित्यैरास्नेतिचसुमंत्रतः॥१५॥
ईश्वरींभुवनस्याथयजुषांश्रीश्चतेतिच ॥ ग्रहहोमंततःकृत्वायथाविध्युक्तद्रव्यया ॥
॥ १६ ॥ वंशपात्रंसमानीयरक्तवस्त्रसमन्वितम्॥तत्रराशिंप्रकुर्वीततंदुलानांनृपोत्तम
॥१७॥तत्रोपरिन्यसेद्धैमींकदलींसूर्यदेवतां॥वन्हेरुत्तरतोविद्वान्कदलींस्थापयेच्छुभां
॥ हेम्नःपंचपलाढ्यांवापलस्यापिसुलक्षणां॥पलार्द्धेनतदर्द्धेनतदर्द्धेनचवापुनः॥ १९ ॥
सुस्तंभाढ्यांसुपत्रांचकदलेनविराजितां॥ ॥तंदुलानांप्रमाणंतु॥ ॥अष्टमुष्टिभवेत्किं
चित्कचिदष्टौचपुष्कलं॥पुष्कलानिचचत्वारिआढकःपरिकीर्तितः॥चतुर्भिराढकै
र्द्रोणोग्राह्योद्रोणैकतंदुलाः ॥ दद्यात्तांविप्रवर्यायसवस्त्रांचसदक्षिणां ॥ अलंकृतायवि
दुषेश्रोत्रियायकुटुंबिने॥ दानमंत्रस्तु ॥ सुपत्रेसुभगेदेविरंभेभास्करवल्लभे॥ रक्षमां

रजसोदोषात्दुष्टस्यास्यविगर्हितात् ॥ दानेनानेनदेवेशः सविताविश्वतोमुखः ॥
प्रीतोभवतुमेसद्योदोषंहरतुदुष्करम् ॥ ततोभिषेचनंकार्यंदंपत्योश्चविशेषतः ॥ उच्चा
र्यवारुणान्मंत्रान्जलेनपंचपल्लवैः ॥ उत्धृत्योत्धृत्यतंसिंचेत्पुण्यमंत्रैर्यथाविधि ॥
आपोहिष्ठात्रिभिर्मंत्रैःपंचैंद्रैःपंचवारुणैः ॥ भगप्रणेतीदमापःसमुद्रायपुनन्तुमा ॥ आ
प्यायपंचनद्येतिशिरोमेतिचतसृभिः ॥ देवस्यत्वात्रिभीत्यादिअभिषिंच्यपुनःपुनः ॥
शक्रादिदेवताःसर्वाब्रह्मविष्णुपुरोगमाः ॥ दंपत्योःपरिधानार्थमहतेवाससीपुरा ॥ क
र्मणोंतेविसृज्यान्यद्वासश्चपरिधार्यते ॥ आचार्यायततोदद्यात्स्वर्णगोभूतिलांस्ततः ॥
ब्राह्मणेभ्यस्तथान्येभ्योदक्षिणाश्चविशेषतः ॥ सदक्षिणमनड्वहंप्रदद्याद्रुद्रजापिने ॥
ब्राह्मणान्भोजयेत्पश्चाच्छर्कराघृतपायसैः ॥ यस्मिन्वासासिदृष्टंचरजोदुष्टभयावहं ॥
तद्वासोयत्नतस्त्याज्यंततःशांतिकरंहितत् ॥ एवंयःकुरुतेशांतिंनारदोक्तप्रमाणतः ॥

तदनिष्टंतुसकलंसद्यएवविनश्यति ॥ इति नारदोक्तरजोदर्शनशांतिक्रमः ॥ ॥ अथ
शांतिप्रयोगानुक्रमः ॥ ॥ शांतिक्रमंप्रवक्ष्यामिनारदेनयथोदितं ॥ गणेशंपूजयेदा
दौस्वस्तिपुण्याहवाचनं ॥१॥ मातृणांपूजनंकार्यंनांदीश्राद्धमतःपरं ॥ आचार्यंवरयि
त्वाथब्रह्माणंगाणपत्यकं ॥२॥ सादस्यमृत्विजश्चैवजापकान्वरयेत्ततः ॥ दिग्रक्षणंत
तःकार्यंपंचगव्यंयथाविधि ॥ ३ ॥ भूमिंसंपूज्यविधिवत्तत्रसंस्कारपंचकं ॥ स्थंडि
लेग्निंप्रतिष्ठाप्यकलशान्स्थापयेत्क्रमात् ॥ ४ ॥ मूर्त्यंभ्युत्तारणंप्राणप्रतिष्ठास्थापना
र्चनं ॥ ग्रहादीन्स्थापयित्वाथस्थापयेद्रुद्रकुंभकं ॥ ५ ॥ ब्रह्मासनंततोदत्वाकारयेत्कु
शकंडिकां ॥ लिंगोक्तैर्नाममंत्रैर्वायथाविध्युक्तद्रव्यया ॥ ६ ॥ देवताग्रहहोमंचयथा
संख्यापुरःसरं ॥ पूजास्विष्टंनवाहुत्यांबलिंपूर्णाहुतिंतथा ॥७॥ स्रुवाश्चादिविमोकां
तंहोमशेषंसमापयेत् ॥ श्रेयःसंपाद्यदानंचअभिषेकोविसर्जनं ॥ ८ ॥ विप्राशिषःप्र

गृण्हीयात्तान्मिष्टान्नेनभोजयेत् ॥ ॥ इति शांतिप्रयोगानुक्रमः ॥ नान्वाधानमृषिश्छंदोयजुषांगृह्यकर्मणि ॥ श्रौतेकर्मणिकेषांचिदन्वाधानादिकारयेदितिवचनात् ॥ ऋषिश्छंदअन्वाधानंगर्भाधानातिरिक्तसंस्कारेऽस्मिन्ग्रंथेनांगीकृतं ॥ ॥ तत्रादौसर्वकर्मसाधारणांगानांगणेशपूजादीनांस्वस्तिवाचनांतानांप्रयोगः ॥ ॥ सचशिष्टप्रचुराचारानुसारेणोच्यते ॥ ॥ महत्सुकर्मसुपूर्वेद्युःस्वल्पेषुतस्मिन्नहनिपूर्वाण्हेनिर्णेजनांतपंचमहायज्ञांतकृतनित्यक्रियेणसपत्नीकेनससंस्कार्येणयजमानेनप्राङ्मुखेनोदङ्मुखेनवाशुद्धपीठेउपवेशनं ॥ ॥ पादौहस्तौचप्रक्षाल्याद्भिराचम्यात्रिःप्राणानायम्यदेशकालौसंकीर्त्यकरिष्यमाणामुककर्मांगतयामंगलस्नानमहंकरिष्येइति संकल्पः ॥ ॥ ततोयथाचारमंगलवाद्यघोषपुरःसरंपुत्रवतीवृद्धसुवासिनीभिर्हस्तैःसुगंधितैलेनाभ्यंजनंतिलामलकादीनांसर्वौषध्यादिसुगंधचूर्णेनोद्वर्तनंउष्णोदकेनस्ना

नामिदमेवमंगलस्नानमित्यभिधीयते ॥ ॥संग्रहे ॥ ॥सौगंध्यातिलतैलेनकुर्यादंगेष्वभ्यंजनं ॥ तिलामलकसंयुक्तैःसुगंध्योषधिचूर्णकैः ॥ अंगोद्वर्त्यौष्णोदकेनस्नानंतन्मंगलंस्मृतमिति ॥ ॥शुष्कवस्त्रपरिधानपुरःसरंपतिपुत्रवतीवृद्धसुवासिनीभिर्मंगलतिलकयुतंनीराजनंचप्रकुर्वीत ॥ तथाचयजमानःपत्न्यासंस्कार्येणचयथायोग्यालंकृतःद्विराचमनं ॥ ततोयजमानःनवंश्वेतंसदशंस्ववर्णेनसकृद्धौतंप्रागुदग्दशंवाप्रसारितन्नान्यधारितंअहतंवसनंतन्नाभिपृष्ठकटयेवंबद्धत्रिकच्छंपरिधास्यैइत्यनेनमंत्रेणपरिधाययशसामेत्यनेनमंत्रेणोत्तरीयं॥अहतेवाक्षौमवस्त्रेश्वेतपीतरक्तरंजितेवानीलीरंजितंविनापत्न्यात्वमंत्रंपरिधाय ॥ प्रतिवस्त्रेस्मार्तविधिनाद्विराचमनं॥ पत्न्यास्तुयथोक्तं ॥ ततोवारणादियज्ञीयदारुनिर्मितेसोत्तरच्छदेशुद्धपीठेशुभासनेयज्ञोपवीतिनादक्षिणपार्श्वेंबद्धशिखाऽभिन्नकेशेनयजमानेनप्राङ्मुखेनोदङ्मुखेनवाउपवेशनं ॥

तद्दक्षिणतःपत्न्याचतद्दक्षिणतःसंस्कार्यैणच ॥ वारणादिपदेनसीसवटैंभुरणीकाष्ठपी
ठं ॥ सोत्तरच्छदेनउपर्यग्रइति ॥ ॥सव्येद्वित्रिकुशदलोपग्रहः ॥दक्षिणेचतुःकुशद
लोपग्रहः ॥ सचअनामिक्यांमध्यपर्वणि ॥ एवंकरद्वयेकुशोपग्रहः ॥ अथवापं
चचतुःकुशदलग्रंथियुतकरद्वयेपवित्रोपग्रहः ॥ वर्णेवर्णेएकैकन्यूनमितिकेचित् ॥
षोडशमाषमारभ्योर्ध्वंचयथाशक्तिहेमात्मकपवित्रंचातिप्रशस्तं ॥ ॥ घृतकुंकुम
केशरान्यतममंगलतिलकंस्मार्तविधिनाद्विराचम्यप्राणानायम्यशांतिपाठंपठित्वा
त्रिमात्रंप्रणवमुच्चार्यलक्ष्मीनारायणादिदेवान्प्रणमेत् ॥ ॥ ॥
अथशांतिपाठमंत्राः॥ ॥ ॐ आनोभद्राःक्रतवोयन्तुविश्वतोदब्धासोऽअपरितास
ऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्प्रायुवोरक्षितारोदिवेदिवे ॥ १ ॥ देवानां

म्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम् ॥ देवानाꣳसख्यमुपसेदिमा
वयन्देवानऽआयुꣳप्प्रतिरन्तुजीवसे ॥ २ ॥ तान्पूर्व्वयानिविदाहूमहेवयम्भगम्मित्र
मदितिन्दक्षमस्रिधम् ॥ अर्य्यमणम्वरुणꣳसोमंमश्विनासरस्वतीनꣳसुभगामयस्क
रत् ॥ ३ ॥ तन्नोवातोमयोभुवातुभेषजन्तन्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणꣳ
सोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ ४ ॥ तमीशानन्जगतस्तस्थुष
स्पतिन्धियन्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धꣳ
स्वस्तये ॥ ५ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाꣳस्वस्तिनꣳपूषाविश्ववेदाꣳ ॥ स्वस्तिनस्तार्क्ष्यो
ऽअरिष्टनेमिꣳस्वस्तिनोबृहस्पतिर्द्दधातु ॥ ६ ॥ पृषदश्वामरुतꣳपृश्निमातरꣳशुभंय्या

वानोविदथेषुजग्मयः ॥ अग्निजिह्वामनवःसूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह
॥ ७ ॥ भद्रङ्कर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳ
सस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ ८ ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्रा
जरसन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः ॥ ९ ॥
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिःपञ्चज
नाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ १० ॥ तम्पत्नीभिरनुगच्छेमदेवाःपुत्रैर्भ्रातृभि
रुतवाहिरण्यैः ॥ नाकङ्गृभ्णानाःसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः ॥ ११ ॥
आयुष्यँम्वर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविशतादिमाम् ॥

द्यौःशान्तिरन्तरिक्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः ॥ वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १ ॥ यतोयतःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ २ ॥ सुशांतिर्भवतु ॥ ॥ ॥ ॥

ॐश्रीमन्महागणाधिपतयेनमः ॥ ॐलक्ष्मीनारायणाभ्यांनमः ॥ ॐउमामहेश्वराभ्यांनमः॥ॐवाणीहिरण्यगर्भाभ्यांनमः॥ॐशचीपुरंदराभ्यांनमः ॥ॐमातापितृचरणकमलेभ्योनमः॥ॐकुलदेवताभ्योनमः॥ॐइष्टदेवताभ्योनमः ॥ॐग्रामदेवताभ्योनमः ॥ॐस्थानदेवताभ्योनमः ॥ ॐवास्तुदेवताभ्योनमः ॥ ॐसर्वेभ्योदेवेभ्यःसर्वेभ्योब्राह्मणेभ्योनमोनमः ॥ ॐपुण्यंपुण्याहंदीर्घमायुरस्तु ॥ सुमुखश्चैकदंतश्चकपिलो

गजकर्णकः॥लंबोदरश्चविकटोविघ्ननाशोगणाधिपः ॥१॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ २॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ ३ ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः ॥ सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ ५ ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधिके ॥ शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥६॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलं ॥ येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥ ७ ॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः ॥ येषामिंदीवरश्यामोहृदयस्थोजनार्दनः ॥ ८ ॥ विनायकंगुरुंभानुंब्रह्मविष्णुमहेश्वरान् ॥सरस्वतींप्रणौम्यादौसर्वकार्यार्थसिद्धये ॥ ९ ॥ सर्वेष्वारब्धकार्येषुत्रयस्त्रिभुवनेश्वराः ॥ देवादिशंतुनःसिद्धिंब्रह्मेशानजनार्दनाः ॥ १० ॥

विष्णुर्विष्णुर्विष्णुः ॥ श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणोद्वितीयेपरार्धेविष्णुपदेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेअष्टाविंशतितमेकलियुगेप्रथमचरणेभरतवर्षेभरतखंडेजंबूद्वीपेदंडकारण्येदेशेगोदावर्याः पश्चिमेतीरेपरशुरामक्षेत्रेबौद्धयावतारेशालिबाहनशकेअमुकनामसंवत्सरेअमुकायनेअमुकऋतौअमुकमासेअमुकपक्षेअमुकतिथौअमुकवासरे अमुकनक्षत्रेअमुकराशिस्थितेचंद्रेअमुकराशिस्थितेश्रीसूर्ये अमुकराशिस्थितेदेवगुरौशेषेषुग्रहेषुयथायथाराशिस्थानस्थितेषुसत्सुएवंगुणविशेषेणविशिष्टायांशुभपुण्यतिथौममआत्मनःश्रुतिस्मृतिपुराणोक्तफलावाप्तये अस्मिन्पुण्याहे अस्याः ममभार्यायाः प्रथमरजोदर्शनसमयेमासतिथिवारनक्षत्रयोगकरणलग्नहोरावस्त्रदर्शनस्थानदिनभागवर्णानांमध्येयद्विरुद्धफलंतत्तद्दोषपरिहारार्थंपुत्रपौत्रादिसंततिप्राप्त्यर्थंतथाचममकलत्रेणसहजन्मराशेःस

काशान्नामराशेःसकाशाद्येकेचिद्विरुद्धस्थानस्थितक्रूरग्रहास्तैः सूचितंसूचयिष्यमाणंचयत्सर्वारिष्टंतद्विनाशार्थंसर्वदातृतीयैकादशशुभस्थानस्थितशुभफलप्राप्त्यर्थंगणपतिदुर्गाक्षेत्राधिपत्यादित्यादिनवग्रहाधिदेवताप्रत्यधिदेवतादिसहितश्रीसूर्यइंद्रइंद्राणीभुवनेश्वरीदेवताप्रीत्यर्थंनारदोक्त[1]रजोदर्शनशांतिंसांगोपांगेनतथाचअस्याः ममभार्यायाः क्षेत्रगर्भयोः संस्कारार्थंप्रातिगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंगर्भाधानाख्यंकर्मएकतंत्रेणाहंकरिष्ये॥इतिसंकल्पः॥तदंगत्वेनगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंआयुष्यमंत्रजपंनांदीश्राद्धंब्रह्माचार्यर्त्विग्वरणंदिग्रक्षणंपंचगव्यकरणंभूमिपूजनंअग्निस्थापनंकलशस्थापनं अग्न्युत्तारणप्राणप्रतिष्ठापूर्वकदेवतास्थापनंकदलीस्थापनंनवग्रहस्थापनंचाहंकरिष्ये।तत्रादौकर्मार्थंज

---

[1] नारदोक्तमूलंदर्पणेएव

लपूरितकलशार्चनं ॥ ॐ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥
अहेडमानोवरुणेहबोध्युरुशंसमानऽआयुःप्रमोषीः ॥ १ ॥ कलशेवरुणायनमः
गंधाक्षतपुष्पैःसंपूज्य ॥ ततोदक्षिणहस्तेनकलशमालभ्याभिमंत्रयेत् ॥ कलशस्यमु
खेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ १ ॥
कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ २ ॥
अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ इत्यभिमंत्र्य ॥ ततोगंगाद्यावाहनं ॥ गं
गेचयमुनेचैवगोदावरिसरस्वति ॥ नर्मदेसिंधुकावेरिजलेस्मिन्सन्निधिंकुरु ॥१॥ अ
स्मिन्कलशेसर्वाणितीर्थान्यावाहयामि ॥ पूजयामि ॥ नमस्करोमि ॥ कलशोदके
नपूजासंभारान्संप्रोक्ष्य ॥ तत्रमंत्रः ॥ ॐ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा ॥

यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरेशुचिः ॥ १ ॥ इतिमंत्रेणप्रोक्षयेत् ॥ दीपपूजनं ॥
भोदीपत्वंब्रह्मरूपअंधकारनिवारक ॥ इमांमयाकृतांपूजांगृण्हंस्तेजःप्रवर्धय ॥ १ ॥
दीपायनमःगंधाक्षतपुष्पैः संपूज्य ॥ ॥ ॥ ॥ ॥ ॥
अथगणपतिपूजनं ॥ ॥ ततोध्यानम् ॥ ॥ श्वेतांगंश्वेतवस्त्रंसितकुसुमगणैःपूजितं
श्वेतगंधैः क्षीराब्धौरत्नदीपैः सुरतरुविमलेरत्नसिंहासनस्थं ॥ दोर्भिःपाशांकुशेष्टाभ
यधृतिविशदंचंद्रमौलिंत्रिनेत्रंध्यायेच्छांत्यर्थमीशंगणपतिममलंश्रीसमेतंप्रसन्नं॥१॥
ॐभूर्भुवःस्वःसिद्धिबुद्धिसहितमहागणपतयेनमःध्यायामि।हेहेरंबत्वमेह्येहिअंबिका

---

१ यद्यपि गणपतिपूजनंगदाधरादिभिर्नोक्तंतथापि आदौविनायकः पूज्योअंतेतुकुलदेवतेति संस्कारमयूखादौगृह्यपरिशिष्टवचनात् ॥ गणेशंपूजयेत्पूर्वंनिर्विघ्नार्थंस्वकर्मणेतिपरशुरामकारिकोक्तेश्चविघ्नेशंच समर्च्येतिचूडामणिकारवृत्ताच्चकार्यमेव.

त्र्यंबकात्मज ॥ सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितुःपितः ॥ १ ॥ नागास्यनागहारत्वं
गणराजचतुर्भुज ॥ भूषितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः ॥ २ ॥ आवाहयामि
पूजार्थंरक्षार्थंचममक्रतौ ॥ इहागत्यगृहाणत्वंपूजांक्रतुंचरक्षमे ॥ ३ ॥ ॐ गणानां
न्त्वागणपतिꣳ हवामहेप्रियाणान्त्वाप्रियपतिꣳ हवामहेनिधीनान्त्वानिधिपतिꣳ हवा
महेवसोमम ॥ आहमंजानिगर्भधमात्वमंजासिगर्भधम् ॥ १ ॥ ॐ भू० सिद्धिबुद्धि
सहितमहागणपतयेनमः गणपतिंआवाहयामि ॥ ॥ रम्यंसुशोभनंदिव्यंसर्वसौख्य
करंशुभं ॥ आसनंचमयादत्तंगृहाणपरमेश्वर ॥२॥ ॐ वष्मोंस्मिसमानानामुद्यतामि
वसूर्यः ॥ इमन्तमभितिष्ठामियोमाकश्चाभिधासति ॥ २ ॥ ॐ भू० सि० म० आसनं
समर्पयामि ॥ उष्णोदकंनिर्मलंचसर्वसौगंध्यसंयुतं ॥ पादप्रक्षालनार्थायदत्तंतेप्रति

गृह्यतां ॥ ३ ॥ ॐ एतावांनस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वांभूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥ ॐ भू० सि० म० ग० पाद्यंस० ॥ ताम्रपात्रेस्थितंतोयं गंधपुष्पफलान्वितं ॥ सहिरण्यंददाम्यर्घ्यंगृहाणपरमेश्वर ॥ ४ ॥ ॐ धामन्तेविश्वम्भुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृतस्तमश्याममधुमन्तन्तऽऊर्मिम् ॥ ४ ॥ ॐ भू० सि० म० अर्घ्यंस० ॥ सर्वतीर्थसमायुक्तंसुगंधि निर्मलंजलं ॥ आचम्यार्थंमयादत्तंगृहाणपरमेश्वर ॥ ५ ॥ ॐ इमम्मेवरुणश्रुधीहवंमद्याचंमृडय ॥ त्वामंवस्युराचंके ॥ ५ ॥ ॐ भू० सि० म० आचमनंस० ॥ पंचामृतस्नानं ॥ कामधेनुसमुद्भूतंसर्वेषांजीवनंपरं ॥ पावनंयज्ञहेतुश्चपयःस्नानार्थमर्पितं ॥

॥ १ ॥ ॐ पयंꣳपृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाꣳ ॥ पयस्वतीꣳप्र
दिशंꣳसन्तुमह्यम् ॥ १ ॥ ॐ भू॰सि॰म॰पयःस्नानंस॰ ॥ पयःस्नानांतेशुद्धोदक
स्नानंस॰ ॥ पयसस्तुसमुद्भूतंमधुराम्लंशशिप्रभं ॥ दध्यानीतंमयादेवस्नानार्थंप्र
तिगृह्यतां ॥ २ ॥ ॐ दधिक्राण्वोऽअकारिषञ्जिष्णोरश्वस्यवाजिनꣳ ॥ सुरभिनोमु
खाकरत्प्रणऽआयूꣳषितारिषत् ॥ २ ॥ ॐ भू॰सि॰म॰दधिस्नानंस॰ ॥ नवनीतसमु
त्पन्नंसर्वसंतोषकारकं ॥ घृतंतुभ्यंप्रदास्यामिस्नानार्थंप्रतिगृह्यताम् ॥ ३ ॥ ॐ
घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम ॥ अनुष्वधमावहमादयस्वस्वा
हाकृतँवृषभवक्षिहव्यम् ॥ ३ ॥ भू॰सि॰म॰घृतस्नानंस॰ ॥ घृतस्नानांतेशु॰ ॥

तरुपुष्पसमुद्भूतंसुस्वादुमधुरंमधु ॥ तेजःपुष्टिकरंदिव्यंस्नानार्थंप्रतिगृह्यतां ॥ ॐ
मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवꣳ ॥ माध्वीर्न्नꣳसन्त्वोषधीꣳ ॥ १ ॥ मधुनक्तमु
तोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ २ ॥ मधुमान्नोवनस्पतिर्म्म
धुमाँ२ऽअस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनꣳ ॥ ३ ॥ ४ ॥ ॐ भू॰सि॰म॰मधुस्ना
नंस॰ ॥ इक्षुसारसमुद्भूताशर्करापुष्टिकारिका ॥ मलापहारिकादिव्यास्नानार्थंप्र
तिगृह्यतां ॥५॥ ॐ अपाꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरस
स्तँवोगृण्हाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृण्हाम्येषतेयोनिरिन्द्रायत्वा
जुष्टतमम् ॥ ५ ॥ ॐ भू॰सि॰म॰शर्करास्नानंस॰ ॥ नानासुगंधद्रव्यंचचंदनंरज
नीयुतं ॥ उद्वर्तनंमयादत्तंगृहाणपरमेश्वर ॥ १ ॥ ॐ गन्धर्वस्त्वाविश्वावसुꣳपरिद

धातुविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः॥ १ ॥ॐअहिरिवभोगैः
पर्येतिबाहुंज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमाꣳस
म्परिपातुविश्वतः ॥ २ ॥ ॐ भू० सि० म० उद्वर्तनस्नानंसम० ॥ उद्वर्तनस्नानांतेशु
द्धोदकस्नानंस० ॥ ततोनाममंत्रेणगंधपुष्पधूपदीपनैवेद्यतांबूलदक्षिणांतंपंचामृत
स्नानांगपूजनंइतिशिष्टाः ॥ कावेरीनर्मदावेणीतुंगभद्रासरस्वती ॥ गंगाचयमुना
तोयंमयास्नानार्थमर्पितं ॥ १ ॥ ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन ॥ म
हेरणायचक्षसे ॥ १ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः
॥ २ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ३ ॥ ॐ

भू॰सि॰म॰शुद्धोदकस्नानमभिषेकंचस॰शांतिःशांतिःशांतिः ॥ सुशांतिर्भवतु ॥
ॐभू॰सि॰म॰स्नानांतेआचमनंस॰ ॥ ॥ सर्वभूषादिमेसौम्येलोकलज्जानिवारणे
॥ मयोपपादितेतुभ्यंवाससीप्रतिगृह्यतां ॥ १ ॥ ॐ युवासुवासाःपरिवीतऽआगात्सऽ
उश्रेयान्भवतिजायमानः ॥ तन्धीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः
॥ २ ॥ ॐ भू॰सि॰म॰वस्त्रंस॰ ॥ नवभिस्तंतुभिर्युक्तंत्रिगुणंदेवतामयं ॥ उपवीतंम
यादत्तंगृहाणपरमेश्वर ॥ १ ॥ ॐ यज्ञोपवीतम्परमम्पवित्रम्प्रजापतेर्यत्सहजम्पुरस्ता
त् ॥ आयुष्यमग्र्यम्प्रतिमुञ्चशुभ्रंयज्ञोपवीतम्बलमस्तुतेजः ॥ १ ॥ ॐ भू॰सि॰म॰
यज्ञोपवीतंस॰ ॥ आचमनं ॥ श्रीखंडंचंदनंदिव्यंकेशरादिसमन्वितं ॥ विलेपनंसुर
श्रेष्ठचंदनंप्रतिगृह्यतां ॥ १ ॥ ॐ त्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥

त्वामौषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥ १ ॥ ॐ भू० सि० म० चंदनंस० ॥ अक्षताश्चसुरश्रेष्ठकुंकुमाक्ताःसुशोभिताः ॥ मयानिवेदिताभक्त्यागृहाणपरमेश्वर ॥ ॥ १ ॥ ॐ अक्षन्नमीमदन्तह्यवेप्प्रियाऽअंधूषत ॥ अस्तौषतस्वभानवोविप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरिं ॥ ॐ भू० सि० म० अक्षतान्स० ॥ सुमाल्यानिसुगंधीनि मालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥ १ ॥ ॐ ओषधीःप्रतिमोदध्वम्पुष्पवतीःप्रसूवरीः ॥ अश्वाऽइवसजित्वरीर्वीरुधःपारयिष्णवः ॥ ॥ १ ॥ ॐ भू० सि० म० पुष्पाणिस० ॥ दूर्वांकुरान्सुहरितानमृतान्मंगलप्रदान् ॥ आनीतांस्तवपूजार्थंगृहाणगणनायक ॥ १ ॥ ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परिं ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ १ ॥ ॐ भू० सि० म० दूर्वांकुरान्स०

हरिद्राकुंकुमंचैवसिंदूरादिसमन्वितं ॥ सौभाग्यद्रव्यसंयुक्तंगृहाणपरमेश्वर ॥ १ ॥
सुगंधौषधिचूर्णंचनानापरिमलानिच ॥ नानासुगंधतैलानिअतःशांतिंप्रयच्छमे ॥२॥
ॐ अहिरिवभोगैःपर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुनानि
विद्वान्पुमान्पुमाꣳसम्परिपातुविश्वतः ॥ १ ॥ ॐ भू०सि०म०नानापरिमलद्रव्या
णिसमर्पयामि ॥ वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपो
यंप्रतिगृह्यतां ॥ १ ॥ ॐ धूरसिधूर्वधूर्वन्तन्धूर्वतंयोस्मान्धूर्वतितन्धूर्वयम्वयन्धूर्वा
मः ॥ देवानामसिवह्नितमꣳसस्नितमम्पप्प्रितमञ्जुष्टतमन्देवहूतमम् ॥ १ ॥ ॐ भू०
सि०म०धूपंस० ॥ साज्यंचवर्तिसंयुक्तंवन्हिनायोजितंमया ॥ दीपंगृहाणदेवेशत्रैलो
क्यतिमिरापह ॥ १ ॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यः

स्वाहा ॥ अग्निर्वर्च्चोज्योतिर्वर्च्चꣳस्वाहासूर्योवर्च्चोज्योतिर्वर्च्चꣳस्वाहा ॥ ज्योतिःसूर्यꣳसूर्योज्योतिꣳस्वाहा ॥ १ ॥ ॐ भू॰सि॰म॰दीपंसमर्पयामि ॥ शर्कराघृतसंयुक्तंमधुरंस्वादुचोत्तमं ॥ उपहारसमायुक्तंनैवेद्यंप्रतिगृह्यतां ॥ १ ॥ ॐ येदेवासोदिव्येकादशस्थपृथिव्यामध्येकादशस्थ ॥ अप्सुक्षितोमहिनैकादशस्थतेदेवासोयज्ञमिमञ्जुषध्वम् ॥ १॥ ॐ भू॰सि॰म॰नैवेद्यंस॰ ॥ ॐ भू॰मध्येपानीयंस॰ ॥ ॐ भू॰उत्तरापोशनंस॰ ॥ ॐ भू॰हस्तप्रक्षालनंसमर्पयामि ॥ भू॰सि॰म॰मुखप्रक्षालनंस॰ ॥ ॐ भू॰चंदनेनकरोद्वर्तनंस॰ ॥ इदंफलंमयादेवस्थापितंपुरतस्तव ॥ तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ १ ॥ ॐ याꣳफलिनीर्याऽअफलाऽअपुष्पायाश्चपुष्पिणीꣳ ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ १ ॥ ॐ भू॰सि॰म॰फलंस॰ ॥ पूगीफ

लंमहद्दिव्यंनागवल्लीदलैर्युतं ॥ एलादिचूर्णसंयुक्तंतांबूलंप्रतिगृह्यतां ॥ १ ॥ ॐ यत्पु
रुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥ १ ॥
ॐ भू०सि०म०तांबूलंस० ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनंतपुण्य
फलदमतःशांतिंप्रयच्छमे ॥ १ ॥ ॐ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यंजातःपतिरे
कऽआसीत् ॥ सदांधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायंहविषांविधेम ॥ १ ॥ ॐ भू०
सि०म०दक्षिणांस० ॥ कदलीगर्भसंभूतंकर्पूरंचप्रदीपितं ॥ आरार्तिकमहंकुर्वेपश्य
मेवरदोभव ॥ १ ॥ ॐ इदर्ठंहविःप्रजननंनम्मेऽअस्तुदशंवीरर्ठंसर्व्वंगणर्ठंस्वस्तये ॥ आत्म
सनिंप्प्रजासनिंपशुसनिंलोकसन्यंभयसनिं ॥ अग्निःप्प्रजाम्बंहुलाम्मेंकरोत्वन्नम्पयो

रतोऽअस्मासुधत्त ॥ १ ॥ ॐ भू० सि० म० कर्पूरनीराजनंस० ॥ नानासुगंधपुष्पा
णियथाकालोद्भवानिच ॥ पुष्पांजलिर्मयादत्तोगृहाणपरमेश्वर ॥ १ ॥ ॐ यज्ञेनय
ज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपू
र्वेसाध्याःसन्तिदेवाः ॥ १ ॥ ॐ भू० सि० म० पुष्पांजलिंस० ॥ यानिकानिचपापानि
ज्ञाताज्ञातकृतानिच ॥ तानिसर्वाणिनश्यंतिप्रदक्षिणपदेपदे ॥ १ ॥ ॐ सप्तास्यासन्प
रिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १ ॥ ॐ
भू० सि० म० प्रदक्षिणांस० ॥ अथ[1]विशेषार्घः ॥ रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक ॥
भक्तानामभयंकर्तात्राताभवभवार्णवात् ॥ १ ॥ द्वैमातुरकृपासिंधोषाण्मातुराग्रज

---

[1] नारिकेलातमचदंनाक्षतपुष्पाद्यन्यणिचार्घ्यपात्रेनिनयेदितिरुद्रपद्धतिकारः ।

प्रभो ॥ वरदत्वंवरंदेहिवांछितंवांछितार्थद ॥ २ ॥ अनेनसफलार्घ्येणफलदोस्तुस
दाममम ॥ ॐभू॰ सि॰ म॰ विशेषार्घंस॰ ॥ ॥ प्रार्थना ॥ ॥ विघ्नेश्वरायवरदाय
सुरप्रियायलंबोदरायसकलायजगद्धिताय ॥ नागाननायश्रुतियज्ञविभूषितायगौ
रीसुतायगणनाथनमोनमस्ते ॥ १ ॥ भक्तार्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभ
दायसुरेश्वराय ॥ विद्याधरायविकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते ॥
नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः ॥ नमस्तेरुद्ररूपायकरिरूपायतेनमः ॥ ३ ॥
विश्वरूपस्वरूपायनमस्तेब्रह्मचारिणे ॥ भक्तप्रियायदेवायनमस्तुभ्यंविनायक ॥ ४ ॥
लंबोदरनमस्तुभ्यंसततंमोदकप्रिय ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ ५ ॥
त्वांविघ्नशत्रुदलनेतिचसुंदरेतिभक्तप्रियेतिसुखदेतिवरप्रदेति ॥ विद्याप्रदेत्यघहरेतिच
येस्तुवंतितेभ्योगणेशवरदोभवनित्यमेव ॥ अनयापूजयासिद्धिबुद्धिसहितमहागण

पतिःसांगःसपरिवारःप्रीयतां ॥ ॥ इतिश्रीऋषिभट्टविरचितेसंस्कारभास्करेगण
पतिपूजनंसमाप्तम् ॥ अथस्वस्तिपुण्याहवाचनं ॥ पुण्याहवाचनविधिंवक्ष्यामोऽथय
थाविधि ॥ प्रयोक्तुःकर्मणामादावंतेचोदर्यासिद्धये ॥ ॥ तच्चप्रयोगांतर्गतमितिकेचित्
॥ अत्रच ॥ बव्हल्पंवास्वगृह्योक्तंयस्यकर्मप्रकीर्तितं ॥ तस्यतावतिशास्त्रार्थेकृतेसर्वंकृ
तंभवेदिति ॥पुण्याहवाचनंऋद्धौपूर्तौच॥ कात्यायनः ॥ ऋद्धिश्चैवतुसंस्काराविवाहां
ताःप्रकीर्तिताः॥प्रतिष्ठोद्यापनादीनिपूर्तकर्मयथोदितमिति॥ तच्चकारिकायां॥स्वस्ति
वाचनमत्रेष्टंगृह्यकर्मादिकेषुच ॥ आचार्येणापिशास्त्रेऽस्मिन्मंगलार्थमुदीर्यते ॥ १ ॥
क्रमेणकलशंस्थाप्यपूर्णपात्रांतसर्वशः ॥ वरुणंतत्रसंपूज्यगंगाद्यावाहनादिकं ॥ २ ॥
अर्चिताब्राह्मणाःसम्यग्गंधतांबूलदक्षिणाः ॥ तिष्ठेयुर्ब्राह्मणायुग्मावक्तारोदर्भपाण
यः ॥ ३ ॥ तिष्ठेद्वाचयितातेषांदक्षिणस्थउदङ्मुखः ॥ अवनीगतजानुभ्यांततोमुकु

लपद्मवत् ॥ ४ ॥ अंजलिंशिरस्याधायप्रणमेत्त्रिःपुनःपुनः ॥ हस्तेकलशमृत्धृत्यनमे
त्त्रीणिपदानिच ॥ ५ ॥ अथवाचयितुंबाहुंदक्षिणांगसमाश्रितः॥ मनइत्यादिरूपेण
एकाग्रमितिचादिशेत् ॥ ६ ॥ मनसःस्मइतिब्रूयुस्तेसमाहितपूर्वकाः ॥ प्रसीदंत्विति
कर्तारःप्रसन्नाःस्मइतिद्विजाः ॥७॥ शांतिरस्त्वितिविघ्नांताःशब्दाःपंचदशैवतु ॥ अ
स्तुवाक्यंद्विजमुखाच्छ्रावयित्वातथापरैः ॥ ८॥ षड्वाक्यानिअस्त्वितिचइतरैरेकविं
शतिः॥प्रीयतांवाक्यपठितैरुदकस्यनिषेचनं ॥ ९ ॥ ततःषड्वाक्यपठितैर्बहिरापोनि
षेचनं ॥ अंतेदशशुभंवाक्यंनिकामेतिततोजपः ॥ १० ॥ शुक्रादयोग्रहाश्चैकंभगवां
ह्यभिषेचनं ॥ उदकस्यप्रकुर्वीतपुण्याहंवाचयेत्ततः ॥ ११ ॥ पुण्याहादित्रिरभ्यास
मंत्रमध्योर्ध्वनिःस्वनैः ॥ पुण्यंकल्याणमृद्धिश्चस्वस्तिःश्रीत्यादिपंचकं ॥ १२ ॥ प्र
णवाद्यंत्रिराचष्टेभवत्पूर्वंभवन्त्विति ॥ प्रत्युक्तविषयेप्रेषास्त्रिवारंस्वस्तिरित्यतः॥१३॥

वारुणैःपावमानीयैरभिषिच्यसपत्निकं ॥ नीराजनंततःकुर्यादंतेकर्मेश्वरार्पणमिति ॥१४॥ ॥ अथपुण्याहवाचनेआदौअपांपतिकलशपूजनेअव्रणःशुद्धकलशोग्राह्यः ॥ कलशलक्षणंपरिभाषायामुक्तं ॥ ॥ अथपुण्याहवाचनप्रयोगः ॥ ॥ महीद्यौरितिभूमिंस्पृष्ट्वा[१] ॥ ॐ महीद्यौःपृथिवीचनऽइमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ १ ॥ ओषधयःसमितियवान्क्षिप्त्वा ॥ ॐ ओषधयःसमवदन्तसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तꣳराजन्पारयामसि ॥ १ ॥ आजिघ्रकलशंस्थापयेत् ॥ ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः ॥ पुनरूर्ज्जानिवर्तस्वसानःसहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः ॥ १ ॥ वरुणस्योत्तंभनमितिजलंपूरयेत् ॥ ॐ वरुं

---

[१] टीप- भूमिपूजनमुक्तं परशुरामकारिकायां ॥

णस्यो॒त्तम्भ॑नमसि॒वरु॑णस्यस्कंभ॒सर्ज्ज॑नीस्थो॒वरु॑णस्यऽऋत॒सद॑न्न्य॒सि॒वरु॑णस्यऽऋत॒
सद॑न॒मासी॑द ॥ १ ॥त्वांगंधर्वाइतिगंधंप्रक्षिपेत् ॥ ॐ त्वाङ्ग॑न्ध॒र्वाऽअ॑खनं॒॰ ॥ १ ॥
याओषधीरितिसर्वौषधीः॥ॐयाऽओष॑धी॒ःपूर्वा॑जा॒तादे॒वेभ्य॑स्त्रियु॒गम्पु॒रा ॥ मनै॒नुब॒भ्रु
णा॑म॒हꣳ श॒तन्धामा॑निस॒प्तच॑ ॥१॥ कांडात्कांडादितिदूर्वाः ॥ॐ काण्डा॑त्काण्डात्प्र॒रो
ह॑न्ती॒॰ ॥ १ ॥ अश्वत्थेवेतिपंचपल्लवान् ॥ ॐ अ॒श्व॒त्थेवो॑नि॒षद॑नम्प॒र्णेवो॑वस॒तिष्कृ॒
ता ॥ गो॒भा॒यऽइत्किला॑सथ॒यत्स॒नव॑थ॒पूरु॑षम् ॥ १ ॥ स्योनापृथिवीतिसप्तमृदः ॥ ॐ
स्यो॒नापृ॑थिविनोभवानृक्ष॒रानि॒वेश॑नी ॥ यच्छा॑न॒ः शर्म्म॑स॒प्प्रथा॑ः ॥ १ ॥ याःफलिनी
रितिफलं ॥ ॐ याः॒फ॒लिनी॒र्या॑ऽअ॑फ॒ला॰ ॥ १ ॥ परिवाजपतिरितिपंचरत्नानि ॥ ॐ

परिवाजंपतिः कविरग्निर्हव्यान्यंक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ १ ॥ हिरण्यगर्भेति
हिरण्यं ॥ ॐ हिरण्यगर्भःसम॰ ॥ १ ॥ सुवासुवासाइतिरक्तसूत्रेणवेष्टयेत् ॥ ॐ सुवा
सुवासाःपरि॰ ॥ पूर्णादर्वीतिपूर्णपात्रमुपरिन्यसेत् ॥ ॐ पूर्णादर्विपरापतसुपूर्णापुन
रापंत ॥ वस्नेवविक्रीणावहाऽइषमूर्ज्जꣳशतक्रतो ॥ १ ॥ तत्वायामीतिवरुणमावाह्य ॥
ॐ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेह
बोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ १ ॥ वरुणंसांगंसपरिवारं आवाहयामि ॥ ॐ
भूर्भुवःस्वःअपांपतिवरुणायनमइतिमंत्रेणषोडशोपचारैः संपूजयेत् ॥ ॥ ततोगंगा
द्यावाहनं ॥ ॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुममशांत्यर्थंदुरित

क्षयकारकाः ॥ १ ॥ ॥ ततःकलशाभिमंत्रणं ॥ ॥ कलशस्यमुखेविष्णुः कंठेरुद्रःसमाश्रितः ॥ मूलेंतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ १ ॥ कुक्षौतुसागराःसप्तसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ ३ ॥ ॥ प्रार्थना ॥ ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं ॥ १ ॥ त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः ॥ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ २ ॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ॥ आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ॥ ३ ॥ त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः ॥ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव ॥ ४ ॥ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा ॥ ५ ॥ नमोनमस्तेस्फटिकप्रभायसुश्वेतहारायसुमं

---

१ स्पृशन्त्वनामिकाग्रेणक्वचिदालोकयन्नपि ॥ अनमंत्रणंसर्वत्रसदैवमनुमंत्रयेदितिदेवयाज्ञिकः ॥

गलाय ॥ सुपाशहस्तायझषासनायजलाधिनाथायनमोनमस्ते ॥ १ ॥ पाशपाणेनमस्तुभ्यंपद्मिनीजीवनायक ॥ पुण्याहवाचनंयावत्तावत्त्वंसन्निधौभव ॥ १ ॥ ॥ इतिप्रार्थना ॥ ॥ अथपुण्याहवाचनं ॥ ॥ अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायानंतरंदक्षिणेनपाणिनास्वर्णपूर्णकलशं[१]धारयित्वादीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिच ॥ ॐ त्रीणिंपदाविचंक्रमेविष्णुर्गोपाऽअदाभ्यः ॥ अतोधर्माणिधारयन् ॥ १ ॥ तेनायुःप्रमाणेनपुण्यंपुण्याहंदीर्घमायुरस्त्वितिभवंतोब्रुवंतुइतियजमानः ॥ पुण्यंपुण्याहंदीर्घमायुरस्त्वितिद्विजाः ॥ ॥ एवंसर्वत्रयजमानवच

---

[१] कलशधारणं आचार्यकर्तृकंधारयित्वेत्युक्तत्वात् ॥ आचार्यउदकुंभंतंधारयेत्तदनंतरमितिपरशुरामकारिकोक्तेश्च ॥

नोत्तरंब्राह्मणाःप्रतिवचनंदद्युः ॥ ब्राह्मणानांहस्तेसुप्रोक्षितमस्तु ॥ शिवा आपःसंतु॥ ॐ संतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यं ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टंच ॥ गंधाःपांतुसौमंगल्यंचास्त्वितिभवंतोब्रुवंतु ॥ ॐ गंधाःपांतुसौमंगल्यंचास्तु ॥ एवंसर्वत्र ॥ अक्षताःपांतु आयुष्यमस्त्वि० ॥ ॐ अक्षताःपांतुआयुष्यमस्तु ॥ पुष्पाणिपांतुसौश्रियमस्त्वि० ॥ ॐ पुष्पाणिपांतुसौश्रियमस्तु ॥ तांबूलानिपांतुऐश्वर्यमस्त्वि० ॥ ॐ तांबूलानिपांतुऐश्वर्यमस्तु ॥ दक्षिणाःपांतुबहुधनमस्त्वि०॥ ॐ दक्षिणाःपांतुबहुधनमस्तु ॥ पुनरत्राःपांतुस्वर्चितमस्त्वि०॥पुनरत्राःपांतुस्वर्चितमस्तु ॥ यजमानआचार्यादीन्प्रणम्यश्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्त्वितिभवंतोब्रुवंतुइतिवदेत् ॥ तेचश्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचा

---

१ शिवाआपःसन्त्वित्यादिश्लोकामंत्राश्वदर्पणे उक्तास्तथापोदानींतनानामपाठदर्शनान्नात्रलिखिताः ॥

स्तुइत्युक्त्वादीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्त्वितियजमानंमूर्द्धन्यभिषिंचेयुः ॥
यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तंतेतमहमोंकारमादिंकृ
त्वाऋग्यजुःसामाशीर्वचनंबह्वृषिमतंसमनुज्ञातंभवद्भिरनुज्ञातः पुण्यंपुण्याहंवाच
यिष्ये ॥ ॥ ॐ वाच्यतां ॥ ॥ ब्राह्मणानांहस्तेष्वक्षतान्दद्यात्तेचाशिषोदद्युः ॥ ॥ ॐ
भद्रङ्कर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभि
र्व्यशेमहिदेवहितंयदायुः ॥१॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाꣳरातिरभिनो
निवर्त्तताम् ॥ देवानाꣳसख्यमुपसेदिमावयन्देवानऽआयुःप्रतिरन्तुजीवसे ॥२॥ न
तद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजःप्रथमजꣳह्येतत् ॥ योबिभर्तिदाक्षायण

---

१ प्रत्यृचंऋध्यंतामितिद्विजावदेयुः इतिप्रयोगरत्नेगदाधरेच ॥

ꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुःसमनुष्येषुकृणुतेदीर्घमायुः ॥३॥ दीर्घायुस्तऽओ
षधेखनितायस्मैचत्वाखनाम्यहम् ॥ अथोत्वन्दीर्घायुर्भूत्वाशतवल्शाविरोहतात् ॥
॥ १॥ द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्यप्रियंसत् ॥ द्रविणोदावीरवती
मिशन्नोद्रविणोदारासतेदीर्घमायुः ॥ १ ॥ सवितापश्चातात्सवितापुरस्तात्सवितोत्त
रात्तात्सविताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितानोरासतान्दीर्घमायुः ॥२॥
नवोनवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रं ॥ भागन्देवेभ्योविदधात्यायन्प्रचंद्र
मास्तिरतेदीर्घमायुः ॥ १२॥ उच्चादिविदक्षिणावन्तोऽअस्थुर्येऽअश्वदाःसहतेसूर्येण॥
हिरण्यदस्यंतत्पुतत्वंभजन्तेवासोदाः सोमप्रतिरन्तआयुः॥ ॥ इत्याशीर्वादः ॥ ॥ व्र
तजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानांसर्वेषांब्राह्मणानांमनःसमाधी

यतां ॥ इतियजमानः ॥ समाहितमनसःस्मः ॥ इतिद्विजाः ॥ प्रसीदंतुभवंतः ॥ इति
यजमान्सेवंमद्र् ॥ प्रसन्नाः स्मइतिद्विजाब्रूयुः ॥ ततोयजमानोब्रूयात् ॥ ॥ ॥
ॐ शांतिरस्तु ॥ अस्त्वितिद्विजाःप्रतिवचनंसर्वत्रदद्युः ॥ ॐ पुष्टिरस्तु ॥ ॐ तुष्टिर
स्तु ॥ ॐ वृद्धिरस्तु ॥ ॐ अविघ्नमस्तु ॥ ॐ आयुष्यमस्तु ॥ ॐ आरोग्यमस्तु ॥
ॐ शिवंकर्मास्तु ॥ ॐ कर्मसमृद्धिरस्तु ॥ ॐ वेदसमृद्धिरस्तु ॥ ॐ शास्त्रसमृ
द्धिरस्तु ॥ ॐ धनधान्यसमृद्धिरस्तु ॥ ॐ पुत्रपौत्रसमृद्धिरस्तु ॥ ॐ इष्टसंपद
स्तु ॥ ॐ अरिष्टनिरसनमस्तु ॥ १५ ॥ ॐ यत्पापंरोगंअशुभंअकल्यांणतद्दूरेप्र

---

१ यद्यपिशौनकेनशांतिरस्त्वित्यादीनिपंचदशवचनान्युक्तानि तथापिप्रयोगरत्नादावधिकान्यपिदृश्यंतेतदनुसारेणात्रलिखितानि ॥ २ अस्त्वितिसमयेपात्रमध्येजलमोचनंकार्यमित्युक्तंप्रयोगचूडामणौ पात्रेमुंचन्निति ॥ ३ अरिष्टांबुनिरसनंद्विवारंपश्चिमेत्युक्तंप्रयोगचूडामणौ ॥

तिहतमस्तु ॥ ॐ यच्छ्रेयस्तदस्तु ॥ ॐ उत्तरेकर्मविघ्नमस्तु ॥ ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ ॐ उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंतां ॥ ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ॥ ६ ॥ उदकसेकः ॥ ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंताम् ॥ ॐ तिथिकरणेसमुहूर्तेसनक्षत्रेसग्रहेसाधिदेवतेप्रीयेतां ॥ ॐ दुर्गापांचाल्यौप्रीयेतां ॥ ॐ अग्निपुरोगाविश्वेदेवाःप्रीयंतां ॥ ॐ इंद्रपुरोगामरुद्गणाःप्रीयंतां ॥ ॐ माहेश्वरीपुरोगाउमामातरःप्रीयंतां ॥ ॐ अरुंधतीपुरोगाएकपत्न्यःप्रीयंतां ॥ ॐ विष्णुपुरोगाःसर्वेदेवाःप्रीयंतां ॥ ॐ ब्रह्मपुरोगाःसर्वेवेदाःप्रीयंतां ॥ ॐ ब्रह्मचब्राह्मणाश्चप्रीयंतां ॥ ॐ श्रीसरस्वत्यौप्रीयेतां ॥ ॐ श्रद्धामेधेप्रीयेतां ॥ ॐ भग यतत कात्यायनीप्रीयतां ॥ ॐ भगवतीमाहेश्वरीप्रीयतां ॥ ॐ भगवतीऋद्धिकरीप्रीयतां ॥ ॐ भगवतीसिद्धिकरीप्रीयतां ॥ ॐ भगवतीपुष्टिकरीप्रीयतां ॥ ॐ भ

गवतीतुष्टिकरीप्रीयतां ॥ ॐ भगवंतौविघ्नविनायकौप्रीयेतां ॥ ॐ सर्वाःकुलदेवताःप्रीयंतां ॥ सर्वाग्रामदेवताःप्रीयंतां ॥ २१ ॥ ॐ हताश्चब्रह्मद्विषः ॥ ॐ हताश्चपरिपंथिनः ॥ ॐ हताश्चविघ्नकर्तारःशत्रवःपराभवंयांतु ॥ ॐ शाम्यंतुघोराणि ॥ ॐ शाम्यंतुपापानि ॥ ॐ शाम्यंत्वीतयः ॥ ६ ॥ ॥ ॐ शुभानिवर्द्धंतां ॥ ॐ शिवाआपःसंतु ॥ ॐ शिवाऋतवःसंतु ॥ ॐ शिवाओषधयःसंतु ॥ ॐ शिवानद्यःसंतु ॥ ॐ शिवागिरयःसंतु ॥ ॐ शिवाअतिथयःसंतु ॥ ॐ शिवाअग्नयःसंतु ॥ ॐ शिवाआहुतयःसंतु ॥ ॐ अहोरात्रेशिवेस्यातां॥ ॐ निकामेनिकामेनꣳपर्ज्जन्योवर्षतुफलवत्त्योनऽओषधयꣳपच्यन्तांयोगक्षेमोनꣳकल्पताम्॥ १॥ ॐ निकामेनिकामेनꣳपर्ज्जन्योवर्षत्वितिनिकामेनि

---

१ हताश्चब्रह्मद्विषेत्यादीनांशाम्यंत्वित्यंतानांपूर्वस्यांजलप्रक्षेपउक्तः प्रयोगचूडामणौ ॥

कामेवैतत्रपर्ज्जन्योवर्षतियत्रैतेनयज्ञेनयजन्तेफलवत्योनऽओषधयःपच्यन्तामितिफलवत्योतु ॥ ॐधयःपच्यन्तेयत्रैतेनयज्ञेनयजन्तेयोगक्षेमोनःकल्पतामितियोगक्षेमोवैतत्रकल्पतेयत्रैतेनयज्ञेनयजन्तेतस्माद्यत्रैतेनयज्ञेनयजन्तेक्लृप्तःप्रजानांयोगक्षेमो भवति ॥ १ ॥ ॥ ॐ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां ॥ ॐ भगवान्नारायणःप्रीयतां ॥ ॐ भगवान्पर्जन्यःप्रीयतांॐ भगवान्स्वामीमहासेनःप्रीयतां ॥ॐ पुण्याहकालान्वाचयिष्ये॥ इतियजमानः ॥ ॐ वाच्यतां ॥ इतिप्रतिवचनं ॥ ब्राह्म्यंपुण्यंमहद्यच्चसृष्ट्युत्पादनकारकं ॥ वेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः ॥ १॥ भोब्राह्मणाःमह्यंसकुटुंबिनेमहाजनान्नमस्कुर्वाणा

---

१ अत्रगदाधरप्रयोगरत्नादौउदगातेवशकुनेत्यादयोमंत्राउक्तास्तथापिप्रयोगदर्पणानुसारेणात्रलिखिताः ॥

य आशीर्वचनमपेक्षमाणायमयाक्रियमाणस्यसग्रहमखरजोदर्शनशांतिपूर्वकगर्भाधानाख्यस्यकर्मणःपुण्याहंभवंतोब्रुवंतु ॥ ॐ पुण्याहं ॥ एवंवचनंप्रतिवचनंचत्रिःपठित्वा ॥ ॥ अथवाममपुत्रस्यवाकन्यायाश्चअमुकसंस्काराख्यस्यकर्मणः ॥ अथवापुत्रस्यवाकन्यायाश्चश्वःकरिष्यमाणविवाहांगभूतस्यअद्यदैवतप्रतिष्ठाग्रहशांत्याख्यस्यकर्मणः ॥ एवंयथोक्तकर्मण्यूहः ॥ ॥ ॐ पुनंतुमादेवजनाःपुनन्तुमनंसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदꣳपुनीहिमा ॥ १॥ ॐ सयꣳकामयेतमहत्प्राप्नुयामित्युदगयनुऽआपूर्यमाणपक्षेपुण्याहेद्वादशाहमुपसद्व्रतीभूत्वौदुंबरेकꣳसेचमसेवासर्वौषधम्फलानिगक्षंभम्भृत्यपरिसमुह्यपरिलिप्याग्निमुपसमाधायावृताज्यꣳसँस्कृत्यपुꣳसानक्षत्रेणमन्थꣳसन्नीयजुहोति ॥ १ ॥ पृथिव्यामुद्धृतायांतुयत्कल्याणंपुराकृतं ॥ ऋ

षिभिः सिद्धगंधर्वैस्तत्कल्याणंब्रुवंतुनः ॥ १ ॥ भोब्राह्मणाःमया॰कर्मणःकल्याणंभ
वंतोब्रुवंतु ॥ ॐ कल्याणं ॥ ३ ॥ ॐ यथेमाँवाचंङ्कल्याणीमावदानिजनैभ्यः ॥ ब्रह्म
राजन्याभ्याꣳशूद्रायचार्यायचस्वायचारंणायच ॥ प्रियोदेवानांदक्षिणायैदातुरिह
भूयासमयम्मेकामःसमृध्यतामुपमादोनमतु ॥ १ ॥ अथाध्वर्योःप्रतिगरोरात्सुरिमे
यजमानाभद्रमेभ्योयजमानेभ्योभूदितिकल्याणमेवैतन्मानुष्यैवाचोवदति ॥ १ ॥
सागरस्ययथावृद्धिर्महालक्ष्म्यादिभिःकृता ॥ संपूर्णासुप्रभावाचतांचऋद्धिंब्रुवंतुनः ॥
॥१॥ भोब्राह्मणाःमयाक्रिय॰कर्मणःऋद्धिंभवंतोब्रुवंतु ॥ ॐ ऋध्यतां॥३॥ॐसत्रस्यऽ
ऋद्धिरस[illegible]ज्योतिरमृताऽअभूम॥ दिवंम्पृथिव्याऽअध्यारुहामाविदामदेवान्त्स्व
ज्योतिः [illegible]॥ ॐ ऽतउत्तरस्यहविर्धानस्यजघन्यायाङ्कवर्याꣳसामाभिगायन्ति

सत्रस्यऽऋर्द्धिवचनाइतिऋद्धिमेवैतदभ्युत्तिष्ठंत्युत्तरवेदेर्वौत्तरायाꣳश्रोणावितरंतुकृतुतरम् ॥ स्वास्त्यस्तुयाविनाशाख्यापुण्यकल्याणवृद्धिदा ॥ विनायकप्रियानित्यंतांचस्वस्तिंब्रुवंतुनः ॥ १ ॥ भोब्राह्मणाकर्मणेस्वास्तिंभ० ॥ ॐ स्वस्ति ॥ ३ ॥ ॐ स्वस्तिनइंद्रोवृद्धश्रवाꣳस्वस्तिनꣳपूषाविश्ववेदाꣳ ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिꣳस्वस्तिनोबृहस्पतिर्दधातु ॥ १ ॥ गातुंयज्ञायगातुंयज्ञपतयऽइतिगातुꣳह्येषयज्ञायेच्छतिगातुंयज्ञपतयेषोयज्ञस्यसꣳस्थान्दैवीस्वस्तिरस्तुनꣳस्वस्तिर्मानुषेभ्यऽइतिस्वस्तिनोदेवत्रास्तुस्वस्तिर्मानुष्यत्रेत्येवैतदाहोर्ध्वंजिगातुभेषजमित्यूर्ध्वोनोयंयज्ञोदेवलोकन्यजत्वित्येवैतदाहशन्नोऽअस्तुद्विपदेशञ्चतुष्पदऽइत्येतावद्वाऽइदꣳसर्वंयावद्द्विपाच्चैवच

तुष्पाच्चतस्माऽएवैतद्यज्ञस्यसꣳस्थांगत्वाशंकरोतितस्मादाहशन्नोऽअस्तुद्विपदेशञ्चतुष्पदे ॥ १ ॥ समुद्रमथनाज्जाताजगदानंदकारिका ॥ हरिप्रियाचमांगल्यातांश्रियंचब्रुवंतुनः॥ १॥भोब्राह्मणाःमयाकृतस्यकर्मणःश्रीरस्त्वितिभवंतोब्रुवंतु ॥ अस्तुश्रीः॥ ३ ॥ ॐ श्रीश्चंतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौ०व्यात्तम्॥ इष्णन्निषाणामुम्मंऽइषाणसर्वलोकम्मंऽइषाण ॥ ४ ॥ तेनोहततईजेदक्षꣳपार्वतस्तऽइमेप्येतर्हिदाक्षायणाराज्यमिवैवप्राप्ताराज्यमिहवैवप्राप्नोतियऽएवंविद्वानेतेनयज्ञेनयजन्तेतस्माद्वाऽएतेनयजेतसवाऽएकैकऽएवानूचीनाहंपुरोडाशोभवत्येतेनोहास्यासपत्नमनन्य[illegible]धाश्रीर्भवति ॥ ५ ॥ ॥ अस्मिन्पुण्याहवाचनेन्यूनातिरिक्तोयो

विधिःसद्रूपवचनं ब्राह्मणानांवचनात्श्रीमहागणपतिप्रसादाच्चसर्वः परिपूर्णोस्तु ॥ ॐ अस्तुपरिपूर्णः ॥ ॥ अथाभिषेकः ॥ ॥ अभिषेकेपत्नीवामतः ॥ एकस्मिन्कलशेवरुणोदकंगृहीत्वाऽविधुराश्चत्वारोब्राह्मणादूर्वाम्रपल्लवैर्यजमानमभिषिंचेयुः ॥ ॥ तत्रमंत्राः ॥ ॐ पयःपृथिव्यां० ॥ १ ॥ पञ्चनद्य० ॥ २ ॥ वरुणस्योत्तं० ॥ ३ ॥ पुनंतुमा०॥ ४ ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॥ सरस्वत्यैवाचोयन्तुर्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिंञ्चाम्यसौ ॥ ६ ॥ देवस्यत्वा० ॥ सरस्वत्त्यैवाचोयन्तुर्यन्त्रेणाग्नेःसाम्राज्येनाभिषिङ्चामि ॥ ७ ॥ देवस्यत्वा० ॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंञ्चामिसरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिंञ्चामि ॥ ८ ॥ विश्वा

निदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रंतन्नऽआसुव ॥ ९ ॥ धामच्छदग्निरिन्द्रोब्रह्मा
देवोबृहस्पतिः ॥ सचेतसोविश्वेदेवायज्ञम्प्रावन्तुनःशुभे ॥ १० ॥ त्वँयविष्ठदाशुषो
नॄँःपाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥ ११ ॥ अन्नपतेन्नस्यनोधेह्यनमीवस्य
शुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्जन्नोधेहिद्विपदेशंचतुष्पदे ॥ १२ ॥ ॐ पालाशंभ
वति ॥ तेनब्राह्मणोभिषिंचतिब्रह्मवैपलाशोब्रह्मणैवैनमेतदभिषिंचति ॥ १ ॥ औदुं
बरंभवति ॥ तेनस्वोभिषिंचत्यन्नंवाऽउदुंबरउर्ग्वैस्वंयावद्वैपुरुषस्यस्वंभवतिनैवताव
दशनायतितेनोर्क्स्वंतस्मादौदुंबरेणस्वोभिषिंचति ॥ २ ॥ नैयग्रोधपादंभवति ॥ ते
नमित्रोराजन्योभिषिंचतिपद्भिर्वैन्यग्रोधःप्रतिष्ठितोमित्रेणवैराजन्यःप्रतिष्ठितस्त

स्मा॒न्नै॒य्यग्रोध[illegible]नामि॒त्रो॒राजन्यो॒भि॒षिंचति ॥ ३ ॥ आ॒श्वत्थंभवति ॥ ते॒नवै॒श्यो
भि॒षिंचतिसय॒द्दे॒वा॒दोश्वत्थेति॒ष्ठतऽइन्द्रोमरु॒तऽउपा॒मंत्रयतेत॒स्मादा॒श्वत्थेनवै॒श्यो
भि॒षिंचति ॥ ४ ॥ य॒द्देवक॒ल्पान्जुहोति ॥ प्राणावैक॒ल्पाऽअमृतम॒वै॒प्राणाऽअमृते॒नै॒
वैनमेत॒दभि॒षिंचति ॥ ५ ॥ स॒र्वेषांवा॒ऽएषवे॒दानाꣳर॒सोयत्सा॒मस॒र्वेषामेवैनमेतद्वे॒दा
नाꣳ र॒सेनाभिषिंचति ॥ ६ ॥ ॐ द्यौःशांतिर॒न्त० ॥ १ ॥ यतोयतꣳस॒मीहसे॒० ॥ २॥
अमृताभिषेकोस्तु ॥ ॥ शांतिःशांतिःशांतिः ॥ सुशांतिर्भवतु ॥ ॥ ततःपुत्रवती
भिर्वृद्धसुवासिनीभिर्नीराजनंकार्यं ॥ ॐ अनाधृष्टापुरस्ताद॒ग्नेराधिपत्य॒ऽआयुर्म्मेदाꣳ
पुत्रवंतीदक्षिण॒तऽइन्द्र॒स्याधिपत्येप्र॒जाम्मेदाꣳसु॒खदांप॒श्चाद्दे॒वस्यंसवि॒तुराधिपत्ये॒च

क्षुम्मेंदाऽआश्रुतिरुत्तरतोधातुराधिंपत्येरायस्पोषम्मेदाः ॥ विधृंतिरुपरिष्टाद्बृहस्पतेराधिंपत्येऽओजोमेदाविश्वाभ्योमानाष्ट्राभ्यंस्पाहिमनोरश्वासिं ॥ १ ॥ इतिमंत्रेण ॥ ॥ अनेनपुण्याहवाचनेनश्रीप्रजापतिःप्रीयतां ॥ ॥ अथमातृकापूजनं ॥ ॥ तत्रायंक्रमः ॥ अंविघ्नोमंडपश्चैवमातॄणांपूजनंसकृत् ॥ वैश्वदेवंवसोर्द्धारानांदीश्राद्धमतःपरं ॥ १ ॥ ॥ अविघ्नपूजनात्पूर्वंवैश्वदेवंविधायच ॥ ॥ ततोगोधूमादिधान्यपूरितेहरिद्रादिरंजितेमृन्मयेअविघ्नाख्यकलशेमोदादिषड्विनायकमातॄणांप्रतिमाःकुंकुमेनालिखित्वावाहयेत् ॥ तद्यथा ॥ मोदश्चैवप्रमोदश्चसुमुखोदुर्मुखस्तथा ॥ अविघ्नोविघ्नकर्ताच षडेतेविघ्ननायकाः ॥ १ ॥ ॐमोदायनमःमोदंआवाहयामि ॥ १ ॥

टीप १ प्रयोगरत्नेनदिन्यादिस्थापनोत्तरमविघ्नपूजनं तंत्रणैवोक्तं ॥

ॐ प्रमोदाय॰प्रमोदं॰॥२॥ ॐ सुमुखाय॰सुमुखं॰॥३ ॥ॐ दुर्मुखाय॰दुर्मुखं॰ ॥४॥ ॐ अविघ्नाय॰अविघ्नं॰ ॥५॥ ॐ विघ्नकर्त्रे॰विघ्नकर्तारं॰॥६॥ मनोजूतिरितिप्रतिष्ठाप्य षोडशोपचारैःसंपूजयेत्॥ ॐभूर्भुवःस्वःमोदादिषड्विनायकाःसुप्रतिष्ठावरदाभवंतु॥ॐमोदादिषड्विनायकेभ्योनमइतिनाममंत्रेण आवाहनादिपुष्पांजलिपर्यंतंपूजनंकार्यं ॥ अनयापूजयामोदादिषड्विनायकाःप्रीयंतां॥ ततःस्तंभरोपणादिकटावरणद्वारफलकांतसंपादितमंडपेमंडपमातृकाःस्थापयेदित्येके ॥ ॥ ततःआचार्यहस्तेसुप्रोक्षितादिकंकार्यं॥ अत्राःपांतुसुप्रोक्षितमस्त्वितिभवंतो ब्रुवंतु॥ ॐ अत्राःपांतुसुप्रोक्षितमस्तु ॥ गंधाःपांतुसौमंगल्यंचास्त्वितिभ॰ ॥ ॐ गंधाःपांतुसौमंगल्यंचास्तु॥ ॐअक्षताःपांतुआयुष्यमस्त्वितिभ॰॥ॐअक्षताःपांतुआयुष्यमस्तु॥ॐपुष्पाणिपांतुसौश्रियमस्त्वितिभ॰॥ॐपुष्पाणिपांतुसौश्रियमस्तु॥ॐ तांबूलानिपांतुऐश्वर्यमस्त्वि

तिभ० ॥ ॐ तांबूलानिपांतुऐश्वर्यमस्तु ॥ दक्षिणाःपांतुबहुधनमास्त्वितिभ० ॥ ॐ
दक्षिणाःपांतुबहुधनमस्तु ॥ अपूपाःपांतुबह्वन्नंचास्त्वितिभ० ॥ ॐ अपूपाःपांतुबह्व
न्नंचास्तु ॥ शाखादूर्वाःपांतुवृद्धिरस्त्वितिभ० ॥ ॐ शाखादूर्वाःपांतुशाखापल्लवानां
वृद्धिश्चास्तु ॥ ॥ ततआचार्येणदूर्वाशम्याम्रादिप्रशस्तवृक्षपत्राणांरक्तसूत्रेणपंचधावे
ष्टनंकार्यं ॥ आसांमंडपमातृसंज्ञाताश्चमंडपमातृमंडपेवावंशपात्रेस्थापयित्वा ॥ व
सोःपवित्रमितिमंत्रेण यजमानपत्न्याशाखासुतैलारोपणंकार्यं ॥ ॐ वसोःपवित्रम
सिशतधारंवसोःपवित्रमसिसहस्रधारम् ॥ देवस्त्वासवितापुनातुवसोःपवित्रेणशत
धारेणसुप्वाकामधुक्षः ॥ १ ॥ अहिरिवभोगैरितिशाखासुहरिद्राकुंकुमादिसुगंधिद्र
व्येणोद्वर्तशपद ॐ अहिरिवभोगैः० ॥ १ ॥ निकामेनिकामेतिउष्णोदकेनशाखास्नप

नं ॥ ॐ धि०ऽप्रमेनिकामेनः० ॥ १ ॥ दधिक्रा०ण्णेतिशाखासुदध्यक्षतावंदनं ॥ ॐ दधिक्राघ्राय०अ०॥१॥याओषधीरितियजमानहस्तेशाखाग्रहणं ॥ ॐ याओषधीः ॥ ॥ १ ॥ ततोयजमानपत्न्याहस्तेशस्त्रगर्भांपंचमींशाखांगृहीत्वाकांडात्कांडादितिकंडनंकार्यं ॥ ॐ कांडात्कांडात्प्ररोहन्ती० ॥ १ ॥ ततआग्नेयादिचतुर्षुमंडपकोणस्तंभेषुक्रमेणचतस्रोमध्येएकाएवंस्थिरोभवेतिस्थिरीकरणं ॥ अथवावंशपात्रमध्येचतुर्षुकोणेषुचतस्रोमध्येएकाएवंस्थिरीकरणसंप्रदायः ॥ ॐ स्थिरोभववीड्वङ्गऽआशुर्भववाज्यर्वन् ॥ पृथुर्भवसुखदस्त्वमग्नेःपुरीषवाहणः ॥ १ ॥ तत्रायंक्रमः ॥ [1]नांदिनीन

टीप १ प्रयोगरत्नेशस्त्रगर्भाभगवत्यासहषण्णांस्थापनंपूजनोत्तरतैलाभ्यंगाद्युक्तंशूर्पेमातृकास्थापनंदक्षिणात्याचारः ॥ प्रयोगरत्नादौतुशूर्पंगृहीत्वा अविघ्नघोषेणसहजलादिसमीपेगत्वाजलादिमातृकावाहनाद्युक्तं तथाप्याचारात्शूर्पेएवसर्वासांस्थापनमुक्तं ॥

लिनीमैत्राउमाचपशुवर्द्धिनी ॥ आग्नेयादिक्रमेणैवशाखास्तंभेप्रतिष्ठिताः॥ १॥ ॐनंदिन्यैनमः नंदिनींआ०॥७॥ॐ नलिन्यैनमःनलिनींआ० ॥८॥ॐ मैत्रायैनमःमैत्रांआ० ॥ ९॥ॐ उमायैनमःउमांआ०॥१०॥ॐ पशुवर्धिन्यै०॥पशुवर्धिनींआ० ॥११॥ मनोजूतिरितिप्रतिष्ठाप्यसर्वासांतंत्रेणषोडशोपचारैःपूजनं ॥ ॐ भूर्भुवःस्वःनंदिन्यादिमंडपमातृभ्योनमःआवाहनादिषोडशोपचारैःपूजयेत् ॥ अनयापूजयानंदिन्यादिमंडपमातरःप्रीयंतां ॥ ॥ ततोगौर्यादिमातरोवंशपात्रेपीतपटंप्रसार्यतदुपरिकुंकुमादिनालिखित्वाक्षतपुंजेषुपूगीफलेषुनिवेश्याः ॥ ॥ तत्रायंक्रमः ॥ गौरीपद्माशचीमेधासावित्रीविजयाजया ॥ देवसेनास्वधास्वाहामातरोलोकमातरः ॥ १ ॥ हृष्टिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवता ॥ गणेशेनाधिकाह्येतावृद्धौपूज्याश्चतुर्दश ॥ १ ॥ अत्रचतुर्दशपदसमाहारान्मातरोलोकमातर इतिसर्वासांविशेषणं ॥ ॐ गणेशायन

मः गणेशंआवाहयामि ॥ ॐ गौर्यैनमःगौरींआ॰ ॥ १२ ॥ ॐ पद्मायैनमःपद्मां
आ॰ ॥ १३ ॥ ॐ शच्यैनमःशचींआ॰ ॥ १४ ॥ ॐ मेधायैनमःमेधांआ॰ ॥ १५
॥ ॐ सावित्र्यैनमःसावित्रींअ॰ ॥१६॥ विजयायैन॰विजयां॰॥१७॥ ॐ जयायै॰ज
यांआ॰ ॥ १८ ॥ॐ देवसेनायै॰देवसेनां॰ ॥१९॥ ॐस्वधयै॰स्वधांआ॰ ॥ २० ॥ॐ
स्वाहायै॰स्वाहां॰ ॥ २१ ॥ ॐहृष्ट्यै॰हृष्टिं॰ ॥२२॥ ॐपुष्ट्यै॰पुष्टिं॰ ॥२३॥ ॐतुष्ट्यैन
मःतुष्टिं॰॥२४॥ ॐ कुलदेवतायै॰कुलदेवतां॰ ॥ २५ ॥ इत्यावाह्य ॥ अथजलमात
रः ॥ मत्सीकूर्मीचवाराहीमांडुकीमकरीतथा ॥ ग्राहकीक्रौंचकीचैवसप्तैताजलमात
रः ॥ १ ॥ कांस्येवाताम्रपात्रेवाप्रभूतजलपूरणं ॥ तत्रमत्स्यादी रावाह्यपूजयेज्जल
मातृकाः ॥ २ ॥ ॐ मत्स्यैनमःमत्सींआवाह॰ ॥ २६ ॥ ॐ कूर्म्यै॰कूर्मींआ॰ ॥२७॥
ॐ वाराह्यै॰वाराहीं॰ ॥ २८ ॥ ॐ मांडूक्यैनमः ॥ मांडूकीं॰ ॥ २९ ॥ ॐ मकर्यै॰म

करीं० ॥ ३० ॥ ग्राहक्यै०ग्राहकीं० ॥ ३१ ॥ ॐ क्रौंचक्यैनमःक्रौंचकीं० ॥ ३२ ॥
इत्यावाह्य ॥ ॥ अथस्थलमातरः ॥ ॥ ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥
वाराहीचतथेंद्राणीचामुंडासप्तमातरः ॥ १ ॥ ॐ ब्राह्मैन०ब्राह्मीं० ॥ ३३ ॥ ॐ माहेश्वर्यैन०माहेश्वरीं० ॥ ३४ ॥ ॐ कौमार्यैन०कौमारीं० ॥ ३५ ॥ ॐ वैष्ण०यैन०वैष्णवीं०॥ ३६ ॥ ॐ वाराह्यै०वाराहीं० ॥ ३७ ॥ ॐ इंद्राण्यैनमःइंद्राणीं० ॥ ३८ ॥ ॐ चामुंडायै०चामुंडां० ॥ ३९ ॥ इत्यावाह्य ॥ एताःगौर्यादिवच्छूर्पे ॥ ॥ अथद्वारमातरः ॥ जयंतीमंगलाचैवपिंगलादक्षिणेगृहात् ॥ आनंदवर्धिनीवामेमहाकालीचनिर्गमे ॥ १ ॥ गृहस्यदक्षिणेभागेतिस्रोलेख्यास्तुमातरः ॥ वामभागेतथाद्वेचजयंत्यादिक्रमेणतु ॥ २ ॥ ॐ जयंत्यैन०जयंतीं० ॥ ४० ॥ ॐ मंगलायै०मंगलां० ॥ ४१ ॥
ॐ पिंगलायै०पिंगलां० ॥ ४२ ॥ इतिद्वारदक्षिणे ॥ ॐ आनंदवर्धिन्यै०आनंदवर्धि

नीं० ४३ ॥ ॐ महाकाल्यैनमःमहाका० ४४ ॥ इतिवामे ॥ इत्यावाह्यसंपूज्य ॥ ततो गौर्यादिवत् शूर्पेगृहमातरःस्थाप्याः ॥ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिस्तुमातरः ॥ १ ॥ ॐ कीर्त्यैनमःकीर्ति ॥ ॥ ४५ ॥ ॐ लक्ष्म्यै०लक्ष्मीं० ॥ ५६ ॥ धृत्यैनमःधृतिं० ॥ ४७ ॥ ॐ मेधायैनमःमेधां० ॥ ४८ ॥ ॐ पुष्ट्यैन०पुष्टिं० ॥ ४९ ॥ ॐ श्रद्धायैन०श्रद्धां० ॥ ५० ॥ ॐ क्रियायै०क्रियां० ॥ ५१ ॥ ॐ मत्यैन०मतिं० ॥ ५२ ॥ ॐ बुद्ध्यै०बुद्धिं० ॥ ५३ ॥ लज्जावपुषेनमःलज्जापुरावाहयामि ॥ ५४ ॥ ॐ शांत्यैनमःशांतिं० ॥ ५५ ॥ ॐ तुष्ट्यै०तुष्टिं० ॥ ५६ ॥ ॐ कांत्यै०कांतिं० ॥ ५७ ॥ इत्यावाह्य ॥ अथघृतमातरः ॥ एताःकुड्येशूर्पेवा कुंकुमाक्तेनघृतेनदक्षिणोत्तराःपूर्वाभिमुखालेख्याः ॥ श्रीर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धा सरस्वती ॥ मांगल्येषुप्रपूज्यंतेसप्तैताघृतमातरः ॥ १ ॥ ॐ श्रियैनमःश्रियं० ॥ ५८ ॥

ॐ लक्ष्म्यैन०लक्ष्मीं०॥ ५९ ॥ ॐ धृत्यै०धृतिंआ० ॥६० ॥ मेधायैनमःमेधां० ॥ ॥ ६१ ॥ ॐ पुष्ट्यै०पुष्टिं० ॥६२॥ॐ श्रद्धायै०श्रद्धांआ० ॥ ६३ ॥ ॐ सरस्वत्यै०सरस्व०आ०॥६४॥ इत्यावाह्य॥ एवंषड्विनायकादि घृतमातृकांतंचतुषष्टिमातॄणांस्थापनं॥मनोजूतिरितिमंत्रेणप्रतिष्ठाप्य ॥ सम॑ख्येदे॒व्याधि॒याइतिमंत्रेणसर्वाःषोडशोपचारैःसंपूजयेत्॥ ॐ सम॑ख्येदे॒व्याधि॒यासन्दक्षिणयो॒रु॒चक्षसा॥मामु॒ऽआयुःप्रमोषी॒मोंऽअ॒हन्तव॑वी॒रम्विदे॑य॒तव॑देवस॒न्दृशीं॥१ ततोयजमानःस्थापितमातृकंशूर्पंस्वयंगृहीत्वापत्न्याचविघ्नकलशंग्राहयित्वापत्न्यग्रतःसन्मंडपतोगृहमध्येदेवस्याग्रेतत्सर्वंस्थापयेत् ॥ तद्वामपार्श्वेदीपंनिदध्यात्॥ततःकुड्येआवाहितघृतमातॄणामुपरिनागवल्लीदलेनगुडयुक्तेनकेवलेनवाघृतेनाभितोधारांवसोःपवित्रमितिमंत्रेणपातयेत् ॥सा

चप्रत्यगादिःप्राक्संस्थादक्षिणादिरुदक्संस्थावाॐ वसोःपवित्रम् ०॥ कुड्यलग्नावसो
र्धाराःसप्तधाराघृतेनतु॥कारयेत्पंचधारावानातिन्यूनाःकदाचन ॥ १॥ अथायुष्यमं
त्रजपः ॥ ॐ आयुष्यंवर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यम्वर्च्चस्वयैत्राया
विशताद्रुमान् ॥ १ ॥ नतद्रक्षां० ॥ २ ॥ यदाबध्नं० ॥ केचित् भद्रंकर्णेत्यादिविरो
हतादित्यंतमृक्चतुष्टयंपठंति ॥ ॥ इत्यायुष्यमंत्रजपः ॥ अत्रमंडपपूजनंशिष्टाचा
रतएव ॥ मंडपस्तुविवाहेचूडाकरणेउपनयनेकेशांतेसीमंतोन्नयनेचैवकार्यइत्युक्तं॥
यत्रमंडपोनास्तितत्राविघ्नमंडपजलस्थलद्वारमातृकादीनांचाभावः ॥ तत्रगौर्या
दिचतुर्दशमातृणांस्थापनमुक्तं ॥ इतिसंस्कारभास्करेमातृकापूजनंसमाप्तं ॥ ॥
अथनांदीश्राद्धं ॥ तत्रकालः ॥ मातृश्राद्धंतुपूर्वाण्हेमध्यान्हेपैतृकंतथा ॥ ततो

मातामहानांचवृद्धौश्राद्धत्रयंस्मृतमिति हेमाद्र्यादिनिबंधेउक्तं॥ तथा॥ अलाभेभिन्नकालानांनांदीश्राद्धत्रयंबुधः ॥ पूर्वेद्युर्वैप्रकुर्वीतपूर्वाण्हेमातृपूर्वकमितिवृद्धमनुवचनं ॥ तच्चकात्यायनेनपृथङ्मातृपार्वणोहपूर्वकनवदैवतनांदीश्राद्धकरणंनिषिद्धं ॥ यथा ॥ आयुष्याणिचशांत्यर्थं जप्त्वातत्रसमाहितः॥ षड्भ्यः पितृभ्यस्तदनुश्राद्धदानमुपक्रमेत् ॥ १ ॥

॥ सूत्रेविशेषोपदेशाभावः ॥ तत्रतुनांदीमुखाः पितरः पितामहाः प्रपितामहाः सपत्नीकाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाइति षड्भ्यः पितृभ्यः पार्वणद्वयंस्पष्टं॥ तच्चसांकल्पिकविधिना ॥ सांकल्पिकेचसमंत्रकावाहनार्घाग्नौकरणपिंडदानविकिराक्षय्यस्वधावाचनप्रश्नेत्येतत्सप्तकंवर्ज्यं ॥ सांकल्पे ॥ शुभायप्रथमांतेन वृद्धौसंकल्पमाचरेत् ॥ नषष्ट्यायदिवाकुर्यान्महादोषोभिजायते ॥ अनस्मद्वृद्धिशब्दानामरूपाणामगोत्रिणां ॥ अनाम्नामतिलैश्चैव नांदी

श्राद्धंचसव्यतः॥ इतिसंग्रहे॥ कृतेनांदीमुखेमध्येनकुर्याद्वितयंपुनः ॥ राजाभिषेके कुर्वीत तथैवपुत्रजन्मनीति ॥ कृतेभ्युदयश्राद्धेतन्मातृकोत्थापनंविना॥नद्वितीयंनांदीमुखंप्रकुर्यात्पुत्रजन्मनि ॥तथैवाभ्युदयंकार्यंराज्ञः पट्टाभिषेचने ॥ अन्यथाकुरुतेमोहादपमृत्युकरंपरं ॥ पुत्रजन्मनिराजाभिषेकेचद्वितीयंनांदीश्राद्धंकुर्यात् ॥ अन्यथान ॥ मंडपोद्वासनात्पूर्वंनांदीश्राद्धेकृतेपुनः ॥ येकुर्वंतिनरामोहादपमृत्युंव्रजंतिते ॥ इतिशास्त्रार्थप्रदीपे ॥ एतन्निषेधस्त्रिपुरुषसापिंडपर्यंतमितिपुरुषार्थचिंतामणौ ॥ पुत्रजन्मनिमित्तेतुतत्कालेनिशिवादिवा ॥ भुक्तोव्रतोपवासीवावृद्धिश्राद्धंतुकारयेत् ॥ इतिरेणुकारिकायां ॥ ॥ नांदीश्राद्धंत्रिपार्वणमित्याशयेनामान्नादिपार्वणप्रयोगः शाखांतरत्वान्नात्रलिखितः ॥ ॥ अथवृद्धिश्राद्धकर्तुर्जीवत्पितृकत्वेनिर्णयः जीवेत्तुयदिवर्गाद्यस्तंवर्गंतुपरित्यजेदितिन्यायेनजीवत्पितृकः स्वापत्यसंस्कारेषुमा

तृमातामहपार्वणयुतं नादीश्राद्धंकुर्यात् ॥ मातरिजीवत्यांमातामहपार्वणमेकमेव ॥ मातामहेजीवतिमातृपार्वणमेकमेव ॥ केवलमातृपार्वणेविश्वेदेवानकार्याः ॥ वर्गत्रयाद्येषुमातृपितृमातामहेषुजीवत्सुनांदीश्राद्धलोपएवसुतसंस्कारेषूचितः ॥ द्वितीयविवाहाधानपुत्रेष्टिसोमयागादिषुस्वसंस्कारकर्मसुयेभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः ॥ तथाचमृतमातृमातामहकोपिजीवत्पितृकः स्वसंस्कारेपितुर्मातृपितामहीप्रपितामह्यः ॥ पितुः पितृपितामहप्रपितामहाः ॥ पितुर्मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः इत्येवंपार्वणत्रयमुद्दिश्यश्राद्धंकुर्यात् ॥ ननु स्वमातृमातामहपार्वणोद्देशः ॥ पितरिपितामहेचजीवतिस्वसंस्कारे पितामहस्य मातृपितामहीप्रपितामह्यइत्याद्युद्देशः ॥ एवंप्रपितामहेपियोज्यं ॥ पितुर्मात्रादिजीवनेतत्पार्वणलोपएव ॥ तथाचयेभ्यएवपितादद्यादितिपक्षस्य वर्गाद्यजीवनेतत्पार्व

णलोपइतिद्वारलोपपक्षस्यचस्वसंस्कारस्वापत्यसंस्कारभेदेनव्यवस्थासिद्धांतितेति ज्ञेयं ॥ ॥ केचित्तुपक्षद्वयस्यैच्छिकोविकल्पोनतुव्यवस्थितइत्याहुः ॥ एवंमृतपितृकस्यजीवन्मातृमातामहस्यपितुः पार्वणेनैवनांदीश्राद्धसिद्धिर्ज्ञेया ॥समावर्तनस्यमाणवककर्तृकत्वेपितदंगभूतनांदीश्राद्धेपितुस्तदभावेज्येष्ठभ्रात्रादेरधिकारइतिकेचित् ॥ तत्रपितापुत्रसमावर्तनेस्वपितृभ्योनांदीश्राद्धंकुर्यात् ॥ पिताजीवत्पितृकश्चेत्सुतसंस्कारत्वात्द्वारलोपपक्षोयुक्तइतिभाति ॥ माणवकपितुः प्रवासादिनाअसन्निधाने भ्रात्रादिर्माणवकस्यपितुर्मातृपितामहीप्रपितामह्यइत्याद्युच्चार्य श्राद्धंकुर्यात् ॥मृतपितृकमाणवकसमावर्तनेपितृव्यभ्रात्रादिरस्यमाणवकस्यमातृपितामहीप्रपितामह्य इत्याद्युच्चारयेत् ॥ भ्रात्रादेरभावेस्वयमेवस्वपितृभ्योदद्यात् ॥ एवंजीवत्पितृकोपि पितुरसन्निधानेभ्रात्रादेरभावेचपितुः पितृभ्यः स्वयमेवनांदीमुखंकुर्यात् ॥ उपनय

नेनकर्माधिकारस्य जातत्वात् ॥ एवंविवाहेपिद्रष्टव्यं ॥ मृतापितृकस्यचौलोपनयनादिकंपितृव्यमातुलादिः कुर्वन् अस्यसंस्कार्यस्यपितृपितामहप्रपितामहेत्याद्युच्चार्यश्राद्धंकुर्यात् ॥ जीवतः पितुरसन्निधानेनकुर्वन्मातुलादिरस्यसंस्कार्यस्यपितुर्जनकादीनुद्दिश्यैवकुर्यान्नतुसंस्कार्यस्यमृतानपिमात्रादीनितिसंक्षेपः ॥ ॥ अथ सांकल्पिकविधिना नांदीश्राद्धप्रयो० ॥ नांदीमुखाः सत्यवसुसंज्ञकाः विश्वेदेवाः ॐ भूर्भुवः स्वः इदंवः पाद्यंपादावनेजनं पादप्रक्षालनं वृद्धिः ॥ ॥ गोत्राः पितृपितामहप्रपितामहाः सपत्नीकाः नांदीमुखाः ॐ भूर्भुवः स्वः इदंवः पाद्यंपादावनेजनंपादप्रक्षालनं वृद्धिः ॥ ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः ॐ भूर्भुवः स्वः इदंवः पाद्यं० अद्यपूर्वोच्चारित० शांतिपूर्वकगर्भाधानांगत्वेन सांकल्पिकेनविधिना ब्राह्मणयुग्मभोजनपर्याप्तान्ननिष्क्रयी

भूतयथाशक्तिहिरण्येननांदीश्राद्धंकरिष्ये ॥ ॥ आसनदानं ॥ ॥ सत्यवसुसंज्ञकानांविश्वेषांदेवानां नांदीमुखानां ॐ भूर्भु० इदमासनं ॥ सुखासनं ॥ नांदीश्राद्धेक्षणौक्रीयेतां ॥ ॐ तथा ॥ प्राप्नुवतांभवंतौ ॥ प्राप्नुवावः ॥ ॥ गोत्राणांपितृपितामहप्रपितामहानांसपत्नीकानां नांदीमुखानां ॐ भू० इदमास० ॥ ॥ द्वितीयगोत्राणां मातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानां नांदीमुखानां ॐ भूर्भुवः० इदमास० ॥ ॥ ततोगंधादिदानं ॥ सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यो नांदीमुखेभ्यः इदंगंधाद्यर्चनंस्वाहासंपद्यतांवृद्धिः ॥ ॥ गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्योनांदीमुखेभ्यः इदंगंधा० ॥ ॥ द्वितीयगोत्रेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्योनांदीमुखेभ्यः अमीगंधाः० ॥ भोजननिष्क्रयद्र

---

१ नांदीश्राद्धेअन्नाभावे आमं आमाभावे हिरण्यंहिरण्याभावेयुग्मब्राह्मणभोजनपर्याप्तान्ननिष्क्रयीभूतंयथाशक्तिकिंचित्द्रव्यदानमितिधर्मसिंधुः ।

व्यदानं ॥ सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनांदीमुखेभ्यःब्राह्मणयुग्मभोजनपर्याप्तमन्नंतन्निष्क्रयीभूतंकिंचिद्धिरण्यं दत्तं अमृतरूपेणस्वाहासंपद्यतांवृद्धिः ॥ गोत्रेभ्यः पितृपितामहप्रपितामहेभ्यःसपत्नीकेभ्योनांदीमुखेभ्यःब्राह्मणयु० ॥ ॥ द्वितीयगोत्रेभ्योमातामहप्रमातामहवृद्धप्रमातामहेभ्यःसपत्नीकेभ्योनांदीमुखेभ्यःब्राह्म०॥ सक्षीरमुदकदानं ॥ नांदीमुखाःसत्यवसुसंज्ञकाःविश्वेदेवाः[2]प्रीयंतां॥ गोत्राःपितृपितामहप्रपितामहाःसपत्नीकाःनांदीमुखाःप्रीयंतां ॥ द्वितीयगोत्राःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःनांदीमुखाःप्रीयंतां ॥ ॥ आशिषोग्रहणं ॥ गोत्रंनोवर्द्धतां ॥ वर्द्धतांवोगोत्रं ॥ दातारोनोभिवर्धंतां ॥ अभिवर्धंतांवोदातारः ॥ वेदाश्चनोभिवर्धंतां ॥ वर्द्धंतांवोवेदाः ॥ संततिर्नोभिवर्द्धतां ॥ वर्धतांवःसंततिः ॥ श्रद्धाचनोमाव्यग

---

२ प्रीयंतामित्यत्रयवक्षीरजलानिदद्यादितिप्रयोगरत्नगदाधरौ ॥

मत् ॥ माऽव्यगमद्वःश्रद्धा ॥ बहुदेयंचनोस्तु ॥ अस्तुवोबहुदेयं ॥ अन्नंचनोबहुभवेत् ॥ भवतुवोबह्वन्नं ॥ अतिथींश्चलभामहै ॥ लभंतांवोतिथयः ॥ याचितारश्चनःसंतु ॥ संतुवोयाचितारः ॥ एताआशिषःसत्याःसंतु ॥ संत्वेताःसत्याआशिषः ॥ दक्षिणादानं ॥ सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्यो नांदीमुखेभ्यःकृतस्य नांदीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे॥ यवमूलंआर्द्रकं॥गोत्रेभ्यःपितृपितामहप्रपितामहेभ्यःसपत्नीकेभ्योनांदीमुखेभ्यःकृतस्य०॥द्वितीयगोत्रेभ्योमातामहप्रमातामह वृद्धप्रमातामहेभ्यःसपत्नीकेभ्योनांदीमुखेभ्यःकृतस्य० ॥ ॥ ततोनांदीश्राद्धंसंपन्नं ॥ सुसंपन्नं॥ वाजे वाजेतिविसृज्य॥ ॐ वाजैवाजेवतवा॒जिनोनो॒धनैषुविप्राऽअमृताऽऋतज्ञाः ॥ अ॒स्यमध्वं÷पिबतमा॒दयध्व

न्तृप्तायातपथिभिर्देवयानैः ॥ १ ॥ आमावाजस्येत्यनुव्रज्यय ॥ ॐ आमावाजंस्य
प्प्रसवोनगम्यादेमेद्यावापृथिवीविश्वरूपे ॥ आमागंतांपितरामातराचामासोमोऽअ
मृतत्वेनगम्यात् ॥ १ ॥ अस्मिन्नांदीश्राद्धेन्यूनातिरिक्तोयोविधिःसउपविष्टब्राह्मणानां
वचनातनांदीमुखप्रसादात्सर्वःपरिपूर्णोस्तु ॥ अस्तुपरिपूर्णः ॥ ॥इतिसंस्कारभास्क
रेनांदीश्राद्धं ॥ अथब्रह्माचार्यर्त्विग्वरणम् ॥आचार्यत्वंयथास्वर्गेशक्रादीनांबृहस्प
तिः ॥ तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रत ॥ १ ॥ ॐ बृहस्पतेऽअतियदर्योअर्हा
द्युमाद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणन्धेहिचित्र

---

१ टीप-आमश्राद्धेहिरण्यश्राद्धेचआमावाजंविसर्जयेदितिग्रहयज्ञकल्पवल्ल्यां ॥

म् ॥१॥ अमुकगोत्रोत्पन्नःअमुकप्रवरान्वितःअमुकशर्मायजमानोहं ॥ अमुकगोत्रोत्पन्नंअमुकप्रवरान्वितंशुक्लयजुर्वेदांतर्गतमाध्यंदिनीयशाखाध्यायिनंअमुकशर्माणंब्राह्मणंअस्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मणिआचार्यत्वेनत्वामहंवृणे॥ वृतोस्मि॥गंधादिभिःसंपूज्य॥यथाचतुर्मुखोब्रह्मासर्वलोकपितामहः॥तथात्वंममयज्ञेस्मिन्ब्रह्माभवद्विजोत्तम ॥१॥ ॐ ब्रह्मजज्ञानंप्रथमम्पुरस्ताद्विशीमतःसुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ १ ॥ अस्मिन्रजोदर्शनशांत्याख्येकर्मणिब्रह्मत्वेनत्वामहंवृणे ॥ वृतोस्मि॥वांच्छितार्थफलावाप्त्यैपूजितोसि

---

२ टीप- स्वनामगोत्रप्रवरान्संकीर्त्यब्राह्मणस्यच ॥ अस्मिन्यज्ञेमुकंदेवंत्वामहंऋत्विजंवृणे ॥ इत्युक्त्वातुफलंदद्यात्करेतत्रैवपूजनं ॥ इतिकल्पवल्ल्यां ॥

सुरासुरैः ॥ निर्विघ्नंक्रतुसंसिद्ध्यैत्वामहंगणपंवृणे ॥ १ ॥ ॥ ॐ गणानांत्वा० ॥ १ ॥ अस्मिन्रजोदर्शनशांत्याख्येकर्मणिगाणपत्येनत्वामहंवृणे ॥ वृतोस्मि ॥ कर्मणामुपदेष्टारंसर्वकर्मविदुत्तमं ॥ कर्मिणंवेदतत्वज्ञंसदस्यंत्वामहंवृणे ॥ १ ॥ ॐ सदस॒स्पतिमद्भुतंप्रि॒यमिंद्रस्यकाम्यम् ॥ स॒निम्मे॒धामयासि॒षᳪंस्वाहा ॥ १ ॥ अस्मिन्रजोदर्शनशांत्याख्येकर्मणिसदस्यत्वेनत्वामहंवृणे ॥ वृतोस्मि ॥ ततश्चतुरोष्टौवाऋत्विजोवृणुयात् ॥ यज्ञादिकर्मकार्येषुऋत्विक्शक्रमखेयथा ॥ तथायज्ञादिकर्मेस्मिन्ऋत्विक्त्वंमेमखेभव ॥ १ ॥ अस्मि० ऋत्विक्त्वेन त्वामहंवृणे ॥ वृतोस्मि ॥ ॥ ततःसूक्तजपार्थेऋग्वेदादीन्वृणुयात् ॥ ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः ॥ अ

---

१ काशीदीक्षितकृतरुद्रपद्धत्यादौगणपत्यदर्शनात् । २ सदस्यवरणं हेमाद्रिमते ॥

त्रिगोत्रस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ १ ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमम् ॥ १ ॥ अस्मिन्रजोदर्शनशांत्याख्येकर्मणिऋत्विक्त्वेनत्वामहंवृणे ॥ वृतोस्मि ॥ कातराक्षोयजुर्वेदस्त्रैष्टुभोब्रह्मदैवतः ॥ भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ १ ॥ ॐ इषेत्वोर्जेत्वावायवस्थदेवोवं÷सविताप्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ अस्मिन्रजो॰वृणे ॥ वृतोस्मि ॥ सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः ॥ काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभव ॥ १ ॥ ॐ अग्नआयाहिवीतयेगृणानोहव्यदातंये ॥ नि

होतांसुत्तिसर्बांर्हिषि ॥ १ ॥ अस्मिन्‌रजो० ॥ बृहन्नेत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः ॥ वैखानसकुलोत्पन्नोऋत्विक्त्वं० ॥ १॥ ॐ शन्नोंदेवीरभिष्टंयऽआपोंभवंतुपीतयें ॥ शंष्योरभिस्रवंतुनः ॥ १ ॥ अस्मिन्‌रजो०वृणे ॥ वृतोस्मि ॥ भगवन्मूर्तिसर्वज्ञसर्वधर्मभृतांवर ॥ विततेममयज्ञेस्मिञ्जपार्थेत्वामहंवृणे ॥ १ ॥ अस्मिन्‌रजो०रुद्रजपार्थेत्वामहं० ॥ वृतोस्मि ॥ ऋत्विजोगंधादिभिःसंपूजयेत्॥यजमानर्त्विजःपरस्परंयज्ञकंकणंबध्नीयुः ॥ ॐ व्रतेनंदीक्षामांप्नोतिदीक्षयांप्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामांप्नोतिश्रद्धयांसत्यमांप्यते॥१॥ एतावंद्रूपञ्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम्॥तदेतत्सर्वमाप्नोतियज्ञेसौत्रामणीसुते ॥ १ ॥ अथ प्रार्थना ब्राह्मणाःसंतुमेशस्ताःपापात्पांतुसमाहिताः ॥

देवानांचैवदातारःपातारःसर्वदेहिनां ॥ १ ॥ जपयज्ञैस्तथाहोमैर्दानैश्चविविधैःपुनः ॥
देवानांचऋषीणांचतृप्त्यर्थंयाजकाःकृताः ॥ २॥ येषांदेहेस्थितावेदाःपावयंतिजगत्त्र
यम् ॥ रक्षंतुसततंतेमांजपयज्ञैर्व्यवस्थिताः ॥ ३ ॥ ब्राह्मणाजंगमंतीर्थंत्रिषुलोकेषु
विश्रुतम् ॥ तेषांवाक्योदकेनैवशुध्यंतिमलिनोजनाः ॥ ४ ॥ पावनाःसर्ववर्णानांब्रा
ह्मणा ब्रह्मरूपिणः ॥ सर्वकर्मरतानित्यं वेदशास्त्रार्थकोविदाः ॥ ५ ॥ श्रोत्रियाःसत्य
वाचश्चग्रहध्यानरताःसदा ॥ यद्वाक्यामृतसंसिक्ता ऋद्धिंयांतिनरद्रुमाः ॥ ६ ॥ अं
गीकुर्वंतुकर्मैतत्कल्पद्रुमसमाशिषः ॥ यथोक्तनियमैर्युक्तामंत्रार्थैस्थिरबुद्धयः ॥ ७॥
यत्कृपालोचनात्सर्वाऋद्धयोवृद्धिमाप्नुयुः ॥ अस्मिन्होमेमयापूज्याःसंतुमेनियमा
न्विताः ॥ ८ ॥ अक्रोधनाःशौचपराःसततंब्रह्मचारिणः ॥ ग्रहध्यानरतानित्यंप्रस
न्नमनसःसदा ॥ ९ ॥ अदुष्टभाषणाःसंतुमासंतुपरनिंदकाः ॥ ममापिनियमाह्येतेभ

वंतुभवतामपि ॥ १० ॥ इतिसंप्रार्थ्यतान्ब्रूयाद्यथावत्क्रियतांविधिः ॥ ऋत्विजश्चयथापूर्वंशक्रादीनांमखेभवन् ॥ ११ ॥ यूयंतथामेभवतऋत्विजोद्विजसत्तमाः ॥ अस्ययागस्यनिष्पत्तौभवंतोभ्यर्चितामया ॥ १२ ॥ सुप्रसन्नैःप्रकर्तव्यंशांतिकंविधिपूर्वकं ॥ इतिसंस्कारभास्करेब्रह्माचार्यऋत्विग्वरणम् ॥ अथदिग्रक्षणं ॥ ततआचम्यप्राणानायम्यदेशकालौस्मृत्वा ॥ अस्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मणियजमानेनवृतोहंआचार्यकर्मकरिष्ये ॥ तदंगशरीरशुद्ध्यर्थंपुरुषसूक्तजपंकरिष्ये इतिपुरुषसूक्तंषोडशर्चँजपेत् ॥ ॥ ततआचार्योवामहस्तेगौरसर्षपान्लाजमिश्रितान्गृहीत्वादिग्रक्षणंकुर्यात् ॥ तत्रमंत्राः ॥ र॒क्षो॒हणंम्वल॒गहनंम्वैष्ण॒वीमि॒दम॒हन्तम्वल॒ग

टीप १ भूतशुद्ध्याद्युक्तं रुद्रपद्धत्यादौ ॥ पुरुषसूक्तन्यासाः क्वचिदुक्ताः ॥

मुत्किरामिषम्मेनिष्ट्योषममात्योनिचखानेदमहन्तम्वलगमुत्किरामिषम्मेसमानोषमसमानोनिचखानेदमहन्तम्वलगमुत्किरामिषम्मेसबन्धुऽर्यमसबन्धुर्निचखानेदमहन्तम्वलगमुत्किरामिषम्मेसजातोषमसजातोनिचखानोत्कृत्याङ्किरामि॥१॥ रक्षोहणोवोवलगहनः प्रोक्षामिवैष्णवान्रक्षोहणोवोवलगहनोवनयामिवैष्णवान्रक्षोहणोवोवलगहनोवस्तृणामिवैष्णवान्रक्षोहणौवाँवलगहनाऽउपदधामिवैष्णवीरक्षोहणौवाँवलगहनौपऽर्यूहामिवैष्णवीवैष्णवमसिवैष्णवास्थ ॥२॥ रक्षसाम्भागोसिनिरस्तठंरक्षऽइदमहठंरक्षोभितिष्ठामीदमहठंरक्षोवबाधऽइदमहठंरक्षोधमन्तमोनयामि॥ घृतेनद्यावापृथिवीप्रोर्णुवाथाँवायोवेस्तोकानामग्निराज्यस्यवेतुस्वाहास्वाहाकृतेऽऊ

र्ध्वंनंभसंमारुतङ्गच्छतम् ॥ ३ ॥ रक्षोहाविश्वचर्षणिरभियोनिमयोंहते ॥ द्रोणेंसुध
स्थमासंदत् ॥ ४ ॥ अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्त्तारस्ते
नश्यंतुशिवाज्ञया ॥ १ ॥ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशं॥ सर्वेषामविरोधे
नशांतिकर्मसमारभे॥२॥यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः॥ स्थानंत्यक्त्वातुत
त्सर्वंयत्रस्थंतत्रगच्छतु॥३॥भूतप्रेतपिशाचाद्या अपक्रामंतुराक्षसाः॥स्थानादस्माद्व
जंत्वन्यत्स्वीकरोमिभुवंत्विमां॥४॥भूतानिराक्षसावापियत्रतिष्ठंतिकेचन॥तेसर्वेप्यप
गच्छंतुशांतिकंतुकरोम्यहं॥५॥इतिमंत्रैरीशानादिसर्वादिक्षुविकिरेत्॥ उदकोपस्प
र्शः॥ततः पंचगव्यप्रकरणं ॥ तद्यथा ॥ गायत्र्यागोमूत्रं॥ ॐतत्सवितु० ॥१॥ गंध
द्वारामितिगोमयं ॥ ॐगंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूता

नांतामिहोपऽह्वयेश्रियं ॥ २ ॥ आप्यायस्वेतिक्षीरं ॥ ॐआप्यायस्वसमेतुतेविश्वतꣳसोमवृष्ण्यम् ॥ भवावाजस्यसङ्गथे ॥ ३ ॥ दधिक्राव्णेतिदधि ॥ ॐदधिक्राव्णो० ॥ ४॥ तेजोसीत्याज्यं ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ५ ॥ देवस्यत्वेतिकुशोदकं ॥ ॐदेवस्यत्वासवितुः० ॥ ६ ॥ ॐ इतिप्रणवेनयज्ञकाष्ठेनालोड्यआपोहिष्ठेतित्रिभिर्मन्त्रैः कर्मभूमिंयज्ञसंभारांश्चप्रोक्षयेत् ॥ ॥ ततोयजमानहस्तप्रमाणंचतुरस्रंचतुरंगुलोन्नतंस्थंडिलंविरच्य तत्रभूमिपूजनं ॥ ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री ॥ पृथिवीन्यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः ॥ ॐभू० पृथिवीकूर्मानंतदेवताभ्योनमः

इतिमंत्रेणषोडशोपचारैः संपूजयेत् ॥ अत्रविचारः ॥ समंततश्चसिद्धार्थान्क्षिपेद्रक्षोघ्नमंत्रतः ॥ सर्वतः पंचगव्येनप्रोक्षयेद्यागमंडपं ॥ आपोहिष्ठातृचेनैव ततः स्वस्त्ययनं जपेदितिशांतिसारे॥ एतेसंस्काराः भूशुद्ध्यर्थंइतिग्रहयज्ञकल्पवल्ल्यां ॥ धृत्वांगुष्ठकनिष्ठाभ्यांमूलैः साग्रैः कुशत्रयं ॥ तदग्रैस्तस्यरजसांपूर्वस्यामपसर्पणं ॥ कृमिकीटपतंगाद्याविचरंतिमहीतले ॥ तेषांसंरक्षणार्थायपरिसमूहनमुच्यतइतिकुशकंडिकायां ॥ रुग्णावृद्धाप्रसूताच्चवंध्यासंधिन्यमेध्यभुक् ॥ मृतवत्साचनैतासां ग्राह्यंमूत्रंशकृत् पयइतिकल्पवल्ल्यां ॥ पुराइंद्रेणवज्रेण हतोवृत्रोमहासुरः॥ व्यापितामेदसापृथ्वीतदर्थमुपलेपनंइतिकुशकंडिकायां ॥ रेखात्रयमुदक्संस्थंप्रागग्रंस्थंडिलावधि ॥ अथवैततप्रकुर्वीतद्वादशांगुलमायतं इतिकल्पवल्ल्यां ॥ ॥ उल्लेखनं ततः कुर्यादस्थिकंटकमेवच ॥ तेषामुद्धरणार्थायउल्लेखः कथितोबुधैः ॥ अंगुष्ठो

पक्वनिष्ठाभ्यामग्निकार्यंतथोत्करं ॥ रेखाभ्यः समुपादायारत्निमात्रेनिधापयेदिति कल्पवल्ल्यां ॥ येभ्रमंतिपिशाचाद्याअंतरिक्षनिवासिनः ॥ तेषांप्रहरणार्थायसमुध्रः कथितोबुधैः ॥ इतिकुशकंडिकायां ॥ ॥ अवोक्षणंतुकर्तव्यमुत्तानेनैवमुष्टिना ॥ तद्वदभ्युक्षणं चैवकर्त्तव्यंन्युब्ज मुष्टिना॥इतिकल्पवल्ल्यां॥आपोदेवगणाःसर्वेआपः पितृगणाः स्मृताः ॥ सर्वंतदापआदाय अभ्युक्ष्येतिपुनः पुनः ॥ संपुटेनाग्निमानीयस्थाप्याग्नेर्दिशिकुंडतः ॥ आमक्रव्यभुजौतस्मात्त्यक्त्वाकुंडोविनिक्षिपेत् ॥शरावेभिन्नपात्रेवा कपालेचोल्मुकेतथा ॥ नाग्नेः प्रणयनंकार्यंव्याधिशोकभयावहं ॥ कपालंखर्परं ॥ उल्मुकंज्वलदग्नेरेकदेशः ॥ कुलालचक्रघटितंमृन्मयंपात्रमासुरं ॥ तदेवहस्तघटितंस्थाल्यादिदैविकंस्मृतं इतिकल्पवल्ल्यां॥ आनीतपात्रंयोरेवप्लावनंतत्क्षणेभवेत् ॥ नोचेत्कर्तुर्मनस्तापः स्यात्संतापस्तयोरपि ॥ इतिकल्पव

ल्ल्यां ॥ ॥ ततः कृतांजलिः स्वस्तिनइतिमंत्रंपठेत् देवाआयांतु ॥ यातुधाना अपयांतु ॥ विष्णोदेवयजनंरक्षस्व ॥ ॥ तत्रस्थंडिलेपंचभूसंस्कारान्कृत्वा ॥ मूलधृतैः ईशानीमारभ्यभ्रामितैः प्रतीचीमारभ्यप्राक्संस्थैः निःसारितैः त्रिभिर्दर्भैः त्रिःपरिसमुह्य ॥ गोमयेनोपलिप्यखादिरकीलेनोल्लिख्य ॥ प्रतीचीमारभ्यप्रागंतंत्रिरूर्ध्वरेषाकरणंयाम्यतउदक्संस्थाप्रादेशपरिमिता ॥ अनामिकांगुष्ठेनोल्लिखितपांसूनांमृदमृत्धृत्योर्ध्वंप्रक्षिप्य ॥ उदकेनाभ्युक्ष्यन्युब्जपाणिना ॥ कांस्यपात्रे अग्निमुपसमाधाय ॥ आनीतमग्निंस्थंडिलस्याग्नेय्यांनिधाय ॥ ॐहुंफट्इतिमंत्रेण क्रव्यादांशंनैर्ऋत्यांदिशिपरित्यज्य ॥ ततोग्निंदूतमितिमंत्रेणात्माभिमुखमग्निंसंस्थापयेत् ॥ ॐअग्निन्दूतंपुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२ऽआसादयादिह ॥ १ ॥ अ

ग्न्यानीतपात्रेसाक्षतोदकंनिषिच्य ॥ अग्निमुखंकृत्वाध्यायेत् ॥ ॐचत्वारिशृंगात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२ ऽआविवेश ॥ १ ॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वोद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥ १ ॥ स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचं स्रुवं ॥ २ ॥ तोमरंव्यजनंवामेघृतपात्रंचधारयन् ॥ आत्माभिमुखमासीनएवंरूपोहुताशनः ॥ ३ ॥ अग्नेवैश्वानरशांडिल्यगोत्रशांडिल्यासितदेवलेतित्रिप्रवरान्वितभूमिर्मातावरुणः पितामेषध्वजप्राङ्मुखममसम्मुखोभव ॥ शांतिकेवरदनामाग्निंप्रतिष्ठाप्य ॐअग्निपुरुषायनमः इतिमंत्रेणवायव्यकोणेबहिः अग्निंषोडशोपचारैः संपूज्य प्रार्थयेत् ॥ अग्निंप्रज्वलितंवंदे जातवेदंहुताशनं ॥

हिरण्यवर्णमनलंसमृद्धंविश्वतोमुखं ॥ इत्यग्निंप्रतिष्ठाप्य ॥ ॥ अथऋतुशांतौविशेषः ॥ ततईशान्यांयाम्यमारभ्यउदक्संस्थंपंक्तिरूपेणकलशचतुष्टयस्यमहीद्यौरित्यादिक्रमेण स्थापनं॥ तथाचनारदसंहितायां ॥ ईशान्यांचतुरः कुंभान्स्थापयेद्विधिपूर्वकं ॥ याम्यमारभ्योदक्संस्थान्पूर्णपात्रसमन्वितान् ॥ १ ॥ सूर्यंचतत्रविन्यस्यइंद्राणींचपुरंदरं ॥ चतुर्थेविन्यसेद्विद्वान्प्रतिमांभुवनेश्वरीं ॥ २ ॥ इति ॥ ॥ ॥ ततो महीद्यौरिति भूमिंस्पृष्ट्वा ॥ ओषधयः समितियवान्क्षिप्त्वा ॥ आजिघ्रमितिकलशंस्थापयेत् ॥ वरुणस्योत्तम्भनमितिजलंपूरयेत् ॥ त्वांगंधर्वाइतिगंधंप्रक्षिपेत् ॥ याओषधीरितिसर्वौषधीः ॥ कांडात्कांडादितिदूर्वाः ॥ अश्वत्थेवइतिपंचपल्लवान् ॥ स्योनापृथिवीतिसप्तमृदः ॥ आपोहिष्ठेतिपंचगव्यं ॥ याःफलिनीरितिफलं॥ परिवाजपतिरितिपंचरत्नानि ॥ हिरण्यगर्भेतिहिरण्यं ॥ युवासुवासा

इतिरक्तसूत्रेणावेष्ट्य ॥ पूर्णादर्वीतिपूर्णपात्रंनिधाय ॥ तत्वायामीतिवरुणमावाह्यपंचोपचारैः संपूज्यसर्वेसमुद्राइतिगंगाद्यावाहयेत् ॥ ततः सुवर्णमयचतुर्मूर्तीनां कदलीसहितानामग्न्युत्तारणपूर्वकंप्राणप्रतिष्ठांकुर्यात् ॥ ततः साचार्योयजमानः देशकालौस्मृत्वाआसांस्वर्णमयसूर्यइंद्रइंद्राणीभुवनेश्वरीकदलीमूर्तीनांघनादिदोषपरिहारार्थंअग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठांकरिष्ये॥मूर्तिंघृतेनाभ्यज्यउपरि जलधारांकुर्यात् ॥ अभ्युत्तारणमंत्राः ॥ ॐसमुद्रस्यत्वावकयाग्नेपरिंव्ययामसि ॥ पावकोऽअस्मभ्यꣳशिवोभव ॥ १ ॥ हिमस्यत्वाजरायुणाग्नेपरिंव्ययामसि ॥ पावकोऽअस्मभ्यꣳशिवोभव ॥ २ ॥ उपज्मन्नुपवेतसेवतरनदीष्वा ॥ अग्नेपित्तमपामसिमण्डूकीताभिरागहिसेमन्नोयज्ञम्पावकवर्णꣳ शिवंकृधि ॥ ३ ॥ अपामिदंन्ययंनꣳ समुद्र

स्यनिवेशनम् ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयःपावकोऽअस्मभ्यꣳशिवोभव ॥ ४ ॥
अग्नेपावकरोचिषामन्द्रयादेवजि॰ह्वया ॥ आदेवान्वक्षियक्षिच ॥ ५ ॥ सनःपावक
दीदिवोग्नेदेवाँ २ इहावह ॥ उपयज्ञꣳहविश्चनः ॥ ६ ॥ पावकयायश्चितयन्त्याकृ
पाक्षामन्रुचऽउषसोनभानुना ॥ तूर्वन्नयामन्नेतशस्यनूरणऽआयोघृणेनततृषाणो
ऽअजरः ॥ ७ ॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्नत्तपन्तुहे
तयःपावकोऽअस्मभ्यꣳशिवोभव ॥ ८ ॥ नृषदेवेड्प्सुषदेवेड्बर्हिषदेवेड्वनसदेवेस्वर्वि
देवेट् ॥ ९ ॥ येदेवादेवानांयज्ञियानाꣳसंवत्सरीणमुपभागमसते ॥ अहुतादोहवि
षोयज्ञेऽअस्मिन्त्स्वयंपिबन्तुमधुनोघृतस्य ॥ ११ ॥ येदेवादेवेष्वधिदेवत्वमायन्येब्र

ह्मणꣳ पुरऽएतारोऽअस्य ॥ येभ्योनऽऋतेपवंतेधामकिंचननतेदिवोनपृथिव्याऽअ
धिस्नुषु ॥१२॥ प्राणदाऽअपानदाव्यानदावर्च्चोदावरिवोदाः ॥ अन्याँस्तेऽअस्मत्तपन्तु
हेतयꣳ पावकोऽअस्मभ्यꣳशिवोभव ॥ १३ ॥ ॥ ततःप्राणप्रतिष्ठांकुर्यात् ॥ ॐ
आँ ह्रींक्रौंयंरंलंवंशंषंसंहंक्षंहंसःसोहं ॥ आसांसूर्यइंद्रइंद्राणीभुवनेश्वरीकदलीमू
र्तीनांप्राणाइहप्राणाः ॥ पुनः ॐआँ ह्रींक्रौंयंरंलंवंशंषंसंहंक्षंहंसः सोहं ॥ आसांसूर्य
इंद्र० भूर्तीनांजीवाइहस्थिताः ॥ पुनः ॐ आँ ह्रींक्रौंयंरंलंवंशंषंसंहंक्षंहंसः सोहं ॥
आसांसूर्यइं० मूर्तीनांसर्वेंद्रियाणिवाङ्मनस्त्वक्चक्षुःश्रोत्रजिव्हाघ्राणपाणिपादपा
यूपस्थानिइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा ॥ ॐमनोजुतिर्ज्जुषता० ॥ एषवैप्र
ति० ॥ २ ॥ इतिप्रतिष्ठाप्य ॥ वृत्रस्यासीतिनेत्रोन्मीलनं ॐवृत्रस्यासिकनीनकश्चक्षु

र्द्दाऽअंसिचक्षुर्म्मेदेहि ॥ गंधादिपंचोपचारान्दत्वासंस्कारसिद्धयेषोडशप्रणवावृत्तिं कुर्यात् ॥ ॐ अनेनआसांसूर्यादिदेवतामूर्तीनांगर्भाधानादिषोडशसंस्कारान्संपादयामीतिवदेत् ॥ इतिप्राणप्रतिष्ठा ॥ अथसूर्याद्यावाहनं ॥ ॥ एह्येहिपद्मासनपद्मपाणेसुरक्तसिंदूरसमानवर्ण ॥ सप्ताश्वरक्तांबरसूर्यशीघ्रंगृहाणपूजांभगवन्नमस्ते ॐआकृष्णेनरजसावर्त० १ ॥ ॐभूर्भुवः स्वः सूर्यइहागच्छइहतिष्ठ॥ ॐसूर्यायनमः सूर्यआवाहयामि ॥ ॥ अथेंद्रध्यानम् ॥ एह्येहिनानाभरणप्रियेंद्रप्राचीपतेवज्रधरामरेश ॥ ऐरावतारूढशचीसखात्रगृहाणपूजांभगवन्नमस्ते ॥ २ ॥ ॐत्रातारमिंद्रम० ॥ २ ॥ ॐभू० इंद्रइहा० ॥ ॥अथेंद्राणीध्यानं॥ एह्येहिदेवीश्वरिहेमवर्णेविशालपंकेरुहलोलनेत्रे ॥ अंभोजहस्तेशचिदिव्यरूपेगृहाणपूजांममयज्ञसिद्ध्यै ॥ ३ ॥

ॐइन्द्रन्दैवीरितिमंत्रेण ॥ ॐइन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभवन् ॥ एवमिमन्यजमानन्दैवीश्चविशोमानुषीश्चानुवर्त्मानोभवन्तु ॥ ३ ॥ ॐभू०इंद्राणिइ० ॥ अथभुवनेश्वरीध्यानम् ॥ एह्येहिदुर्गेदुरितौघनाशिनिप्रचंडदैत्यौघविनाशकारिणि ॥ उमेमहेशार्धशरीरधारिणिस्थिराभवत्वंममयज्ञकर्मणि ॥ ४ ॥ ॐश्रीश्चतेल० ॥ ४ ॥ ॐभू०भुवनेश्वरिइहा० भुवनेश्व०भुवनेश्वरींआवाहयामि ॥ ॥ ततआकृष्णेत्यादिचतुर्मंत्रैर्नाममंत्रैर्वासर्वाएकतंत्रेणषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ सूर्यप्रार्थना ॥ नमोनमस्तेसुरसेवितायसहस्रनेत्रायसुमंडलाय ॥ सिंदूरवर्णायसुपंकजायसुवर्णवज्राभरणायतुभ्यं ॥ १ ॥ क्षमापनं ॥ सप्तसाप्तिसमारूढपद्महस्तसुमंगल ॥ क्षमांकुरुदयालोत्वंग्रहराजनमोस्तुते ॥ २ ॥

॥ अथैंद्रप्रार्थना ॥ पुरंदरनमस्तेस्तुवज्रहस्तनमोस्तुते ॥ शचीसखनमस्तेस्तुमेघवाहनमोस्तुते ॥ १ ॥ क्षमापनं ॥ देवराजगजारूढपुरंदरशतक्रतो ॥ शचीसखमहाबाहोवांच्छितार्थप्रदोभव ॥ २ ॥ अथैंद्राणीप्रार्थना ॥ त्वांनमामिगजारूढां शचींकमललोचनां ॥ सुरराजप्रियेदेविधृतसंतानमंजरीं ॥ १ ॥ क्षमापनं ॥ अंभोजहस्तेवरदेकमलायतलोचने ॥ सुरराजप्रियेदेविप्रसीदपरमेश्वरि ॥ २ ॥ अथभुवनेश्वरीप्रार्थना ॥ नमोस्तुदेव्यैसुरपूजितायैविशालपंकेरुहलोचनायै ॥ नगाधिराजप्रियकन्यकायैनमोस्तुतस्यै हरवल्लभायै ॥ १ ॥ क्षमापनं ॥ दुर्गेदेविमहाभागेमहादेवप्रियेनघे ॥ नीलोत्पलमुखेवंद्येममपीडांनिराकुरु ॥ २ ॥ इतिप्रार्थ्यअनया पूजया श्रीसूर्यइंद्रइंद्राणिभुवनेश्वरीदेवताःप्रीयंतां ॥ ॥ वन्हेरुत्तरतोविद्वान्कदलीं स्थापयेच्छुभां ॥ हेम्नःपंचपलाढ्यांचपलस्यापिसुलक्षणां ॥ १ ॥ वंशपात्रेप्रतिष्ठाप्य

तंदुलानाढकोपरि ॥ कदल्यैइतिमंत्रेणपूजयित्वाप्रणम्यच ॥ दद्यात्तांद्विजवर्याय सर्वदोषापनुत्तये ॥ २ ॥ ततोग्नेरुत्तरतःप्रसारितरक्तवस्त्रेवंशपात्रेआढकपरिमिततंदुलराशिंकृत्वा तदुपरिहैमींकदलींसंस्थाप्य ॥ श्रीसूर्यदेवतायैकदल्यैनमइतिमंत्रेणषोडशोपचारैःसंपूजयेत् ॥ दानसमयेअस्यादानंकार्यमिति ॥ ॥ ततोजपार्थंकृतवर्णोब्राह्मणःसूर्याद्यावाहितमूर्तिसमीपेउपविश्यकलशंस्पृष्ट्वाविभ्राडित्यनुवाकंजप्त्वा अप्रतिरथं श्रीसूक्तंइंद्राणीभुवनेश्वरीकलशद्वयेद्विवारं अथवारुद्रैकादशनींजपेत् ॥ इत्थंनारदोक्तऋतुशांतिविशेषः ॥ अथग्रहमंडलदेवतास्थापनं ॥ उक्तप्रकारेणग्रहपीठंविरचयेत् ॥ ॥ शास्त्रार्थः ॥ ग्रहनामानि ॥ स्कांदे ॥ जन्मभूर्गोत्रमग्निश्चवर्णस्थानमुखानिच॥योऽज्ञात्वाकुरुतेशांतिंग्रहास्तेनावमानिताः ॥ १ ॥ रविःसोमोमहीपुत्रोबुधोजीवोथभार्गवः ॥ शनैश्चरोराहुकेतू नवखेटाः प्रकीर्तिताः॥ १॥वर्णाः॥ रविभौमौ

रक्तवर्णौश्वेतश्चंद्रस्तुभार्गवः ॥ बुधजीवौपीतवर्णौ कृष्णौमंदविधुंतुदौ ॥ धूम्रवर्णाः
केतवश्चग्रहवर्णाःप्रकीर्तिताः ॥ प्रतिमाः ॥ रविभौमौताम्रमयौराजतौ सोमभार्ग
वौ ॥ बुधजीवौस्वर्णमयौलोहौमंदविधुंतुदौ ॥ केतुःकांस्योथवासीसःप्रतिमाधातवः
स्मृताः ॥ ॥ मात्स्ये ॥ पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः ॥ सप्ताश्वरथसंस्थश्च
द्विभुजःस्यात्सदारविः ॥ १ ॥ श्वेतःश्वेतांबरधरोदशाश्वःश्वेतवाहनः ॥ गदापाणिर्द्वि
बाहुश्चकर्तव्योवरदःशशी ॥ २ ॥ रक्तमाल्यांबरधरःशक्तिशूलगदाधरः ॥ चतुर्भुखो
मेषगमोवरदःस्याद्धरासुतः ॥ ३ ॥ पीतमाल्यांबरधरःकर्णिकारसमद्युतिः ॥ खड्गचर्म
गदापाणिःसिंहस्थोवरदोबुधः ॥ ४ ॥ देवदैत्यगुरूतद्वत्पीतश्वेतौचतुर्भुजौ ॥ दंडिनौ
वरदौकाव्यौसाक्षसूत्रकमंडलू ॥ ५ ॥ इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः ॥ बाण
बाणासनधरःकर्तव्योर्कसुतःसदा ॥ ६ ॥ करालवदनःखड्गचर्मशूलीवरप्रदः ॥ नी

लसिंहासनस्थश्च राहुश्चात्रप्रशस्यते ॥७॥ धूम्राद्द्विबाहवःसर्वेंगदिताविकृताननाः॥
गृध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः ॥ ८ ॥ सर्वेकिरीटिनःकार्याग्रहालोकहिताव
हाः ॥ स्वांगुलेनोच्छ्रिताःसर्वेशतमष्टोत्तरावधि ॥९॥ देशाः॥ उत्पन्नोर्कःकलिंगेषु
यमुनायांचचंद्रमाः॥अंगारकस्त्ववंत्यांचमगधायांहिमांशुजः ॥ १ ॥ सैंधवेषुगुरुर्जा
तःशुक्रोभोजकटेतथा॥ शनैश्चरस्तुसौराष्ट्रेराहुर्वैराठिनापुरे ॥ अंतर्वेद्यांतथाकेतुरित्ये
ताग्रहभूमयः ॥ गोत्राणि ॥ आदित्यःकाश्यपेयस्तुआत्रेयश्चंद्रमाभवेत् ॥ भारद्वा
जोभवेद्भौमस्तथात्रेयश्चसोमजः॥गुरुश्चैवांगिरोगोत्रःशुक्रोवैभार्गवस्तथा ॥ शनिःका
श्यपएवाथराहुःपैठिनसःस्मृतः ॥ केतवोजैमिनीयाश्चग्रहगोत्राणिकीर्तयेत् ॥ सका
रेणतुवक्तव्यं गोत्रंसर्वत्रधीमता ॥ सकारःकुतुपोज्ञेयस्तस्माद्यत्नेनतंवदेत् ॥ ॥स्था
नानिस्कांदे ॥ वृत्तमंडलमादित्येचतुरस्रंनिशाकरे ॥ महीपुत्रेत्रिकोणंतुबुधेवैबाणस

न्निभं ॥ गुरौतुपट्टिशाकारंपंचकोणंतुभार्गवे ॥धनुर्निभंशनौज्ञेयंशूर्पाकारंतुराहवे॥केतवेतुध्वजाकारंमंडलानिप्रकल्पयेत् ॥ मंडलव्यासश्चग्रहरत्नावल्यां ॥ मंडलव्यासःकथितःसूर्यस्यद्वादशांगुलः ॥ चतुरंगुलःसोमस्यत्र्यंगुलोलोहितस्यच ॥ चतुरंगुलःसौम्यस्यगुरोश्चैवषडंगुलः॥ नवांगुलस्तुशुक्रस्यअर्कपुत्रस्यद्व्यंगुलः ॥ द्वादशांगुलोराहोश्चकेतोश्चैवषडंगुलइति ॥ मध्येतुभास्करंविंद्याच्छशिनंपूर्वदक्षिणे ॥ दक्षिणेलोहितंविंद्याद्बुधंपूर्वोत्तरेपिच॥उत्तरेतुगुरुंविंद्याद्भार्गवंपूर्वतोन्यसेत् ॥ शनिंपश्चिमतःस्थाप्यनैर्ऋत्येराहुमेवच ॥ केतुंवायव्यकोणेचग्रहस्थानानिकीर्तयेत्॥दिङ्मुखानिप्रतिष्ठाकल्पे॥शुक्रार्कौप्राङ्मुखौज्ञेयौगुरुसौम्यावुदङ्मुखौ ॥ प्रत्यङ्मुखौसोमशनीशेषादक्षिणतोमुखाः॥एतेवैदिङ्मुखाःखेटाःस्वस्वलोकेनिवासिनः॥यजमानात्माभिमुखाःसर्वेसंस्थापयंतिच ॥ पूज्यपूजकयोर्मध्येयत्रप्राचींप्रकल्पयेत्॥ तत्रसन्मुखःसं

स्थाप्यइतिन्यायोयथातथमिति ॥ मदनरत्नसंग्रहे ॥ ॥ ग्रहस्यदक्षिणेभागेस्थापयेदधिदेवताः ॥ ग्रहस्यवामपार्श्वेतुस्थाप्याःप्रत्यधिदेवताः ॥ अधिदेवतानामानि ॥ ईश्वरंचउमांचैवस्कंदंविष्णुंतथैवच ॥ ब्रह्माणेंद्रंयमंचैवकालंचैवतुअष्टमं ॥ चित्रगुप्तंतुनवमंअधिदैवतकीर्तिताः ॥ ॥ प्रत्यधिदेवतानामानि ॥ अग्निश्चैवतथाआपःपृथिवीविष्णुरेवच ॥ इंद्रश्चैवतथेंद्राणीप्रजापतिस्तथैवच ॥ सर्पश्चैवतुब्रह्माचएताःप्रत्यधिदेवताः ॥ ॥ संग्रहे ॥ राहुमंददिनेशानामुत्तरस्यांयथाक्रमं ॥ गणेशदुर्गावायुश्चराहुकेत्वोश्चदक्षिणे ॥ आकाशमश्विनौदेवौस्थापयित्वाक्रमेणतु ॥ वास्तोष्पतिंक्षेत्रपालंस्थाप्यगुरूत्तरेषुच ॥ एताःसदैवसंस्थाप्याःकर्मसाद्गुण्यदेवताः ॥ इंद्राग्नियमनैर्ऋत्यावरुणोवायुरेवच ॥ कुबेरेशानावित्यष्टौप्रागादिमदिशाधिपाः ॥ ब्रह्माणंचततःस्थाप्यपूर्वेशान्योस्तुमध्यमे ॥ प्रतीचिनैर्ऋतिमध्येअनंतंस्थापयेदिति ॥ यथावर्णं

प्रदेयानिवासांसिकुसुमानिच ॥ नवग्रहेभ्योदेयानिसुगंधसहितान्यपि ॥ ॥ गंधाः ॥ आदित्यभूमिपुत्रार्थंदापयेद्रक्तचंदनं ॥ चंदनंसितवर्णंचप्रदद्यात्सोमभार्गवे ॥ कुंकुमेनचसंयुक्तंचंदनंजीवसौम्ययोः॥ अगरोश्चंदनंदद्याद्राहुकेत्वर्कजेषुच॥ ॥ धूपः॥ रवेःकुंदरुकंधूपंशशिनस्तुघृताक्षताः ॥ भौमेसर्जरसंचैवअगरुंचबुधेस्मृतं ॥ सिल्हकंगुरवेदद्याच्छुक्रेबिल्वागरुंतथा ॥ गुग्गुलंमंदचारेतुलाक्षाराहोश्चकेतवे ॥ नैवेद्यं ॥ गुडौदनंरवेर्दद्यात्सोमायघृतपायसं ॥ लोहितायमसूरान्नंबुधायक्षीरषाष्टिकं॥ दध्योदनंगुरोर्दद्यात्शुक्रायचघृतौदनं ॥ मिश्रितंतिलमाषान्नंनिवेद्यंचशनैश्चरं ॥ राहोर्माषौदनंदद्यात्केतोश्चित्रौदनंतथा ॥ ॥ हविर्द्रव्यं ॥ तिलाज्यचरुभिर्द्रव्यंसमिधांचयथातथं ॥ ग्रहादीनांचसर्वेषांहविर्द्रव्यमुदीरितं ॥ ॥ समिधस्तु ॥ अर्कःपलाशख

दिरावपामार्गोंथपिप्पलः ॥ औदुंबरःशमीदूर्वाःकुशाश्चसमिधःक्रमादिति ॥ ॥ हेमाद्रौभविष्योत्तरेसंग्रहेच ॥ एकैकस्यावाहनादिपुष्पांजल्यंतपूजनं ॥ समाप्यचततोन्यस्यइतिकांडोनुकीर्तितः ॥ सर्वेषामेकतंत्रेणरव्यादीनांयथाविधि ॥ पूजनंतुप्रकर्तव्यंपदार्थोनुप्रकीर्तितः ॥ गणाधिपतयेदेयात्प्रथमांतुवराहुतिं ॥ अन्यथाविफलंविप्रभवतीहनसंशयः ॥ आघारावाज्यभागौतुआज्येनैवयथाक्रमं ॥ एकैकस्याहुतिंहुत्वाअन्यहोमंततःपरं ॥ केवलंग्रहयज्ञंचसर्वशांत्यादिकेषुच ॥ प्रथमोयुतहोमस्यद्वितीयोलक्षहोमकः ॥ तृतीयःकोटिहोमःस्यात्त्रिविधोग्रहयज्ञकः ॥ अष्टोत्तरसहस्रंतुशतमष्टाधिकंतथा ॥ अष्टाविंशतिसंख्याकैरेकैकस्यतुहोमयेत् ॥ कोटिलक्षायुतमखेरव्यादीनांयथाक्रमं ॥ प्रणवादिश्चतल्लिंगःस्वाहाकारांतएवच ॥ जुहुयात्सर्वदेवानांवेद्यांयेचोपकल्पिताः ॥ ॥ नृसिंहपुराणे ॥ ततोव्याहृतिभिः पश्चाज्जुहुयाच्चति

लादिकं ॥ यावत्प्रपूर्यंतेसंख्यालक्षंवाकोटिरेववा ॥ वाशब्देनअयुतमपिगृण्हीयात् ॥ तिलाःकृष्णाघृताभ्यक्ताःकिंचिद्यवसमन्विताः होमेऽव्याहृतिभिश्चैवसर्वैस्तत्रविधीयतेइतिशांतिरत्ने ॥ संग्रहे ॥ कोटावधिप्रत्यधेश्चशतमष्टाधिकाहुतिः ॥ विनायकादिदिक्पालान्ताष्टाविंशतिसंख्यया ॥ १ ॥ लक्षेअष्टाविंशतिश्चअधिप्रत्यधिकेषुच ॥ विनायकादिदिक्पालान्ताष्टाष्टसंख्ययाहुतिः ॥ २ ॥ अयुतेष्टाष्टसंख्याकैरधिप्रत्यधिकेषुच ॥ विनायकादिदिक्पालांतानांहुत्वाचतुश्चतुः ॥३ ॥ केवलेअधिप्रत्यधिहुत्वाचैवचतुश्चतुः ॥ विनायकादिदिक्पालाद्वेद्वेसंख्याहुतीहुनेदिति ॥ ४ ॥ शौनकः॥अंतेपूर्णाहुतिंहुत्वासमुद्रादूर्मिसूक्ततः॥ सततामाज्यधारांतांपूर्णाहुतिमथाचरेत्॥ मात्स्येग्निपुराणेच ॥ मूर्धानंदिवमंत्रेणावशेषघृतधारया ॥ दद्यादुत्थायपूर्णांवैनोपविश्यकदाचन ॥ इतिकातीयानांचावश्यंशांतिमयूखे॥शुक्रज्योत्यनुवाकेनघृते

नाच्छिन्नधारया॥होमांतेसर्वकल्याणीदेयापूर्णाहुतिःसदेतिग्रहयज्ञकल्पवल्ल्यां॥पूर्णाहुतिरन्याज्येनस्थाल्याज्येनकदाचनेतिग्रहयज्ञकल्पवल्ल्यां॥कारिकायां॥अन्यदाज्यंसमानीयाधिश्रितेस्रुक्स्रुवावुभौ ॥ तौप्रतप्यचसंमार्गकुशैःसंमृज्यसिंचयेत् ॥ पुनःप्रतप्ययाम्यायांनिदध्यात्स्रुक्स्रुवौचतौ ॥ आज्यमुद्वास्यचोत्पूयावेक्ष्यापद्रव्यनिष्कृतिः ॥ चतुर्गृहीतमाज्यंतद्गृहीत्वास्रुचिमध्यतः ॥ वस्त्रतांबूलपूगादिफलपुष्पसमन्वितां ॥ अधोमुखस्रुवच्छन्नांगंधाक्षतैरलंकृतां ॥ पूर्वंदक्षिणहस्तेनपश्चाद्वामेनपाणिना ॥ अग्रमध्यममध्यस्थंमूलमध्यममध्यतः ॥ पाणिद्वयेनहोतव्यंपाणिरेकोनिरर्थकः ॥ गृहीत्वाथस्रुवंकर्ताशंखसन्निभमुद्रया ॥ वामस्तनांतमानीयनाभिमूलात्स्रुचंततः ॥ सप्ततेत्यनुवाकांतेमखेसूक्तान्विशेषतः ॥ श्रावयेत्सूक्तमाग्नेयंवैष्णवंरौद्रमैंदवं ॥ महावैश्वानरंचापिचमकानिततःपठेत् ॥ समास्त्वेतिनवर्चमाग्नेयंसूक्तं ॥ वि

ष्णोर्नुकंवीर्याणिइतिषडर्चँवैष्णवंसूक्तं ॥ नमस्तेतिषोडशर्चँरौद्रंसूक्तं ॥ आप्यायस्वे
तिषडर्चँमैंदवं ॥ महावैश्वानरं ॥ चमकंवाजश्चेत्यारभ्यसप्तविंशतिऋचां ॥ इतिका
शीदीक्षितपद्धतौ ॥ ऐशान्यामाहरेत्भस्मस्रुचावाथस्रुवेणवा॥ अंकनंकारयेत्तेनाशि
रःकंठांसकेषुचेतिशांतिकमलाकरे ॥ ततोग्रहपीठमध्येसूर्यमंडलस्याग्रेउदक्संस्थंपं
क्तिरूपेणगणपतिंदुर्गांक्षेत्रपालंचावाह्य ॥ ॥ तत्रमंत्राः ॥ ॐग॒णाना॑न्त्वा० ॥ १ ॥
ॐगणपतेइहागच्छइहातिष्ठॐगणपतयेनमःगणपतिंआवाहयामि ॥ ॐअ॒म्बे॒अम्बि॒
के॒म्बा॑लिके॒नमा॑नयति॒कश्च॒न ॥ सस॑स्त्यश्व॒कः सुभ॑द्रिकाङ्काम्पील॒वासि॑नीम् ॥ २ ॥
ॐभूर्भुव०दुर्गे॑इ०दुर्गा॑यै०दुर्गांआ० ॥ ॐन॒हिस्पश॒मवि॑दन्न॒न्यम॒स्माद्वै॑श्वान॒रात्पु॑रऽ
ए॒तार॑म॒ग्नेः ॥ एमे॑नमवृधन्न॒मृता॒ऽअम॑र्त्यम्वैश्वान॒रंक्षैत्रा॑जित्याय॒देवाः ॥ ३॥ ॐ

भूर्भुवःस्वःक्षेत्राधिपतेइहागच्छइहातिष्ठक्षेत्राधिपतयेनमःक्षेत्राधिपतिंआ० ॥ ॥ तत्रपीठमध्ये वर्तुलेद्वादशांगुलेमंडलेप्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैरावाह्य ॥ ॐआकृष्णेनरजंसावर्तमानोनिवेशयन्नमृतम्मर्त्यंच ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ १ ॥ ॐभूः०कलिंगदेशोद्भवकाश्यपसगोत्ररक्तवर्णभोःसूर्यइहागच्छइहतिष्ठॐसूर्यायनमःसूर्यंआवाहयामि ॥ ततआग्नेय्यांदिशिचतुरस्रेचतुर्विंशत्यंगुलेमंडलेप्रत्यङ्मुखंसोमंशुक्लपुष्पाक्षतैःसह ॥ ॐ इमन्देवाऽअसपत्नꣳसुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानंराज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्यपुत्रम

---

१ प्रणवंत्वादितः कुर्याद्भूर्भुवःस्वस्ततः परं ॥ चतुर्थ्यानामसंयुक्तंनमस्कारांतयोजितं ॥ एवंमंत्रः समाख्यातोग्रहपूजाविधायकः ॥ अनेनावाहनंकुर्याद्दनेनैवविसर्जनमितिशांतिमयूखे ॥

मुष्यैपुत्रमस्यैविशऽएषवौमीराजासोमोस्माकम्ब्राह्मणानाᳪराजा ॥ २ ॥ ॐ भू०
यमुनातीरोद्भवआत्रेयसगोत्रशुक्लवर्णभोसोमइहागच्छइ० ॥ ततोदक्षिणस्यांदिशि
त्रिकोणेत्र्यंगुलेमंडले दक्षिणाभिमुखंभौमंरक्तपुष्पाक्षतैःसह ॥ ॐअग्निर्मूर्धादिवः
ककुत्पतिःपृथिव्याऽअयम् ॥ अपाᳪरेताᳪसिजिन्वति ॥ ३ ॥ ॐ भू०अवंतिदे
शोद्भवभारद्वाजसगोत्ररक्तवर्णभोभौमइहा० ततश्चईशान्यांदिशिबाणाकारेचतुरंगु
लेमंडलेउदङ्मुखंबुधंपीतपुष्पाक्षतैःसह ॥ ॐउद्बुध्यास्वाग्नेप्रतिजागृहित्वमिष्टापुर्ते
सᳪसृंजेथामयश्चं ॥ अस्मिन्त्सधस्तेऽअध्युत्तरस्मिन्विश्वेंदेवायजंमानश्चसीदत ॥
॥ ४ ॥ ॐभू०मगधदेशोद्भवआत्रेयसगोत्रपीतवर्णभोबुधइ० ॥ ततःउत्तरस्यांदिशि

लंबदीर्घचतुरस्रेपट्टाकारेषडंगुलेमंडलेबृहस्पतिंपीतपुष्पाक्षतैःसह ॥ ॐबृहस्पतेऽअतियदर्यो्ऽअर्हाँद्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवंसऽऋतप्प्रजाततदस्मासुद्रविणन्धेहिचित्रम् ॥ ५ ॥ ॐभू०सिंधुदेशोद्भवआंगिरसगोत्रपीतवर्णभोबृहस्पतेइ० ॥ ततःपूर्वस्यांदिशिपंचकोणेनवांगुलेमंडलेप्राङ्मुखंशुक्रं शुक्लपुष्पाक्षतैःसह॥ ॐअन्नात्परिश्रुतोरसम्ब्रह्मणाऽव्यपिबत्क्षत्रम्पयꣳसोमम्प्रजापंतिः॥ ऋतेनंसत्यमिन्द्रियम्विपानंꣳशुक्रमन्धंसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ६ ॥ ॐ भू०भोजकटदेशोद्भवभार्गवसगोत्रशुक्लवर्णभोशुक्रइ० ॥ ततःपश्चिमायांदिशिधनुराकारेद्वयंगुलेमंडलेप्रत्यङ्मुखंशनिंकृष्णपुष्पाक्षतैःसह ॥ ॐशन्नोंदेवीरभिष्टंयऽआपोंभवन्तुपी

तयें ॥ शंय्योरभिस्रवन्तुनः ॥ ७ ॥ ॐभू० सौराष्ट्रदेशोद्भवकाश्यपसगोत्रकृष्णवर्णभोशनैश्चरइ० ॥ ततोनैर्ऋत्यांदिशिशूर्पाकारेद्वादशांगुलेमं० दक्षिणाभिमुखंराहुंकृष्णपुष्पाक्षतैःसह ॥ ॐ कयानश्चित्रऽआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ ८ ॥ ॐभू० राठिनापुरोद्भवपैठिनसगोत्रकृष्णवर्णभोराहोइ० ॥ ततोवायव्यांदिशिध्वजाकारेषडंगुलेमंडलेदक्षिणाभिमुखंकेतुंधूम्रपुष्पाक्षतैःसह ॥ ॐकेतुंकृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ९ ॥ ॐभू० अंतर्वेदिसमुद्भवजैमिनिसगोत्रधूम्रवर्णभोकेतोइ० ॥ ततोधिदेवतास्थापनंग्रहदक्षिणपार्श्वे ॥ ॐत्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीय

मामृतात् ॥ १ ॥ सूर्यदक्षिणपार्श्वे ॥ ॐ भू० ईश्वरइहागच्छइहतिष्ठईश्वरायनमः ई
श्वरंआवाहयामि ॥ एवंसर्वत्र ॥ ॐ श्रीश्चतेलक्ष्मी० ॥ २ ॥ सोमदक्षिणपार्श्वे ॥ ॐ
भू० उमेइ० उमायै० उमांआ० ॥ ॐ यदक्रन्दꣳप्रथमञ्जायमानऽउद्यन्त्समुद्रादुत
वापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यम्महिषातन्तेऽअर्वन् ॥ ३ ॥ भौ
मदक्षिणपार्श्वे ॥ ॐ भू० स्कंदइहा० स्कंदाय० स्कंदंआ० ॥ ॐ विष्णोरराटमसि
विष्णोꣳश्नप्त्रेस्थोविष्णोꣳस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसिविष्णवेत्वा ॥ ४ ॥
बुधदक्षिणपार्श्वे ॥ ॐ भू० विष्णोइहागच्छइहतिष्ठविष्णवे० ॥ ॐ आब्रह्मन्ब्राह्मणोब्र
ह्मवर्चसीजायतामाराष्ट्रेराजन्यꣳशूरइषव्योतिव्याधीमहारथोजायतान्दोग्ध्रीधेनु

वोंढानड्वानाशुःसप्तिःपुरंन्धिर्षोषाजिष्णूरंथेष्ठाः ॥ सभेयोषुवास्यषजमानस्यवीरोजायतान्निकामेनिंकामेनःपर्जन्योवर्षतुफलंवत्योनऽओषधयःपच्यन्ताँषोगक्षेमोनः कल्पताम् ॥ ५ ॥ गुरुदक्षिणपार्श्वेॐभू० ब्रह्मन् इ० ब्रह्मणेन० ब्रह्माणंआ० ॥ ॐस षोषाऽइन्द्रसगणोमरुद्भिःसोमंपिबवृत्रहाशूरविद्वान् ॥ जहिशत्रूँ२रपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः ॥ ६ ॥ शुक्रदक्षिणपार्श्वे ॥ ॐ भू० इंद्रइहा० इंद्राय० इंद्रंआ० ॥ ॐ षमायत्वांगिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्मायस्वाहाघर्म्मःपित्रे ॥ ७ ॥ शनिदक्षिणपार्श्वेॐयमइ० इहाति० यमाय० यमंआ० ॥ ॐकार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधीः ॥ ८ ॥ राहुदक्षिणपा

श्वैं ॥ ॐ भू० कालइ० इहति० का० कालंआ० ॥ ॐ चित्रावसोस्वस्तितैंपारमंशीय ॥
केतुदक्षि० ॥ ॐ भू० चि० इ० इ० चि० चित्रगुप्तंआ० तत्प्रत्यधिदे० स्थाप० ग्रहवामपा
श्वैंॐअग्निंदूतंपुरोदंधेहव्यवाहमुपंब्रुवे॥देवाँ२आसादयादिह ॥सू० वामपा० भू० अ०
अग्निं अ० अग्निं ॥ ॐआपोहि०॥२॥ सोमवामपा० ॐभू० आ० इ० इ० अद्भ्यो० आ०
आ० ॥ ॐस्योनापृ० ॥ ३ ॥ भोमवामपाश्वैं ॥ ॐ भू० पृथिवीइ० इ० पृ० पृ० पृथि
वींआवाहयामि ॐइदंविष्णुर्विचंक्रमेत्रेधानिदंधेपदम्॥समूंढमस्यपाꣳसुरेस्वाहा ॥
॥ ४॥ बुधवामपाश्वैं ॐ विष्णोइहागच्छइ० वि० विष्णुंआ० ॐत्रातारमिन्द्रंमविता
रमिन्द्रꣳ हवैंहवेसुहवꣳशूरमिंद्रम्॥ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधा

त्विन्द्रः ॥५॥ गुरुवामपार्श्वे ॥ ॐभू० इन्द्रइहा० इ० इं० इन्द्रं० ॐअदित्यैरास्नासीन्द्रा
ण्याऽउष्णीषः पूषासिघर्म्मायदीष्व ॥६॥ शुक्रवामपार्श्वेॐभू० इन्द्राणिइहा० इ० इ०
इद्राणींआ० ॥ ॐप्रजापतेनत्वदेतान्न्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्ते
जुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ॥ ७ ॥ शनिवामपार्श्वे ॥ ॐभू० प्रजा
पतेइहा० इ० प्र० प्रजापतिंआ० ॥ ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्त
रिक्षेयेदिवितेभ्यःसर्पेभ्योनमः ॥ ८ ॥ राहुवामपार्श्वेॐभू० सर्पाइ० इ० सर्पेभ्यो०
सर्पान्आ० ॥ ॐब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विशींमतःसुरुचोवेनआवः ॥ सबुध्न्या
ऽउपमाऽअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ९ ॥ केतुवामपार्श्वे ॥ ॐभू०

ब्रह्मन् इ० ब्रह्मणेन० ब्रह्माणंआ० ॥ ततो[१]विनायकादिपंचदेवताः वास्तोष्पतिक्षेत्रपालंचावाहयेत् ॥ ॥ ॐगणानांन्त्वा० ॥ १ ॥ राहोरुत्तरतः ॐभू० गणपतेइहा० ग० इ० गणपतिंआ० ॥ ॐअम्बेअम्बिके० ॥ २॥ शनेरुत्तरतः ॐ भू० दुर्गे० इ० इह० दुर्गा० दुर्गां० ॥ ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सववनेमादयस्वयूयम्पातस्वस्तिभिःसदानः ॥ ३ ॥ रवेरुत्तरतः ॐभू० वायोइहा० वायवेन० वायुंआ० ॥ ॐ घृतङ्घृतपावानःपिबतवसाम्वसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहा ॥ दिशःप्रदिशऽआदिशोविदिशऽउद्दिशोदि

---

१ विनायकाद्याः पंचउत्तरे स्थाप्या इति सांप्रदायिकेतिशांतिमयूखे ॥

ग्भ्यःस्वाहा ॥ ४ ॥ राहोर्दक्षिणे ॐ भू॰ आकाशइहा॰ इ॰ आका॰आकाशं आ॰ ॥ ॐयाञ्चाङ्कशामधुमत्यश्विनासून्तृतांवती ॥ तयांयज्ञम्मिमिक्षताम् ॥ ५ ॥ केतोर्दक्षिणे ॥ ॐभू॰ अश्विनौइ॰ इ॰ अश्विभ्यां॰ अश्विनौआ॰ ॥ वस्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोऽअनमीवोभवानः ॥ यत्वेमहेप्रतितन्नोजुषस्वशन्नोभवद्विपदेशंचतुष्पदे ॥ १ ॥ उत्तरे ॐ भू॰ वास्तोष्पतेइ॰ इ॰ वा॰ वास्तोष्पतिंआ॰ ॥ ॐ नाहिस्पशमविदं॰ ॥ २ ॥ उत्तरेॐभूं॰ क्षेत्राधिपतेइ॰ इ॰ क्षे॰ क्षेत्राधिपतिंआ॰ ॥ इतक्रतुसाङ्कुण्यदेववताः ॥ अथप्रागादितःपीठसमंताद्दिक्पालानावाहयेत् ॥ त्रातारमिन्द्रं॰ ॥ ॥१॥ पूर्वेॐभू॰ इन्द्रइ॰इ॰इ॰ इंद्रंआ॰ ॥ ॐ त्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्ष

---

१ मंगलोत्तरेक्षेत्रपालस्थापनमितिशांतिकमलाकरे॥क्षेत्रस्यपतिनाक्षेत्रपालंस्थाप्य भुजोत्तरे॥भुजौमंगलः।

तन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्रते ॥ २ ॥ आग्नेय्यां ॐ भू० अग्ने इ० इ० अग्निंआ० ॥ ॐ यमायत्वांगिर० ॥ ६ ॥ दक्षिणे ॐ भू० यम इ० इ० य० यमंआ० ॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ ४ ॥ नैर्ऋत्यां ॐ भू० निर्ऋतेइ० इ० नि० निर्ऋतिंआ० ॥ ॐ तत्वायामि ॥ ५ ॥ पश्चिमे ॐ भू० वरुणइ० इ० व० वरुणंआ० ॥ ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रि० ॥ ६ ॥ वायव्यां ॐ भू० वायोइहा० इ० वा० वायुंआ० ॥ ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तःसचेमहि ॥ ७ ॥ उत्तरेसोमइहा० सो० सोमंआ० ॥ ॐ तमीशानञ्जगतस्त

स्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ ८ ॥ ईशान्यांॐभू०ईश्वरइ० इ०इ०तौआवा० ॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्त्येभरहूतौसजोषाः ॥ षःशꣳसंतेस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ२अवन्तुदेवाः ॥ ९ ॥ पूर्वेशानयोर्मध्येऊर्ध्वायांॐभू०ब्रह्मन्इहाग०इ०ब्र०ब्रह्माणंआ० ॥ ॐ स्योनापृथिविनो० ॥ १० ॥ निर्ऋतिपश्चिमयोर्मध्येअधःस्थायांॐभू०अनंतइहागच्छइ०अनंताय०अनंतंआ० ॥ इतिक्रतुसंरक्षकदिक्पालदेवताः ॥ ॐ मनोजूतिर्जु० ॥ एषवैप्रतिष्ठेतिऋग्भ्यांआदित्यादिग्रहमंडलदेवताभ्योनसुप्रति

---

१ अत्रावसरेदर्पणेयच्छेषादिदेवतास्थापनमुक्तं तत्तुशिष्टैरनादृतत्वान्नात्रलिखितम् ॥

ष्ठितावरदाभवत ॥ पूजामंत्रस्तु ॥ ॐ ग्रहाऽऊर्जाहुतयोऽव्यन्तोविप्रायंमतिम् ॥ तेषां
विशिप्रियाणाम्वोहमिषमूर्ज्जंसमंग्रभमुपयामगृहीतोसीन्द्रायत्वाजुष्टंङ्गृण्हाम्ये
षतेयोनिरिन्द्रायत्वाजुष्टतमम् ॥ १ ॥ ॐ भूर्भुवःस्वःआदित्यादिनवग्रहमंडलदेवता
भ्योनमःइतिमंत्रेणषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ आदिदेवनमस्तुभ्यंसप्तसप्तेदि
वाकर ॥ आयुरारोग्यंमेदेहिकुरुशांतिंशुभप्रदां ॥ १ ॥ रोहिणीशसुधामूर्तेसुधारूप
सुधाशन ॥ सोमसौम्योभवास्माकंसर्वारिष्टंनिवारय ॥ २ ॥ कुजकुप्रभवोपित्वंमं
गलःपरिगद्यसे ॥ अमंगलंनिहत्याशुसर्वदायच्छमंगलं ॥ ३ ॥ बुधस्त्वंबुद्धिजननो
बोध्यवान्सर्वदान्नृणां ॥ नत्वावबोधंकुरुतेसोमपुत्रनमोस्तुते ॥४॥ वेदशास्त्रार्थतत्वज्ञ
ज्ञानविज्ञानपारग ॥ विबुधार्तिहरोनित्यंदेवाचार्यनमोस्तुते ॥ ५ ॥ भार्गवोभर्गजन

नशुचिःश्रुतिविशारद ॥ हत्वाग्रहकृतान्दोषानायुरारोग्यंदेहिमे ॥ ६ ॥ कोणनीलां
जनप्रख्यंमदचेष्टाप्रसारिणं ॥ छायामार्तंडसंभूतंतंनमामिशनैश्चरं ॥ ७ ॥ महाशि
रामहावक्रोदीर्घदंष्ट्रोमहाबलः ॥ मुंडकायोर्ध्वंकेशिश्चपीडांहरतुमेतमः ॥ ८ ॥ अधः
स्थार्धांगभोःकेतोपलधूमसमप्रभ ॥ रौद्ररूपनमस्तुभ्यंममपीडांनिराकुरु ॥ ९ ॥ ॥
अनयापूजयाआदित्यादिग्रहमंडलदेवताःप्रीयंतां ॥ ॥ इतिग्रहस्थापनं ॥ ॥ ततई
शान्यांग्रहसंबंधि[1]रुद्रकलशस्थापनं ॥ महीद्यौरितिक्रमेणपूर्णपात्रनिधानांतंकृत्वात
त्वायामीत्यावाह्य॥ॐ असंख्यातास॒हस्राणि॒येरुद्राऽअधि॒भूम्याम् ॥तेषाꣳसहस्रयो
ज॒नेव॒धन्वानितन्मासि ॥१॥ इतिमंत्रेणषोडशोपचारैःसंपूज्यसर्वेसमुद्राःसरितइतिगं

---

[1] अयंरुद्रकलशःयजमानस्यस्नानार्थंइतिकमलाकरैः ॥

गाद्यावाहयेत्॥तत्रकलशेसांगरुद्रजपः॥अनेनकलशोदकेनअभिषेकसमयेपत्न्यासहयजमानमभिषिंचेत्॥अथकुशकंडिका॥एतस्याव्याख्याग्रहरत्नावलीकुशकंडिकाभाष्यानुसारेणलिखिता।यथा।अग्नेर्दक्षिणतःस्थापितेवारणादिपीठेउदगग्रान्त्र्यधिकान्कुशानास्तीर्याग्नेरुत्तरतःकुशासनेब्रह्माणंपूर्वाभिमुखमासीनंयजमानःस्वयंउदङ्मुखमासीनोब्रह्मणोदक्षिणंहस्तंगृहीत्वाभोब्रह्मन्अत्रासनेउपविशेतिब्रूयात्॥उपविशामीतितेनपठितेदक्षिणपादेनाग्नेःपूर्वेणगत्वास्वासनादंगुष्ठानामिकाभ्यांकिंचित्तृणमादायदक्षिणापरस्यांनिरस्याग्न्यभिमुखउपविशतीतिग्रहयज्ञकल्पवल्ल्यां॥अग्नेरुत्तरतःप्रागग्रैःकुशैरासनद्वयंकल्पयित्वाएकमग्नेरुत्तरतःद्वितीयंतत्पश्चिमे॥वायव्याश्रितंवारुणंद्वादशांगुलदीर्घंचतुरंगुलविस्तृतंचतुरंगुलखातं॥यथा॥वारुणंपाणिमात्रंचद्वादशांगुलविस्तृतं॥पद्मपत्राकृतिर्वापिप्रोक्षणीपात्रसंस्थितिरितिकल्पव

ल्ल्यां ॥ ॥ चमसंदक्षिणहस्तेनगृहीत्वासव्येपाणौप्रागग्रंनिधायतिष्ठन्दक्षिणहस्तोद्धृतपात्रजलेनात्माभिमुखंपूरयित्वापश्चिमासनेनिधायदक्षिणयानामिकयाजलमालभ्याग्नेरुत्तरतःप्राक्कल्पितेप्रोक्षण्यासनादुदक्प्रणीतासनेस्थापयेत् ॥ यथा ॥ प्रणीताउत्तरेस्थाप्यावितस्त्यंतरतोग्नितः ॥ इतिग्रहयज्ञकल्पवल्ल्यां ॥ चमसंवारुणंप्रणीतापात्रंप्रागग्रमुत्तानंवारुणोदकेनसंपूर्य ॥ दर्भमुष्टिमादायप्रदक्षिणंप्रागादिबर्हिर्भिःकुंडपरिमाणैःपरिस्तरणंनिधेयंइतिकल्पवल्ल्यां ॥ बर्हिर्दर्भमुष्टिः ॥ तच्चप्रागुदगग्रैः ॥ दक्षिणतःप्रागग्रैः ॥ प्रत्यगुदगग्रैः ॥ उत्तरतःप्रागग्रैः ॥ आसादनंतुपात्राणांप्रादेशांतरकेबुधः ॥ अंगुलद्वयमानेनद्वंद्वंद्वांतरेन्यसेत् ॥ प्रागग्रोदग्बिलंतत्स्यादुत्तरासादनेग्नितः ॥ पात्रजातंप्राग्बिलंतदुदगग्रंतुपश्चिमेइतिकारिकाकारः ॥ उत्तरतश्चेदुदक्संस्थंअसंभवेप्राक्संस्थंपश्चिमसंस्थंउदक्संस्थमपीतिदेवयाज्ञिकः॥अनंतर्गर्भिणंसाग्रं

कौशंद्विदलमेवच ॥ प्रादेशमात्रंविज्ञेयंपवित्रंयत्रकुत्रचित् ॥ आज्यस्थालीकांस्यमयीयद्वाताम्रमयीतथा ॥ प्रादेशमात्रदीर्घासागृहीतव्याऽव्रणाशुभा ॥ दृढाप्रादेशमात्र्यूर्ध्वातिर्यङ्नातिबृहन्मुखी ॥ मृन्मय्यौदुंबरीवापिचरुस्थालीप्रशस्यतइतिरत्नमालायां ॥ स्रुवसंमार्जनार्थायपंचवाथत्रयोपिवा ॥ प्रादेशमात्रान्गृण्हीयात्संमार्गकुशसंज्ञकान् ॥ १ ॥ उपयमनकुशाःसप्तपंचवाथत्रयोपिवेतिग्रहयज्ञकल्पवल्ल्यां ॥ समिल्लक्षणंपरिभाषायामुक्तं ॥ अथस्रुवलक्षणम् ॥ खादिरादेःस्रुवःकार्योहस्तमात्रप्रमाणतः ॥ अंगुष्ठपर्वखातंतात्त्रिभागंदीर्घपुष्करं ॥ १ ॥ ॥ षट्त्रिंशांगुलांस्रुचंकारयेत्खादिरादिभिः ॥ कर्दमेगोपदाकारंपुष्करंतद्वदेवहि ॥ १ ॥ पुष्कराग्रंषडंशंतुखातंद्व्यंगुलविस्तृतं ॥ अंगुष्ठैकंस्थूलतरंदंडेतस्यचकंकणमित्यासदन्यां ॥२॥ पूर्णपात्रलक्षणंपरिभाषायामुक्तं ॥ एवमासादनंकृत्वापवित्रच्छेदनैःकुशैः ॥ अंगुष्ठांगुलिपर्वं

भ्यांच्छिद्यात्प्रादेशसंमितमितिकल्पवल्ल्यां॥अंगुलीरनामिकाग्रपर्वं॥ प्रादेशमात्रमुत्सार्योत्पवनंतुविधीयते॥उद्दिंगनंतुकर्तव्यमूर्ध्वमूर्ध्वंप्रमाणतइतिकल्पवल्ल्यां॥ प्रोक्षणेकारणमाहश्रुतिः॥अथपात्राणिप्रोक्षतीत्युपक्रम्यतद्देवैषामत्राशुद्धस्तक्षान्योमेध्यःकश्चित्पराहंतीतितद्देवैतेषामद्भिरमेध्यंकरोतीति॥ तक्षावर्धकिः॥ तद्व्यतिरिक्तोन्योवृषलादिःससर्वोप्यमेध्यत्वादशुद्धः॥ तस्यस्पर्शकृतंयदेषांपात्राणांदोषजातंतदनेनप्रोक्षणेननिवर्तयतीतिग्रहयज्ञकल्पवल्ल्यां॥ पात्राणिक्रमशःप्रोक्ष्यनिदध्यात्तामसंचरे॥ असंचरःप्रणीताग्न्योरंतरेणप्रकीर्तितः॥स्वालंभान्निर्वपेदापमाज्यंस्थाल्यांयथार्हतः॥ इतिकारिकायां॥ प्रणीतमुदकंकृत्वास्थाल्यांत्रिःक्षालितान्क्षिपेत्॥ तंडुलाननुमानेनचरुःपूर्णोयथाभवेत्॥ दैवेत्रिःक्षालिताज्ञेयास्तंडुलाःपैतृकेसकृत्॥ पात्रप्रोक्षणकालेतुचैतेषांप्रोक्षणंभवेदितिकल्पवल्ल्यां॥ तत्राज्यंब्रह्माधिश्रय

ति ॥ तदुत्तरतआचार्यश्चरुमधिश्रयतीतियुगपत् ॥ इतिकल्पवल्ल्यां ॥ कात्यायनसूत्रेअवरोत्तरमुत्तरर्ठंहवीःषि ॥ श्रपणलक्षणंकारिकायां ॥ अन्वर्थःश्रपितःस्विन्नोह्यदग्धोकठिनश्शुभः॥ नचातिशिथिलःपच्योनचरुश्चारसस्तथेति॥ कारिकायां ॥ द्वयोःपर्यग्निकरणंकर्तव्यंज्वलदग्निना ॥ पर्यग्निकरणेकारणमाहश्रुतिः ॥ तंपर्यग्निकरोत्यच्छिद्रमेवैनमेतदग्निनापरिगृण्हातिनाष्ट्रारक्षार्ठंस्यभिमुषेयुरग्निर्हिरक्षसामपहंतेतिकल्पवल्ल्यां ॥ ततः ॥ स्रुवंसंमार्जयेत्प्रांचमतःसंमार्जनैःकुशैः ॥ मूलतःपुष्करंयावत्कुशमूलैस्तथाग्रतः ॥ अग्नावभ्युक्ष्यचपुनःप्रतप्यनिदधातितं ॥ अधोमुखंतापयित्वासंमृज्योर्ध्वमुखंततः ॥ अभ्युक्षणंतुप्रणीतोदकेनविशेषवचनाभावात्प्रणीतानांसर्वार्थत्वाच्च ॥ पुनःप्रतपनंपूर्ववत् ॥ निधानंसमीपे ॥ सम्मार्गकुशानामपासनंउत्तरतः ॥ शाखांतरेग्नौप्रासनंविहितं ॥ आहवनीयेप्रासनमेकेइतिकात्यायनः ॥ अनु

द्वासितानांपूर्वेणोद्वासितानामपरेणउत्तरतउपचारोहियज्ञइतिवचनादग्नेरुत्तरतउद्वासनं ॥ उद्वास्यप्रोक्षणीपश्चाद्धामउत्तरतोग्नेःस्थापनं ॥ इतिकल्पवल्ल्यां॥ तदुद्वासितमाज्यंपवित्राभ्यामुत्पूयतदेवावेक्ष्य॥ अवेक्षणंअपद्रव्यनिरसनार्थंइतिकल्पवल्ल्यां आज्यस्थालीताभ्यांप्रोक्षणीरुत्पुनातीतिश्रुतेः ॥ उत्पुनातिकरणेपवित्रमुदगग्रंवामहस्तेधृत्वातन्मूलंदक्षिणहस्तेधृत्वापवित्रकुशमध्यतउत्पुनाति ॥ उपग्रहार्थंदक्षिणहस्तेनसव्येकुर्यात् ॥ रक्षसांतर्जनायवज्रोवाआपआपोहिकुशाःएवंपरंपरयाकुशेषुवज्रत्वादितिकल्पवल्ल्यां ॥ कारिकायां ॥ अधोमुखऊर्ध्वपादःप्राङ्मुखोहव्यवाहनः ॥ तिष्ठत्येवस्वभावेनआहुतिःकुत्रदीयते ॥ सपवित्रांबुहस्तेनवन्हेःकुर्यात्प्रदक्षिणां ॥ हव्यवाट्सलिलंदृष्ट्वाबिभेतिसंमुखोभवेत् ॥ तिष्ठंतीवहास्थीनीतिश्रुतेःअस्थिस्थानापन्नत्वातसामिधौत्तिष्ठायाधानंइतिदेवयाज्ञिकः ॥ कारिकायां ॥ अन्वारंभेकृतेहोमे

ब्रह्मणादक्षिणेकरे ॥ बहुकाष्ठैःसमिंधीयादर्चिष्मंतंक्रियाक्षमम् ॥ स्रुवेणाज्यंगृहीत्वाग्नेःप्रत्यगुत्तरदेशतः ॥ आरभ्यदिशमाग्नेयीमाज्यधारामृजुंहरेत् ॥ मनसासंस्मरेत्स्वाहायुक्तंचैवप्रजापतिं ॥ नैर्ऋतिंदिशमाश्रित्यऐशानींपूर्ववत्क्षिपेत् ॥ तत्रेंद्रायपदंस्वाहायुक्तंचोपांशुकंभवेत् ॥ स्वाहेत्याघारयेदेतावाघारावितिभाषितौ ॥ प्राच्यौवाजुहुयादेतावृजूसंततमेवच ॥ जुहुयादग्नयेस्वाहासोमायेतितथापरां ॥ अथमेशानकोणाग्रेद्वितीयाग्नेयकोणगा ॥ सुसमिद्धेथवावन्हौहोतव्येचोत्तराहुती ॥ ननुउत्तरतउपचारोयज्ञइतिशास्त्रं ॥ कथमेतेआहुतीदक्षिणसंस्थंहूयेतेइतिचेत्सत्यं ॥ आत्माभिमुखस्याग्नेर्दक्षिणवामाभिप्रायेणेत्यदोषः ॥ प्राजापत्याहुतौउपांशुलकारणंहविर्यज्ञकांडेद्रष्टव्यं ॥ उपांशुलक्षणंहौत्रसूत्रे ॥ यस्मिन्मंत्रादयोनविज्ञायंतेनव्यंजनंकेवलमेवोष्ठचालनंश्वासोवातदुपांशुरिति ॥ भूरादिनवसु

स्विष्टकृतेचाद्यचतुष्टये ॥ अन्वारंभोभवेत्तेषुसोन्वारंभःकुशेनवै ॥ स्रुवधारणार्थंकारिका ॥ अग्रेधृत्वार्थनाशायमध्येचैवमृतप्रजा ॥ मूलेचम्रियतेहोतास्रुवस्थानंकथंभवेत् ॥ अग्रमध्याच्चयन्मध्यंमूलमध्याच्चमध्यतः ॥ स्रुवंधारयतेविद्वान्ज्ञातव्यंचसदाबुधैः ॥ तर्जनींचबहिःकृत्वाकनिष्ठांचबहिस्तथा ॥ मध्यमानामिकांगुष्ठैःस्रुवंधारयतेद्विजः ॥ स्रुवहोमेसदात्यागःप्रोक्षणीपात्रमध्यतः ॥ पाणिहोमेत्यागोन ॥ ॥ इतिकुशकंडिकाभाष्यकारादयः ॥ ॥ अनेकस्रुवसाध्यहोमेअनेकस्रुवासादनंतेषांप्रोक्षणंचेतिसिंधुःसर्वत्रत्यागादौद्रव्यप्रक्षेपइतिगदाधरादयः ॥ उपविशतीवमाज्येतिश्रुतेःउपविश्यैवआहुतिंजुहुयात् ॥ आज्याहुतेराज्यस्थानीयत्वेनोक्तत्वादेतिदेवयाज्ञिकः ॥ अग्निपूजाबहिःप्रोक्तेतिवचनाद्बहिरेवसर्वपूजनमितिकेचिदाहुः ॥ तत्रविशेषोविष्णुधर्मोत्तरे ॥ मध्येपिगंधपुष्पादीन्दद्यादग्नेर्नसंशयः ॥ बहिर्नैवेद्यमात्रं

तुदातव्यमितिनिश्चयइतिशांतिमयूखे ॥ ॥ आज्येनव्याहृतीर्हुत्वाभूर्भुवःस्वरितिक्रमात् ॥ पंचवारुणकंतद्वदंतेचैवप्रजापतिमितिकारिकायां ॥ प्राङ्महाव्याहृतिभिःस्विष्टकृदन्यच्चेदाज्याद्धविरितिसूत्रं ॥ ॥ अस्यार्थः ॥ ॥ यत्रहोमेआज्यादन्यद्धविःस्यात् ॥ अत्रहविःशब्देनचरुरेवहविः ॥ यत्रचरुःस्यात्तत्रमहाव्याहृतिभिःप्राक्स्विष्टकृद्भवति ॥ अन्यत्रांतेपीतिभाष्यकारः ॥ स्विष्टकृद्धोमःसर्वहोमद्रव्यैःकार्यः ॥ लक्षहोमादौचरुशेषस्यधार्यत्वोक्तेरितिशांतिकमलाकरः ॥ ततआचार्योग्निसमीपउपविश्यान्वादध्यात् ॥ अथान्वाधानं ॥ यजुषामन्वाधानंगोभिलहरिहरगदाधरादिभिर्नोक्तत्वात्स्मार्तकर्मणिनान्वाधानंतथापिप्रयोगरत्नस्मार्तोल्लासस्मार्तगंगाधर्यादौ अन्वाधानोक्तेःप्रचुरतरशिष्टाचारप्राप्तत्वाच्चात्राप्युच्यते ॥ ॥ देशकालौ॰ अग्नि

न्सग्रहमखरजोदर्शनशांत्याख्येकर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ अस्मिन्नन्वाहितेग्नौपूर्वेणब्रह्मणोगमनं ॥ उत्तरतःपात्रासादनं ॥ द्वेपवित्रे ॥ कांस्यमयीताम्रमयीवाआज्यस्थाली ॥ ताम्रमयीचरुस्थाली ॥ पालाश्यःसमिधः ॥ प्रांच्यावाघारौ ॥ समिद्धतमेआज्यभागौ॥ पूर्णपात्रंदक्षिणावा ॥ एतान्‌वैकल्पिकान्‌पदार्थानहंकरिष्ये ॥ अथदेवताभिध्यानं ॥ तत्रप्रजापतिंइंद्रंअग्निंसोमंएताःआज्येनप्रत्येकंएकैकयाहुत्या ॥ अत्रप्रधानं ॥ आदित्यादिनवग्रहान्‌अर्कादियथालाभसमिच्चरुतिलाज्यद्रव्यैःप्रत्येकंप्रतिद्रव्येणअष्टाष्टसंख्याकाभिराहुतिभिः ॥ अधिदेवताप्रत्यधिदेवताश्चतैरेवद्रव्यैःप्रत्येकंप्रतिद्रव्येणचतुश्चतुःसंख्याकाभिराहुतिभिः ॥ विनाय

---

१ दर्पणेनमुख्यदेवतान्वाधानोत्तरग्रहान्वाधानमुक्तं कमलाकरादिनिबंधेषुग्रहान्वाधानोत्तरं मुख्यदेवतान्वाधानमुक्तं तदनुसारेणात्र ॥ व्याहृतिहोमः सर्वत्रोक्तः ॥

कादिपंचदेवताःक्षेत्रपालंवास्तोष्पतिंइंद्रादिदशलोकपालांश्चतैरेवद्रव्यैःप्रत्येकंप्रतिद्रव्येणद्वाभ्यांद्वाभ्यामाहुतिभ्यां यक्ष्ये॥ पुनरत्रप्रधानं ॥सूर्यंइंद्रंइंद्राणींभुवनेश्वरींशकराघृतसंमिश्रपायसतिलाज्यद्रव्यैःप्रत्येकंप्रातिद्रव्येणअष्टाविंशत्यष्टाविंशतिसंख्याकाभिराहुतिभिर्यक्ष्ये ॥ न्यूनातिरिक्तार्थंघृताक्ततिलद्रव्येणसमस्तव्याहृतिभिरष्टाविंशतिसंख्याकाभिराहुतिभिर्यक्ष्ये ॥ शेषेणस्विष्टकृतं ॥ अग्निंवायुंसूर्यंअग्नीवरुणौ अग्नीवरुणौअग्निंवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतःस्वर्कान्वरुणंआदित्यंअदितिंप्रजापतिंएताअंगप्रधानार्थादेवताआज्येनअस्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मण्यहंयक्ष्ये॥ ॥दाक्षिणतोब्रह्मासनास्तरणंतत्रब्रह्मोपवेशनं ॥ ॥उत्तरतःप्रणीतासनं ॥ वायव्यांद्वितीयमासनं ॥ ततोवामकरेणप्रणीताःसंगृह्यदक्षिणकरेणजलं प्रपूर्यभूमौवायव्यासनेनिधायालभ्योत्तरतोग्नेरासनेस्थापनं ॥ बर्हिषाप्रदक्षिणमग्निं

परिस्तीर्यवाईशानादिपूर्वाग्रैस्त्रिभिस्त्रिभिर्दर्भैःपरिस्तरणं ॥ तच्चप्रागुदगग्रैःदक्षिणतो प्रागग्रैः ॥ प्रत्यगुदगग्रैः ॥ उत्तरतःप्रागग्रैः॥अर्थवत्पात्रासादनं ॥ पवित्रच्छेदनादर्भास्त्रयः ॥ पवित्रेद्वे ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली॥ चरुस्थाली ॥ संमार्गकुशाःपंच उपयमनकुशाःसप्त ॥ समिधस्तिस्रः ॥ स्रुवः ॥ आज्यं ॥ तंदुलाः पूर्णपात्रेदक्षिणा वरोवा ॥ पवित्रच्छेदनैःपवित्रकरणं ॥ द्वयोःपवित्रयोरुपरिपवित्रत्रयंनिधाय ॥ द्वयोर्मूलेनद्वौकुशौप्रदक्षिणीकृत्यत्रयाणांमूलाग्रेएकीकृत्यअनामिकांगुष्ठेनद्वयोरग्रंछेदयेत् ॥ द्वयोर्मूलंत्रीणिचोत्तरतःक्षिपेत्॥ प्रोक्षणीपात्रेप्रणीतोदकमासिच्यपात्रांतरेणचतुर्वारं ॥ वामकरेपवित्राग्रंदक्षिणेमूलंधृत्वामध्यतःपवित्राभ्यामुत्पवनंप्रोक्षणीपात्रजलस्येति ॥ प्रोक्षणीनांसव्यहस्तेकरणम् ॥ दक्षिणहस्तमुत्तानंकृत्वामध्यमानामिकांगुल्योर्मध्यपर्वभ्यामपामुद्दिंगनं ॥ प्रणीतोदकेनप्रोक्षणीनांप्रोक्षणं ॥ प्रोक्षण्युद

केनआज्यस्थाल्याःप्रोक्षणं ॥ चरुस्थाल्याःप्रोक्षणं ॥ संमार्गकुशानांप्रोक्षणं ॥ उपयमनकुशानांप्रोक्षणं॥ समिधानांप्रोक्षणं ॥ स्रुवस्यप्रोक्षणं ॥ आज्यस्यप्रोक्षणं ॥ तंडुलानांप्रोक्षणं ॥ पूर्णपात्रस्यप्रोक्षणं ॥ प्रणीताभ्योर्मध्येअसंचरेप्रोक्षणीनिधानं ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ सपवित्रकेचरुपात्रेप्रणीतोदकमासिच्यक्षालिततंदुलप्रक्षेपः ॥ ब्रह्मणोदक्षिणतआज्याधिश्रयणं ॥ आचार्यस्यचरोरधिश्रयणमाज्यस्योत्तरतः ॥ ज्वलितोल्मुकेनपर्यग्निकरणं ॥ स्रुवस्यप्रतपनं ॥ संमार्गकुशैःस्रुवस्यसंमार्जनं ॥ अग्रैरग्रंमूलैर्मूलं ॥ प्रणीतोदकेनाभ्युक्षणं ॥ पुनःप्रतपनंदेशेनिधानं ॥ आज्योद्वासनं ॥ चरोरुद्वासनं ॥ प्रत्युत्पवनवत् पवित्रेणाज्योत्पवनं ॥ अवेक्षणं ॥ अपद्रव्यनिरसनं ॥ प्रोक्षण्याः प्रत्युत्पवनं ॥ उपयमनकुशानादाय ॥ तिष्ठन्समिधोभ्याधाय ॥ प्रोक्षण्युदकशेषेणसपवित्रहस्तेनाग्नेः ईशानकोणादारभ्यप्रदक्षिणवत्पर्युक्ष

णं ॥ पवित्रयोःप्रणीतासुनिधानं ॥ दक्षिणंजान्वाच्यजुहोति ॥ तत्राघारावाज्यभागौचब्रह्मान्वारब्धस्स्रुवेणजुहुयात् ॥ मृगीमुद्रयाधृतस्स्रुवेणाज्यमादायप्रजापतिंमनसाध्यात्वास्वाहाकारमुच्चैः इदंप्रजापतयेउपांशुनममेत्युच्चैरुच्चारयेत् ॥ अग्नेरुत्तरभागे ॐ प्रजापतयेस्वाहा ॥ इदंप्रजापतयेनमम ॥ अग्नेर्दक्षिणभागे ॥ ॐ इंद्रायस्वाहा ॥ इदमिन्द्रायनमम ॥ इत्याघारौ ॥ मध्येसमिद्धतमेवाज्यभागौ ॥ ॐ अग्नयेस्वाहा ॥ इदमग्नयेनमम ॥ ॐ सोमायस्वाहा ॥ इदंसोमायनमम ॥ ततोयजमानेनद्रव्यत्यागः कार्यः ॥ यथाकालंप्रत्याहुतित्यागस्यकर्तुमशक्यत्वात्सर्वमेवहविर्जातंदेवताश्चमनसाध्यात्वाइदंयथादैवतमस्तुनममेतिएवंरूपंत्यागमुच्चारयेद्यजमानः ॥ तत्रच ॥ मंत्रेणोंकारपूतेनस्वाहांतेनविचक्षणः ॥ स्वाहावसानेजुहुयाद्ध्यायन्वैमंत्रदेवतां ॥ १ ॥ योनर्चिषिजुहोत्यग्नौव्यंगारिणिचमानवः ॥ मंदाग्निरामयावीचदरि

द्रश्चैवजायते ॥ २ ॥ परिणामोवदानस्ययाजैश्वर्यंग्निपुष्टये ॥ तस्मात्समिद्धेहोतव्यं नासमिद्धेकथंचन ॥ ३ ॥ अर्कःपलाशखदिरावपामार्गोथपिप्पलः ॥ औदुंबरशमी दूर्वाकुशाश्चसमिधःक्रमात् ॥ ४ ॥ तिलाज्यचरुपक्कंचहविर्मुख्यंप्रकीर्तितामिंति॥ ॥[1] इदंसंपादितंसमिच्चरुतिलाज्यादिहविर्द्रव्यंयायायक्ष्यमाणदेवतातस्यैतस्यैदेवतायैन मम ॥ ॥ यथादैवतमस्तु ॥ ततंआदित्यादिनवग्रहान्क्रमेणपूर्वोक्तार्कादिसमिच्चरुतिलाज्यद्रव्यैरष्टाष्टसंख्ययाहुत्वा ॥ पूर्वोक्तग्रहहोमद्रव्येणअधिप्रत्यधिदेवताश्चतुश्चतुःसंख्ययाहुत्वा ॥ यस्यग्रहस्ययासमित्सातस्याधिदेवतायाः प्रत्यधिदेवतायाश्चयोज्या ॥ विनायकादिदिक्पालांतंक्रतुसाद्गुण्यंक्रतुसंरक्षदेवताः पलाशोदुंबरान्य

---

[1] गणाधिपतयेदेयाप्रथमातुवराहुतिः ॥ अन्यथाविफलंविप्रभवंतीहनसंशयः ॥ इतिकमलाकरे ॥

तमसमिच्चरुतिलाज्यद्रव्येणद्विद्विसंख्यायाजुहोति ॥ समिधासरलासत्वचाकनिष्ठिकाग्रवत्स्थूला द्वादशांगुलदीर्घाग्राह्या ॥ अत्रतिसृभिर्दूर्वाभिरेकाहुतिस्तथैवत्रिपत्रकुशैरेकाहुतिः ॥ द्रवद्रव्यंस्रुवेणैवपाणिनाकठिनंहविरिति ॥ प्रधानंपायसंप्रोक्तंसघृतंचसशर्करं ॥ अष्टोत्तरंशतंचैवजुहुयात्तिलसर्पिषा ॥ ॥ इतिऋतुशांतौनारदसंहितायां ॥ ॥ ततः सूर्येंद्रेंद्राणीभुवनेश्वरीणांप्रीत्यर्थंतिलपायसाज्यद्रव्येणप्रत्येकमष्टोत्तरशतमष्टाविंशतिसंख्यायावाजुहुयात् ॥ ततः समस्तव्याहृतिभिस्तिलाज्यद्रव्येणाष्टोत्तरशतमष्टाविंशतिसंख्यययावाजुहुयात् ॥ ॥ एवंहोमंसमाप्याग्नेःस्थापितदेवतानांचोत्तरपूजनंकार्यं ॥ तत्रायंक्रमः ॥ पूजास्विष्टंनवाहुत्योबलिः पूर्णाहुतिस्तथा ॥ संस्रवादिविमोकांतंहोमशेषसमापनं ॥ श्रेयः संपाद्यदानंचअभि

षेकोविसर्जनमिति ॥अद्यपू० कृतस्यकर्मणः सांगतासिद्ध्यर्थंस्थापितदेवतानांमृडाग्नेश्चोत्तरपूजनंकरिष्ये॥ मृडाग्निस्तु ॥पूर्वप्रज्वलितोह्यग्निर्हविर्द्रव्यबुभुंजितः॥तृप्तोनिर्धूमनिर्ज्वालोमृडाग्निः परिकीर्तितइतिग्रहरत्नावल्ल्यां॥ ॐ अग्नेनयंसुपथारायेऽअस्मान्विश्वानिदेववयुनानिविद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिम्विधेम ॥ १ ॥ ॐ मृडाग्नयेनमः गंधादिपंचोपचारैः संपूज्यस्थापितदेवतानामुत्तरपूजनंॐविश्वानिदेवसवितरितिमंत्रेण ॥ ॐ भू० सूर्यादिस्थापितदेवताभ्योनमः गंधादिपंचोपचारैःसंपूज्य ॥ अनयापूजयामृडाग्निस्थापितदेवताश्चप्रीयंतां ॥ ॥

---

१ अग्निपूजाबहिःप्रोक्तेतिवचनात्बहिरेवसर्वपूजनमितिकेचिदाहुः॥ तत्रविशेषोविष्णुधर्मोत्तरे॥ मध्येपिगंधपुष्पादिदत्यादग्नेर्नसंशयः॥ बहिर्नैवेद्यमात्रंतुदातव्यइतिनिश्चयेतिशांतिमयूखे॥

ततोहुतशेषहविर्द्रव्यंगृहीत्वाब्रह्मान्वारब्धः स्विष्टकृद्धोमंकुर्यात् ॥ ॥ ॐ अग्नयेस्विष्टकृतेस्वाहा ॥ इदमग्नयेस्विष्टकृतेनमम ॥ ततोभूराद्यानवाहुतयः ॥ ॥ ॐ भूःस्वाहा ॥ १ ॥ इदमग्नयेनमम ॥ ॐ भुवःस्वाहा ॥ २ ॥ इदंवायवेनमम ॥ ॐ स्वःस्वाहा ॥ ३ ॥ इदंसूर्यायनम ॥ ॐ त्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा ॥ ४ ॥ इदमग्निवरुणाभ्यां० ॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥

---

१ प्राङ्महाव्याहृतिभिः स्विष्टकृदन्यच्चेदाज्याधविरितिसूत्रं ॥ अस्यार्थः ॥ यत्रहोमे आज्यादन्यधविस्यात् ॥ अत्रहविःशब्देनचरुरेवहविः ॥ यत्रचरुस्यात्तत्रमहाव्याहृतिभिःप्राक्स्विष्टकृत्भवतिअन्यत्रांतेति भाष्यकाराः ॥ स्विष्टकृद्धोमः सर्वद्रव्यैःकार्यः॥लक्षहोमादौचरुशेषस्यधार्यत्वोक्तेति शांतिकमलाकरः ॥

अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसुहवोनऽएधिस्वाहा ॥ ५ ॥ इदमग्नीवरुणाभ्यां० ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाऽअसि ॥ अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा ॥ ६॥ इदमग्नयेअयसेन० ॥ ॐ येतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहान्तः ॥ तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चंतुमरुतःस्वर्काःस्वाहा ॥ ७ ॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्चनमम ॥ ॐ उदुत्तमंवरुणपाशमस्मदबाधमंविमध्यमꣳश्रथाय ॥ अथावयमादित्यव्रतेतवानागसोऽअदितयेस्यामस्वाहा ॥ ८ ॥ इदंवरुणायादित्यायादितयेचन० ॥ ॐ प्रजापतयेस्वाहा ॥ ९ ॥ इदंप्रजापतयेनमम ॥ इतिनवाहुतयः ॥ ततोबलिदानं ॥ तच्चैवं ॥ ॥ अग्न्यायतनस्यसमंताद्दिक्षुविदिक्षुच ॥ दशदिक्पालानांमाषभक्तबलयो

देयाः ॥ ॥ अद्यपू० कृतस्यकर्मणःसांगतासिद्ध्यर्थंदिक्पालपूर्वकंआदित्यादिग्रहमंडलादिस्थापितदेवताभ्योबलिदानंकरिष्ये ॥ ॥ ॐ त्रांतारमिंद्रं० ॥ १ ॥ प्राच्यांदिशिइंद्रंसांगंसपरिवारंसायुधंसशक्तिकंएभिर्गंधाद्युपचारैस्त्वामहंपूजयामि ॥ इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायइमंसदीपमाषभक्तबलिंसमर्पयामि ॥ भोइंद्रदिशंरक्षबलिंभक्षममसकुटुंबस्याभ्युदयंकुरु ॥ आयुःकर्ताक्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्तावरदोभव ॥ ॥ अनेनबलिदानेनइंद्रःप्रीयतां ॥ एवंसर्वत्रोहः ॥ ॐ त्वन्नोऽअग्नेतववदेव० ॥ २ ॥ आग्नेय्यांदिशिअग्निंसांगं० एभिर्गंधा० अग्नयेसांगायसप०भोअग्नेदिशं० आयुःकर्ता०अनेनबलि० अग्निःप्रीयतां ॥ ॐ यमायत्वांगि० दक्षिणस्यांदिशियमंसांगं० एभिर्गंधा० यमायसां० भोयमदिशं० आ

---

१ दर्पणेअहोइन्द्रगजेंद्रस्येत्यादिश्लोकाउक्ताः इदानींतनानामपाठदर्शनान्नात्रलिखिताः ॥

युःकर्ता॰ अनेनबलिदा॰ यमःप्रीयतां ॥ ॐ असुन्वन्तमयजमानमिच्छ॰ ॥ ४ ॥ नैर्ऋत्यांदिशिनिर्ऋतिंसां॰ एभिर्गंधा॰ निर्ऋतयेसां॰ ॥ भोनिर्ऋतेदि॰ अनेनबलि॰ निर्ऋतिःप्री॰ ॥ ॐ तत्वायामि॰ ॥ ५ ॥ पश्चिमायांदिशिवरुणंसां॰ एभिर्गंधा॰ वरुणायसां॰ भोवरुणदिशं॰ आयुःकर्त्ता॰ अनेनबलि॰ वरुणःप्री॰ ॐ आनोनियु॰ ॥ ६ ॥ वायव्यांदिशिवायुंसां॰ एभिर्गंधा॰ वायवेसां॰ भोवायोदिशं॰ ॥ अनेनबलिदा॰ वायुःप्री॰ ॥ ॐ वयर्ठंसोमव्र॰ ॥ ७ ॥ उदीच्यांदिशिसोमंसां॰ एभिर्गंधा॰ सोमायसां॰ भोसोमदिशं॰ अनेनबलि॰ सोमःप्री॰ ॥ ॐ तमीशानं॰ ॥ ॥ ८ ॥ ईशान्यांदिशिईश्वरंसां॰ एभिर्गंधा॰ ॥ ईश्वरायसां॰ भोईश्वरदिशं॰ ॥ अनेनबलिदानेनईश्वरःप्री॰ ॥ पूर्वेशानयोर्मध्येऊर्ध्वायांदिशिब्रह्माणं॰ ॐ अस्मेरुद्रा॰

॥ ९ ॥ पूर्वेशानयोर्मध्येऊर्ध्वायांदिशिब्रह्माणंसांगं० एभिर्गंधा० ब्रह्मणेसां० भोब्रह्मन्
दि० आयुः क० अनेनबलि०ब्रह्माप्री० ॥ ॐ स्योनापृथि० ॥ १० ॥ निर्ऋतिपश्चि
मयोर्मध्येअधःस्थायांदिशि अनंतंसांगं० एभिर्गंधा० अनंतायसां० भोअनंतदि
शं० आयुःकर्ता० अनेनब० अनंतः प्री० ॥ ॥ ततआवाहनमंत्रेणगणेशदुर्गाक्षे
त्रपालबलिदानं ॥ ततोग्रहवेदीसमीपेग्रहाणांबलिः ॥ ॐ आकृष्णेन० ॥ १ ॥ सूर्याय
सांगायसपरिवारायसायुधायसशक्तिकायईश्वराग्निरूपाधिप्रत्यधिदेवतासहिताय
इमंसदीपमाषभक्तबलिंस० ॥ भोसूर्यइमंबलिंगृहाणममसकुटुंबस्याभ्युदयंकुरु ॥
आयुःकर्त्ता क्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्तावरदोभवअनेनबलि
दानेनसूर्यः प्री० १ ॥ ॐ इमन्देवा० ॥ २ ॥ सोमायसां० उमांबुरूपाधिप्रत्यधि

देवतास० इमं० ॥ भोःसोमइमंब० ॥ ॐ अग्निर्मूर्द्धा० ॥ ३ ॥ भौमायसां० स्कंधभूमिरूपाधिप्रत्यधिदेवतास० भोभौमइमंबलिंगृ० ॥ ॐ उद्बुध्यस्वा० ॥ ४ ॥ बुधायसांगाय० नारायणविष्णुरूपाधिप्रत्यधिदेवतास० इमंमाषभ० भोबुधइमं० अनेनबलि० बुधः प्री० ॥ ॐ बृहस्पते० ॥ ५ ॥ बृहस्पतयेसां० ब्रह्मेंद्ररूपाधिप्रत्यधिदेवतासहिताय० ॥ भोबृहस्पतेइमं० अनेनबलि० बृहस्पतिः प्री० ॥ ॐ अन्नात्परिस्रु० ६ ॥ शुक्रायसां० इंद्रेंद्राणीरूपाधिप्रत्यधिदेव० ॥ भोःशुक्रइमंबलिं० अनेनबलिदा० शुक्रः प्री० ॥ ॐ शन्नोदेवी० ॥ ७ ॥ शनैश्चरायसां०यमप्रजापतिरूपाधिप्रत्यधिदे० भोःशनैश्चरइमं०अनेनबलि० शनैश्चरः प्री० ॥ ॐ कयानश्चि० ॥ ॥ ८ ॥ राहवेसां०कालसर्परूपाधिप्रत्यधिदे०भोरा०इमंबलिं०अनेन० राहुःप्री० ॥

ॐ के॒तुंकृ॒ण्वन्न ॥ ९ ॥ केतवेसां॰चित्रगुप्तब्रह्मरूपाधिप्रत्यधिदेव॰ भोःके॰
इमंबलिं॰ अने॰ केतुः प्री॰ ॥ ततः क्रतुसाद्गुण्यदेवताभ्योबलिः ॥ ॐ ग॒णानांत्वा
॥ १ ॥ गणपतयेसां॰ सशक्तिकायइ॰ भोगण॰ इमंब॰ आयुः अनेन॰ ॥ ॐ अ
म्बे॒अंबि॒के॰ ॥ २ ॥ दुर्गायैसांगां॰ सशक्तिका॰ भोदुर्गेइ॰ आयुः कर्त्री॰ अनेनब॰
ॐ आनौनि॒॰ ॥ ३ ॥ वायवेसां॰ इमं॰ भोवायोइमं॰ ॥ ॐ घृ॒तंघृत॰ ॥ ४ ॥
आकाशायसां॰ भोआकाशइमं॰ ॥ ॐ यावा॒ङ्कशा॒॰ ॥ ५ ॥ अश्विभ्यांसा॰ इमंस॰
भोअश्विनौ॰ अनेनब॰ ॥ ॐ वास्तोष्पते॰ ॥ १ ॥ वास्तोष्प॰ सां॰ इमंस॰ भो
वास्तो॰ इमंबलिं॰ अनेनब॰ ॥ ॐ नहि॒स्पश॒॰ ॥ २ ॥ क्षेत्राधिपतयेसा॰ इमंस॰
भोःक्षेत्राधिपतेइमंबलिं॰ अथ दिक्पालेभ्यएकतंत्रेणैकमेवबलिंदद्यात् ॥ ॐ प्रा

च्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा॒दक्षिणायैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहाप्र॒तीच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहोदीच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहो॒र्ध्वायैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहावाच्यैदि॒शेस्वाहा॒र्वाच्यैदि॒शेस्वाहा ॥ १ ॥ इंद्रादिदशदिक्पालेभ्यइमं सदीपमाषभक्तबलिंस॰ भोभोइंद्रादिदशदिक्पालाःदिशंरक्षतबलिं॰ आयुःकर्त्तारःक्षेम॰ अनेनबलि॰ इंद्रादिदशदिक्पालाःप्री॰ एवंसर्वेभ्योग्रहेभ्यएकतंत्रेणैकमेवबलिंदद्यात् ॥ ॐ ग्रहाऽऊर्जा॰ तमम् ॥ १ ॥ आदित्यादिनवग्रहदेवताभ्यः अधिप्रत्यधिदेवताविनायकादिवास्तोष्पत्तिक्षेत्रपालदेव॰ स॰ प्रीयंतां॰ ॥ ॥ एवंमातृणामेकमेवबलिंदद्यात् ॥ ॐ समख्येदे॒व्या॰ ॥ १ ॥ गौर्यादिमातृभ्यइमंसदीपमाषभक्तबलिं॰ भोभोगौर्यादिमातरइमंबलिंगृण्हीतआयुःकर्त्र्यःक्षेम॰ अनेनबलि॰ गौ

र्यादिमातरःप्रीयंतां ॥ ॥ प्रधानदेवताभ्यएकतंत्रेणैकमेवबलिंदद्यात् ॥ ॥ ॐ आकृष्णे० ॥ १ ॥ त्रातारमिंद्रं० ॥ २ ॥ अदित्यैरा० ॥ ३ ॥ श्रीश्चंतेल० ॥ ४ ॥ सूर्येन्द्रइन्द्राणीभुवनेश्वरीदेवताभ्यइमंसदीपमाषभक्तबलिंस०॥ भोभोःसूर्यइंद्रइंद्राणीभुवनेश्वरीदेवताइमंबलिंगृण्हीत०ममसकुटुंब०आयुःकर्त्र्यःक्षेम०अनेनबलि०सूर्यइंद्रइन्द्राणीभुवनेश्वरीदे०प्रीयन्तां॥अथक्षेत्रपालमहाबलिः॥एकस्मिन्वंशपात्रेकुशानास्तीर्यतदुपरिआहारचतुर्गुणंद्विगुणंवामाषभक्तदध्योदनंजलपात्रंचनिधायहरिद्राकुंकुमादिपताकायुतंकृत्वा ॥ अद्यपू० सकलारिष्टशांतिपूर्वकंप्रारिप्सितस्यकर्मणः सांगतासिद्ध्यर्थंक्षेत्रपालपूजनबलिदानंचकरिष्ये ॥ ॐ नहिस्पशु० ॥ १ ॥ इतिमंत्रेणक्षेत्रपालायनमःषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ ॥ ॐ नमोक्षेत्रपाल

स्त्वंभूतप्रेतगणैःसह ॥ पूजांबलिंगृहाणेमंसौम्योभवतुसर्वदा ॥ आयुरारोग्यंमेदेहिनिर्विघ्नंकुरुसर्वदा ॥ १ ॥ ॐनमोभगवन्क्षेत्रपालचित्रतुरंगवाहनसर्वभूतप्रेतपिशाचशाकिनीडाकिनीवेतालादिपरिवृतदध्योदनाप्रियसकलशक्तिसहितइमांपूजांगृहाणअनयापूजयाक्षेत्रपालःप्रीयतां ॥ ततोबलिदानं ॥ ॥ क्षेत्रपालायसांगायभूतप्रेतपिशाचशाकिनीडाकिनीवेतालादिपरिवारयुतायसायुधायसशक्तिकायसवाहनायइमंसदीपमाषभक्तबलिंसमर्पयामि ॥ भोभोःक्षेत्रपालसर्वतोदिशंरक्षबलिंभक्षममसकुटुंबस्याभ्युदयंकुरुआयुःकर्ताक्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकर्तानिर्विघ्नकर्तावरदोभव ॥ अनेनबलिदानेनक्षेत्रपालःप्रीयतां ॥ अनवेक्ष्यमाणेनदुर्ब्राह्मणेनबलिंनीत्वाचतुष्पथेनिक्षेपयेत् ॥ ॥ यस्यवेदश्चवेदीचविच्छिद्येतेत्रिपूरुषं ॥ सर्वेदुर्ब्राह्मणोज्ञेयःसर्वकर्मसुनिंदितइतिस्मृतौ ॥ ततोयजमानस्तस्यपृष्ठतोद्वारपर्यंतंगत्वा

जलंक्षिपेद्धिंकारेतिमंत्रेण॥ ॐ हिंकारायस्वाहा।हिंकृतायस्वाहा।क्रन्दतेस्वाहा।वक्रन्दायस्वाहा।प्रोथतेस्वाहा।प्रप्रोथायस्वाहा।गन्धायस्वाहा।घ्रातायस्वाहा।निविष्टायस्वाहोपविष्टायस्वाहा।सन्दितायस्वाहा।वल्गतेस्वाहासींनायस्वाहा।शयानायस्वाहा।स्वपतेस्वाहा।जाग्रतेस्वाहा।कूजतेस्वाहा।प्रबुद्धायस्वाहा।विजृम्भमाणायस्वाहा।विचृत्तायस्वाहा।सꣳहानायस्वाहोपस्थितायस्वाहायंनायस्वाहाप्रायंणायस्वाहा ॥ १ ॥ यजमानः पाणिपादंप्रक्षाल्याचम्यपूर्णाहुतिंहोमंकुर्यात् ॥ ॥अद्यपू० कृतस्यकर्मणः सांगतासिद्ध्यर्थंवसोर्द्धारासमन्वितंपूर्णाहुतिहोमंकरिष्ये ॥ ततःपात्रांतरेस्रुवेणचतुर्गृहीतमाज्यंद्वादशवारंगृहीत्वापात्रोपरिसमिधंधृत्वावस्त्रफलतांबूलचंदनमाल्यादिभिरलंकृत्यगृहीत्वापात्रंस्रुगुपरिनिधायधृत्वोभयपाणिभ्यांयजमानस्तिष्ठेत् ॥ ॥

तत्रमंत्राः ॥ ॥ ॐ स॒मु॒द्रादू॒र्म्मिर्मधु॑माँ२ऽउदा॑र॒दु॒पा॒ꣳशु॒ना॒सम॑मृत॒त्वमा॑नट् ॥
घृ॒तस्य॒नाम॒गुह्य॒न्यदस्ति॑जि॒ह्वादे॒वाना॑म॒मृत॑स्य॒नाभिः॑ ॥ १ ॥ व॒यन्नाम॒प्प्रब्र॑वामाघृ॒
तस्या॒स्मिन्य॒ज्ञेधा॑रयामा॒नमो॑भिः॑ ॥ उप॑ब्र॒ह्माशृ॑णवत्स॒स्यमा॑न॒ञ्चतुः॑शृ॑गोवमीद्गौ॒र
ऽए॒तत् ॥ २ ॥ च॒त्वारि॒शृंगा॒त्रयो॑ऽअस्य॒पादा॒द्वेशी॒र्षेस॒प्तहस्ता॑सोऽअस्य ॥ त्रिधा॑ब॒
द्धोवृ॑ष॒भोरो॑रवीति॒म॒होदे॒वोमर्त्याँ॒ २ ऽआवि॑वेश ॥ ३ ॥ त्रिधा॑हि॒तम्प॒णिभि॑र्गु॒ह्यमा॑
नं॒गवि॑दे॒वासो॑घृ॒तमन्व॑विन्दन्॥ इन्द्र॒ऽएक॒ठंसूर्य॒ऽएकं॑न्यजानवे॒नादेकं॑ꣳस्व॒धया॒नि
ष्ठतक्षुः॑ ॥ ४ ॥ ए॒ताऽअ॑र्षन्ति॒हृद्या॑त्समु॒द्राच्छ॒तव॑जारि॒पुणा॒नाव॒चक्षे॑ ॥ घृ॒तस्य॒धारा॑
ऽअ॒भिचा॑कशीमिहि॒रण्ययो॑वे॒तसोमध्य॑ऽआसाम् ॥ ५ ॥ स॒म्यक्स्र॑वन्तिस॒रितो॒न

धेनाऽअन्तर्हृदामनसापूयमानाः ॥ एतेऽअर्षन्त्यूर्म्मयोघृतस्यमृगाऽइवक्षिपणोरीष
माणाः ॥ ६ ॥ सिन्धोरिवप्राध्वनेशूघनासोवातप्प्रमियः पतयन्तिजिह्वाः ॥ घृत
स्यधाराऽअरुषोनवाजीकाष्ठाभिन्दन्नूर्म्मिभिः पिन्वमानः ॥ ७ ॥ अभिप्प्रवन्तसम
नेवयोषाः कल्याण्यः स्मयमानासोऽ अग्निम् ॥ घृतस्यधाराः समिधोनसन्तताजु
षाणोहर्य्यतिजातवेदाः ॥ ८ ॥ कन्याऽइववहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशी
मि ॥ यत्रसोमः सूयतेयत्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते ॥ ९ ॥ अभ्यर्षतसुष्टुति
ङ्गव्यमाजिमस्मासुभद्राऽद्रविणानिधत्त ॥ इमंयज्ञन्नयतदेवतानोघृतस्यधारामधु
मत्पवन्ते ॥ ॥ १० ॥ धामन्तेविश्वम्भुवनमधिश्रितमन्तःसमुद्रेहृद्यन्तरायुषि ॥ अ

पामनीं॑केस॒मि॒थेय॒ऽआभृ॑त॒स्तम॑स्या॒ममधु॑मं॑तं॑तऽऊ॒र्म्मिमम् ॥ ११ ॥ पुन॑स्त्वादि॒त्या
रु॒द्रा॒वस॑वः॒समि॑न्धता॒म्पुन॑र्ब्र॒ह्माणो॑वसुनीथय॒ज्ञैः ॥ घृ॒तेन॒त्वन्त॒न्वँ॒वर्धयस्वस॒त्याः सं
न्तु॒यज॑मानस्य॒कामाः॥ १२ ॥ स॒प्त॑तेऽअग्ने॒समि॒धः॑स॒प्तजि॒ह्वाः॒स॒प्तऽऋष॑यः॒स॒प्तधाम॑
प्रि॒याणि ॥ स॒प्तहोत्राः॑स॒प्त॒धात्वा॑यजन्ति॒स॒प्तयो॒नी॒रापृ॑णस्व॒घृ॒ते॒नस्वाहा॑ ॥ १३ ॥
पू॒र्णा॑द॒र्वि॒परा॑पत॒० ॥ १४ ॥ अथप्रातरहुतेप्राहुतेवायदरथाःकामयेतसोऽस्याऽअनि
रसितायैकुं॑भ्यैद०र्व्यौ॑पहन्तिपूर्णादर्विपरापतसु॒पूर्णापुनरापत ॥ वस्नेवविक्रीणावहा॒ऽ
इषमूर्जꣳशतक्रतोस्वाहा ॥ १ ॥ इदमग्नयेवैश्वानरायवसु॒रुद्रादित्येभ्यःशतक्रतवेस
प्तवतेअग्नयेअद्भ्ययश्चनमम ॥ ॥ ततोवसोर्द्धारांजुहुयात् ॥ ॥ तत्रमंत्राः ॥ ॥ ॐ

सप्ततेअग्नेसमिधः०॥१॥ शुक्रज्योतिश्चचित्रज्योतिश्चसत्यज्योतिश्चज्योतिष्माँश्च॥
शुक्रश्चऽऋतपाश्चात्यꣳहाः ॥२॥ ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च ॥ मितश्चसम्मि
तश्चसभराः ॥ ३ ॥ ऋतश्चसत्यश्चध्रुवश्चधरुणश्च ॥ धर्त्ताचविधर्त्ताचविधारयः ॥
॥ ४ ॥ ऋतजिच्चसत्यजिच्चसेनजिच्चसुषेणश्च ॥ अन्तिमित्रश्चदूरेऽअमित्रश्चगणः॥
॥ ५ ॥ ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासःप्रतिसदृक्षासऽएतन॥ मितासश्चस
म्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअस्मिन् ॥ ६ ॥ स्वतवाँश्चप्रघासीचसान्तप
नश्चगृहमेधीच ॥ क्रीडीचशाकीचोज्जेषि ॥ ७॥ इन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभ
वन्यथेन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभवन् ॥ एवमिमन्यजमानन्दैवीश्चविशोमानु

षीश्वानुवत्सानोभवन्तु ॥ ८ ॥ इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्नेसरिसस्य
मध्ये ॥ उत्सं षस्वमधुमन्तमर्वन्त्समुद्रियꣳसदनमाविशस्व ॥ ९ ॥ घृतम्मिमि
क्षेघृतमस्य० ॥ १० ॥ ॥ ब्राह्मणं ॥ ॥ अथातोवसोर्धाराञ्जुहोति ॥ अत्रैषसवो
ग्निःसंस्कृतःसऽएषोत्रवसुस्तस्मैदेवाऽएतान्धाराम्प्रागृण्हँस्तयैनमप्रीणँस्तद्यदेतस्मै
वसवऽएतान्धाराम्प्रागृण्हंस्तस्मादेनाम्वसोर्द्धारेत्याचक्षतेतयैवास्माऽअद्यमेतान्धा
राम्प्रगृण्हातितथैनंप्रीणाति ॥ १ ॥ यद्वेवैताम्वसोर्धाराञ्जुहोति ॥ अभिषेकऽएवा
स्यैषऽएतद्वाऽएनन्देवाः सर्वंकृत्स्नꣳसंस्कृत्याथैनमेतैःकामैरभिषिन्चत्येतयावसो
र्द्धारयातथैनमयमेतत्सर्वंकृत्स्नꣳ संस्कृत्याथैनमेतैः कामैरभिषिंचत्येतयावसोर्द्धा

रयाज्येनपन्चगृहीतेनौदुम्बर्यास्त्रुचातस्योक्तोबन्धुः ॥ २ ॥ वैश्वानरꣳहुत्वा ॥ शि
रोवैवैश्वानरःशीर्ष्णोवाऽअन्यमद्यतेथोशीर्षतोवाऽअभिषिन्च्यमानाभिषिन्च्यतेमा
रुतान्हुत्वाप्प्राणावैमारुताःप्राणैर्वाऽअन्नमद्यतेथोप्राणेषुवाऽअभिषिन्च्यमानोभि
षिन्च्यते ॥ ३ ॥ तद्वाऽअरण्येनूच्योवाग्वाऽ ॥ अरण्येनूच्योवाचोवाऽअन्नमद्य ते
थोवाचावाऽअभिषिन्च्यमानोभिषिन्च्यतेतेतदेतत्सर्वम्वसुसर्वेह्येतेकामाःसैषावसु
मयीधारायथाक्षीरसवासर्पिषोवैवमारम्भायैवेयमाज्याहुतिर्हूयतेतद्यदेषामसुमयी
धारातस्मादेनाम्वसोर्द्धारेत्याचक्षते ॥ ४ ॥ सऽआहाऽइदऽन्चमऽइदन्चमऽइत्यने
नचत्वाप्रीणाम्यनेनचानेनचत्वाभिषिन्चाम्यनेनचेत्येतदथोऽइदन्चमेदेहीदन्चम

ऽइतिसायद्वैषाधाराग्निम्प्राप्नुयादथैतद्यजुःप्रतिपद्यते ॥ ५ ॥ एतद्वाऽएनन्देवाः ॥
एतन्नानेनप्रीत्यतैःकामैरभिषिन्चत्येतयावसोर्द्धारयाथैनमेतान्कामानयाचन्तते
भ्यऽइष्टःप्रीतोभिषिक्तऽएतान्कामान्प्रयच्छन्तथैवैनमेतदैतन्नानेनप्रीत्येतैःकामैर
भिषिञ्चैतयावसोर्द्धारयाथैनमेतान्कामान्याचक्षतेतस्माऽइष्टःप्रीतोभिषिक्तऽएता
न्कामान्प्रयतिद्वौद्वौकामोसंयुनक्त्य॰व्यवच्छेदाथयथा॰योमाकसौसयजुन्देवन्यज्ञे
नकल्पतामिति ॥ ६ ॥ एतद्धैदेवाऽअब्रुवन् ॥ केनेमान्कामान्प्रतिग्रहिष्यामऽइत्यां
त्मननेवैत्यब्रुवन्यज्ञोवैदेवानामात्मायज्ञऽउऽएवयजमानस्यसयदाहयेनकल्पतामि
त्यात्मनामेकल्पतामित्येवैतदाह ॥ ७ ॥ द्वादशसुकल्पयति ॥ द्वादशमासाःसंव

त्सरःसवत्सरोग्निर्यावानग्निर्यावत्यस्यमात्रातावतैवैनमेतदन्नेनप्रीणात्यथोतावतैवैनमेतदन्नेनाभिषिञ्चतिचतुर्दशसकल्पयत्यष्टासकल्पयतिदशसकल्पयतित्रयोदशसकल्पयति ॥ ८ ॥ अथार्धेन्द्राणिजुहोति ॥ सर्वमेतद्यदर्धेन्द्राणिसर्वेणैवैनमेतत्प्रीणात्यथोसर्वेणैवैनमेतदभिषिन्चति ॥ ९ ॥ अथग्रहान्जुहोति ॥ यज्ञावैग्रहायज्ञेनैवैनमेतदन्नेनप्रीणात्यथोयज्ञेनैवैनमेतदन्नेनाभिषिञ्चति ॥ १० ॥ अथैतान्यक्रतुन्जुहोति ॥ अग्निश्चमेघर्मश्चमऽइत्येतैरेवैनमतद्यज्ञक्रतुभिःप्रीणात्यथाऽएतैरेवैनमतद्यज्ञक्रतुभिरभिषिञ्चति ॥ ११ ॥ अथायुषस्तोमान्जुहोति ॥ सहैषयज्ञऽउवाचनग्नतायावैबिभेमीतिकातेनग्नतेत्यभितएवमापरिस्तृणीयुरितितस्मादेतदग्निमभितःपरितृणान्ति

तृष्णायावैबिभेमीतिकातेतृप्तिरितिब्राह्मणस्यैवतृप्तमनुतृप्येयमितितस्मात्सर्ठ॑स्थतेयज्ञेब्राह्मणन्तर्प्पयेतवैब्रूयाद्यज्ञमेवैतत्तर्प्पयति॥ १२ ॥ यत्कर्मणात्यरीरिचन्न्यद्वान्यूनमिहाकरम्॥अग्निर्ठ॑त्स्विष्टकृद्विद्वान्स्विष्टर्ठ॑सुहुतंकरोतुस्वाहा ॥ १३ ॥ ॥ ततस्त्र्यायुषकरणं ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांपुष्टिंश्रियंबलं ॥ तेजआयुष्यमारोग्यंदेहिमेहव्यवाहन ॥ १ ॥ ॐ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ भस्मनाललाटेग्रीवायांदक्षिणेर्ठ॑सेहृदिचत्र्यायुषमितिप्रतिमंत्रः ॥ ततःसंस्रवप्राशनं ॥ पवित्राभ्यांमार्जनं ॥ अग्नौपवित्रप्रतिपत्तिः ॥ ब्रह्मणेपूर्णपात्रदानंप्रणीतोदकेन ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंब्रह्मन्इदंपूर्णपात्रंसदक्षिणाकंतुभ्य

महंसंप्रददे ॥ प्रतिगृह्यतांइतियजमानोब्रूयात् ॥ देवस्यत्वेतिप्रतिगृण्हाति ॥ प्रणीताविमोकः ॥ आपःशिवेतिविमोकोदकंयजमानःस्वमूर्धानमभिषिञ्चति ॥ ॐ आपःशिवाःशिवतमाःशान्ताःशान्ततमास्तास्तेकृण्वन्तुभेषजं ॥ १ ॥ ॥ ततःश्रेयःसंपादनं ॥ तच्चैवं ॥ आचार्यादयोवरणक्रमेणस्वस्वश्रेयोदानंकुर्युः ॥ ॥ अद्येत्यादि० कृतस्यसग्रहमखरजोदर्शनशांत्याख्यस्यकर्मणःयजमानायश्रेयोदानंकरिष्ये ॥ तत्रादौवचःप्रतिवचनं ॥ शिवाआपःसंतु ॥ संतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यं ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टंच ॥ यजमानहस्तेगंधादिदानं ॥ गंधाःपांतुसौमंगल्यंचास्तु ॥ अक्षताःपांतुआयुष्यमस्तु ॥ पुष्पाणिपांतुसौश्रियमस्तु यत्पापंरोगंअशुभंअकल्याणंतद्दूरेप्रतिहतमस्तु॥ यच्छ्रेयस्तदस्तु॥ भवन्नियोगेनमयाअस्मिन्नारदोक्तसग्रहमखरजोदर्शनशांत्याख्येकर्माणियत्कृतंआचा

र्यत्वंतदुत्पन्नंश्रेयःतत्अमुनासाक्षतेनसजलेनपूगीफलेनतुभ्यमहंसंप्रददे ॥ प्रतिगृह्य तांप्रातिगृण्हामि ॥ तेनश्रेयसात्वंश्रेयोवान्भव ॥ भवामीतितेनवाच्यं ॥ एवमेवब्रह्मादयऋत्विजोवाजापकादयश्च ॥ यद्वाब्रह्मादयऋत्विजोजापकाश्चआचार्यद्वाराश्रेयोदानंकुर्युः ॥ तद्यथा ॥ भवन्नियोगेनमयाअस्मिन्सग्रहमखरजोदर्शनशांत्याख्येकर्मणियत्कृतंआचार्यत्वंतथाचएभिर्ब्राह्मणैःसहयत्कृतंब्रह्मत्वंगाणपत्यं सादस्यत्वं तथाचयःकृतोहोमःयःकृतोजपःआचार्यत्वातब्रह्मत्वात्गाणपत्यात् सादस्यात् होमात्जपात्यदुत्पन्नंश्रेयःततअमुनासाक्षतेनसजलेनपूगीफलेनतुभ्यमहंसंप्रददे ॥ तेनश्रेयसात्वंश्रेयोवान्भव॥भवामीतितेनवाच्यं॥ततआचार्यादीनांगंधवस्त्रालंकारादिभिर्यथाविभवंपूजनंकार्यं ॥ दानानिच ॥ स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तयेइति ॥ ॥ तत्रस्वर्णदानमंत्रः ॥ हिरण्यगर्भसंभूतंसौवर्णंपीततैजसं ॥ तस्यदानेनदेवे

शसर्वदोषान्निवारय ॥ १॥ इदंयथाशक्तिस्वर्णंवातन्निष्क्र० अमुकशर्म० नममेति ॥ गोदानमंत्रः॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरादेवप्रीयतामनयागवा ॥ इमांगांवागोनिष्क्रयीभूतरजतमुद्राद्रव्यंरजोदर्शनशांतिसांगतासिद्ध्यर्थंआचार्यायतुभ्यमहंसंप्रददे ॥ नममेति ॥ भूमिदानमंत्रः ॥ सर्वभूताश्रयाभूमिर्वराहेणसमुत्धृता॥अनंतसस्यफलदाअतःशांतिंप्रयच्छमे॥ इदंभूमिदानंवातन्निष्क्रयीभूतयथाशक्तिरजतमुद्राद्रव्यंरजोद०सिद्ध्यर्थंअमुकशर्मणेब्रा० संप्रददे ॥ नममेति ॥ तिलपात्रदानमंत्रः ॥ तिलाःकाश्यपसंभूतास्तिलाःपापहराःस्मृताः ॥ तिलपात्रप्रदानेनसर्वदोषोविनश्यतु ॥ इदंतिलपात्रंवातन्निष्क्र० अमुक० नममेति ॥ ॥ ततोहेमकदलीदानं ॥ तत्रमंत्रः ॥ सुपत्रेसुभगेदेवीरंभेभास्करवल्लभे ॥ रक्षमांरजसोदोषादुष्टस्यास्यविगर्हितात् ॥ १ ॥ दानेनानेनमेदेवःसविताविश्वतोमुखः ॥ प्रीतोभवतु

मेसद्योदोषंहरतुदुष्करं ॥ अनेनस्वर्णकदलीदानेनश्रीसूर्यःप्रीयतां ॥ आचार्यत्वंमहाभागसर्वदोषविनाशन ॥ दानस्यास्यप्रभावेणरजोदोषाच्चपाहिमां ॥ ॥ अथमूर्तिदानं ॥ देवदेवजगन्नाथजगतांकारणाव्यय ॥ मनोहरनमस्तुभ्यंभास्करःप्रीयतामिति ॥ इमःसूर्यादिचतस्रोमूर्तयःसकलशाःसवस्त्राआचार्यायतुभ्यमहंसंप्रददे ॥ ॥

ततोग्रहकलशदेवताकलशानामुदकमेतस्मिन्पात्रेएकीकृत्यदूर्वापंचपल्लवैरुदङ्मुखआचार्यस्तिष्ठन्चत्वारऋत्विजश्चसपत्नीकंयजमानंप्राङ्मुखमुपविष्टमभिषिंचेयुः ॥

॥ तत्रमंत्राः ॥ ॥ ॐ आपोहिष्ठा० ॥ १ ॥ योवꣳशिव० ॥ २ ॥ तस्माऽअरं० ॥ ॥ ३ ॥ आपोऽअस्मान्मातरꣳशुन्धयन्तुघृतेननोघृतप्वꣳपुनन्तु ॥ विश्वꣳहिरिप्रम्प्रवहन्तुदेवीरुदिदाभ्यꣳशुचिरापूतऽएमि ॥ ४ ॥ इदमापꣳप्रवहतावद्यञ्चमलञ्चयत् ॥

यच्चाभिदुद्रोहानृतन्यच्चशेपेऽअभीरुणम् ॥ आपोमातस्मादेनसꣳपवमानश्चमुञ्चतु ॥
॥ ५ ॥ स्तोकानामिन्दुम्प्रतिशूरऽइन्द्रोवृषायमानोवृषभस्तुराषाट् ॥ घृतप्नुषामनसा
मोदमानाꣳस्वाहादेवाऽअमृतामादयन्ताम् ॥ ६ ॥ आयात्विन्द्रोवसऽउपनऽइहस्तु
तःसधमादस्तुशूरꣳ ॥ वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्षत्रमभिभूतिपुष्यात् ॥ ७ ॥
आनऽइन्द्रोदूरादानऽआसादभिष्टकृदवसेयासदुग्रꣳ ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुꣳस
ङ्गेसमत्सुतुर्वणिꣳपृतन्यून् ॥ ८॥ आनऽइंद्रोहरिभिर्यात्वच्छार्वाचीनोवसेराधसेच ॥
तिष्ठात्तिवज्रीमघवाविरप्सीमन्यज्ञमनुनोवाजसातौ ॥ ९ ॥ त्रातारमिन्द्र० ॥ २० ॥
इमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ ११ ॥ तत्वायामि० ॥ १२॥

त्वन्नोऽअग्ने० ॥ १३॥ सत्वन्नोऽअग्ने० ॥ १४॥ उदुत्तमम्वरुण० ॥ १५ ॥ वरुणस्योत्तम्भ०
॥ १६ ॥ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्रातर्म्मित्रावरुणाप्रातरश्विना ॥ प्रातर्भगम्पूष
णम्ब्रह्मणस्पतिम्प्रातःसोममुतरुद्रꣳहुवेम ॥ १७॥ भगप्रणेतर्भगसत्यराधोभगेमान्धि
यमुदवाददन्नः ॥ भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवन्तःस्याम ॥ १८॥ समुद्राय
त्वावातायस्वाहासारितायत्वावातायस्वाहा ॥ अनाधृष्यायत्वावातायस्वाहाप्रतिधृ
ष्यायत्वावातायस्वाहा ॥ अवस्यवेत्वावातायस्वाहाशिमिदायत्वावातायस्वाहा ॥
आप्यायस्व० ॥ २०॥ पञ्चनद्यःसरस्वतीमापियंतिसस्रोतसः ॥ सरस्वतीतुपञ्चधासो
देशेभवत्सरित् ॥ २१ ॥ पुनंतुमादेवजनाः० ॥ २२ ॥ पवित्रेणपुनीहिमाशुक्रेणदे

व॒दीद्यत् ॥ अ॒ग्ने॒क्रत्वा॒क्रतूँ॒रनु॑ ॥ २३ ॥ यत्ते॑प॒वित्र॑म॒र्चिष्यग्ने॒वित॑तमन्त॒रा ॥ ब्रह्म॒ते
न॑पु॒नातु॒मा ॥ २४ ॥ पव॑मान॒ꣳ सोऽअ॒द्यन॑ꣳप॒वित्रे॑ण॒विच॑र्षणिꣳ ॥ यःपोता॒सपु॑नातु
मा ॥ २५ ॥ उ॒भाभ्या॑न्देवसवितꣳ प॒वित्रे॑णस॒वेन॑च ॥ माम्पु॑नीहि॒विश्वत॑ꣳ ॥ २६ ॥
वै॒श्व॒दे॒वीपु॑नतीदे॒व्यागा॒द्यस्या॑मि॒माब॒ह्व्यस्त॒न्वो॑वी॒तपृ॑ष्ठाꣳ ॥ तया॒मद॑न्तꣳसध॒मादे॑
षु॒वयꣳस्या॑म॒पत॑योरयी॒णाम् ॥ २७ ॥ चि॒त्पत्ति॑र्म्मा॑पुना॒तु॒वाक्पति॑र्मा॑पुनातु॒देवोमा॑स
वि॒तापु॑ना॒त्वच्छि॑द्रेणप॒वित्रे॑ण॒सूर्य॑स्यर॒श्मिभि॑ꣳ ॥ तस्य॑तेपवित्रपतेप॒वित्र॑पूतस्य॒यत्का॑
मꣳपु॒नेतच्छ॑केयम् ॥ २८ ॥ शि॒रो॑मे॒श्रीर्य॑शो॒मु॒खन्त्विषि॒ꣳ केशा॑श्च॒श्मश्रू॑णि ॥ राजा॑मे
प्रा॒णोऽअ॒मृत॑ꣳ स॒म्राट्चक्षु॑र्वि॒राट्श्रोत्र॑म् ॥ २९ ॥ जि॒ह्वामे॑भ॒द्रँवाङ्महो॒मनो॑म॒न्युःस्व॒रा

ड्भाम॑ꣳ॥मोदा॑ꣳप्र॒मोदा॒ऽअङ्गु॒ली॒रेङ्गा॑निमि॒त्रम्मे॒सह॑ꣳ॥३०॥बा॒हूमे॒बल॑मिन्द्रि॒यꣳहस्तौ॑
मे॒कर्म्म॑वी॒र्य॑म् ॥ आ॒त्माक्ष॒त्रमु॒रोमम॑ ॥ ३१ ॥ पृ॒ष्टिर्म्मे॑रा॒ष्ट्रमु॒दर॒मꣳसौ॑ग्री॒वाश्च॒श्रो
णी॑ ॥ उ॒रूऽअ॑र॒त्नीजा॒नु॑नी॒वि॒शो॒मेऽङ्गा॑निस॒र्वतः॑ ॥ ३२ ॥ ना॒भिर्म्मे॑चि॒त्तम्वि॒ज्ञान॑म्पा॒
यु॒र्म्मे॑प॒चिति॑र्भ॒सत् ॥ आ॒न॒न्द॒न॒न्दा॒वा॒ण्डौमे॒भग॒ꣳसौभा॑ग्यम्प॒सः ॥ जङ्घा॑भ्याम्प॒
द्भ्यान्धर्म्मो॑ऽस्मिवि॒शिराजा॒प्रति॑ष्ठितः ॥ ३३ ॥ पर्य॑ꣳपृ॒थि॰ ॥३४॥ दे॒वस्य॑॰सर॑स्व॰
य॒न्त्रियै॑॰म्यसौ ॥ ३५ ॥ दे॒वस्य॑॰ सर॑स्व॰य॒न्त्रेणा॒ग्नेश्चामि ॥ ३६ ॥ दे॒वस्य॑॰ अ॒
श्विनो॒र्भैं॰ ॥ ३७ ॥ विश्वा॑निदेव॰ ॥ ३८ ॥ धाम॑च्छद॒ग्नि॰ ॥ ३९ ॥ त्वँय॑विष्ठ॰॥
॥ ४० ॥ अन्न॑पते॰ ॥ ४१ ॥ पा॒ला॒शाम्भु॒॰ ॥ ४२ ॥ औदु॑म्बरं॰ ॥ ४३ ॥ नैय्यग्रो॒

धपादं० ॥ ४४ ॥ आश्वत्थं० ॥ ४५ ॥ यद्देवकुल्पान्ज्जुहो० ॥ ४६ ॥ द्यौःशांतिरन्तरिं० ॥४७॥ यतोयतस्सु० ॥ ४८ ॥ ॥ अथपुराणोक्तमंत्राः ॥ ॥ सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्चभवन्तुविजयायते ॥ आखंडलोग्निर्भगवान्यमोवैनैर्ऋतस्तथा ॥ २॥ वरुणः पवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्मणासहिताः सर्वेदिक्पालाःपांतुतेसदा ॥ ३ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः॥ बुद्धिर्लज्जावपुः शांतिस्तुष्टिःकांतिस्तुमातरः ॥ ४ ॥ एतास्त्वामाभिषिंचंतुदेवपत्न्यः समागताः ॥ आदित्यश्चंद्रमाभौमबुधजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिंचंतुराहुःकेतुश्चतर्पिताः ॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ ६ ॥ ऋषयोमानवागावोदेवमातरएवच ॥देवपत्न्योद्रुमानाग

दैत्याश्चाप्सरसांगणाः ॥ ७ ॥ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच ॥ औषधानिचरत्नानिकालस्यावयवाश्चये ॥ ८ ॥ सरितःसागराःशैलास्तीर्थानिजलदानदाः ॥ एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये ॥ ९ ॥ सर्वेषांवा० ॥ ४९ ॥ अमृताभिषेकोस्तु ॥ एवमभिषेकानंतरंसर्वौषधीरनुलिप्यशुद्धोदकेनस्नात्वाउभयोःस्नानवस्त्रत्यागः ॥ वस्त्राण्याचार्यायदद्यात् ॥ शुक्लमाल्यांबरधरोधृतमंगलतिलकः सपत्नीकोयजमानःस्वासनेउपविश्याचम्याज्यावलोकनंकुर्यात् ॥ ॐ रूपैणंवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतु ॥ ऋतस्यंपथाप्रेतंचन्द्रदक्षिणाविस्वःपश्यव्यन्तरिंक्षन्यतंस्वसदस्यैः ॥ १ ॥ रूपꣳरूपम्प्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणा

---

१ टीप–स्नानवस्त्रमाचार्या यदद्यादितिमदनरत्ने ॥

य ॥ इन्द्रोमायाभिःपुरुरूपऽएतेयुक्ताह्यस्यहरयःशतादशोत्ययंवैहरयोयंवैदशचस
हस्राणिबहूनिचनन्तातदेतद्ब्रह्मपूर्वमनमबाह्यजमनुः सर्वानुशासनम् ॥ १॥इदंआज्य
पात्रंआचार्यायतुभ्यमहंसंप्रददे ॥ ततोब्राह्मणभोजनसंकल्पः ॥ कृतस्यकर्मणः
सांगतासिद्ध्यर्थं आचार्यायदक्षिणांदद्यात् ॥ ऋत्विगादिभ्योयथाशक्तिदक्षिणां
दत्वा अन्येभ्योब्राह्मणेभ्योयथाशक्तिभूयसींदक्षिणांदातुमहमुत्सृजेइतिदत्वा ॥ ते
षामाशिषोगृण्हीयात् ॥ ततोदेवताग्निविसर्जनं ॥ यांतुग्रहग्रगाः सर्वेस्वशक्त्यापू
जितामया ॥ इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच ॥ १ ॥ ॐ उत्तिष्ठब्रह्मणस्प
तेदेवयन्तंस्त्वेमहे ॥ उपप्रयन्तुमरुतंःसुदानवऽइन्द्रंप्राशूर्भवासचा ॥ १ ॥ आवाहि
तदेवताःस्वस्थानेगच्छत ॥ गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर ॥ यत्रब्रह्मादयोदे

वास्तत्रगच्छहुताशन॥ १ ॥ ॐ यज्ञंयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा
एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसर्ववीरस्तञ्जुषस्वस्वाहा ॥ १ ॥ यज्ञनारायण
स्वस्थानेगच्छ ॥ मयाअमुकमासपक्षतिथ्यादियथाकालेयथादेशेयथाशक्तिद्रव्या
दिकेनयत्कृतंनारदोक्तरजोदर्शनशांत्याख्यंकर्मतत्कालहीनंभक्तिहीनंश्रद्धाहीनंब्रा
ह्मणानांवचनात् श्रीसूर्याद्यावाहितदेवताप्रसादात्सर्वंपरिपूर्णमस्त्वितिभवंतोब्रुवंतु
॥ अस्तुपरिपूर्णइतिब्राह्मणाब्रूयुः ॥ प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् ॥ स्मर
णादेवतद्विष्णोःसंपूर्णंस्यादितिश्रुतिः ॥ १ ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रि
यादिषु ॥ न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युतं ॥ २ ॥ ॐ विष्णवेनमोविष्णवेनमो
विष्णवेनमः ॥ ३ ॥ एवंयःकुरुतेशांतिंनारदोक्तप्रमाणतः ॥ तदनिष्टंतुसकलंसद्यए

वविनश्यतीति ॥ इतिसंस्कारभास्करेसग्रहमखनारदोक्तरजोदर्शनशांतिप्रयोगः ॥ ॥ अथ गर्भाधानसंस्कारनिर्णयः ॥ ॥ गर्भाधानसीमंतोन्नयनेतुस्त्रीसंस्कारत्वात्प्रतिगर्भनावर्तंते ॥ किंतुप्रथमगर्भएवकार्यं ॥ इतिधर्मसिंधौ ॥ तत्रप्रथमरजोदर्शनेत्रयोदशदोषाः तेषांफलानिचज्योतिःशास्त्रेउक्तानि ॥ अथप्रथमर्तौशिष्टाचारात्कर्तव्यमाह ॥ संस्कारकौस्तुभेकश्यपः ॥ प्रथमर्तौतुपुष्पिण्याःपतिपुत्रवतीस्त्रियः ॥ अक्षतैरासनंकुर्युस्तस्मिंस्तामुपवेशयेत् ॥ हरिद्रापुष्पगंधादीन्दद्यात्तांबूलंस्रजं ॥ आशिषोवाचयेयुस्ताः पतिपुत्रवतीभव ॥ दीपैर्नीराजनंकुर्युःसदीपेवासयेद्गृहे ॥ ताःसर्वाःपूजयेत्पश्चाद्गंधपुष्पाक्षतादिभिः ॥ लवणापूपमुद्गादिदद्यात्ताभ्यःस्वशक्तितइति ॥ ॥ सर्वर्तुसाधारणविशेषमाह ॥ ॥ वसिष्ठः ॥ त्रिरात्रंरजस्वलाऽशुचिर्भवति ॥ साज्यान्नंभुंजीयान्नाप्सुस्नायादधःशयीतनदिवास्वप्यान्ना

ग्निंस्पृशेन्नरज्ज्वादिस्पृशेन्नदंतान्धावयेन्नपुष्पाद्यलंकरणंनग्रहान्निरीक्षेतनाश्लीलंकिंचिदाचरेन्ननूतनजीर्णखर्परेणजलंपिबेन्नांजलिनापिबेन्नलोहेनायसेन ॥ ताम्रेणविज्ञायतआहारेगोरसंवर्जयेदिति ॥ ॥ अथरजस्वलाशुद्धिप्रकारः ॥ ॥ स्मृत्यर्थसारे ॥ रजस्वलाषष्टिमृत्तिकाभिःशौचंकृत्वामलंप्रक्षाल्यदंतधावनपूर्वकं संगवेसशिराः स्नायादिति ॥ ॥ अथगर्भाधानकालः ॥ पारस्करः ॥ तामुदुह्ययथर्तुप्रवेशनं ॥ तांवधूंपूर्वोक्तविधिनाउदुह्यविवाहयित्वायथर्तुऋतावृतौप्रवेशनमभिगमनंकुर्यादित्यर्थः ॥ याज्ञवल्क्यः ॥ षोडशर्तुर्निशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत् ॥ ब्रह्यचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत् ॥ स्त्रीणांगर्भधारणयोग्यावस्थोपलक्षितः कालऋतुः ॥ सचरजोदर्शनादिवसादारभ्यषोडशाहोरात्रं ॥ तस्मिन्नृतौयुग्मासुसमासुरात्रिषु ॥ रात्रिग्रहणाद्दिवसप्रतिषेधः ॥ संविशेद्गच्छेत् ॥ पुत्रार्थं ॥ युग्मास्वितिब

हुवचनंसमुच्चयार्थमतश्चैकस्मिन्नपिऋतौअप्रतिषिद्धासुयुग्मासुसर्वासुरात्रिषुगच्छेत् ॥ एवंगच्छन्ब्रह्मचार्येवभवति ॥ अतोयत्रब्रह्मचर्यंश्राद्धादिषुचोदितंतत्रगच्छतोपिनब्रह्मचर्यस्खलनदोषोस्ति ॥ किंचपर्वण्याद्याश्चतस्रश्चवर्जयेत्पर्वाणीतिबहुवचनावगमादष्टमीचतुर्दश्योर्ग्रहणं ॥ अत्रसर्वासुयुग्मासुरात्रिषुगमनमावश्यकं ॥ तच्चैकस्यांरात्रौसकृदेवकार्यं ॥ इदंचर्तौगमनमन्यकालेप्रतिबंधादिनाश्राद्धैकादश्यादावपिनकार्यं ॥ यत्तुहेमाद्रौचरहस्ये ॥ दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रती ॥ श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीनचपर्वास्वितितदनृतुविषयं ॥ तथाचगृह्यपरिशिष्टे ॥ यदिदिवामैथुनंव्रजेत्क्लीबाऽअल्पावीर्याऽअल्पायुषाश्चप्रसूयंते तस्मादेतद्वर्जयेदिति ॥ स्त्रीणांयौगपद्येतुऋतौगमनक्रममाह ॥ यौगपद्येतुतीर्थानांविप्रादिकमतोव्रजेत् ॥ रक्षणार्थमपुत्राणांग्रहणंक्रमशोपिवेति ॥ तीर्थंऋतुः ॥ विप्रादिवर्णक्रमेणपात्रविवा

हक्रमश्चेति ॥ ॥ अगमनेदोषमाह ॥ पराशरः ॥ ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति ॥ घोरायांब्रह्महत्यायांयुज्यतेनात्रसंशयइति ॥ अस्यापवादमाहमदनरत्नेव्यासः ॥ व्याधितोबंधनस्थोवाप्रवासेष्वथपर्वसु ॥ ऋतुकालेपिनारीणांब्रह्महत्यांप्रमुच्यतइति ॥ गर्भाधानाकरणेप्रायश्चित्तमाह ॥ पारिजाते आश्वलायनः ॥ गर्भाधानस्याकरणात्तस्यांजातस्तुदुष्यति ॥ अकृत्वागांद्विजेदत्वाकुर्यात्पुंसवनंपतिः॥ अकृत्वेत्यनंतरंअपिशब्दोअध्याहारार्थः॥ प्रायश्चित्तेकृतेपश्चादतीतमपिकर्मवै॥ कार्यमित्येकआचार्यो नेत्यन्येतुविपश्चितइतिवचनसंवादात् ॥ गांद्विजायदत्वाअकृत्वागर्भाधानंपतिः पुंसवनंकुर्यादितिउत्तरार्धार्थः ॥ इतिसंस्काररत्नमालायां ॥ ऋतौगमनेपराशरः ॥ ऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनः स्मृतं ॥ अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवत् ॥ स्त्रियास्तुनस्नानं ॥ उभावप्यशुचीस्यातांदंपतीशयनंगतौ ॥

शयनादुत्थितानारीशुचिःस्यादशुचिःपुमानितिवृद्धशातातपोक्तेः॥ ॥प्रथमर्तौःपूर्वंस्त्रीगमनंनकार्यमित्याहाश्वलायनः॥प्राग्रजोदर्शनात्पत्नींनेयाद्गत्वापतत्यधः॥व्यर्थीकारेणशुक्रस्यब्रह्महत्यामवाप्नुयादिति ॥ ॥आद्यर्तौगर्भाधानंचमलमासशुक्रास्तादावपिकार्यं ॥ उत्सवेषुचसर्वेषुसीमंतेऋतुजन्मसु ॥ सुरासुरगुरोश्चैवमौढ्यदोषो नविद्यतेइतिनिबंधेभृगूक्तेः ॥ दिनशुद्धिस्तुज्योतिःशास्त्रेउक्ता ॥ ॥अथगर्भाधानप्रयोगः ॥ ॥तत्रऋतुदर्शनमारभ्यआद्यरात्रिचतुष्कंपर्वादिनिषिद्धदिनानिचवर्जयित्वा ॥आद्यर्तुनियतेचगुरुशुक्रास्तमलमासादिदोषोनास्ति ॥ तत्रज्योतिःशास्त्रोक्तशुभेदिनेशुभकालेकार्यं तत्रयुग्मासुरात्रिषुपुत्रः अयुग्मासुकन्याजायतेइति ॥ तत्रायंक्रमः ॥ गर्भाख्येमातृनांदींयजतिविधुबलंप्रातसुस्नापयेत्तांदोषेशांतिंप्रकुर्याद्वसनथफलधान्यार्पणंसूर्यवीक्ष्य ॥ यत्तद्रात्रौस्वभार्यांरमयतिकुशलोबाह्यरत्यासु

तास्यैगत्वातांनागरेणप्रतिकुसुममुरोलंभनंस्यात्तुयत्ते ॥ १ ॥ अथर्तुमतीस्त्रीनूतनवस्त्रं कंचुकींचपरिधायमाल्याभरणैरलंकृत्यशुभासनेप्राङ्मुखमुपविशेत् ॥ ततःपतिपुत्राद्यवच्छिन्नसंतत्यन्विताभिः कुलवृद्धसुमंगलस्त्रीभिर्गोधूमैर्नारिकेलादिनानाफलैस्तत्पल्लवैश्चप्रक्षेपणंवृद्धाचारंयाःफलिनीरितिमंत्रेणकारयेत् ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यअस्याःममभार्यायाःप्रथमगर्भातिशयद्वाराअस्यांजनिष्यमाणसर्वगर्भाणांबीजगर्भसमुद्भवैनोनिबर्हणार्थंगर्भाधानाख्यसंस्कारकर्माहंकरिष्ये इतिकर्तानिशिकर्मणोमंत्राभिज्ञानेसतिसूर्यावलोकनोत्तरंविप्राशिषोगृहीत्वामातृविसर्जनादिकंसंपाद्यरात्रावभिगमनादिकंकुर्यात् ॥ अथमंत्राणामज्ञानेविशेषः ॥ अस्याः ममभार्या० निबर्हणार्थंगर्भाधानसंस्कारनिशिकर्मणांदिवापकृष्यमाणसद्योमंत्रजपपूर्वकंगर्भाधानाख्यंकर्माहंकरिष्येइतिसूर्यावलोकनोत्तरंसर्वान्मंत्रान्पठित्वामातृ

गणांविसर्जयेदित्येकःपक्षः॥ तदंगविहितंगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिकृत्वा॥आदित्यंगर्भमित्यादित्यमवेक्षते॥ॐ आदित्यङ्गर्भम्पयंसासमंङ्धिसहस्रस्यप्रतिमाम्विश्वरूपम् ॥ परिंवृङ्धिहरंसामाभिमंꣳस्थाःशतायुषङ्कृणुहिचीयामानाः ॥१॥ अनेनमंत्रेणदंपतिभ्यांसूर्यावलोकनंनमस्कारश्च ॥ ततःसायंकालीनंनित्यकर्मकृत्वोभौशुक्लांबरधारणानुलेपनमाल्याभरणालंकृतौसदीपेशयनागारेसुखशय्याप्रसारितशुभमंचकमारुह्यसुमुहूर्तेस्त्रियमुत्तानांप्राक्शिरः शयितांकृत्वाभर्तातस्याःनाभिदेशेहस्तंदत्वाभिमृश्यजपेत् ॥ ॐ पूषाभगꣳसवितामेददातुरुद्रःकल्पयतुललामगुम्विष्णुर्योनिङ्कल्पयतुत्वष्टारूपाणिपिꣳशतु ॥ आसिञ्चतुप्रजापतिर्धातागर्भन्दधातुते ॥ गर्भंधेहिसिनीवालिगर्भंधेहिपृथुष्टुके ॥ गर्भंतेऽअ

शिवनौदेवावाधत्तांपुष्करस्रजौ ॥ तेजोवैश्वानरोदद्यादथब्रह्मानुमंत्रयते ॥ ब्रह्मागर्भंन्दधातुते ॥ अथाभिगमनं ॥ ॐ गायत्रेणत्त्वाच्छन्दंसामन्थामित्रैष्टुंभेनत्त्वाच्छन्दंसामन्थामिजागंतेनत्वाच्छन्दंसामन्थामि ॥ १ ॥ रेतोमूत्रंविजंहातियोनिंम्प्रविशदिन्द्रियम् ॥ गर्भोंजरायुणावृंतऽउल्बंञ्जहातिजन्मंना ॥ ऋतनंसुत्यमिंन्द्रियँविपानꣳशुक्रमन्धंसऽइन्द्रंस्येन्द्रियमिदम्पयोमृतम्मधुं ॥ १॥ अभिगमनोत्तरंतस्याःदक्षिणस्कंधस्योपरिहस्तंनीत्वावेनहृदयमालभते ॥ ॐ यत्तेसुशीमेहृदयन्दिविचन्द्रमसिश्रितम् ॥ वेदाहन्तन्मान्तद्विद्यात्पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम् ॥ १ ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये ॥ तेनश्रीकर्मांगदेवताःप्रीयंतां ॥ ब्राह्मणेभ्योदक्षिणांदत्वातैराशिषोगृहीत्वा॥ यांतुमातृ

गणाःसर्वैइतिमातॄणांविसर्जनंकार्यम् ॥ इतिसंस्कारभास्करेगर्भाधानसंस्कारः ॥ ॥ सायदिगर्भंनदधीततदौषधंपतिःकुर्यात् ॥ ऋतुस्नातायांचतुर्थेहनिवाषोडशरात्रिमध्येकस्मिँश्चियुग्मेन्हिपुष्यनक्षत्रादिनाचंद्रमायुज्येततदन्हिऋतुमतीमुपोष्यतद्रात्रौसिंह्याःश्वेतपुष्पा[1]बृहत्यामूलमुत्थाप्योदपेषंपिष्ट्वादक्षिणस्यांनासिकायामासिंचति भर्ता ॥ ॥ तत्रमंत्रः ॥ ॥ ॐइयमोषधीत्रायमाणासहमानासरस्वती ॥ अस्या अहंबृहत्याःपुत्रःपितुरिवनामजग्रभम् ॥ १ ॥ इतिसंस्कारभास्करेगर्भधारणार्थमौषधम् ॥ अथपुंसवनकर्मणोनिर्णयःक्रमश्चोच्यते ॥ पुंसवनंतुगर्भसंस्कारत्वात्प्रतिगर्भं कार्यमितिधर्मसिन्धौ ॥ पुंसवनसंस्कारेगुरुशुक्रास्तमलमासादिदोषोनास्तीतिसंस्कारत्नमालायां ॥ ॥ प्रयोगपारिजातेजातूकर्ण्यः ॥ ॥ द्वितीयेवातृतीयेवामासिपुंस

---

[1] भूयरिंमणी श्वेतपुष्पां ॥

वनंभवेत्॥व्यक्तेगर्भेंभवेत्कार्यंसीमंतेनसहाथवेति ॥तत्रगर्भाधानप्रभृतिमासेद्वितीये तृतीयेवायस्मिन्नहनिपुंनक्षत्रेणचंद्रमायुज्येततास्मिन्नहनिगर्भिणीमुपवास्यरात्रौन्यग्रोधावरोहाञ्छुंगांश्चोदकेनपिष्ट्वानासिकायांदक्षिणपुटेआसिंचतिभर्त्ता ॥हिरण्यगर्भोऽद्भ्यःसम्भृतइत्येताभ्यामृग्भ्याम्॥न्यग्रोधोवट्वृक्षःतस्यअवरोहाःअतिलंबंअवाचीनंजायमानाःअंकुराःतस्यशाखायाःशुंगांश्चतदंकुरान्उद्केनपिष्ट्वेत्येकःपक्षः।कुशकंटकꣳसोमाꣳशुचैके॥एकेषामाचार्याणांमतेन्यग्रोधावरोहांकुरेषुपिष्यमाणेषुकुशकंटकंकुशमूलांकुरंसोमांशुंसोमलताखंडंचतन्मध्येपेषणेनवस्त्रगालितंकार्यं॥सोमलताभावेगुडूचीलताब्राह्मीवाग्राह्या॥एतत्पक्षेद्रव्यचतुष्टयपेषणंकार्यमिति॥तत्रायंक्रमः॥पुंसाख्येमातृनांदीन्यजातिपुरुषभेस्यंदनात्प्राग्द्विमासेत्रिमासेवाप्युपोष्यानिशिसुबटभवानंकुरान्पेष्यवार्भिः॥सोमांशुंकौशकंटान्क्षिपतिचवसनेगालितंदक्षिनासा

रंध्रेक्षिप्त्वासमंत्रंसजलमभिमृशेदंकमध्येशरावं ॥ १ ॥ ॥ अथप्रयोगः ॥ ॥ आचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्याःममभार्यायाःउत्पत्स्यमानगर्भस्यबैजिकगार्भिकदोषपरिहारार्थंपुंरूपताज्ञानोदयप्रतिरोधपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंपुंसवनंकरिष्ये ॥ तत्रानिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंचकरिष्येइतिकृत्वाअत्रपुण्याहवाचनांतेप्रजापतिःप्रीयतामितिवदेत् । तास्तांगर्भिणींस्नापयित्वाऽहतेवाससीपरिधाय्योपवास्य॥ ततोरात्रौन्यग्रोधावरोहांकुरांश्चकुशकंटकंसोमलताखंडंचोदकेनपिष्ट्वापेषितोदकंवस्त्रगालितंकृत्वागर्भिणीदक्षिणनासिकायामासिंचतिभर्ता ॥ तत्रमंत्रौ ॥ ॐ हिरण्यगर्भः० ॥ १ ॥ अद्भ्यःसम्भृतꣳपृथिव्यैरसाच्चविश्वकर्म्मणःसमवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ २ ॥ कूर्मापितंचोपस्थेकृत्वेतिउदकपूर्णशरावंअंकेनि

धायेति ॥ सयदिकामयेतवीर्यवान्त्स्याद्गर्भस्तदातस्याःस्त्रियाअंकेउदकपूर्णंशरावं निधायभर्तागर्भिण्याउदरंअनामिकाग्रेणस्पृशन्गर्भमभिमन्त्रयते॥ॐ सुपर्णोसिगरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथंतरेपक्षौ ॥ स्तोमंऽआत्माच्छन्दाꣳस्यङ्गानि यजूꣳषिनाम ॥ सामतेतनूर्वामदेव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याꣳशफाः ॥ सुपर्णोसिगरुत्मान्दिवङ्गच्छस्वःपत ॥ १ ॥ ॥ इत्यनेनमंत्रेण ॥ कृतस्यकर्म० स्मृत्युक्तान्दशसंख्याकान्ब्राह्मणान्भोजयिष्ये॥ब्राह्मणेभ्योदक्षिणांदत्वातैराशिषोगृहीत्वा॥ यांतुमातृगणाःसर्वेइतिमातृणांविसर्जनंकुर्यात् ॥ ॥ इतिसंस्कारभास्करेपुंसवनसंस्कारप्रयोगः ॥ अथगर्भिणीधर्माः ॥ पाद्मे॥ गर्भिण्यधिकारेअदितिंप्रतिकश्यपः॥नावस्करेषूपविशेन्मुसलोलूखलादिषु॥अवस्करेषुमार्जन्यादिषु॥ नोपस्करेतिपाठांतरे

उपस्करशब्देनशूर्पादिज्ञेयम् ॥ जलंचनावगाहेतशून्यागारंविवर्जयेत् ॥ वल्मीकेनाधितिष्ठेतनचोद्विग्नमनाभवेत्॥विलखेन्ननखैर्भूमिंनांगारेणनभस्मना॥नशयालुःसदातिष्ठेद्व्यायामंचविवर्जयेत्॥नतुषांगारभस्मास्थिकपालेषुसमाविशेत् ॥ वर्जयेत्कलहंगेहेगात्रभंगंतथैवच॥नमुक्तकेशातिष्ठेतनाशुचिःस्यात्कदाचन॥ नशयीतोत्तरशिरानचैवाधःशिराः क्वचित् ॥ नवस्त्रहीनानोच्छिष्टानचार्द्रचरणातथा ॥ नामंगल्यांवदेद्वाणींनचहास्याधिकाभवेत् ॥ कुर्याच्छुश्रूषयानित्यंपूजामांगल्यतत्परा ॥ तिष्ठेत्प्रसन्नवदनासदाभर्तुर्हितेरतेति ॥ ॥ भविष्ये ॥ ॥ संध्यायांनैवभोक्तव्यंगर्भिण्यावरवर्णिनि ॥ स्थातव्यंनचगंतव्यंवृक्षमूलेचसर्वदा ॥ नदुर्मुखीसदातिष्ठेत्खट्वाछायांविवर्जयेत् ॥ सर्वौषधीभिः कोष्णेनवारिणास्नानमाचरेत् ॥ ईषदुष्णंकोष्णं ॥ कृतरक्षासुभूषाचवास्तुपूजनतत्परा॥ दानशीलातृतीयायांपार्वत्यानक्तमाचरेत् ॥ ग

र्भिणीकुंजराश्वादिशैलहर्म्यादिरोहणं ॥ व्यायामंशीघ्रगमनंशकटारोहणंत्यजेत् ॥
शोकंरक्तविमोक्षंचसाहसंकुक्कुटासनं ॥ व्यवायंचदिवास्वापंरात्रौजागरणंत्यजेत् ॥
अतिरूक्षंतुनाश्नीयादत्यम्लमतिभोजनं ॥ अत्युष्णमतिशीतंचगुर्वाहारंविवर्जयेत् ॥
इतिवृत्ताभवेन्नारीविशेषेणतुगर्भिणी॥यश्चतस्यांभवेत्पुत्रःस्थिरायुर्वृद्धिसंयुतः॥अन्य
थागर्भपतनमवाप्नोतिनसंशयइति ॥ मार्कंडेयोपि ॥ वृक्षंमहींचनाक्रामेन्नप्राकारंपयो
निधिं ॥ परिखांचनचाक्रामेदबलागर्भधारिणी ॥ गर्भरक्षासदाकार्यानित्यंशौचानि
षेवणात् ॥ प्रशस्तमंत्रालिखनाच्छस्तमाल्यानुलेपनाइति ॥ स्मृत्यंतरे ॥ भूम्यांचै
वोच्चनीचायामारोहश्चावरोहणं ॥ नदीप्रतरणंचैवशकटारोहणंतथा ॥ उग्रौषधंतथा
क्षारंमैथुनंभारवाहनम् ॥कृतेपुंसवनेचैवगर्भिणीपरिवर्जयेत् ॥ गर्भग्रहणंचश्रमादिलिं
गैर्वेदितव्यं ॥ गृहीतगर्भायाः सद्यःश्रमोग्लानिश्चजायते ॥ पिपासाआयासः सक्थि

स्यंदनंशुक्रशोणितयोरनुसंबंधोयोन्याःस्फुरणंचेत्यादि ॥ अन्यच्चप्रयोगार्णवेस्मृत्यं
तरे ॥ दानंपक्वान्नभिक्षायाः परिवेषणमेवच ॥ पचनंनचकर्तव्यंगर्भिण्यासर्वथैवति
ति ॥ इतिसंक्षेपेणगर्भिणीधर्माः ॥ ॥ अथगर्भिणीपतिधर्माः ॥ ॥ गर्भिणीवांछितं
द्रव्यंतस्यैदद्याद्यथोचितं ॥ सूतेचिरायुषंपुत्रमन्यथादोषमर्हतीति ॥ ॥ याज्ञवल्क्यः ॥
दोहदस्याप्रदानेनगर्भोदोषमवाप्नुयात् ॥ वैरूप्यंमरणंवापितस्मात्कार्यंप्रियंस्त्रियाइ
ति ॥ दोहदंगर्भिणीप्रियं ॥ स्मृतिचिंतामणौ ॥ पुंसोभार्यागर्भिणीयस्यचेत्स्यात्सू
नोश्चौलंक्षौरकर्मात्मनश्च ॥ गेहारंभंस्तंभसंस्थापनंचवार्धिस्नानंनैवकुर्याच्चयात्रामि
ति ॥ ॥ दक्षः ॥ ॥ ऋतुद्वयेव्यतीतेतुनकुर्यान्मौंजिबंधनं ॥ अग्न्याधानंगयाश्राद्धं
वपनंचविवर्जयेदिति ॥ कालविधाने ॥ क्षौरंशवानुगमनंनखकृंतनंचयुद्धंचवास्तुक
रणंत्वतिदूरयानं ॥ उद्वाहमौपनयनंजलधेर्वगाहंआयुःक्षयोभवतिगर्भिणिकापती

नां ॥ वगाहइत्यत्रअवेत्युपसर्गावयवाकारस्यभागुरिमतेनलोपः ॥ ॥ क्षौरंवपनं ॥ तच्चात्रकर्तनस्याप्युपलक्षणं ॥ नोदन्वतोंभासिस्नायान्नचश्मश्र्वादिकर्तयेत् ॥ अंतर्वत्न्याःपतिःकुर्वन्नप्रजाभवतिध्रुवमितिऋतुस्मरणात् ॥ यत्तु ॥ वपनस्यनिषेधेपिकर्तनंवैविधीयतेइतिस्मृत्यंतरवचनं॥ तद्गर्भिणीपतिभिन्नानांजीवत्पितृकादीनांयोवपननिषेधस्तत्रकर्तनविधानपरं ॥ ॥ संग्रहे ॥ दहनंपवनंचैवपर्वतारोहणंतथा ॥ नावआरोहणंचैववर्जयेद्गर्भिणीपतिरिति ॥ स्मृत्यंतरे ॥ ॥ गर्भिण्यामपिभार्यायां विवाहेऽप्यथवाव्रते ॥ सपितापिवपेत्केशान्गौतम्यांसिंहगेगुराविति ॥ विवाहेइत्त्यत्र निवृत्तेपीतिशेषः ॥ एवंव्रतेइत्यत्र ॥ गौतम्यामितिगौतम्यसान्निहितदेशनिवृत्त्यर्थं॥ सिंहगेगुराविततितीर्थयात्रांतरोपलक्षणं ॥ विवाहेव्रतबंधेचगर्भिणीपतिरेवच ॥ मुंडनंसर्वतीर्थेषुकुर्यादेवाविचारयन्निति ॥ स्मृतिदर्पणधृतसंग्रहवचनसंवादात् ॥ ॥

स्मृत्यंतरे ॥ ॥ सिंधुस्नानंद्रुमच्छेदंवपनंप्रेतवाहनं ॥ विदेशगमनंचैवनकुर्याद्गर्भिणीपतिरिति ॥ प्रेतवाहनमित्यनेनप्रेतविधानमप्युपलक्ष्यते ॥ ज्योतिर्निबंधेगालवः ॥ प्रव्यक्तगर्भापतिरब्धियानंमृतस्यवाहंक्षुरकर्मसंगं ॥ तथैवयत्नेनगयादितीर्थयागादिकंवास्तुविधिंनकुर्यादिति ॥ आदिशब्देनव्रतोद्यापनादि ॥ शुद्धिदर्पणेदक्षः ॥ मुंडनंपिंडदानंचप्रेतकर्मतथैवच ॥ नजीवत्पितृकःकुर्याद् गर्भिणीपतिरेवचेति ॥ पिंडदानशब्देनश्राद्धमुपलक्ष्यते ॥ इतिकेचित् ॥ वपनंप्रेतविधानापवादस्तत्रैव ॥ क्षौरंनैमित्तकंकुर्यान्निषेधेसत्यपिध्रुवं ॥ पित्रोःप्रेतविधानंचगर्भिणीपतिरेवचेति ॥ एतच्चनियमाःसप्तममासादूर्ध्वंभवंति ॥ वपनंमैथुनंतीर्थंवर्जयेद् गर्भिणीपतिः ॥ श्राद्धंचसप्तमान्मासादूर्ध्वंनैवसमाचरेदित्यादि आश्वलायनोक्तेः ॥ अत्रकेचित्सप्तममासोत्तरंयोवपनादिनिषेधः सदोषातिशयार्थः ॥ तेनतत्पूर्वमपिशक्तौसत्यांवपनादिनिषेध

परिपालनमस्त्येवेत्याहुः ॥ ऊर्ध्वंनैवसमाचरेदितिवचनात्सप्तममासात्पूर्वंकदाचिद्वपनादिकरणमस्तीतिगम्यते ॥ दक्षः ॥ मासषट्केव्यतीतेतुनकुर्यान्मौंजिबंधनं ॥ अग्न्याधानंगयाश्राद्धंवपनंचविवर्जयेदिति ॥ ॥ संस्कारदर्पणेसत्यव्रतः ॥ ॥ ऋतुत्रयेव्यतीतेतुनकुर्यान्मौंजिबंधनं ॥ अग्न्याधानंगयाश्राद्धंवपनंचविवर्जयेदिति ॥ संकटवशेनशक्ताशक्तपरतयावाव्यवस्थायथायथंबोध्या ॥ तीर्थंतीर्थयात्रा ॥ श्राद्धंश्राद्धभोजनमितिकेचित् ॥ पित्रोःक्षयाहश्राद्धादिकंतुसप्तममासादूर्ध्वमपिभवति ॥ पित्रोःक्षयाहंदर्शंचगयाश्राद्धंमहालयं ॥ ग्रहगान्वष्टकाश्राद्धेकुर्याद्गर्भवतीपतिरितिसत्यव्रतोक्तेः ॥ एतच्चनित्यानांयुगादिश्राद्धानामुपलक्षणं ॥ पिंडयज्ञोपिभवत्येव ॥ नित्यत्वात् ॥ मुंडनंपिंडदानंचेत्युदाहृतदक्षवाक्ये ॥ पिंडदानशब्देनश्राद्धमुपलक्ष्यतइतिश्राद्धस्यैवनिषेधप्राप्तौपित्रोःक्षयाहमितिसत्यव्रतवाक्येनानित्यश्रा

द्धानांप्रतिप्रसवःक्रियते ॥ पिंडदानशब्देनपिंडदानमेवनिषिध्यतइतिमातापित्रोःक्षयाहादिश्राद्धेष्वपिपिंडदाननिषेधः ॥ तच्चनिर्वपणंकार्यंतस्यामपिनृसत्तमेति ॥ अन्वष्टक्यविषयएवगर्भिणीपतित्वप्रयुक्तोयःपिंडदाननिषेधःप्राप्तःसनास्तिइतिनिबंधकारलेखनादान्वष्टक्यव्यतिरिक्तसांवत्सरिकादिस्थलेकथंपिंडदानप्राप्तिरितिवाच्यं ॥ अपिशब्देनसांवत्सरिकादीनामपिसंगृहीतत्वेनतत्प्राप्तिसंभवात् ॥ नचापितृशब्दस्यपिंडनिर्वपणशब्देनान्वयात्कथमेतदितिवाच्यं ॥ सन्निहितपदान्वयसंभवेव्यवहितान्वयकल्पनस्यानुचितत्वात्॥सांवत्सरिकादिषुगर्भिणीपतिकर्तृकाऽपिंडदानाचारस्यबहुशोदृष्टत्वाच्चेतिकेचित्॥वस्तुतस्तुएतन्मतेपिक्षयाहादिश्राद्धेष्वपिपिंडनिषेधोनैवास्ति ॥ श्राद्धंचसप्तमान्मासादूर्ध्वंनैवसमाचरेदित्याश्वलायनवचनस्यश्राद्धशब्दार्थःश्राद्धभोजनपरइतिमतेश्राद्धकरणस्यैतस्मादेववचनात्प्राप्तत्वात्पित्रोः

क्षयाहमितिवचनंसपिंडकत्वविधानार्थंद्रष्टव्यं ॥ यथाचारंव्यवस्था ॥ ॥ इतिगर्भिणीपातिधर्माः ॥ ॥ अथगर्भवृद्ध्युपायः॥ ॥ वरीविश्वाचगंधाचमधुकंभृंगराट्समं ॥ अजादुग्धेनपानंतुनार्यागर्भस्यवृद्धिकृदिति ॥ वरीशतावरी ॥ विश्वाशुंठी ॥ गंधा अश्वगंधा ॥ भाषायांआस्कंदइत्युच्यते ॥ मधुकंज्येष्ठंमधु ॥ भृंगराट् ॥ भाषायांमाकाइति ॥ ॥ अथगर्भरक्षोपायः ॥ ॥ शांखायनगृह्ये ॥ चतुर्थेमासिगर्भरक्षणं ॥ ब्रह्मणाग्निःससंविदानइतिस्थालीपाकेनहुत्वाक्षीभ्यांतइतिप्रत्यृचंआज्यलेपेनांगान्यवमृजेदिति ॥ ब्रह्मणाग्निःसंविदानइतिराक्षोघ्नं ॥ अथवास्वशाखोक्तराक्षोघ्नीसूक्तग्रहणं ॥ शास्त्रांतरोक्तत्वात्लौकिकाग्नाविदंकार्यं ॥ इतिगर्भरक्षणोपायः॥ ॥ आथगर्भिण्यागर्भस्रावहरोपायः ॥ ॥ तत्रेदंगृह्यं ॥ यदिगर्भःस्रवेददैंद्राणास्याःपाणिनत्रिरूर्ध्वंनाभेरुन्मार्ष्टि ॥ पराचंत्वानार्वाचंत्वष्टाबंधातुबंधने ॥ सकृतूनुपवेश्यदश

मासोअवीरहेति ॥ यदिगर्भोगर्भिण्याःस्रवेत्तदातस्यानामेरूर्ध्वंयोदेशः ॥ गर्भावस्थितियोग्यःसस्वेनपाणिनापराचंत्वेतिमंत्रेणत्रिरुन्मार्ष्टिऊर्ध्वापवर्गंसमृजीतेत्यर्थ॥ सकृदेवमंत्रः ॥ यत्रैकस्मिन्द्रव्यइतिसूत्रात् ॥ नैमित्तिकमिदंकर्म॥ औषधमपि ॥ पीत्वातंदुलतोयेनतंदुलीयजटाङ्कृतौ ॥ पतद्गर्भांचयानारीस्थिरगर्भाप्रजायते ॥ शर्कराथचतिलैःसमांशकैर्माक्षिकेणसहभक्षितैःस्त्रियाः ॥ नास्तिगर्भपतनोद्भवंभयंपापभोक्तुरिवतीर्थसेवनामिति ॥ तंडुलीयजटातंडुलजामूलं ॥ माक्षिकंमधु ॥ ॥ इतिगर्भस्रावहरोपायः ॥अथसीमंतोन्नयनं ॥ ॥ तत्रनिर्णयः ॥ हारीतः ॥ [1]सकृत्संस्कृत

---

[1] इदंचकर्मसकृदेवकार्यं ॥ स्त्रीसंस्कारत्वान्नप्रतिगर्भमावर्तेतिवृत्तिकारात्युक्तेः ॥ यत्तुविष्णुः ॥ सीमंतोन्नयनंकर्मनंस्त्रीसंस्कारइष्यते ॥ केचिद्गर्भस्यसंस्कारात्प्रतिगर्भंप्रयुंजतेति ॥ तत्कात्यायनविषयं ॥ ममतुबहुसंमतेसंस्कृत्कार्यमित्युक्तं ॥ तदुक्तंभवति ॥

संस्काराःसीमंतेनद्विजस्त्रियः ॥ यंयंगर्भंप्रसूयंतेससर्वःसंस्कृतोभवेदिति ॥ यदिसीमंतस्यमुख्यकालातिक्रमस्तदाप्रसवादर्वागपिकर्तव्यं ॥ तथाचोक्तं ॥ सीमंतोन्नयनंमुख्यकालेनस्यात्कथंचन ॥ कार्यमाप्रसवादेतदितिशंखोब्रवीत्स्फुटमिति ॥ अकृतसीमंतायाःप्रसवेविशेषःसत्यव्रतेनोक्तः ॥ स्त्रीयद्यकृतसीमंताप्रसूयेतकदाचन ॥ पुत्रंगृहीत्वाविधिवत्सातंसंस्कारमर्हतीति ॥ ॥ अथसीमंतोन्नयनंनामक्षेत्रगर्भसंस्कारकर्मव्याख्यायते ॥ तच्चप्रथमगर्भसंभवात्मासेषष्ठेष्टमेवापुन्नक्षत्रेशुक्लपक्षादिज्योतिःशास्त्रोक्तशुभदिनेकार्यं ॥ अत्रापिनियतकालेअधिमासगुरुशुक्रास्तादिदोषोनास्ति ॥ असंभवेयावत्प्रसवकालपर्यंतं ॥ अत्राप्यनियतकालेअधिमासादिप्रत्यवायोनास्ति ॥ ॥ अथसीमन्तोन्नयनप्रयोगः ॥ ॥ तत्रायंक्रमः ॥ ॥ सीमंताख्यंरवीज्येभवतिचयुवतेर्वाष्टमेमासिषष्ठेशालाकर्मादिनांदीस्नपयतिसातिलंमुद्गमिश्रंच

हंप्राक् ॥ प्राजापत्यैकहुत्वोदितमनुहवनंसर्वंपंचादशस्यात्पश्चात्पीठोपविश्यंविनयतिपुलिकास्थाप्यतांप्रेष्यगानं ॥ १ ॥ तत्रपत्न्यासहमंगलस्नापितअहतवासोयुग्मलालंकृतःपत्न्यासहबहिःशालायांशुभासनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्याःममभार्यायाःगर्भावयवेभ्यस्तेजोवृद्ध्यर्थंक्षेत्रगर्भयोः संस्कारार्थंप्रतिगर्भसमुद्भवैनोनिबर्हणेनबीजकोत्पत्त्यतिशयद्वाराश्रीपरमेश्वरप्रीत्यर्थंसीमंतोन्नयनाख्यसंस्कारकर्मकरिष्ये ॥ तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धारांआयुष्यमंत्रजपंनांदीश्राद्धंचकरि

---

१ यद्यपिसीमंतेबहिःशालाउक्तातथापीदानीतनानांनामकरणान्नात्रलिखिता॥ पुंसवनंसीमंतेनसहकार्यमित्युक्तंसीमंतेनसहकरणेअनादिष्टपूर्वंकार्यमितिप्रयोगरत्ने ॥ गर्भसंस्कारएवस्यादित्यादिनिर्णयोगदाधरादौज्ञेयः ॥ अनादिष्टपूर्वंकार्यमित्युक्तंप्रयोगरत्नेगदाधरादौ ॥

ष्ये इतिकृत्वा ॥ अत्रपुण्याहवाचनांतेधाताप्रीयतामित्यूहः कर्तव्यः ॥ तत्रबाहिःशालायांस्थंडिलेपंचभूसंस्कारपूर्वकंमंगलनामाग्नेःस्थापनं ॥ ततोदक्षिणतोब्रह्मासनादिआज्यासादनानंतरंतंदुलतिलमुद्गानामासादनं ॥ अनंतरंउपकल्पनीयानि ॥ मृद्पीठं ॥ युग्मान्यौदुंबरफलान्यपक्कान्येकस्तबकनिबद्धानि ॥ त्रयोदशपरिमाणकास्त्रयोदर्भपिंजूलाः ॥ [1]त्र्येणीशलली ॥ वीर[2]तरशंकुः ॥ केचिदश्व[3]त्थशंकुः ॥ पूर्ण[4]चात्रं अंलोहितं ॥ सूत्रेणपूर्णं ॥ वीणागाथिनौचेति ॥ गानंगायनं ॥ त्रैवर्णिकौवीणागायिनौराजवर्णनसंबंधिगानंकुरुतः ॥ ॥ अथवानलादिसंबंधिगानंकुरुतः ॥ ॥

---

१ तीनठिकाणीश्वेत ॥ २ वीरतरोवीरतरुशिरेतिजयरामः ॥ ३ अश्वत्थशंकुः षरैषिकैवेतिहरिहररेणुकारिकाकारौ ॥ अश्वत्थशंकुरितिकारिकाकारः कर्कश्च ॥ खादिरः शंकुरितिगर्गः ॥ ४ चात्रह्मणजे सूतकाढण्याचीचाकी ॥ ४ लोखंडाखेरीज ॥

तकुआ

आज्यनिर्वपणानंतरं ॥ चरुपात्रेमुद्गप्रक्षेपंकृत्वाधिश्रयणं ॥ ईषत्श्रितेषुतिलतंडुलप्रक्षेपः ॥ पर्यग्निकरणांतेआघारावाज्यभागौस्त्रुवेणजुहुयात् ॥ मनसा ॥ ॐ प्रजापतयेस्वाहा ॥ इदंप्रजा० ॥ ॐ इंद्राय० इदमिं० ॥ ॐ अग्नयेस्वाहा ॥ इदम० ॐ सोमायस्वा० इदंसो० ॥ ततश्चरुमभिधार्यस्त्रुवेणचरुंजुहुयात् ॥ ॐ प्रजापतये० इदंप्र० ॥ ५ ॥ ततःस्थालीपाकेनोत्तरार्धात्स्विष्टकृत् ॥ ॐ अग्नयेस्विष्टकृतेस्वा० इदम० ॥ ६ ॥ ॥ ततोभूराद्यानवाहुतयः ॥ ॐभूःस्वाहा इदम० ॥ ७ ॥ ॐ भुवःस्वा० इदंवा० ॥ ८ ॥ ॐ स्वःस्वा० इदंसूर्या० ॥ ९ ॥ ॐ त्वन्नोऽअग्ने० ० इदम० वरु० ॥ १० ॥ ॐ सत्वन्नोऽअग्ने० ॥ इदमग्न० वरु० ॥ ११ ॥ ॐ अयाश्चाग्ने० ॥ इ

---

१ थोडेसेंशिजल्यावर ॥

दम० अयसे०॥१२॥ॐ येतेशतं० इदंवरु०सवित्रे०॥१३॥ ॐउदुत्तमं०॥१४॥इदंवरु०
दित्यायादि० ॥ मनसा ॐ प्रजाप०इदंप्र० ॥१५॥ ततःसंस्रवप्राशनादिप्रणीतावि
मोकांतंहोमशेषंसमाप्य ॥ ततःपश्चादग्नेर्भद्रपीठे[1]मृद्वासनंसंस्थाप्यतदुपरिगर्भिणी
मुपवेशयेत् ॥ ततोयुग्मेनसटालुग्रप्सेनौदुंबरेणात्रिभिःवेण्याकृतिदर्भपिंजूलैस्त्र्येण्या
शलल्यावीरतरशंकुनासूत्रपूर्णचात्रेणचेत्येतैःसर्वैःपुंजीकृतैःसीमंतंमूर्ध्निविनयति ॥
ललाटांतरमारभ्यकेशान्द्विधाकरोतिभर्ता ॥ ततोविनयनं ॥ ॐभूर्विनयामिॐ भुव
र्विनयामि ॥ ॐ स्वर्विनयामि ॥ ततऔदुंबरादिपंचकस्यवेण्यांबंधनं ॥ ॐ अयमू
र्जावतोवृक्षऽऊर्ज्जीवफलिनीभव ॥ १ ॥ इत्यनेनमंत्रेण ॥ अथगाथागानं[2] ॥ सोमऽए

---

[1] तैल देवदारुपीठे ॥ [2] ततस्त्रैवर्णिकौवीणागाथिनौराजवर्णनसंबंधिअथवानलादिसंबंधिगानं कुरुतइतिगदाधरः ॥ राजन्यव्यतिरिक्तवीरतरगानमिति हरिहरः ॥

वनोराजेमामानुषीःप्रजाः ॥ अविमुक्तचक्रऽआसिरंस्तिरेतुभ्यमसाविति ॥ १ ॥ एतयागाथयावीणागाथिनौगानंकुर्यातां ॥ असौस्थानेसमीपावस्थितायाःमहानद्यानामग्रहणं ॥ गंगा ॥ यमुना ॥ सरस्वतीत्येवमादिप्रथमांतंनामग्रहणंह्येवकरोति ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंस्मृत्युक्तान्दशसंख्याकान्ब्राह्मणान्भोजयिष्ये ॥ तेनश्रीकर्मांगदेवताःप्रीयंतां ॥ ब्राह्मणान्गंधतांबूलादिभिःसंपूज्यतेभ्यश्चदक्षिणांदत्वातराशिषोगृहीत्वाआग्निंविसृज्यमातॄणांविसर्जनं ॥ यांतुमातृगणाःसर्वेपूजामादायपार्थिवीं ॥ इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच ॥ ॥ इतिसंस्कारभास्करेसीमंतोन्नयनसंस्कारप्रयोगः ॥ ॥ अथजातकर्मक्रमारंभः ॥ ॥ अथकस्माच्चिद्योगाद्गर्भाधानादिसंस्काराअकृताश्चेत्तर्हिगोदानपूर्वकमनादिष्टप्रायश्चित्तंकृत्वांतरितसंस्कारान्संपाद्यचजातकर्मकार्यमिति ॥ शीघ्रप्रसवोपायःग्रंथांतरे ॥ हिमवत्युत्तरेपार्श्वेशब

रीनामयक्षिणी ॥ तस्यानूपुरशब्देनविशल्यास्यात्तुगर्भिणीस्वाहा ॥ इतिमंत्रेणैकविंशतिदूर्वांकुरैरेकपलंतिलतैलंप्रदक्षिणमावर्तयन्नष्टशतंमंत्रंजपित्वातत्तैलंकिंचित्पाययेच्छेषमुदरेलेपयेदिति ॥ अथयंत्रप्रकाशेयंत्रमप्युक्तं ॥ गजाग्निवेदाउडुराट्शरांकारसर्षिपक्षाइतिहिक्रमेण ॥ लिखेत्प्रसूतेःसमयेगृहेदंसुखेननार्यःप्रसवंतिशीघ्रमिति ॥ अस्यार्थः ॥ गर्भिण्यानार्यादृष्टिगोचरेदेशेसमचतुरस्रंसंसाध्यतस्यसमान्नवकोष्टकान्कृत्वाईशानोत्तरवायुकोष्ठेषुअष्टमतृतीयचतुर्थानंकान्क्रमेणालिखित्वापूर्वमध्यमपश्चिमकोष्ठेषुप्रथमपंचमनवमांकान्क्रमेणविलिख्यआग्नेयदक्षिणनैर्ऋतकोष्ठेषुषष्ठसप्तमाद्वितीयांकान्क्रमेणविलिखेत् ॥ इदंयंत्रंप्रसूतिसमयेपूर्वंसूतिकागृहेलेखनीयंएतद्दर्शनेनसुखेनशीघ्रंनार्यःप्रसवंति ॥ ॥ यंत्रंयथा सोष्यंतीमिति प्रसवकालेशूलवतींस्त्रियंभर्ताएयतुदशमास्योगर्भोइतिमंत्रेणदशकमभिमं

	पूर्वं	
८	१	६
३	५	७
४	९	२

त्र्यतेनोदकेनशीघ्रप्रसवार्थंत्रिवारमभिषिंचेत्॥ॐ एषंतुदशंमास्योगर्भोजरायुणासुह॥ यथायम्वायुरेषंतियथासमुद्रऽएषंति ॥ एवायन्दशंमास्योऽअस्त्रंज्जरायुणासह ॥१०॥ इत्यनेनमंत्रेण॥ अभ्युक्षणानन्तरंवरावपतनानिःसारपर्यंतंप्रसूतिसमीपेअवैतुपृश्निशैवलमितिमंत्रंजपतिभर्ता ॥ ॐ अवैतुपृश्निशैवलठंशुनेजराय्वपत्तवेनैवमाठंसेनपीवरीनकस्मिंश्चनायतनमवजरायुपद्यताम् ॥१॥ शांतिप्राप्ततिथिनक्षत्रयोगादिसंभवेपुत्रमुखमदृष्ट्वैवस्नानंकार्यं ॥ दुष्टकालेपिकुर्वीतजातकर्मयथाविधीति खंडभट्टपद्धतौजैमिनिः॥देशकालोपघाताद्यैःकालातिक्रमणंयदि॥ अनस्तकेज्येंदुसितेतत्कार्यंचोत्तरायणे॥ तथैवानिष्टतिथिनक्षत्रयोगविषघटीसंक्रांतिग्रहणपर्वपोषजननेवैकृतप्रसवेचशांतयोमयूखादिशांतिग्रंथेषुद्रष्टव्याः॥ ग्रंथविस्तरभयान्नात्रलिखि

ताः ॥ ॥ अथजातकर्मसंस्कारनिर्णयः ॥ ॥ तद्यथा ॥ नपक्वेननचामेनश्राद्धंहेम्नैव कारयेत् ॥ पुत्रजन्मनियात्रायांशर्वर्यांदत्तमक्षयमिति ॥१॥ जातकर्मणिनांदीश्राद्धं रात्रावपिकार्यं॥यद्यपिकिंचित्कर्मांगंप्रथमंनांदीश्राद्धंकृतंतथापिपुत्रजन्मनिमित्तंनांदीश्राद्धंद्वितीयंतद्दिनेएवमुक्त्वापिजननकालेकार्यमिति ॥ नालच्छेदनेकालप्रतीक्षामाहहारीतः ॥ कालप्रतीक्षाबालस्यनालच्छेदनकर्मणि ॥ षण्मुहूर्तात्परंकार्यंसंकटेष्टमुहूर्तके ॥ १ ॥ तदूर्ध्वंच्छेद्यमच्छेद्यंपित्रादिःसूतकीभवेत् ॥ २ ॥ ब्रह्मसूत्रधृतंनालंतेनावेष्ट्यनिकृंतयेत् ॥ मूलतोष्टांगुलंत्यक्त्वानालंछिंद्यात्क्षुरादिनेति ॥ ॥ तत्रायंक्रमः ॥ ॥ जातेपुत्रेसचैलंभवतिजनयतोमातृनांदीयमेधायुष्येत्वेनंजपःस्याज्जननभुवममुंमंत्रयेन्मातरंच ॥ सव्यंप्रक्षाल्यवामंस्तनमुदकयुतंपात्रप्रच्छिद्यनालंसूत्याग्निंस्थाप्यहुत्वाद्वितयमनुदिनंविंशतिद्वेदशाहं ॥ १ ॥ इति ॥ अथ

जातकर्मप्रयोगः ॥ तत्रजातेपुत्रेपिताकुलदेवतावृद्धप्रणामपूर्वकंतस्यमुखंनिरीक्ष्यनद्यादावनुष्णवारिणातडागादौवाउदङ्मुखंस्नायात् ॥ मूलज्येष्ठाव्यतिपातादौ उत्पन्नेमुखमदृष्ट्वैवस्नायात् ॥ अथासंभवेदिवाहृताभिः शीताभिरद्भिःसुवर्णयुताभिर्गृहेएवस्नात्वाऽहतेवाससीपरिधायधृतकुंकुमतिलकः शुभासनेउपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वाममास्यबालकस्यगर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थं जातकर्मकरिष्ये ॥ तत्रानिर्विघ्नार्थं गणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृपूजनायुष्यमंत्रजपपूर्वकमाभ्युदयिकश्राद्धंहेम्नैवकरिष्येइतिकृत्वा ॥ अत्रपुण्याहवाचनांतेसविताप्रीयतामित्यूहः ॥ अच्छिन्नेनालेमेधाजननायुष्येकरोति ॥ तत्रमेधाजननंयथा ॥ अनामिकयासुवर्णांतर्हितयामधुघृतेएकीकृत्यघृतंवाकेवलंकुमारंप्राशयतिपिता ॥ ॐ भूस्त्व

यिदधामि ॥ ॐ भुवस्त्वयिदधामि ॥ ॐ स्वस्त्वयिदधामि ॥ ॐ भूर्भुवःस्वःसर्वंत्वयिदधामीत्यनेनमंत्रेणसक्तूत्प्राशयति ॥ ॥ अथास्यायुष्यंकरोति ॥ तत्रकुमारस्यनाभिदेशेवादक्षिणकर्णसमीपेअग्निरायुष्मानित्यादिवक्ष्यमाणमंत्राञ्जपति ॥ ॐ अग्निरायुष्मान्त्सवनस्पतिभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि ॥ १ ॥ ॐ सोमआयुष्माँन्त्सऽओषधीभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि ॥ ॐ ब्रह्मऽआयुष्मत्तद्ब्राह्मणैरायुष्मत्तेनत्वायुषायुष्मंतंकरोमि ॥ ३ ॥ ॐ देवाऽआयुष्मंतस्तेमृतैरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ॥ ४ ॥ ॐ ऋषयऽआयुष्मंतस्तेव्रतैरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ॥ ५ ॥ ॐ पितरऽआयुष्मंतस्तेस्वधाभिरायुष्मंतस्तेनत्वायुषायुष्मंतंकरोमि ॥ ६ ॥ ॐ यज्ञऽआयुष्मान्त्सदक्षिणाभिरायुष्माँस्तेनत्वायुषायुष्मंतंकरोमि ॥ ॥ ७ ॥ ॐ समुद्रऽआयुष्माँत्सस्रवंतीभिरायुष्मांस्तेनत्वायुषायुष्मंतंकरोमि ॥ ८ ॥

एतावत्पर्यंतमाग्निरायुष्मानित्यारभ्यत्रिर्जपति ॥ ॐ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ त्र्यायुषमित्येतमपिमंत्रंत्रिर्जपति ॥ सयदिकामयेतकुमारःसर्वमायुरियादितितदाकुमारंवात्सप्रेणाभिमृशति ॥ दिवस्परीत्यारभ्यगोमंतमुशिजोविवव्रुरित्यंतोवात्सप्रः ॥ ॐ दिवस्परिप्रथमञ्जज्ञेऽअग्निरस्मद्द्वितीयम्परिजातवेदाः ॥ तृतीयमप्सुनृमणाऽअजस्रमिन्धानऽएनञ्जरतेस्वाधीः ॥ ॥१॥ विद्मातेऽअग्नेत्रेधात्रयाणिविद्मातेधामविभृतापुरुत्रा ॥ विद्मातेनामपरमङ्गुहायद्विद्मातमुत्सयतऽआयगन्थ ॥ २ ॥ समुद्रेत्वानृमणाऽअप्स्वन्तर्नृचक्षाऽईधेदिवोऽअग्नऽऊधन् ॥ तृतीयेत्वारजसितस्थिवाꣳसमपामुपस्थेमहिषाअवर्धन् ॥ ३ ॥

अक्रन्ददग्निस्तनयन्निवद्यौःक्षामारेरिहद्वीरुधःसमञ्जन् ॥ सद्योजज्ञानोविहीमिद्धोऽअ
ख्यदारोदसीभानुनाभात्यन्तः ॥ ४ ॥ श्रीणामुदारोधरुणोरयीणाम्मनीषाणाम्प्रा
र्पणꣳसोमंगोपाः ॥ वसुःसूनुःसहसोऽअप्सुराजाविभात्यग्रउषसामिधानः ॥ ५ ॥ वि
श्वस्यकेतुर्भुवनस्यगर्ब्भऽआरोदसीऽअपृणाज्जायमानः ॥ वीडुञ्चिदद्रिमभिनत्पराय
ञ्जनायदग्निमयजन्तपञ्च ॥ ६ ॥ उशिक्पावकोऽअरतिःसुमेधामर्त्येष्वग्निरमृतो
निधायि ॥ इयर्तिधूममरुषम्भरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्षन् ॥ ७ ॥ दृशानोरु
क्मऽऊर्व्याव्यद्यौद्दुर्म्मर्षमायुःश्रियेरुचानः ॥ अग्निरमृतोऽअभवद्वयोभिर्यदेन
न्द्यौरजनयत्सुरेताः ॥ ८ ॥ यस्तेअद्यकृणवद्भद्रशोचेपूपन्देवघृतवन्तमग्ने ॥ प्रतन्नय

प्रतरम्वस्योऽअच्छाभिसुम्नन्देवभंक्तंऽयविष्ठ ॥ ९ ॥ आतम्भंजसौश्रवसेष्वंग्नऽउक्थऽउक्थआभंजशस्यमाने ॥ प्रियःसूर्येप्रियोऽअग्नाभवात्युज्जातेनभिनदद्दुज्जनित्वैः ॥ १० ॥ त्वामग्नेयजमानाऽअनुद्यून्विश्वावसुदधिरेवार्याणि ॥ त्वयासहद्रविणमिच्छमानाव्रजंगोमन्तमुशिजोविवव्रुः ॥ ११ ॥ ततःकुमारस्यप्रागादिचतुर्दिक्षुचत्वारःउपरिभागस्याभावेमध्येवानैर्ऋत्यकोणेएकः पंचमएवंपंचब्राह्मणानवस्थाप्य ॥ इममनुप्राणेतियजमानोब्रूयात् ॥ ॥ एवंसर्वत्र ॥ व्यानेत्यादयः ॥ ततःपूर्वदिकस्थितोब्राह्मणःकुमारंलक्षीकृत्यप्राणेतिब्रूयात् ॥ एवंव्यानेतिदक्षिणतः ॥ अपानेत्यपरतः ॥ उदानेत्युत्तरतः ॥ समानेतिपंचमउपरिष्टादवेक्षमाणोब्रूयात् ॥ अविद्यमानेषुब्राह्मणेषुस्वयमेवप्रतिदिशंपरिक्रम्यैतत्करोति ॥ स्वयंकरणपक्षेप्रेषाभावः ॥ यस्मिन्देशेकुमारोभवति तंदेशमभिमंत्रयते ॥ देशंसूतिकागारं ॥ ॥ तत्रमंत्रः ॥ ॐ

वेदतेभूमिहृदयन्दिविचन्द्रमसिश्रितं ॥वेदाहन्तन्मान्ताद्विद्यात्पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम् ॥ १ ॥ अथैनंकुमारमभिमृशति ॥ ॐ अश्माभवपरशुर्भवहिरण्यमस्तृतम्भव ॥ आत्मावैपुत्रनामासिसजीवशरदःशतम् ॥ १ ॥ अथास्यमातरमभिमंत्रयते ॥ ॐ इडासिमैत्रावरुणीवीरेवीरमजीजनथाः ॥ सात्वम्वीरवतीभवयास्मान्वीरवतोकरत् ॥ १ ॥ इतिमंत्रेण ॥ अथास्यमातुर्दक्षिणस्तनंजलेनप्रक्षाल्यकुमारायप्रयच्छति ॥ ॐ इमꣳस्तनमूर्षं॰ ॥ १ ॥ ततोवामस्तनंप्रक्षाल्यप्रयच्छति ॥ ॐ यस्तेस्तनंः शशयोजोमयोभूर्यौरत्नधावसुविक्ष्यःसुदत्रः ॥ येनविश्वापुष्यसिवार्याणिसरस्वतीतमिहधातवेकः ॥ १ ॥ इत्यनेनमंत्रेण ॥ ततःसूतिकायाः खट्वाधस्तात्कुमारस्याशिरःप्रदेशेउदकपूर्णंकलशंनिदधाति ॥ ॐ आपोदेवेषुजा

---

१ इदं कुमारस्यमूर्ध्नीति कारिकाकारः ॥ हृदिस्तुजयरामः ॥ सर्वशरीरेतुहरिहरः ॥

ग्रथयथादेवेषुजाग्रथ ॥ एवमस्यार्ठसूतीकायार्ठसपुत्रिकायांजाग्रथ ॥ १ ॥ इत्यनेनमंत्रेण॥तदुदकपात्रंस्थापितमेवदशाहंतिष्ठतिप्रागुत्थानात् ॥ ततोनालच्छेदनं ॥ ततःसूतिकागृहद्वारदेशेअरत्निमात्रेस्थंडिलेपंचभूसंस्कारान्कृत्वासूतिकाग्नेःस्थापनं ॥ संपूज्यहविःसंस्कृत्यपर्युक्ष्य ॥ अतःप्रभृत्युत्थानंयावत्तावत्सायंप्रातःसंधिवेलयोर्द्वयोःप्रत्यहंयावत्सूतिकास्नानंकरोतितावद्दशाहपर्यंतंफलीकरणमिश्रान्सर्षपान्तस्मिन्नग्नौद्वेद्वेआहुतीहस्तेनजुहोति ॥ फलीकरणमिश्रान्सूक्ष्मतंडुलाग्रमिश्रान् ॥ तत्रमंत्रौ ॥ ॐ शंडामर्काउपवीरःशौंडिकेयऽउलूखलः ॥ मलिम्लुचोद्रोणासश्च्यवनोनश्यतादितःस्वाहा॥ इदंशंडामर्कायउपवीरायशौंडिकेयायउलूखलायमलिम्लुचोद्रोणासश्च्यवनोनश्यतादितेभ्यश्चनमम॥ १॥ ॐ आलिखन्ननिमिषःकिम्वदन्तऽउपश्रुतिः॥ हर्य्यक्षःकुम्भीशत्रुःपात्रपाणिर्नृमणिर्हन्त्रीमुखःसर्षपारुणश्च्यवनोनश्यतादितः

स्वाहा॥ इदमालिखन्ननिमिषायत्किंवद्दयः उपश्रुतहर्यक्षायकुंभीशत्रवेपात्रपाणयेन्द्रमणयेहंत्रीमुखाय सर्षपारुणायचवनायच नमम॥ ॥ ॥२॥ इत्याहुतिद्वयं ॥ ॥ यदिकुमारग्रहोबालमुपद्रवेत्तदातंबालंजालेनप्रच्छाद्योत्तरीयेणवाससावाप्रच्छाद्यांकआधायतंबालंहृदिस्पृशन्पिताजपति ॥ ॐ कुर्कुरः सुकुर्कुरः कुर्कुरोबालबंधनः ॥ चेच्चेच्छुनकः सृजनमस्तेऽअस्तुसीसरोलपेतापह्वरतत्सत्यं ॥ यत्तेदेवावरमदद्दुः सत्वंकुमारमेववावृणीथाः ॥ चेच्चेच्छुनकःसृजनमस्तेऽअस्तुसीसरोलपेतापह्वरतत्सत्यं ॥ यत्तेसरमामातासीतरः पिताश्यामशबलौभ्रातरौ ॥ चेच्चेच्छुनकः सृजनमस्तेऽअस्तुसीसरोलपेतापह्वरतत्सत्यं॥ १॥इत्यंतंपठितेनरक्षति ॥ॐ ननामयतिनरुदतिनहृष्यतिनग्लायतियत्रवयंवदामोयत्रचाभिमृशामसि॥ १ ॥ इत्यनेनमंत्रेणाभिमृशतिकुमारंपिता ॥ ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थंस्मृत्युक्तान्दशसख्याकान्ब्राह्म

णान्सूतकांतेभोजयिष्ये ॥ तेनश्रीकर्मा० ॥ ब्राह्मणेभ्योगंधतांबूलवस्त्रालंकारादिभिर्यथाविभवंसंपूज्य॥ तेभ्यश्चसुवर्णादिदक्षिणांदत्वातैराशिषोगृहीत्वा ॥ ॥ मातॄणां विसर्जनं ॥ यांतुमातृगणाः सर्वेस्वशक्त्यापूजितामया ॥ इष्टकामप्रसिध्यर्थंपुनरागमनायच ॥ १ ॥ इतिविसर्जयेत् ॥ कुमार्याश्चैतज्जातकर्मामंत्रकंकार्यं ॥रात्रौसंध्यायांग्रहणेजाताशौचांतरमध्येपीदंकार्यं ॥ मृताशौचमध्येजातश्चेत्तदैवाशौचांतेवाकार्यं ॥ पितरिग्रामांतरगतेपिपितृव्यादिगोत्रजोज्येष्ठक्रमेणेदंकुर्यात् ॥ इदंआयुष्यकरणंकालातिक्रमेपिक्रियते ॥ मेधाजननंतुमुख्यकालातिक्रमान्ननिवर्ततेतस्मात्कुमारंजातंघृतंवैवाग्रेप्रतिलेहयंतिस्तनंवानुधापयंतीतिजातमात्रस्यकुमारस्यश्रुत्यामेधाजननोपदेशात्संस्कारकर्मत्वाच्च ॥ ॥ इतिसंस्कारभास्करेजातकर्मसंस्कारप्रयोगः॥ ॥अथबालस्यदुष्टदृष्टिदोषादौरक्षाविधिः ॥ ॥ वासुदेवोजगन्नाथःपूतनातर्ज

नोहरिः ॥ रक्षतित्वरितंबालंमुंचमुंचकुमारकं ॥ कृष्णरक्षशिशुंशंखमधुकैटभमर्दन ॥ प्रातःसंगवमध्यान्हसायान्हेषुचसंध्ययोः ॥ महानिशिसदारक्षकंसारिष्टनिषूदन ॥ यद्घोरजःपिशाचांश्चग्रहान्मातृग्रहानपि ॥ बालग्रहान्विशेषेणच्छिंधिच्छिंधिमहाभयान् ॥ त्राहित्राहिहरेनित्यंत्वद्रक्षाभूषितंशिशुं ॥ इतिभस्माभिमंत्र्यैवभूषयेत्तेनभस्मना ॥ शिशोर्ललाटाद्यंगेषुरक्षांकुर्याद्यथाविधि ॥ इतिप्रयोगसारे ॥ ॥ रक्षरक्षमहादेवनीलग्रीवजटाधर ॥ ग्रहैस्तुसहितोरक्षमुंचमुंचकुमारकं ॥ अमुंमंत्रंभूर्जपत्रेविलिख्यतत्पत्रंदक्षिणभुजेबध्नीयात्इतियंत्रोद्धारे ॥ ॥ बालरोदनपरिहारार्थं यंत्रमुक्तंमयूखे ॥ षडस्रमध्येऱ्हींकारस्तन्मध्येशिशोर्नामविलिख्यषट्कोणेषुॐ लुलुबस्वाहेतिमंत्रषडक्ष



इदंयंत्रंयथोक्तंलिखेत् ॥

राणिविलिख्यतद्बहिर्नेमिवद्वृत्तद्वयंविलिख्यतद्बाहिरधोमुखैरर्धचंद्रैरावेष्ट्यपंचोपचारैः
संपूज्यबालहस्तेबध्नीयादिति ॥ बालग्रहशांत्यादिकंबालग्रहस्तवश्चशांतिकमलाकर
शांतिमयूखयोर्द्रष्टव्यः ॥ ॥ **अथषष्ठीपूजनं** ॥ ॥तद्यथा॥ विघ्नेशजन्मदानांचजीवं
त्याश्चप्रपूजनं ॥ जातादिपंचमेषष्ठेनिशीथेबलिमाहरेत् ॥ १ ॥ द्वारतृतीयभागेतुपु
त्तलैश्चापिकज्जलैः ॥ दक्षिणोत्तरयोर्देशेलेख्यचत्वारिपूजयेत् ॥ २ ॥ द्वारस्योर्ध्वतृ
तीयभागइति ॥ ॥ अर्चयेद्दशदिक्पालान्गीतवादित्रनिःस्वनैः ॥ कृत्वाजागरणंरा
त्रौगीतैश्चशांतिपाठकैः ॥ ३ ॥ दशाहंसूतिकागारमायुधैश्चविशेषतः ॥ वन्हिःसधू
मःसलिलापूर्णकुंभैःप्रदीपकैः ॥ ४ ॥ मूसलादितथाशस्त्रैर्वर्णकैश्चित्रितेनच ॥ विभू
तिरक्षांकुर्वीतसर्षपान्विकिरेत्तथेति ॥ ५ ॥ सूतिकावासनिलयाजन्मदानामदेव
ताः ॥ तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तितेति ॥ प्रथमेदिवसेषष्ठेदशमेचैवसर्व

दा॥त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनीतिसंस्कारनृसिंहे॥ ॥तच्चपंचमेषष्टेदिनेवापूव
रात्रौपित्रादिर्द्विराचम्यप्राणानायम्यदेशकालसंकीर्तनांतेअनयोःसूतिकाबालकयोः
आयुरारोग्याभिवृद्ध्यर्थंसकलारिष्टशांतिद्वाराश्रीपरमेश्वरप्रीत्यर्थंविघ्नेशस्यजन्मदा
नांजीवंत्यपरनाम्न्याःषष्ठीदेव्याःशस्त्रगर्भाभगवत्याश्चयथामीलितोपचारैःपूजनंक
रिष्ये॥ ॥एतत्प्रतिमाःपीठादौवाक्षतपुंजेषुपूगीफलेषुविनिवेश्याः ॥ संप्रदायस्तुस्व
र्णमयींएकांजीवंतिकाप्रतिमांकृत्वातस्याश्चअभ्युत्तारणपूर्वकप्राणप्रतिष्ठांकुर्वंति॥ स
र्वासांपृथग्वाएकतंत्रेणषोडशोपचारैःपूजनं ॥ तद्यथा ॥ आयाहिवरदेदेविषष्ठीदेवि
तिविश्रुता ॥ शक्तिभिःसहपुत्रंमेरक्षरक्षवरानने ॥ १ ॥ मनोजूतिरितिप्रतिष्ठा॥अथ
ध्यानं ॥ देवीमंजनसंकाशांचंद्रार्धकृतशेखरां ॥ सिंहारूढांजगद्धात्रींकौमारीभक्त
वत्सलां ॥ खड्गंखेटंचबिभ्राणामभयांवरदांतथा ॥ तारकाहारभूषाढ्यांचिंतयामिन

वांशुकां ॥ १ ॥ ॐ श्रीश्चंतेलक्ष्मी० ॥ १ ॥ ॐ भूर्भुवःस्वःविघ्नेशजन्मदाषष्ठीदेवी
जीवंतिकाभ्योनमः ॥ ध्यायामि ॥ एवंसर्वत्र ॥ आगच्छवरदेदेविस्थानेचात्रस्थि
राभव ॥ आराधयामिभक्त्यात्वांरक्षबालंचसूतिकां ॥ १ ॥ हिरण्यवर्णांहरिणींसुव
र्णरजतस्रजाम् ॥ चंद्रांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ ॥ ॐ भू० विघ्नेशाय०
विघ्नेशंआवा० ॥ जन्मदायैषष्ठीदेव्यैनमः ॥ जन्मदांषष्ठीदेवींआवाह० ॥ ॐ शस्त्र
गर्भाभगवत्यैनमःशस्त्रगर्भांभगवतींआवाह० ॥ संध्यारागनिभंरक्तमासनंस्वर्णनि
र्मितं ॥ गृहाणसुमुखीभूत्वारक्षबालंचसूतिकां ॥ ॐ तांमऽआवहजातवेदोलक्ष्मीम
लंपगामिनीं ॥ यस्यांहिरण्यांम्विन्देयङ्गामश्वंम्पुरुषानहं ॥ ॐ भू० विघ्ने० ॥ आस
नंसमर्पयामि ॥ गंगाजलंसमानीतंसुवर्णकलशेस्थितम् ॥ पाद्यंगृहाणमेबालंसूतिकां

चैवपालय ॥ ॐ अश्वपूर्णांरथमध्यांहस्तिनादप्रमोदिनीं ॥ श्रियन्देवीमुपह्वयेश्री
र्मादेवीजुषतां॥ॐ भू० वि० पाद्यं० ॥ अक्षतापुष्पगंधाढ्यमध्यार्थंनिर्मलंजलं ॥ गृ
हाणपाहिमेपुत्रंसूतिकांभयहारिणि ॥ ॐ कांसोस्मितांहिरण्यप्राकारामार्द्राञ्ज्वलं
न्तीतृप्तान्तर्पयन्तीम् ॥ पद्मेस्थितांपद्मवर्णांतामिहोपह्वयेश्रियं ॥ ॐ भू० वि० अर्घ्यं
सम० ॥ गृहाणाचमनीयंतुकर्पूरैलादिवासितं ॥ सबालांसूतिकांपाहिजगन्मातर्न
मोस्तुते ॥ ॐ चद्राम्प्रभासांयशसाज्वलंन्तींश्रियंन्लोकेदेवजुष्टामुदारां ॥ ताम्पद्मने
मींशरंणमहम्प्रपद्येअलक्ष्मीर्मेंनश्यतान्त्वाँवृणोमि ॥ ॐ भू० वि० आचमनंस०
पंचामृतंगृहाणेदंपयोदधिघृतंमधु ॥ शर्करासहितंदेविपाहिबालंसमातृकं ॥ ॐ घृतेन

सीतामधुनासमंज्यताम्विश्वैर्देवैरनुमतामरुद्भिः ॥ ऊर्जस्वतीपयसापिन्वमानास्मा
न्सीतेपयसाभ्यावंवृत्स्व ॥ ॐ भू० वि० पंचामृतस्नानंस० ॥ दुकूलादिमयंदेवीना
नारत्नैःपरिष्कृतं ॥ परिधत्स्वामलंवस्त्रंरक्षमेसूतसूतिके॥ॐउपैतुमादेवसखःकीर्तिश्च
मणिनासह ॥ प्रादुर्भूतोसुराष्ट्रेस्मिन्कीर्तिमृद्धिंददातुमे ॥ ॐ भू० वि० वस्त्रंसमर्प
यामि ॥ नानारत्नमयंदिव्यंमुक्ताहारमयंशुभं ॥ गृहाणकालरात्रित्वंरक्षमेसूतसूति
के ॥ क्षुत्पिपासमलांज्येष्ठाअलक्ष्मींनाशयाम्यहं ॥ अभूतिमसंमृद्धिंचसर्वाणिर्नुदमे
ग्रहात् ॥ ॐ भू० वि० अलंकारान्समर्पयामि ॥ कर्पूरागरुकस्तूरीकंकोलादिसम
न्वितं ॥ चंदनंस्वीकुरुत्वंमेरक्षबालंचसूतिकां ॥ ॐ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीं

षिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥ ॐ भू० वि० चंदनंसमर्पयामि ॥ सुमाल्यानिसुगंधीनिमालत्यादीनिवैप्रभो ॥ गृहाणवरदेदेविरक्षबालंचसूतिकां॥ॐ मनसःकाममाकूतिम्वाचःसत्यमशीमहि ॥पशूनांरूपमन्यस्यमयिश्रीःश्रयतांयशः ॥ॐ भू० वि० पुष्पंसम० ॥ हरिद्राकुंकुमादीनिनानापरिमलानिच ॥ गृहाणकालरात्रित्वंरक्षबालंचसूतिकां ॥ ॐ अहिरिवभोगैः० ॥ ॐ भू० वि० परिमलद्रव्यंसम० ॥वनस्पत्युद्भवंधूपंदिव्यंस्वीकुरुदेविमे॥प्रसीदसुमुखीभूत्वारक्षमेसुतसूतिके ॥ ॐ कर्दमेनप्रजाभूतामयिसंभ्रमकर्दम ॥ श्रियंवासयमेकुलेमातरंपद्ममालिनीं ॥ भू० वि०धूपंस० ॥आज्यंवर्तिकृतंदेविज्योतिषांज्योतिषंतथा॥जीवंतिकेगृहाणेदंरक्षमेसुतसूतिके॥ ॐआपःस्रजन्तुस्निग्धानिचिक्लीतवसंमेगृहे ॥ नीचंदेवीम्मातरंश्रियम्वास

यंमेकुले ॥ ॐ भू० वि० दीपंसम० ॥ नैवेद्यंलेह्यपेयादिषड्रसैश्चसमन्वितं ॥ भुंक्ष्व
देविगणैर्युक्तारक्षमेसुतसूतिके ॥ १ ॥ ॐ आर्द्रांयःकरिणींयष्टींसुवर्णांहेममालिनीं॥
सूर्यांहिरण्मयींलक्ष्मींजातवेदोममावह ॥ भू० वि० नैवेद्यंसम० ॥ इदंफलंमयादे
विस्थापितंपुरतस्तव ॥ तेनमेपरितुष्टात्वंरक्षबालंचसूतिकां ॥ ॐ याःफलिनी० ॥
ॐ भू० वि० फलंस० ॥ नागवल्लीदलंरम्यंपूगीफलसमन्वितं ॥ भद्रेगृहाणतांबूलं
पाहिमेसुतसूतिके ॥ ॐ आर्द्राम्पुष्करिणींपुष्टींपिंगलांपद्ममालिनीं ॥ चन्द्रांहिरण्म
यींलक्ष्मींजातवेदोममावह ॥ ॐ भू० वि० तांबूलंसम० हिरण्यगर्भेंतिदक्षिणां० ॐ
भू० वि० दक्षिणांस० ॥ कदलीगर्भसंभूतंकर्पूरंचप्रदीपितं ॥ आरार्तिकमहंकुर्वेरक्ष

बालंचसूतिकां ॥ ॐ इदर्ठंहुविः० ॥ ॐ भू० वि० कर्पूरनीराजनंसमर्पयामि॥नाना
सुगंधपुष्पाणियथाकालोद्भवानिच ॥ पुष्पांजलिंगृहाणेमांरक्षमेसुतसूतिके ॥ ॐ श्री
श्चंतेलक्ष्मी० ॥ ॐ भू० वि० पुष्पांजलिंसम० ॥ यानिकानि० सप्तास्यैंतिप्रदक्षि
णां० ॥ अथप्रार्थना ॥ षष्ठीदेविनमस्तुभ्यंसूतिकाग्रहशालिनी ॥ पूजितापरयाभ
क्त्यादीर्घमायुःप्रयच्छमे ॥ १ ॥ जननीजन्मसौख्यानांवर्धिनीधनसंपदां ॥ साधि
नीसर्वभूतानांजन्मदेत्वांनतावयं ॥ २ ॥ गौरीपुत्रोयथास्कंदःशिशुत्वेरक्षितःपुरा ॥
तथाममाप्यमुंबालंषष्ठिकेरक्षतेनमः ॥ ३ ॥ यथादाशरथीरामश्चतुर्मूर्तिर्भवप्रदे ॥
त्वयासंरक्षितस्तद्वद्बालंपाहिशुभप्रदे ॥ ४ ॥ विष्णुनाभिस्थितोब्रह्मादैत्येभ्योरक्षित
स्त्वया ॥ तथामेबालकंरक्षयोगनिद्रेनमोस्तुते ॥ ५ ॥ रक्षितौपूतनादिभ्योनंदगो

पसुतौयथा ॥ तथामेबालकंपाहिदुर्गेदेविनमोस्तुते ॥ ६ ॥ यथावृत्रासुरादिंद्रोरक्षितोदितिबालकः ॥ त्वयातथामेबालोयंरक्षणीयोमहेश्वरि ॥७॥ यथात्वयांजनीपुत्रोहनुमान्रक्षितःशिशुः॥तथामेबालकंरक्षदुर्गेदुर्गार्तिहारिणि ॥७॥ रुद्रस्वर्गाद्यथादेविकश्यपादिसुतास्त्वया॥मातस्त्राहितथाबालंविष्णुमायेनमोस्तुते ॥९॥ सर्वविघ्नानपाकृत्यसर्वसौख्यप्रदायिनि॥जीवंतिकेजगन्मातःपाहिनःपरमेश्वरि॥१०॥अनयापूजयाविघ्नेशस्यजन्मदाजीवंत्यपरनाम्नीषष्ठीदेवीशस्त्रगर्भाभगवत्यःप्रीयंतां ॥ ततोदिक्पालपूजनं ॥ ततोनीराजनं ॥ सूतिकागृहेबलिंसोपस्करंदद्यात् ॥ तत्रमंत्रः ॥ क्षेत्रस्याधिपतेदेविसर्वारिष्टविनाशिनि ॥ बलिंगृहाणमेरक्षक्षेत्रंसूतींचबालकं ॥ १ ॥ इमंसोपस्करबलिंक्षेत्राधिपत्यैदेव्यैसमर्पयामि ॥ ततआगत्यद्वारस्योभयतः कज्जलेनद्वेद्वेमातरौलिखेत् ॥ तन्नामानि ॥ धीषणावृद्धिमाताचतथागौरीचपूतना ॥ आयुर्दात्र्यो

भवंत्वेताअद्यबालस्यमेशिवाः ॥ पंचोपचारैःपूजयेत् ॥ सुवासिनीभोजनं ॥ विप्रेभ्यश्चखाद्यतांबूलदक्षिणादिदद्यात् ॥ तैराशिषोगृहीत्वा ॥ दशमेन्हिविसर्जनंकार्यं ॥ जननाशौचमध्येप्रथमषष्ठदशमदिनेषुदानेप्रतिग्रहेचनदोषः ॥ अन्नंतुनिषिद्धं ॥ अत्र पंचमषष्ठदिनयोःपुरुषाः शस्त्रहस्ताः स्त्रियश्चनृत्यगीतकारिण्यः अस्यांरात्रौजागरणंकुर्युः ॥ सूतिकागेहंसधूपाग्निदीपंशस्त्रमुशलांबुविभूतियुतंकार्यं ॥ सर्षपांश्चसर्वतोविकिरेत् ॥ अन्यदपियथाचारंकार्यं ॥ विप्राश्चशांतिपाठंपठेयुः॥ ॥इतिसंस्कारभास्करेषष्ठीपूजनं ॥ ॥ अथरात्रिवर्गः ॥ रात्रिवर्गोनामशांतिपाठः ॥ तंचदशदिनंसूतिकासमीपेप्रदोषसमयेजपेत् ॥ ॥ अद्यपू० तिथौसकलारिष्टशांतिपूर्वकंसूतिकाबालकयोः आयुष्याभिवृद्ध्यर्थंश्रीपरमेश्वरप्रीत्यर्थंशांतिपाठजपंकारिष्येइतिसंकल्पः ॥ ॥ तत्रायंक्रमः ॥ गणानांत्वेतिप्रथमंश्रीश्चतेतदनंतरं ॥ ब्रह्मयज्ञानम्प्रथमं

इदम्विष्णुस्तुत्र्यम्बकम् ॥ भूरसिभूमिप्रथमंआपोहिष्ठाततःपरं ॥ तेजोसिशुक्रमि
तिचवायोयेतेघृतंघृतं ॥ २ ॥ नवग्रहाणांमंत्राश्चदिक्पालानांतथैवच ॥ आशुःशिशा
नमारभ्यममर्माण्यंततःपठेत् ॥ ३ ॥ दिवस्परिसमारभ्यविवब्रुह्यायुषंजपेत् ॥ आ
नोभद्राःसमारभ्यजनित्वांततःपरं ॥ ४ ॥ ऋचम्वाचंसमारभ्यअंतेतुशरदःशतात् ॥
रात्रिवर्गमिमंजाप्यंबालानांभयनाशनं ॥ ५ ॥ ॥ इतिसंस्कारभास्करेरात्रिवर्गक्र
मःसमाप्तः ॥ ॥ अथनामकरणसंस्कारनिर्णयः ॥ एकादशाहेद्वादशाहेवाविप्रस्यना
मकर्म ॥ क्षत्रियाणांत्रयोदशेषोडशेवादिने ॥ वैश्यानांषोडशेविंशतितमेवादिने ॥
द्वाविंशेमासांतेवाशूद्राणां ॥ दशम्यामुत्थाप्येतिप्रसवदिनमारभ्यदशम्यांरात्र्याम
तीतायांएकादशेन्हिसूतिकामुत्थाप्यस्नापयित्वामातृपूजापूर्वकंनांदीमुखश्राद्धंव्य
तिरिक्तं त्रीन्ब्राह्मणान्भोजयित्वापितानामकरोति ॥ तद्यथोक्तं ॥ अत्रपितृग्रहणाद

न्यत्रापिपितुर्नियमोवगम्यते ॥ अत्राप्यसन्निधौपितरिअन्यैःकश्चित्कुलवृद्धःकरोति ॥ तत्र ॥ कृष्णोनंतोऽच्युतश्चक्रीवैकुंठोथजनार्दनः ॥ उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः ॥ योगीशःपुंडरीकाक्षोमासनामान्यनुक्रमात् ॥ अत्रयथाचारंचैत्रादिमार्गशीर्षादिर्वाक्रमः ॥ तच्चत्रिपुरुषवाचिदेवतावाचिस्विष्टंवायुग्माक्षरंप्रतिष्ठाकामः ॥ चतुरक्षरंब्रह्मवर्चसकामोनामकुर्यात्॥तच्चघोषवदादि॥घोषवंतिअक्षराणि ॥ गघङ॥ जझञ ॥ डढण ॥ दधन ॥ बभम ॥ नामादौ ॥ अंतःस्थायरलवाः नाम्नोमध्येभवंति ॥ दीर्घावसानं ॥ कृत्प्रत्ययांतं ॥ नताद्धितांतं ॥ कन्यकायास्तुअयुग्माक्षरं ॥ आकारांतं ॥ तद्धितांतं ॥ अत्रब्राह्मणस्यशर्मांतंनामकुर्यात् ॥ क्षत्रियस्यवर्मांतं ॥ वैश्यस्यगुप्तांतं ॥ शूद्रस्यदासांतं ॥ नाक्षत्रनामानितुचुचेचोलाश्विनीप्रोक्तेत्यादिज्योतिर्ग्रंथोक्तावकहडाचक्रानुसारेणाश्विन्यादिचतुश्चरणेषुचूडामणिश्चेदीशश्चोलेशोल

क्ष्मणइत्यादिकानिकुर्वंति ॥ कार्तीयानांकृत्तिकोत्पन्नस्याग्निशर्मेतिनक्षत्रदेवतासंबद्धंनाक्षत्रंनामकुर्यात् ॥ नाक्षत्रनामैवाभिवादनीयंगुप्तंचामौंजीबंधनात् मातापितरावेवजानीयातां ॥ व्यावहारिकंनामचतुर्थं ॥ तच्चकवर्गादिषुतृतीयचतुर्थपंचमवर्णहकारान्यतमवर्णाद्यावयवकं ॥ यरलवान्यतममध्यवर्णयुतंऋलृवर्णरहितंविसर्गांतं ॥ पित्रादिपुरुषत्रयान्यतमवाचकंशत्रुवाचकभिन्नंतद्धितप्रत्ययरहितंकृत्प्रत्ययांतंयुग्माक्षरंपुंसांअयुग्माक्षरंस्त्रीणांकार्यं ॥ तद्यथा ॥ भक्ता इत्याबंतंदेवतानाम ॥ मासनामसु ॥ चक्रिणी ॥ वैकुंठी ॥ वासुदेवी ॥ एतानि त्रीणिङीबंतानि ॥ हरिरित्येतन्नामकन्यापुत्रयोःसमानम् ॥ शेषाण्यष्टौ ॥ जनार्दना ॥ उपेंद्रा ॥ यज्ञपुरुषा ॥ योगीशा ॥ पुंडरीकाक्षा ॥ कृष्णा ॥ अनंता ॥ अच्युता ॥ एतान्याबंतानिज्ञेयानीतिधर्मसिंधौ ॥ एतन्नामकरणंकन्यायास्तु अयुजाक्षरमाकारांतं तद्धितप्रत्ययां

तंकार्यं ॥ मासनामानितु ॥ श्रीर्लक्ष्मीः कमलापद्मासीतासत्याचरुक्मिणी ॥ माधवीचेंदिरादेवीतुलसीजांबवत्यपि ॥ एतानिमासनामानिकन्यायाःक्रमतोवदेत् ॥ इतिखंडभट्टपद्धतौ ॥ ॥ तच्चजन्मतएकादशेन्हिवायथाचारंनियतदिनेनामकरणंकार्यं ॥ नियतकालेपिविष्टिवैधृतिव्यतीपातग्रहणसंक्रांत्यमावास्याश्राद्धदिनंचेत्तर्हिनकार्यं ॥नियतकालेक्रियमाणेगुरुशुक्रास्तबाल्यवार्धक्यवक्रातिचारमलमासादिनिषेधोनास्ति ॥ नियतकालातिक्रमेतुज्योतिःशास्त्रोक्तशुभदिनेकार्यं ॥ यदिकेनचित्प्रकारेणप्राप्तकालेजातकर्मनभवतितदाअनादिष्टप्रायश्चित्तपूर्वकंनामकर्मकालेजातकर्मनामकर्मचसहैकतंत्रेणकार्यं ॥ सकृदेवभवेच्छ्राद्धमित्याशयस्तुप्रसिद्धः ॥ ॥ अथप्रयोगः ॥ तत्रायंक्रमःशिष्टाचारश्च ॥ नामाख्येमातृनांदीन्यजतिजननतोद्वादशैकादशेवाविप्रांस्त्रीन्भोजयित्वाकृतमपिचभवेत्ताद्धितंनैवपुंसः ॥ तस्यादौघोषवंतोयर

लवपुरतःशर्मवर्मेतिगुप्तेत्येतेविप्रादिवर्णांस्त्रितयेषुअभिधानंत(?)मीबंतमस्याः ॥ १ ॥

ततःकुमारपितामंगलंस्नात्वाऽहतवाससीपरिधायधृतमंगलतिलकःशुभासनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यशिशोःबीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंनामकरणंकरिष्ये ॥ तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिकृत्वा ॥ अत्रपुण्याहवाचनांतेप्रजापतिःप्रीयतामितिवदेत् ॥ नामकरणेअधिकारार्थंत्रीन्ब्राह्मणान्भोजयिष्ये ॥ अत्रशिष्टाचारप्राप्तंनामदेवतापूजनं ॥ तद्यथा ॥ कांस्यपात्रेतंडुलान्प्रसार्यतदुपरिसुवर्णशलाकयाकुलदेवताप्रयुक्तमादौअमुकदेवताभक्तइतिनाम ॥ मासनाम ॥ नक्षत्रनाम ॥ व्यवहारनाम ॥ एवंनामचतुष्टयंलिखित्वा ॥ ॥ अस्यशिशोर्ब॰हायुष्यप्राप्त्यर्थंनामदेवतापूजनंकरिष्येइतिसंकल्पः ॥ मनोजूतिरितिप्रतिष्ठा ॥ श्रीश्चते

इतिमंत्रेणनामदेवताभ्योनमइतिषोडशोपचारैःसंपूज्य॥ततःदक्षिणतःमातुरुत्संगस्थस्यशिशोर्दक्षिणकर्णेकथयति ॥हेकुमारत्वंगणपतिभक्तोसि॥हेकुमारत्वंकुलदेव्याभक्तोनाम्नामार्तंडोसि॥हेकुमारत्वंमासनाम्नाकृष्णोसि॥ हेकुमारत्वंनक्षत्रनाम्नाचूडामणिरसि ॥ हेकुमारत्वंव्यवहारनाम्नारामचंद्रोसीति ॥इतिकथयित्वा॥मनोजूतिरिति मंत्रपठनांतेविप्रैर्नामसुप्रतिष्ठितमितिवाचयित्वा ॥ ततोब्राह्मणानभिवादयेत् ॥ तद्यथा॥हेकुमारत्वंगणपतिभक्तोसिसर्वान्ब्राह्मणानभिवादय॥इत्युपांशुपितावदेत्॥ आयुष्मान्भवसौम्यगणपतिभक्तः ॥ इतिद्विजाब्रूयुः ॥ हेकुमारत्वंमार्तंडशर्माकुलदेव्याभक्तोसिसर्वान्ब्राह्म० ॥ आयु०मार्तंडशर्मा ॥हेकुमारत्वंमासनाम्नाकृष्णशर्मासिसर्वान्ब्रा० ॥ आयु०कृष्णशर्मा ॥ हेकुमारत्वंनक्षत्रनाम्नाचूडामणिशर्मासिस० ॥ आयु०चूडामणिशर्मा ॥ हेकुमारत्वंव्यवहारनाम्नारामचंद्रशर्मासिस० ॥ आ

यु०रामचंद्रशर्मा ॥ ततोविप्राःवेदोसीतिमंत्रेणाशिषंशिशवेदद्युः ॥ ॐ वेदोसि
येनत्वंदेंवव्वेददेवेभ्योंवेदोभंवस्तेनमह्यंवेदोभूंयाः ॥ १ ॥ ॥ उपांशुलक्षणं ॥
अभिवादननामेदमस्येत्यालोच्यचेतसा ॥ उपांशुनिर्दिशेच्चैतंनजानीयुःपरेयथे
ति ॥ ॥ अथास्यायुष्यंकरोतिदक्षिणकर्णमभिनिधायवाग्वागितित्रिरथास्यना
मधेयंकरोतिवेदोसीतितदास्यैतद्गुह्यमेवनामस्यादथदधिमधुघृतꣳसꣳसृजानंतर्हिते
नजातरूपेणप्राशयति ॥ अथास्यायुष्यंकरोतिदक्षिणकर्णे ॥ ॐअग्निरायुष्मान्त्स
वनस्प० ॥ ॐ सोमऽआ० ओषधी० ॥ ॐ ब्रह्मऽआ० त्तद्ब्राह्म० ॥ ॐ देवाऽ
आयु० मृतै० ॐ ऋषयऽआ० व्रते० ॥ ॐ पितरऽआ० स्वधा० ॐ यज्ञऽ
आ० न्तसदक्षिण० ॥ ॐ समुद्र आ० न्सस्रवं० ॥ ॐ त्र्यायुषञ्जम० ॥ १ ॥ इ

तित्रिः ॥ अथास्यदधिमधुघृतमेकीकृत्यप्राशयति ॥ ॐ भूस्त्वयिदधामि ॥ ॐ भुवस्त्व० ॥ ॐ स्वस्त्वयि० ॥ ॐ भूर्भुवस्वःसर्वंत्व० ॥ अथैनमभिमृशति ॥ ॐ अश्माभवपरशुर्भवहिरण्यमस्तुतम्भव ॥आत्मावैपुत्रनामासिसजीवशरदः शतम् ॥ १ ॥ अथास्यमातरमभिमंत्रयते ॥ ॥ ॐ इडासिमै० ॥ १ ॥ अथैनंमातुःस्तनंप्रक्षाल्यप्रयच्छति ॥ ॐ इमठंस्तन० ॥ १ ॥ यस्तेस्तनःइतिऋग्भ्यां० ॥ ॐ तंवाऽएतमाहुःअतिपिताबताभूरतिपितामहोबताभूःपरमांबतकाष्ठांप्रापश्रियायशसाब्रह्मवर्चसेनयऽएवंविदोब्राह्मणस्यपुत्रोजायते ॥ १ ॥ ततःकर्तादेवताभ्योब्राह्मणेभ्यश्चनत्वा ॥ दशसंख्याकान्ब्राह्मणान्भोजयिष्ये ॥ ब्राह्मणेभ्योदक्षिणांदत्वातैराशिषोगृहीत्वा ॥ यांतुमातृगणाःसर्वेइतिमातृणांविसर्जनं ॥ कुमार्याअपिनामकरणंअमंत्रकंकार्यं॥इतिसंस्कारभास्करेनामकरणं ॥ ॥ आंदोलशयनेपुंसोद्वादशोदिवसःशुभः ॥ त्रय

दशस्तुशय्यायांननक्षत्रविचारणा ॥ १ ॥ अत्रादिनेशुभकालेकुलदेवतांयोगशायिनंचसंपूज्यस्मृत्वानत्वाचमात्रादिसुभगस्त्रीभिःअलंकृतशिशुंगीतवाद्यघोषपुरःसरंआंदोलेदक्षिणशिरसंनिधापयेत् ॥ प्राप्तकालेकुयोगसत्त्वेपिजातकर्मवत्कार्यं ॥ इत्यांदोलारोहणं ॥ ॥ एकत्रिंशद्दिनेचैवपयःशंखेनपाययेत् ॥ अन्नप्राशननक्षत्रेदिवसेवापरेशुभे ॥ १ ॥ अत्रोक्तदिनेशुभकालेगणपतिंकुलदेवतांचसंपूज्यगोक्षीरंशंखेनधात्रीमातादक्षिणशिरसंशिशुमंकेनिधायआप्यायस्वेतिमंत्रेणपाययेत् ॥इतिदुग्धपानं ॥

अथनिष्क्रमणसंस्कारः ॥ तच्चद्वादशेन्हिचतुर्थेमासेवायात्रोक्तशुभदिनेशुभकालेकार्यं ॥ तत्रायंक्रमः ॥ निष्क्रामस्तुर्यमासेभवतिसुदिवसेमातृनांदीमुखांतेतच्चक्षुऋकप्रपाठैर्दर्शयतिसविताजातपुत्रस्यनार्या॥कुर्यात्कन्यांविमंत्रैर्ग्रहमखमथवाकेचिदिच्छंतिविप्रान्भोज्यंदानादिकृत्यंभवतिविधिरयंसर्वसंस्कारमुख्यः ॥ १ ॥ शिशु

नासहमंगलंस्नात्वाशुभासनेउपविश्य आचम्यप्राणानायम्यदेशकालकीर्तनांतेम
मास्याशिशोःआयुरभिवृद्धिव्यवहारासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंगृहान्निष्क्रमणं
करिष्ये ॥ स्वस्तिवाचनादिमातृपूर्वकनांदीश्राद्धांतंकृत्वा ॥ अत्रपुण्याहवाचनां
तेसविताप्रीयतामित्यूहः ॥ ततःपिताऽलंकृतंशिशुंमातृगृहीतंसुशकुनेगृहान्निष्क्रम्य
सूर्यौदीक्षणंकारयेत् ॥ तत्रमंत्रः ॥ ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्ये
मशुरदंःशतञ्जीवेमशुरदंःशुतꣳश्रृणुयामशुरदंःशतम्प्रब्रवामशुरदंःशुतमदीनाःस्या
मशुरदंःशतम्भूयंश्चशुरदंःशुतात् ॥ १ ॥ देवतायतनेगच्छेत् ॥ गृहमागत्यसुवा
सिनीभिर्नीराज्यदशब्राह्मणान्भोजयिष्येइतिसंकल्पयेत् ॥ ब्राह्मणेभ्योदक्षिणांद
त्वा ॥ तैराशिषोगृहीत्वा ॥ यांतुमातृगणाःसर्वेइतिमातृणांविसर्जनं ॥ ॥ कुमारस्या

स्मिन्नेवदिनेरात्रौशुभवेलायांचंद्रदर्शनंकार्यं ॥ तद्यथा ॥ चंद्रार्कयोर्दिगीशानांदिशांचवरुणस्यच ॥ निक्षेपार्थमिदंदध्मितेत्वांरक्षंतुसर्वदा ॥ प्रमत्तंवाप्रसुप्तंवादिवारात्रमथापिवा ॥ रक्षंतुसततंतेत्वांदेवाःशक्रपुरोगमाः ॥ १ ॥ इतिसंस्कारभास्करेनिष्क्रमणसंस्कारः ॥ ॥ अथभूम्युपवेशनं ॥ पंचमेचतथामासेशिशुंभूमौनिवेशयेत् ॥ तत्रसर्वेग्रहाःशस्ताभौमोप्यत्रविशेषतः ॥ १ ॥ तच्चध्रुवमृदुलघुनक्षत्रादिज्योतिःशास्त्रोक्तशुभदिनेपूर्वाण्हेस्वस्तिवाचनंकृत्वावाराहंकूर्ममनंतंपृथ्वींचसंपूज्य ॥ ततोगोमयोपलिप्तभूमौरंगवल्लीमंडलंकृत्वातत्रद्रोणसमानंगोधूमराशिंकृत्वा॥ तत्रराशौमंगलगीतवाद्यघोषपुरःसरमलंकृतंशिशुमुपवेशयेत् ॥तत्रमंत्राः ॥ रक्षैनंवसुधादेविसदासर्वगतेशुभे ॥ आयुःप्रमाणंलिखितंनिक्षिपस्वहरिप्रिये॥ १ ॥ अचिरादायुषस्तस्ययेकेचित्परिपंथिनः ॥ जीवितारोग्यवित्तेषुनिर्दहस्वाचिरेणतान् ॥ २ ॥ धारिण्यशेषभूतानां

मातात्वमसिकामधुक् ॥ अजराचाप्रमेयाचसर्वभूतनमस्कृता ॥ ३ ॥ चराचराणांभूतानांप्रतिष्ठानाम्नियाह्यसि ॥ कुमारंपाहिमातस्त्वंब्रह्मातदनुमन्यतां ॥ ४ ॥ वासुसिनीभिर्नीराज्य ब्राह्मणेभ्योदक्षिणांदत्वातैराशिषोगृहीत्वाधान्यराशिंगुरवेदद्यात् ॥ एवंकुमार्याअपि ॥ इतिभूम्युपवेशनं ॥ ॥ अथान्नप्राशनं ॥ षष्ठेमासेन्नप्राशनं ॥ तच्चज्योतिःशास्त्रोक्तशुभदिनेकार्यं ॥ तत्रायंक्रमः ॥ अन्नप्राशोथनांदौश्रपयतिचचरुंपायसंचाथहुत्वातत्राघाराज्यभागौद्वितयमथघृताद्वेवदेवींतुवाजः ॥ प्राणाद्यासुश्चतस्रश्चरुहुतिथहुनेत्स्विष्टकृद्भूर्भुवाद्याःसर्वास्ताविंशतिस्तुमुदितमथशिशुंप्राशयेद्धृतहेम्ना ॥ १ ॥ ततःपितासभार्यःशिशुनासहमंगलंस्नात्वाऽहतेवाससीपरिधायधृततिलकःशुभासनेचोपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेममास्याशिशोर्मातृगर्भमंगलप्राशनशुद्ध्यर्थंअन्नाद्यब्रह्मवर्चसतेजइंद्रियायुर्बललक्षणफलसिद्धिबीजगर्भसमुद्भवैनोनिब

र्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंअन्नप्राशनाख्यंकर्मकरिष्ये ॥ तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिकृत्वा ॥ तत्रपुण्याहवाचनांतेसविताप्रीयतामितिवदेत् ॥ ततःस्थंडिलेपंचभूसंस्कारपूर्वकंशुचिनामानमग्निंप्रतिष्ठाप्यषोडशोपचारैःसंपूजयेत् ॥ ततोब्रह्मोपवेशनादि ॥ आसादितेविशेषः ॥ सर्वान्षड्रसान्क्षारकटुतिक्तकषायमधुराम्लाँल्लेह्यपेयचोष्यखाद्यंयवशाल्यादिनिर्मितंघृतादिपाचितमन्नंतैजसपात्रेधृतं ॥ पुस्तकशस्त्रवस्त्रादि[1]शिल्पंचविन्यसेत् ॥ पवित्रच्छेदनादिआज्यभागांतंकृत्वानंतरंआज्येनाहुतिद्वयं ॥ तत्रमंत्रौ ॥ ॐदे॒वींवाचंमजनयंतदे॒वास्तांवि॒श्वरू॑पाःप॒शवो॑वदंति॒ ॥ सानो॑मं॒द्रेष॒मूर्ज्जं॒दुहा॑नाधे॒नुर्वाग॒स्मानु

---

[1] शिलाशस्त्रादि.

पसुष्टुतैतुस्वाहा ॥ १ ॥ इदंवाचेन० ॥ ॐ देवींवा० नुपसुष्टुतैतु ॥ ॐ वाजोनाऽअद्य
प्रसुवातिदानंवाजोदेवाँ२ ऽऋतुभिंःकलपयाति ॥ वाजोहिमासर्वंवीरञ्जजान
विश्वाऽआशावाजपतिर्जयेयꣳस्वाहा ॥ २ ॥ इदंवाचेवाजाय० ॥ ततःस्थालीपा
केनाहुतिचतुष्टयं ॥ ॐ प्राणेनान्नमशीयस्वा०इदंप्रा० ॥ ॐ अपानेनगंधान
शीयस्वा० इदमपानाय० ॥ ॐ चक्षुषारूपाण्यशीयस्वा० इदंचक्षुषे० ॥ ॐ श्रोत्रे
णयशोशीय०इदंश्रो० ॥ ततःस्थालीपाकेनस्विष्टकृत् ॥ ततोमहाव्याहृत्यादिनवा
हुतयः ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतं होमशेषंसमाप्य ॥ ॥ ततःस्थाल्यां
आसादितसर्वरसान्शाल्यादीन्यन्नानिचआनीयएकस्मिन्पात्रेप्रत्येकमुद्धृत्यसकृ
देवप्राशयेद्धंतेतिमंत्रेण ॥ ॐ हंत० ॥ हंतकारंमनुष्याइतिश्रुतेः ॥ ततोबालकंभूमौउ

पवेश्यतदग्रेपुस्तकशस्त्रवस्त्रादिशिल्पंविन्यस्यजीविकापरीक्षांकुर्यात्॥शिशुस्स्वेच्छयाप्रथमंयत्स्पृशेत् तेनैवतस्यजीविकाभविष्यतीतिज्ञायेत् ॥ ब्राह्मणेभ्योदक्षिणांदत्वातैराशिषोगृहीत्वादशब्राह्मणान्भोजयिष्येइतिसंकल्प्य मातृणामग्नेश्चविसर्जनंकुर्यात् ॥ इतिसंस्का० भा० अन्नप्राशनं ॥ अथशौनकोक्तदत्तपुत्रप्रतिग्रहविधाननिर्णयः ॥ तत्रादौतिथ्यादिनिर्णयः ॥ ज्योतिषसारसंग्रहे ॥ हस्तादिपंचकभिषक्वसुपुण्यभेषुसूर्येंचभौमगुरुभार्गववासरेषु ॥ रिक्ताविवर्जिततिथिष्वलिकुंभलग्नेसिंहेवृषेभवतिदत्तपरिग्रहोयम् ॥ १ ॥ पुन्नाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः ॥ तस्मात्पुत्रइतिप्रोक्तः पितॄन्यःपातिसर्वतः॥इतिअयोध्याकांडेभरतंप्रतिरामवचनम् ॥शौनकः ॥ अपुत्रोमृतपुत्रोवापुत्रार्थंसमुपोष्यच ॥ वाससीकुंडलेदद्यादुष्णीषंचांगुलीयकं ॥ १ ॥ अन्वाधानादियत्तंत्रंकृत्वाज्योतपवनादिकं ॥ दातुःसमक्षंगत्वातुपुत्रंदे

हीतियाचयेत् ॥ २ ॥ दानेसमर्थोदातास्मैयेयज्ञेनेतिपंचभिः ॥ देवस्यत्वेतिमंत्रेण हस्ताभ्यांपरिगृह्यच ॥ ३ ॥ अंगादंगेत्यृचंजप्त्वाचाघ्रायशिशुमूर्धनि ॥ गृहमध्येतमादायचरुंहुत्वाविधानतः ॥ ४ ॥ यस्त्वाहृदेत्यृचाचैवतुभ्यमग्नेऽऋचैकया ॥ सोमोददादित्येताभिःप्रत्यृचंपंचभिस्तथा ॥ ५ ॥ स्विष्टकृतादिहोमंचकृत्वाशेषंसमापयेत् ॥ बंधुभिःसहभुंजीतब्राह्मणांश्चविशेषतः ॥ ६ ॥ ॥ दत्तकेविशेषः ॥ पितुर्गोत्रेणयःपुत्रः संस्कृतःपृथिवीपते ॥ आचूडांतंनपुत्रःसपुत्रतांयातिचान्यतः ॥ १ ॥ चूडोपायनसंस्कारानिजगोत्रेणवैकृताः ॥ दत्ताद्यास्तनयास्तेस्युरन्यथादासउच्यते ॥ ॥ २ ॥ नत्वेकपुत्रिणोदद्युस्तथैवज्येष्ठपुत्रकमिति ॥ ब्राह्मणानांसपिंडेषुकर्तव्यःपुत्रसंग्रहः ॥ सोदकोवासगोत्रोवाअन्यत्रतुनकारयेदिति ॥ ॥ कात्यायनः ॥ अभ्रातृवृद्धवयसोअसंपद्दत्तपालने॥ कुलस्योद्धरणार्थायग्राह्यांकन्यांविवाहयेदिति कन्य

दत्तकग्रहणेविशेषः ॥ ॥ स्त्रीशूद्रयोस्तुविशेषः ॥ पराशरेणशूद्रकर्तृकहोमोविप्रद्वारैवोक्तः ॥ तथापिब्राह्मणस्यशूद्रत्वबाधापत्तेः ॥ अतएवदातापौराणमंत्रंपठेत् ॥ कुलस्योद्धरणार्थायदेवाग्निद्विजसन्निधौ ॥ वंशविस्तरणार्थायप्रतिगृण्हामीमंसुतं॥ १ ॥ कन्याविषयेउत्तरार्धभेदः॥ अप्रजस्त्वनिवृत्त्यर्थंकन्यासत्ताप्रगृह्यतामिति ॥ मूर्ध्न्यवघ्राणे ॥ अंगादंगानिसंभूतान्हृदयादीनिसर्वशः ॥ आत्मावैपुत्रनामासिसजीवशतवत्सरान् ॥ १ ॥ इति ॥ होममंत्रः ॥ सोमोद्ददद्गंधर्वायगंधर्वोददद्ग्नये ॥ अनेन अग्निनादत्तोयेनदत्तोमयाइमंइति ॥ ॥ अथप्रयोगः ॥पुण्येहनिसपत्नीकोयजमानः शुभासनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेममअप्रजस्त्वप्रयुक्तपैतृकऋणापाकरणपुन्नामनरकत्राणद्वारावंशाभिवृद्ध्यर्थंसंततिविच्छेदजनितप्रत्यवायपरिहारार्थंसनातनकुलधर्माणांउत्पत्तयेचसमस्तपितॄणांशाश्वतब्रह्मलोकनिवासार्थं

स्वस्योद्धर्तुंकामोहंस्वकुलाप्तावनवत्पुत्रवतासमत्वसिद्ध्यर्थंश्रीपरमेश्वरप्रीत्यर्थंशौनकोक्तविधिनापुत्रप्रतिग्रहंकरिष्ये॥कन्याविषयेविशेषः॥अप्रजस्त्वनिरासार्थंममसमस्तपितॄणांनिरतिशयानंदवंशोद्धारकल्पोक्तफलावाप्तयेश्रीपरमेश्वरप्रीत्यर्थंएतत्कन्यायाःस्वकन्यारूपसत्ताकरणंकरिष्येइतिसंकल्पेऊँहः॥तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंआचार्यवरणंविष्णुपूजनंचकरिष्येइतिकृत्वा विष्णुपूजनंतुस्थंडिलात्प्राग्देशेमहीद्यौरित्यादिनाकलशंसंस्थाप्योपरिविष्णुंपूजयेदिति ॥ कुलदेवतागुरूंश्चसंपूज्यनत्वापुत्रप्रतिग्रहांगविहितंअग्निप्रतिष्ठापनंहवनंचकरिष्ये ॥ एवंकन्यासत्ताकरणांगत्वेनेति ॥ तत्रस्थंडिलेपंचभूसंस्कारपूर्वकंलौकिकाग्निंप्रतिष्ठाप्य ॥ ततोदक्षिणतोब्रह्मासनादिप्रोक्षण्याःप्रत्युत्पवनांतंकृत्वा ॥ ततआचार्येणसहदातुःसमक्षंगच्छेत् ॥ आचार्यद्वारायाच्ञांकारयेत् ॥ आचार्योदातारंप्रत्येतस्मै

पुत्रंदेहीतियाच्ञांकुर्यात ॥ ददामीतिदातावदेत्॥ ततोदाताआचम्यप्राणानायम्य देशकालकीर्तनांतेतववंशाभिवृद्धयेममचपुत्रफलप्राप्तिकामःश्रीपरमेश्वरप्रीत्यर्थंपुत्रदानंकरिष्ये ॥ कन्याविषयेतु ॥ तववंशोद्धारार्थंकन्यारूपसत्तासिद्ध्यर्थंचकन्यास्वसत्तानिवृत्तिपूर्वकंतुभ्यंएतत्कन्यानिवेदनंकरिष्येइतिऊहः ॥ तदंगविहितंगणपतिपूजनंकरिष्येइतिकृत्वा ॥ ततोयथाशक्तिचंदनादिनाप्रतिग्रहीतारंसंपूज्यदानमंत्राः ॥ ॐ येयज्ञेनदक्षिणयासमक्तइंद्रस्यसख्यममृतत्वमानशं ॥ तेभ्योभद्रमंगिरसोवोऽअस्तुप्रतिगृभ्णीतमानवंसुमेधसः॥१॥यऽउद्दायन्पितरोगोमयंवस्वृतेनाभिन्दन्परिवत्सरेबलं ॥ दीर्घायुत्वमंगिरसोवोऽअस्तुप्रतिगृभ्णीतमानवंसुमेधसः ॥ २ ॥ यऋतेनसूर्यमारोहयन्दिव्यप्रथयन्पृथिवींमातरंवि ॥ सुप्रजास्त्वमंगिरसोवोऽअस्तुप्रतिगृभ्णीतमानवंसुमेधसः ॥ ३ ॥ अयन्नाभावदतिबलग्वोगृहेदेवपुत्रऋषयस्तुवृणो

तन ॥ सुब्रह्मण्यमंगिरसोवोअ० ॥ ४ ॥ ॐ विरूपासऽइदृषयस्तऽइद्गंभीरवेपसः ॥ तेऽअंगिरसःसूनवस्तेऽअग्नेःपरिजज्ञिरे ॥ ५ ॥ इतिमंत्रपठनांते ॥ इमंपुत्रंतवपैतृकऋणापाकरणपुन्नामनरकोत्तारणार्थंवंशाभिवृद्ध्यर्थंआत्मनश्चमुक्तयेश्रीपरमेश्वरप्रीतयेतुभ्यमहंसंप्रददेनमम॥कन्याविषयेविशेषः॥ इमांकन्यांतवअप्रजस्त्वनिरासार्थंत्वयासहएकविंशतिपुरुषोद्धरणार्थंआत्मनश्चमुक्तयेवंशोद्धारकल्पोक्तफलावाप्तयेश्रीपरमेश्वरप्रीतयेआत्मसत्तानिवृत्तिपूर्वकंतुभ्यंकन्यारूपसत्तांसंप्रददेनममेति ॥ एतद्दानोदकंपुत्रविषयेप्रतिग्रहीतृहस्तेनिषिंच्य ॥ कन्याविषयेप्रतिग्रहीतृसमीपेजलमध्येजलंक्षिपेदिति ॥प्रतिगृण्हातुपुत्रंभवान्॥कन्यारूपसत्तांप्रतिगृण्हातुभवान्॥देवस्यत्वेतिमंत्रेणहस्तद्वयेप्रतिगृण्हामीतिप्रतिगृह्यस्वांकेउपवेशयेत् ॥ ततअंगादंगादितिमं

त्रेणशिशुंमूर्ध्न्यभिजिघ्रेत्॥ ॐअंगादंगात्संभवसिहृदयादधिजायसे ॥ आत्मावैपुत्रनामासिसजीवशरदः शतम् ॥ १॥ततोयुवासुवासाइतिमंत्रेणबालकायवस्त्रंपरिधायउष्णीषंबद्ध्वा।कुंडलादिभिरलंकृत्यकुंकुमादिना।तिलकंकृत्वाप्रावरणेनसंवेष्ट्यधृतच्छत्रंगीतनृत्यमंगलवाद्यपुरःसरंब्राह्मणैःस्वस्तिनइंद्रेतिसुमंगलसूक्तंपठन्नरैस्तंबालंगृहे आनीयपुरंध्रीभिर्नीराजयेत्॥ ततोग्रहीता हस्तौपादौचप्रक्षाल्यअग्नेःपश्चिमतःशुभासनेउपविश्यस्वदक्षिणतःपत्नींपत्न्युत्संगेबालंचोपवेश्य॥आचम्यप्राणानायम्यदेशकालकीर्तनांतेदत्तविधानांगहवनंकरिष्ये॥उपयमनकुशानादाययेत्यादिआज्यभागांतंकृत्वा ॥ ततश्चरुमभिघार्यहोमः॥ॐ यस्त्वाहृदाकीरिणामन्यंमानोमर्त्यंमर्त्यो योहंवीमि ॥ जातवेदोयशोंऽअस्मासुंधेहिप्रजाभिरग्नेऽअमृतत्वमंस्यांस्वाहा ॥ १ ॥

इदमग्नयेनमम ॥ ॐ यस्मैत्वंसुकृतेंजातवेदऽउलोकमंग्नेकृणवःस्योनं ॥ अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिन्नशतेस्वस्तिस्वाहा ॥ २ ॥ इदमग्नयेनमम ॥ कौस्तुभेतुमंत्रद्वयेनैकाहुतिःप्रदर्शिता ॥ ॐ तुभ्यमग्नेपर्यवहन्त्सूर्यांवहतुनासह ॥ पुनःपतिभ्योजायांदाग्नेप्रजयासहस्वाहा ॥ १ ॥ इदंसूर्यासावित्र्यै० ॥ ॐ सोमोददद्गंधर्वायगन्धर्वोददद्ग्नये ॥ रयिंचपुत्राँश्चादादग्निर्मह्यमथोऽइमांस्वाहा ॥ २ ॥ इदंसूर्यासावित्र्यैन० ॥ ॐ इहैवस्तंमावियौष्टंविश्वमायुर्व्यश्नुतं ॥ क्रीळंतौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहेस्वाहा ॥ ३ ॥ इदंसूर्यासावि० ॥ ॐ आनःप्रजांजनयतुप्रजापतिराजरसायसमंनक्त्वर्यमा ॥ अदुर्मंगलीःपतिलोकमाविशशन्नोभवद्विपदेशंचतुष्पदेस्वाहा ॥ ४ ॥ इ

दंसूर्यासावित्र्यै० ॥ ॐ अघोरचक्षुरपतिघ्नेधिशिवापशुभ्यःसुमनाःसुवर्चाः ॥ वीरसू
र्देवकामास्योनाशन्नोभवद्विपदेशंचतुष्पदेस्वाहा ॥ ५ ॥ इदंसूर्यासावित्र्यै० ॥ ॐ इ
मांत्वमिंद्रमीढ्वःसुपुत्रांसुभगांकृणु ॥ दशास्यांपुत्रानाधेहिपतिमेकादशंकृधिस्वाहा ॥
॥ ६ ॥ इदंसूर्यासावित्र्यैनमम ॥ ततोव्यस्तसमस्तव्याहृतिभिरष्टाहुतीर्हुत्वा ॥
उभाभ्यांस्विष्टकृत ॥ ततोभूराद्यानवाहुतयः ॥ ततःसंस्रवप्राशनादिप्रणीताविमो
कांतंहोमशेषंसमाप्य ॥ आचार्यायवस्त्रालंकारादिभिर्यथाविभवंपूजयित्वाधेनुंदद्या
त् ॥ ब्राह्मणेभ्योदक्षिणांदत्वाआशिषोगृहीत्वा ॥ सभोपविष्टान्गंधतांबूलादिभि
स्तोषयेत् ॥ दश[1]ब्राह्मणान्भोजयेत् ॥ देवताग्निंचविसृज्य ॥ कर्मणःसंपूर्णतांवाच

---

[1] ब्राह्मणभोजनांतेहोमपु [illegible] र्यमितिकौस्तुभादिग्रंथाशयः ॥ तथापीदानींतनशिष्टाःप्रा
गेवपुत्रप्रतिग्र [illegible] ॥

यित्वाईश्वरार्पणंकुर्यात् ॥ बंधुसुहृद्भिःसहभुंजीत ॥ ततःस्वस्तिवाचनादिनांदीश्राद्धांतंकृत्वाजातकर्मादीन्संस्कारान्कुर्यात् ॥ अथवाकृतजातकर्मादिषुचौलोपनयनादिकुर्यात् ॥ इतिसंस्कारभा० दत्तपुत्रप्रतिग्रहविधानम् ॥ ॥ अथांतरितसंस्कारे प्रायश्चित्तं ॥ गर्भाधानादिचूडाकरणांतानिसंस्कारकर्माणिनियतकालान्यभिहितानि ॥ यदिदैववशात्पुरुषापराधाद्वादोषाद्वातेषांनियतस्यकालस्यअतिक्रमोभवति तदाप्रायश्चित्तंविधीयते ॥ कात्यायनः ॥ आरभ्याधानमाचौलात्कालेतीतेतुकर्मणां ॥ व्याहृत्याज्यंतुसंस्कृत्यहुत्वाकर्मयथाक्रमं ॥ व्यस्तैःसमस्तैर्व्याहृत्याचत्वारिपंचवारुणं ॥ प्रतिसंस्कारलोपेतुहुत्वाज्येनपृथक्पृथगिति ॥ अन्यच्च ॥ एतेष्वेकैकलोपेतुपादकृच्छ्रंसमाचरेत् ॥ चूडायाअर्धकृच्छ्रंस्यादापदीत्येवमीरितम् ॥ अनापदितुसर्वत्रद्विगुणंद्विगुणंचरेत् ॥ लुप्तेकर्मणिसर्वत्रप्रायश्चित्तंविधीयते ॥

प्रांयश्चित्तेकृतेपश्चाल्लुप्तकर्मसमाचरेत् ॥ इति ॥ अशक्तौगोदानं॥अथवागोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यदानमिति ॥ अथोपनयनदिनात्पूर्वेन्हिआचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यकुमारस्यगर्भाधानादिवापुंसवनादिचूडाकरणांतानांसंस्काराणांकालातिपत्तिजनितप्रत्यवायपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंअनादिष्टप्रायश्चित्तहोमपूर्वकंगोदानंकरिष्ये॥स्थंडिलेपंचभूसंस्कारपूर्वकंलौकिकाग्निंप्रतिष्ठाप्य ॥ ब्रह्मोपवेशनादिआज्यभागांतेप्रतिसंस्कारेआज्येनव्यस्तसमस्तव्याहृतीश्चतस्त्वन्नोअग्नेइत्यादिपंचवारुणंहुत्वा॥ततोमहाव्याहृत्यादिस्विष्टकृदंतादशाहुतयः॥ ततःसंस्रवप्राशनांतंहोमशेषंसमाप्य॥गांचदद्यात् ॥ अथवाकालातिपन्नसंस्कारप्रत्यवायपरिहारद्वारागोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यंदातुमहमुत्सृजे ॥ तेनश्रीकर्मा

---

१ चौलस्योपनी[illegible]हकरणेकुलधर्मप्राप्तत्वेकालातिपत्तिहोमंचौललोपप्रायश्चित्तंचनकार्यमितिधर्मसिंधौ।

गदे० ॥ इत्यंतरितसंस्कारेप्रायश्चित्तं॥एवंकन्यायाश्चगर्भाधानादिचौलांताष्टसंस्काराअतिक्रांताभवंतितदाअस्याःकन्यकायाःइत्यूहेनप्रायश्चित्तमनादिष्टहोमंचकुर्यात् ॥ ॥ अथसंक्षिप्तांतरितसंस्कारप्रयोगः ॥ यथा ॥ प्राङ्नामकरणाद्बालःप्रागन्नप्राशनाच्छिशुः ॥ कुमारकस्तुविज्ञेयोयावन्मौंजीनिबंधनं ॥ तदूर्ध्वंब्रह्मचारीस्याद्विसर्गांतेतुस्नातकः ॥ कृतेविवाहेविधिवद्गृहस्थाश्रमिणंवदेदिति॥सर्वांतरितसंस्कारेकुमारःपरिकीर्तितइति ॥ गणशःक्रियमाणानांमातृणांपूजनंसकृत् ॥ सकृदेवभवेत्श्राद्धंहोममंत्राःपृथक्पृथगिति॥ ॥ततोयजमानःपत्नीकुमारसहितउपनयनदिनात्पूर्वेन्हिमंगलंस्नात्वाऽहतेवाससीपरिधायधृतमंगलतिलकः शुभासनेउपविश्य ॥ आचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणेनबीजकोत्पत्त्यतिशयमातृगर्भामंगलप्राशनशुद्धिपुरुषताज्ञानोदयतेजइंद्रियबला

युर्वर्चोभिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानादिवा पुंसवनादि अन्नप्राशनांतान्संस्कारानेकतंत्रेणाद्यतथा च द्विजत्वसिद्ध्यावेदाध्ययनाधिकारसिद्ध्यर्थं श्वःकरिष्यमाणचौलोपनयने ब्रह्मवर्चस्वसित्ध्यर्थं वेदारंभं च एकतंत्रेण करिष्ये ॥ तदंगत्वेन निर्विघ्नार्थं गणपतिपूजनं स्वस्तिवाचनादि नांदीश्राद्धांतं करिष्ये इति कृत्वा ॥ अंथांतरितसंस्काराणामवश्यकर्तव्यानि ॥ ॐ पूषाभगइतिगर्भाधानं ॥ ॐ हिरण्यगर्भोद्भ्यः संभृतइत्येताभ्यांद्वाभ्यामृग्भ्यांपुंसवनं ॥ ॐ भूर्भुवःस्वरितिमहाव्याहृतिभिर्विनयामीतिसीमंतः ॥ ॐ भूस्त्वयिभुवस्त्वयिस्वस्त्वयिभूर्भुवःस्वःसर्वंत्वयिदधामीतिमेधाजननं ॥ ॐ अग्निरायुष्मानित्यादित्र्यायुषकरणांतंजातकर्म ॥ श्रीकुलदेवता० असुकदे

---

१ प्रायश्चित्तेकृतेपश्चादतीतमपिकर्मवै । कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितइतिवचनात् ॥ जातादिसंस्कारावृत्तिः [illegible]कार्याइतिपक्षद्वयमितिधर्मसिंधौ ॥

नभा

वताभक्तमास[illegible]मनक्षत्रनामव्यवहारनामप्रतिष्ठाप्यवेदोसीत्याशिषामितिनामकर्म ॥ ॐ तच्चक्षुरितिनिष्क्रमणं ॥ ॐ हन्त ॥ इतिमंत्रेणान्नप्राशनं ॥ पुण्याहवाचनांतेमृत्युःसवितासवितासविताचैतेप्रीयंतामिति ॥ इत्यंतारितसंस्कारप्रयोगः॥ ॥अथचूडाकरणसंस्कारः ॥ ॥ सांवत्सरिकस्यचूडाकरणं ॥ संवत्सरोजातोयस्यसःसांवत्सरिकः ॥ सचाद्यसंवत्सरस्यांतिमेमासे ॥ तृतीयेवाप्रतिहते ॥ अथतृतीयेसंवत्सरेअपूर्णेचूडाकरणंकुर्यात् ॥ यथामंगलंवासर्वेषां ॥ अथवायथाकुलाचारंपंचमेद्वेवाउपनीत्यासहक्रियतेतथाव्यवस्था ॥ उदगयनेशुक्लपक्षेगुरुशुक्रयोर्बाल्यवार्द्धक्यास्तसमयाभावेअक्षयेअनधिकेचमासेज्योतिःशास्त्रोक्तप्रशस्ततिथिवारलग्नेशुभेमुहूर्तेदिनेएवकार्यः नतुरात्रौ ॥ यदिगर्भाधानादिसंस्कारलोपस्तत्प्रायश्चित्तंकालात्ययनिमित्तंप्रायश्चित्तहोमंचकृत्वाकार्यइति ॥ प्रायश्चित्तप्रकारस्तुअं

तरितसंस्कारलोपप्रकरणेद्रष्टव्यः॥सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् ॥ पंचमाब्दात्प्रागूर्ध्वंतुगर्भिण्यामपिकारयेत् ॥ सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यते॥ ज्वरितस्यचौलादिमंगलंनकार्यं ॥ मातरिरजस्वलायामपिनकार्यं ॥ विवाहव्रतचूडासुमातायदिरजस्वला ॥ तस्याःशुद्धेःपरंकार्यंमंगलंमनुरब्रवीत् ॥ नांदीश्राद्धोत्तरंरजस्वलायांशांतिंकृत्वाकार्यं ॥ केचित्तुमुहूर्तांतराभावेप्रारंभात्प्रागपिरजोदोषेश्रीपूजनादिविधिनाशांतिंकृत्वाकार्यमित्याहुः ॥ मातुलपितृव्यादेः कर्तुःपत्न्यांरजस्वलायामपिमंगलंनेतिसिंधुः ॥ त्रिपुरुषात्मककुलेषण्मासमध्येमौंजीविवाहरूपमंगलोत्तरंमुंडनाख्यंचूडाकर्मादिनकार्यं ॥ संकटेतुअब्दभेदेकार्यं ॥ चतुःपुरुषपर्यंतंकुलेसपिंडीकरणमासिकश्राद्धांतप्रेतकर्मसमाप्तेः प्राक्चूडाकर्मादिकमाभ्युदयिकंकर्मनकार्यं ॥ एक[illegible]तृजयोरेकसंवत्सरेअपत्ययोर्द्वयोःसमानसंस्कारौनकार्यौ ॥ नसं

कमा

नं स्या

स्कारःसमानंत्र्यान्मातृभेदेविधीयते ॥ प्रारंभोत्तरंसूतकप्राप्तौकूष्मांडीभिर्ऋग्भि
र्घृतंहुत्वागांदत्वाचूडोपनयनोद्वाहनादिकमाचरेत्॥ चौलकर्मणिजातकर्मणिचभोज
नेसांतपनकृच्छ्रप्रायश्चित्तं ॥ अन्येषुसंस्कारेषूपवासेनशुद्धिः ॥ चूडांताःसर्वेसंस्का
राःस्त्रीणाममंत्रकाःकार्याः ॥ होमस्तुसमंत्रकः॥ इदानींशिष्टेषुस्त्रीणांचूडांतसंस्कार
करणंनदृश्यते ॥ विवाहकालेचूडांतलोपप्रायश्चित्तमात्रंकुर्वंति ॥ चौलोत्तरंमासत्रय
पर्यंतंसपिंडैः पिंडदानंतिलतर्पणंचनकार्यं ॥ महालयेगयायांपित्रोः प्रत्यब्दश्राद्धेच
पिंडदानादिकार्यं ॥ इतिधर्मसिंधौ ॥ इतिचूडाकरणोपयोगीनिर्णयः ॥ अथक्रमः॥
चौलंस्यात्त्र्येकवर्षाद्युदितमथकुलान्मातरोबाह्यशालांत्रीन्विप्रान्भोज्यहुत्वामनुमि
तमुदकैश्चौदनंदक्षिणेप्राक् ॥ त्र्येण्याशल्याविनीयत्रिकुशतरुणकंधार्यक्षूरैः सकेशा
न्छित्त्वोक्ष्णोगोमयेऽस्यादितिवदपरयोःकेशमेवंनृपाब्दे ॥ १ ॥ ॥ अथप्रयोगः ॥ त

त्रबहिःशालाभवति ॥ ज्योतिःशास्त्रोक्तेशुभमुहूर्तेमाताकुमारमादायाप्लाव्याहतेवाससीपरिधाप्यांकआधायपश्चादग्नेरुपविशति ॥ तत्रसंकल्पः ॥ देशकालौस्मृ० अस्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणेनबलायुर्वर्चोभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थंचौलकर्मकरिष्ये ॥ यदाउपनीत्यासहक्रियतेतदासंकल्पस्तु चूडोपनयनेकरिष्येएवमूहःकर्तव्यः ॥ तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धारानांदीश्राद्धंचकरिष्येइतिकृत्वा ॥ अत्रपुण्याहवाचनांतेप्रजापतिःप्रीयतामितिवदेत् ॥ चूडाकरणाधिकारार्थंत्रीन्ब्राह्मणान्भोजयिष्ये ॥ ततोबहिःशालायांस्थंडिलेपंचभूसंस्कारान्कृत्वासभ्यनाम्नोग्नेःस्थापनं ॥ततःब्रह्मोपवेशनादिपात्रासादने॥नात्रचरुः ॥ पात्रासादनानंतरंउपकल्पनीयानि ॥ शीतोदकं ॥ उष्णोदकं ॥ नवनीतपिंडः ॥ घृतपिंडोदधिपिंडोवा॥

द्वादशांगुलदी[illegible]यणीशलली ॥ साग्राणिद्वादशांगुलदीर्घाणिसप्तविंशतिकुशतरुणानि ॥ ताम्रपरिष्कृतआयसक्षुरः ॥ आनडुहगोमयपिंडः ॥ नापितः ॥ वरश्चेति॥ पल्वलेवा ॥ पवित्रीकरणादिआज्यभागानंतरंमहाव्याहृत्यादिप्रजापत्यंतानवाहुतयः ॥ तद्यथा ॥ ॐ प्रजापतयेस्वा० इदंप्र० ॥ ॐ इंद्रायस्वा० इदंइं० ॥ ॐ अग्नयेस्वा० इदम० ॥ ॐ सोमायस्वा० ॥ इदंसो० ॥ ॐ भूःस्वा० इदमग्न० ॥ ॐ भुवःस्वा० इदंवा० ॥ ॐ स्वः स्वा० इ० सूर्याय० ॥ ॐ त्वन्नोऽअग्ने०स्वाहा ॥ इदमग्नीवरुणाभ्यांन० ॥ ॐ सत्वन्नोऽअग्ने० स्वा० इदमग्नीवरुणाभ्यांन० ॥ ॐ अयाश्चाग्ने० स्वा० ॥ इदमग्नयेअयसे० ॥ ॐ येतेशतम्व० ॥ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्चन०॥ॐ उदुत्तमं०॥इदंवरुणायादित्यायादितये० ॥ ॐ प्रजापतयेस्वा० इदंप्रजाप० ॥ ततःस्विष्टकृत् ॥ ॐ अग्नयेस्विष्टकृतेस्वा० इदम०

स्विष्ट० ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ ततएकस्मिन्पात्रेशीतास्वप्सूष्णाऽअपआसिंचति ॥ आसिंचनसमयेकुमारेणअन्वारंभःकार्यइतिभर्तृयज्ञः ॥ ॐ उष्णेनवायउदकेनेह्यदितेकेशान्वप ॥ १ ॥ इतिमंत्रेण ॥ अथात्रउदकेनवनीतपिंडंघृतपिंडंदध्नोवाप्रास्यति ॥ तदुदकमादायदक्षिणगोदानमुंदति ॥ तच्चकारिकायां ॥ उंदनंकेशमूलेतुकेशमध्येविनीयनं ॥ छेदनंचैवकेशाग्रेएषएवक्रमोभवेदिति ॥ दक्षिणगोदानंशिरोदक्षिणपार्श्वस्थकेशप्लावनादीत्यर्थः ॥ ॥ ॐ सवित्राप्रसूतादैव्याऽआपउंदंतुतेतनूं ॥ दीर्घायुत्वायबलायवर्चसे ॥ इत्यनेनमंत्रेण ॥ ततस्त्र्येण्याशलल्याकेशान्विनीय ॥ त्रिस्थानश्वेतयाशलल्याइति ॥ विनयनंकेशसमीकरणंत्रीणिकुशतरुणान्यंतर्दधाति ॥ ॐ ओषधेत्रायस्व ॥ १ ॥ इत्य

---

१ उं

नेनमंत्रेण ॥ शिवोनामेतिलोहक्षुरमादाय ॥ ॐ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिंꣳसीः ॥ १ ॥ निवर्तयामीतिकेशकुशक्षुरसंलग्नीकरणं ॥ ॐ निवर्तयाम्यायुषेन्नाद्यायप्प्रजननायरायस्पोषायसुप्प्रजास्त्वायसुवीर्याय ॥ १ ॥ छेदनेमंत्रः ॥ ॐ येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान् ॥ तेनब्रह्माणोवपतेदमस्यायुष्यंजरदष्टिर्यथासम् ॥ १ ॥ इत्यनेनमंत्रेणसकेशानिकुशतरुणानिप्रच्छिद्यानडुहेगोमयपिंडेप्रास्यत्युत्तरतः ॥ अग्नेरुत्तरतः गोमयपिंडस्यस्थापनमितिगदाधरः ॥ ततस्तस्मिन्नेवदक्षिणगोदानेएवमेवापरंवारद्वयंतूष्णींकर्तव्यं ॥ एकद्व्येकर्मावृत्तौसकृन्मंत्रवत्कर्मेतिकात्यायनः ॥ तत्प्रकारः ॥ उंदनं ॥ विनयनं ॥ त्रिकुशतरुणांतर्धानं ॥ संलग्नीकरणं ॥ छेदनं ॥ गोमयपिंडेप्रासनं ॥ एवमुक्तेनप्रकारेणपु

नरेकवारंकर्तव्यं ॥ पश्चिमगोदानेअप्येवमेवकर्मकरोति ॥ ॐ सवित्राप्रसू० ॥ १ ॥ इत्यनेनपश्चिमगोदानेउंदनं ॥ त्रेण्याशलल्याविनयनं ॥ ॐ ओषधेत्रायस्वेतित्रिकुशतरुणांतर्धानं ॥ ॐ शिवोनामेतिलोहक्षुरग्रहणं ॥ ॐ निवर्तयामीतिसंल्लग्नीकरणं ॥ छेदनेमंत्रविशेषः ॥ ॐ त्र्यायुषंजमदग्नेरिति ॥ गोमयपिंडेप्रासनं ॥ पुनःपश्चिमगोदानेएवमेवापरंवारद्वयंतूष्णींकर्तव्यं ॥ तत्प्रकारः ॥ उंदनं ॥ त्रिनयनं ॥ त्रिकुशतरुणांतर्धानं ॥ संल्लग्नीकरणं ॥ छेदनं ॥ गोमयपिंडेप्रासनं ॥ एवमुक्तेनप्रकारेण० ॥ अथोत्तरगोदाने ॥ ॐ सवित्राप्रसूताइतिमंत्रेणउंदनं ॥ त्र्येण्याशलल्याविनयनं ॥ ॐ ओषधेत्रायस्वेतित्रिकुशतरुणांतर्धानं ॥ शिवोनामेतिलोहक्षुरग्रहणं ॥ ॐ निवर्तयामीतिसंलग्नीकरणं ॥ छेदनेमंत्रविशेषः ॥ ॐ येनभूरिश्चरादिवंज्योक्पश्चाद्धिसूर्यम् ॥ येनतेवपामिब्रह्मणाजीवातवेजीवनायसुश्लोक्यायस्वस्तये ॥ १ ॥ इति

मंत्रेणछेदनंगोमयपिंडेप्रासनं ॥ पुनरुत्तरगोदानेएवमेवापरंउक्तप्रकारेणवारद्वयंतूष्णींकर्तव्यं ॥ उंदनं ॥ विनयनं ॥ त्रिकुशतरुणांतर्धानं ॥ संलग्नीकरणं ॥ छेदनं ॥ गोमयपिंडेप्रासनं ॥ ततस्त्रिःक्षुरेणशिरःप्रदक्षिणंपरिहरति ॥ ॐ यत्क्षुरेणमज्जायितासुपेशसावप्तावावपतिकेशाञ्छिन्धिशिरोमास्यायुःप्रमोषीः ॥ १ ॥ सकृन्मंत्रेणद्विस्तूष्णींशिरसःसमंतात्क्षुरभ्रामणं ॥ ततस्ताभिरद्भिःशिरःसमुंद्यनापितायक्षुरंप्रयच्छति ॥ ॐ अक्षण्वंपरिवपइतिमंत्रेण ॥ सचनापितउदङ्मुखस्थितस्यकुमारस्यप्राक्संस्थंप्राङ्मुखस्थितस्यउदक्संस्थंशिरोवपेत्॥यथामंगलंकेशशेषकरणमित्यस्यायमर्थः ॥ कुलव्यवस्थयाशिखास्थापनं ॥ केचित्पंचशिखाः ॥ केचिदेकशिखाः॥ यस्ययथाप्रसिद्धिस्तस्यतथाशिखास्थापनं ॥ यथा ॥ केशशेषंततःकुर्याद्यस्मिन्गोत्रेयथोचितं॥कुर्वन्त्यन्येशिखामात्रंमंगलार्थमिहक्वचित्॥कांबोजानांवसिष्ठानांदाक्षि

णेकारयेच्छिखां ॥ द्विभागेत्रिकश्यपानांमुंडाश्चभृगवोमताः ॥ पंचचूडाआंगिरस एकावाजसनेयिनामिति ॥ ततःसर्वान्केशान्गोमयपिंडेवस्त्रादिनावेष्ट्यअनुगुप्तंकृत्वागवांगोष्ठेस्थापयेत् ॥ अथवापल्वलस्योदकांतेउदकसमीपेस्थापयेत् ॥ पल्वलं तडागः ॥ ततश्चूडाकरणसंस्कारकर्त्तास्वाचार्यायवरंददाति ॥ वरंगोनिष्क्रयं ॥ स्मृत्युक्तान्दशसंख्याकान्ब्राह्मणान्भोजयिष्ये ॥ यांतुदेवेतिमातृणांविसर्जनं ॥ इति संस्कारभास्करेचूडाकरणं ॥ ॥ स्पृष्टास्पृष्टेशातातपः ॥बालस्याभ्युक्षणंप्रोक्तंशिशोराचमनंस्मृतं ॥ रजस्वलादिसंस्पर्शेस्नानमेवकुमारके ॥ १ ॥ याज्ञवल्क्यः ॥ चांडालादिषुसंस्पर्शेसचैलंस्नानमाचरेत् ॥ तोयेनिमज्जनंविनाशुद्धिर्नास्तीनिश्चयः ॥ ॥ २ ॥ ॥ इतिसंस्कार्यस्यस्पृष्टास्पृष्टविचारः ॥ ॥ अथकर्णवेधः ॥ सौवर्णीराजपुत्रस्यराजतीविप्रवैश्ययोः ॥ शूद्रस्यचायसीसूचीकर्संख्यासूर्यरंध्रयुक् ॥ १ ॥ कर्ण

रंध्रेरवेश्छायामप्रविशेदग्रजन्मनः ॥ स्त्रीणांयथेच्छंरंध्रंचकर्णाभरणधारणेइति॥ तच्चवर्षेतृतीयेपंचमेवाज्योतिःशास्त्रोक्तशुभमासेशुक्लपक्षेशुभदिनेशुभमुहूर्तेकार्यम् ॥कृतमंगलस्नानअहतेवाससीपरिधायधृतमंगलतिलकःशुभासनेप्राङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यकुमारस्यआयुरभिवृद्धिव्यवहारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंकर्णवेधंकरिष्ये ॥ तदंगत्वेननिर्विघ्नार्थंगणपतिपूजनंकरिष्ये इतिकृत्वा ॥ ततोगणेशसरस्वतींकुलदेवताब्रह्मविष्णुशिवान्नवग्रहांल्लोकपालान्ब्राह्मणांश्चनत्वाकुमारंप्राङ्मुखंशुभासनेउपवेश्य ॥ तद्धस्तेमधुरंदत्वा ॥ दक्षिणंकर्णमभिमंत्रयते ॥ ॐभद्रंकर्णेभिरितिमंत्रेण॥ततोवामकर्णमभिमंत्रयते॥ॐव॒क्षन्तीवेदागनीगन्ति॒कर्णंम्प्रि॒यꣳसखा॑यंपरि॒षस्वजा॒नाः॥योषे॑वशि॒ङ्क्तेवित॒ताधि॒धन्व॒ञ्ज्याऽइयꣳ

समंनेपारयन्ति॥ १॥ततःशिशोःकर्णवेधस्थलमारक्तरसेनांकयित्वायथाविभवंसुवर्णादिसूच्यामंगलसूत्रोपेतयाकुशलसुभगास्त्रियाकर्णंवेधयेत् ॥ कुमारस्यपूर्वंदक्षिणकर्णं ॥कुमार्यास्तुपूर्वंवामकर्णंवेधयेत् ॥ यथाशक्तिब्राह्मणान्भोजयेत् ॥ तेभ्यश्चदक्षिणांदत्वातैराशिषोगृहीत्वा॥ सुवासिन्यैचकुंकुमतांबूलादिदत्त्वागणपतिंविसृजेत् ॥ अथकर्णवेधनक्षत्रात्तृतीयनक्षत्रेकर्णक्षालनंउष्णोदकेनरोहणार्थंकार्यं ॥ रूढौचकर्णौयथाभरणधारणक्षमताभवतितथावर्धनीयौ॥पुंसःसूर्यरश्मिप्रवेशपर्यंतरंध्रंवर्धयेत् ॥ स्त्रीणांयथेच्छं ॥ इतिसंस्कारभास्करेकर्णवेधः ॥ ॥ जातकर्मादिचूडाकरणांतानिसंस्कारकर्माणिकुमार्यास्तुअमंत्रकाणिकार्याणि ॥ होमस्तुसमंत्रकः॥स्त्रीशूद्रयोस्तुगर्भाधानादिविवाहांतानवसंस्काराः ॥ तत्रापिशूद्रस्यकेवलपौराणविधिनाइतिहरिहरभाष्येनिर्दिष्टः ॥ यथा ॥ जातकर्मसमारभ्यस्त्रीणांचूडांतसर्वशः ॥ होमःसमंत्र

कःकार्यःसंस्कारस्तुअमंत्रकः ॥ १ ॥ इतिस्त्रीविषये ॥ शूद्रेतुप्रागुक्तं ॥ अथवर्धापनानिर्णयः ॥ तच्चवर्षपर्यंतंप्रतिमासेजन्मतिथौकार्यं ॥ तदनंतरंप्रत्यब्देजन्मतिथौकार्यं ॥ तिथिद्वैधेयत्रजन्मर्क्षयोगःसातिथिर्ग्राह्या ॥ दिनद्वयेजन्मर्क्षयोगसत्त्वासत्त्वयोरौदयिकीद्विमुहूर्ताधिकाग्राह्या ॥ द्विमुहूर्तन्यूनाचेत्पूर्वा ॥ जन्ममासेऽधिमाससत्त्वेशुद्धमासेकर्तव्यं ॥ नत्वधिके ॥ इदंवर्धापनंबाल्येपित्रादिनाकार्यं ॥ पश्चात्तुस्वयमेवेति ॥ ॥ अथप्रयोगः ॥ जन्मदिनेकुमारपत्नीसहितोयजमानःमंगलंस्नात्वाहतवाससीअलंकारांश्चपरिधायधृतमंगलतिलकोमातापित्रोर्गुर्वाचार्यकुलदेवताविप्रांश्चनमस्कृत्यगृहाभ्यंतरतःशुभासनेप्राङ्मुखउपविश्यस्वदक्षिणतःपत्नींतद्दक्षिणतःकुमारमुपवेश्यधृतपवित्रपाणिराचांतःप्राणानायम्यदेशकालकीर्तनांतेअस्यकुमारस्यदीर्घायुःश्रीतेजोवृद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंअद्यजन्मदिनेवर्धापनाख्यंकर्मक

करिष्ये ॥ स्वयंकरणेममचदीर्घायुस्तेजोवृद्धिद्वाराश्रीप० प्रीत्यर्थंअद्यमदीयजन्मदिनेवर्धापनाख्यंकर्मकरिष्ये ॥ इतिसंकल्पः ॥ तत्रनिर्विघ्नार्थंगणपतिपूजनं स्वस्तिपुण्याहवाचनंचकरिष्येइतिकृत्वा ॥ ततःश्रीपर्ण्यादिपीठेपंक्तिरूपेणाक्षतपुंजेषुदेवताआवाहयेत् ॥ तद्यथा ॥ ॐ गणपतये तये० [illegible]णपतिंआवाह० एवंसर्वत्र ॥ ॐ दुर्गायै० ॥ ॐ कुलदेवतायै० ॥ ॐ पत्ना[illegible] ॐ विष्णवे० ॥ ॐ महेश्वराय० ॥ ॐ सूर्याय० ॥ ॐ सो[illegible] ॥ ॐ भौमाय [illegible] ॥ ॐ बुधायन० ॥ ॐ बृहस्पतयेन० ॥ ॐ शुक्राय ॥ ॐ [illegible] ॥ ॐ कालाय० ॥ ॐ युगाय० ॥ ॐ [illegible] ॐ मासायन० ॥ ॐ पक्षाय० ॥ ॐ न[illegible] ॥ योगाय० ॥ जॅम्म कर रसायन० ॥ ॐ जन्म[illegible]

वायै०॥ॐसंभूत्यै०॥ॐप्रीत्यैन०॥ॐ[illegible]तत्यै०॥ॐ [illegible] नायैन०॥[illegible]
उपविष्टायै० ॥ ॐ भद्रायैन० ॥ [illegible] ०॥
पूगीफलेदेवताआवाहयेत् ॥ ॐ [illegible]
पुनस्तदग्रेपंक्तिरूपे[illegible] ह्यामि ॥ ए
वंसर्वत्र ॥ ॐ [illegible]ये० ॥ ॐ [illegible] चार्याय०
॥ ॐ परशुरामाय० ॥ ॐ [illegible] ॥ ॐ इष्टदे
वतायै० ॥ ॐ स्थानदे[illegible] ॥ ॐ [illegible]य० ॥ ॐपृथि
व्यै० ॥ ॐअद्भ्यः० ॥ [illegible] ॥ ॐवायवे० [illegible]ये० [illegible] ॥ सर्वासांसमं
तात्प्रागादिदिक्षुवापे[illegible] ॐइद्राय० ॥ ॐ अग्नये० ॥ ॐ यमाय० ॥ ॐ नि
ऋंतये० ॥ ॐ वरुणाय० ॥ ॐ वायवे० ॥ ॐ कुबराय० ॥ ॐ ईशानाय० ॥ ॐ

ब्रह्मणे० ॥ ॐ अनंता० ॥ इत्यावाह्य ॥ मनोजूतिरितिप्रतिष्ठाप्य॥आवोदेवेतिमंत्रेण षोडशोपचारैःसंपूज्य ॥ ॐ आवोदेवाऽसईमहेवामम्प्रंयत्युध्वरे॥आवोदेवासऽ आशिषोयज्ञियासोहवामहे ॥ १ ॥ इतिमंत्रेण ॥ ॐ भूर्भुवःस्वःमार्कंडेयाद्यावाहितदेवताभ्योनमःइत्यावाहनादिषोडशोपचारसमर्पणं ॥ षष्ठ्यैदधिभक्तनैवेद्यं ॥ अन्येभ्यःपायसादि ॥ प्रार्थना ॥ जयदेविजगन्मातर्जगदानंदकारिणि ॥ [illegible] कल्याणिनमस्तेषष्ठिदेवते ॥ १ ॥ आयुःप्रदमहा[illegible] निधिश्रेष्ठमार्कंडेयनमोस्तुते ॥ १ ॥ चिरंजी[illegible] पवान्वित्तवानायुःश्रियायुक्तंचमांकुरु ॥ २ ॥ [illegible] ति ॥ मार्कंडेयनमस्तेस्तुसप्तकल्पांतजीवन [illegible]

॥ १ ॥ व[illegible]आयुरारोग्यंबालायदे[illegible]भ[illegible]हति ॥ चिरंजीवीयथात्वं
भोमुनीनांप्रवरोद्विज ॥ कुरुष्वमुनिशार्दूलतथामांचिरजीविनं ॥ १ ॥ कर्तापिताचेत ॥
बालंमेचिरजीविनमिति ॥ जमदग्नेमहाभागमहातेजोमयेज्वर[illegible] आयुरारोग्यवि
द्धयर्थमस्माकंवरदोभव ॥ १ ॥ कर्तापिताचेतबालस्य[illegible] ॥ त्रैलोक्ये[illegible]यानिभूतानि
स्थावराणिचराणिच ॥ ब्रह्मविष्णुशिवैःसा[illegible]तानिमे ॥ [illegible] ॥ प्रीयंतांदेव
ताःसर्वाःपूजांगृण्हंतुतामम ॥ प्रयच्छंत्वायुरारो[illegible]संपदं[illegible] ॥ २ ॥ मं
त्रन्यूनंक्रियान्यूनंद्रव्यन्यूनंमहामुने ॥ यदर्चितंमयादेवपरिपूर्णंतदस्तुमे ॥ ३ ॥ अ
नयापूजयामार्कंडेयाद्यावाहितदेवताःप्रीयंतां ॥ ततःपायसेनसर्वेभ्योभूतेभ्योनमइ
तिबलिंदद्यात् ॥ क्वचित्स्थंडिलेपंचभूसंस्कारपूर्वकंलौकिकाग्निंप्रतिष्ठाप्य ॥ ब्रह्मोप
वेशनाद्याज्यभागांतंकृत्वा ॥ ततोघृताक्ततिलैर्नाममंत्रेणषष्ठीदेवीमार्कंडेयजमदग्नी

नांप्रीत्यर्थंअष्टाष्टसंख्ययाअन्वाहितदेवतानामेकैकयाहुत्यामहाव्याहृत्याष्टाविंशतिसंख्ययाचजुहुयात् ॥ शेषेणास्विष्टकृत् ॥ ततोभूराद्यानवाहुतयआज्येन ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ दानानिदद्यात् ॥ तत्रादौसुवर्णयुक्ततिलपात्रदानं ॥ तिलाःकाश्यपसंभूतास्तिलाःपापहराःस्मृताः ॥ तिलकांचनदानेनदीर्घायुष्यंददातुमे ॥ १ ॥ इदंतिलपात्रंसदक्षिणाकंदीर्घायुष्यप्राप्तिकामनयामार्कंडेयाद्यावाहितदेवताप्रीत्यर्थंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ घृतपात्रदानं ॥ आज्यंतैजससमुद्दिष्टंआज्यंयज्ञेप्रतिष्ठितं ॥ आज्यपात्रप्रदानेनदीर्घायुष्यंकुरुष्वमे ॥ १ ॥ इदंआज्यपात्रंसदक्षिणाकंदीर्घायुःश्रीप्राप्तिकामनयाश्रीमार्कंडेयाद्यावाहितदेवताप्रीत्यर्थंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ गोदानमपिदद्यात्॥ततस्तिलशर्करायुतंपयःपिबेत्॥तत्रमंत्रः॥सतिलंशर्करामिश्रमंजल्यर्धमितंपयः ॥

मार्कंडेयाद्बलंलब्ध्वापिबाम्यायुर्विवृद्धये ॥ २ ॥ इतिमंत्रेणपिबेत् ॥ ब्राह्मणेभ्योगंधादिभिःसंपूज्यतेभ्यश्चदक्षिणांदत्वातैराशिषोगृहीत्वाआवाहितदेवताआग्निंचविसृज्य ॥ यथाशक्तिब्राह्मणान्भोजयित्वा ॥ यस्यस्मृत्येतिनत्वा ॥ सुहृद्बंधुभिःसहस्वयंभुंजीतेति ॥ ग्रंथांतरेतुमातुरेवसुवासिन्याश्चहरिद्राकुंकुमपुष्पतांबूलादिभिःसंपूज्यताभ्यांचनीराज्यअनंतरंअक्षतपुंजेषुकुमुदांषष्ठींदेवींजन्मर्क्षदेवतांकुलदेवतांचसंपूज्यब्राह्मणान्संपूज्यतेभ्यश्चापूपपूरिकापायसयुक्तानिकुमुदादिदेवताप्रीतयेपुत्रायुर्विवर्धनार्थंयथाशक्तिवायनानिदद्यात्॥ तेभ्यश्चदक्षिणांदत्वातैराशिषोगृहीत्वा॥सुवासिन्यैशिशवेचभोजनंदत्वादेवतांविसृज्ययस्यस्मृत्येतिनमेत्॥इतिवर्धापनप्रयोगः॥

अथाक्षरलेखनारंभनिर्णयः ॥ मार्कंडेयः ॥ पंचमेसप्तमेवाब्देपूर्वस्यान्मौंजिबंधनात् ॥ तत्रचैवाक्षरारंभःकर्तव्यस्तुशुभेदिनेइति ॥ पंचमेसप्तमेवावर्षेअक्षरलेखनारंभ

उत्तरायणेकार्यः ॥ अत्रकुंभस्थःसूर्योवर्ज्यः ॥ शुक्लपक्षःशुभःप्रोक्तःकृष्णश्चांत्यत्रिकंविना ॥ द्वितीयातृतीयापंचमीदशम्येकादशीद्वादशीत्रयोदश्यःश्रेष्ठाः ॥ अश्विनीमृगार्द्रापुनर्वसुपुष्यहस्तचित्रास्वात्यनुराधाश्रवणधनिष्ठाशततारकारेवत्योभौमशनिभिन्नवाराश्चशुभाः ॥ तत्रायंक्रमः ॥ संपूजयेद्गणाधीशंतथैवचसरस्वतीं ॥ कुलदेवींततश्चैवपूजयेच्चबृहस्पतिम् ॥ नारायणंमहालक्ष्मींगंधधूपादिभिस्तथा ॥ स्वविद्यासूत्रकारांश्चस्वविद्यांचविशेषतः ॥ एतेषामेवदेवानांनाममंत्रेणपूजनं ॥ कृत्वाहोमंस्वशाखोक्तंआघारांतंसमाचरेत् ॥ पूर्वोक्तदेवतानांचनाम्नातुजुहुयाद्घृतं ॥ प्राङ्मुखोगुरुरासीनःपश्चिमाभिमुखंशिशुं ॥ कुर्यादक्षरसंस्कारलेखनंवाचनादिकं ॥ राजत्यांपाटिकायांवैप्रसार्यकुंकुमादिकं ॥ सुवर्णलेखनीयेनलिखेत्तत्राक्षराणिवै ॥ नमोगणेशायतथासरस्वत्यैनमस्तथा ॥ नमःकुलदेवतायैश्रीगुरुभ्योनमस्त

था ॥ लक्ष्मीनारायणाभ्यांचलिखित्वापंचनामभिः ॥ ॐ नमःसिद्धमित्यादिलेखयित्वाअनुक्रमात् ॥ एवंलिखित्वाआचार्यः शिशुहस्तेनपूजयेत् ॥ तथैवतेनसंलेख्यपुनस्त्रिर्वाचयेत्ततः ॥ आचार्यंपूजयेत्पश्चाद्वस्त्रालंकारभूषणैः ॥ त्रिभिःप्रदक्षिणाकार्यादेवताश्चाथवैगुरुं ॥ ब्राह्मणान्पूजयेत् भक्त्यागंधपुष्पाक्षतादिभिः॥ तोषयेद्दक्षिणादिभिराशिषंपरिगृह्यच ॥ नीराजनंततःकुर्यात्सुवासिन्याःकरेणच ॥ उष्णीषंगुरवेदद्याद्देवताग्निंविसर्जयेदिति ॥ अथप्रयोगः ॥ तत्रपंचमेवर्षेज्योतिःशास्त्रोक्तउदगयनेगुरुशुक्रास्तरहितेशुभमासेशुक्लपक्षेशुभदिनेसुमुहूर्तेयजमानःशिशुनासहमंगलंस्नात्वाऽहतेवाससीपरिधायालंकृत्यधृतमंगलतिलकःशुभासनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्याशिशोःलेखनवाचनादिविपुलविद्याज्ञानप्राप्तयेविद्यारंभंकरिष्ये॥तत्रनिर्विघ्नार्थंगणपतिपूजनंकरिष्येइतिकृत्वा ॥ ततस्तंदुला

ष्टदलेगणेशंसरस्वतींकुलदेवतांगुरुंलक्ष्मींनारायणंचावाह्यअक्षतपुंजेषुपंक्तिरूपेणनारदंपाणिनिंपतंजलिंसांख्यंकात्यायनंपारस्करंयास्कंकपिंजलंगोभिलंजैमिनिंविश्वकर्माणंआचार्यंव्यासंचावाह्य ॥ सविद्यासूत्रंव्याकरणंभाष्यादिकंचसंस्थाप्य ॥ नाममंत्रेणषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ सर्वविद्येत्वमाधारःस्मृतिज्ञानप्रदायक ॥ प्रसन्नवरदोभूत्वादेहिविद्यांस्मृतिंयशइति ॥ अनयापूजयाआवाहितदेवताःप्रीयंतां॥ ततःस्थंडिलेपंचभूसंस्कारपूर्वकंलौकिकाग्निंप्रतिष्ठाप्यसंपूज्य ॥ ततोदक्षिणतोब्रह्मासनाद्याज्यभागांतंकृत्वा ॥ आज्येनावाहितदेवतानामष्टाऽष्टसंख्याहुतीर्हुत्वा ॥ ततोमहाव्याहृत्यादिस्विष्टकृदंतादशाहुतयः ॥ ततःसंस्रवप्राशनं ॥ पवित्राभ्यांमार्जनं॥ अग्नौपवित्रप्रतिपत्तिः ॥ ब्रह्मणेपूर्णपात्रदानं ॥ प्रणीताविमोकः ॥ आपःशिवेतिमंत्रेणविमोकजलेनमूर्धानमभिषिंचयेत्एवंहोमशेषंसमाप्य ॥ ततोबालकआवाहितदे

वताअध्यापनगुरुंचनमस्कृत्य ॥ अध्यापनगुरोः समीपेप्रत्यङ्मुखमुपविश्यरजतादिपाटिकायांकुंकुमादिकंप्रसार्यतदुपरिसुवर्णशलाकयाश्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीकुलदेवतायैनमः ॥ श्रीगुरुभ्योनमः ॥ श्रीलक्ष्मीनारायणाभ्यांनमः ॥ ॐ नमःसिद्धं ॥ इत्यादिलेख्य ॥ पूजनमंत्रः ॥ ॐपा॒व॒कान॒ःस॒र॑स्वती॒वाजे॑भिर्वा॒जिनी॑वती ॥ य॒ज्ञम्व॑ष्टुधि॒याव॑सुः ॥ १ ॥ ॐ लिखितसरस्वत्यैनमः ॥ इतिमंत्रेण शोडशोपचारैःसंपूजयेत् ॥ गुरुःकुमारहस्तात्त्रिवारंलेखनवाचनादिकंकारयेत् ॥ अनंतरंकुमारःदेवताक्षरंगुरुंचत्रिः प्रदक्षिणीकृत्यगुरुंसंपूज्यतस्मैचोष्णीषंसमर्प्यनमस्कृत्य । आचार्यंगंधादिभिःसंपूज्यतस्मैअन्यब्राह्मणेभ्यश्चदक्षिणांदत्वातैराशिषोगृहीत्वा । सुवासिन्याकुमारंनीराज्य । देवताग्निंविसृज्य । अन्येभ्यस्तांबूलादिकंप्र

दापयेत् ॥ इतिसं० भा० विद्यारंभविधिः ॥ ॥ अथोपनयनमुच्यते ॥ ॥ तत्रकालः ॥ सूत्रं ॥ अष्टवर्षंब्राह्मणमुपनयेत् ॥ गर्भाष्टमेवावर्षेंब्राह्मणमुपनयेत् ॥ एकादशवर्षेराजन्यमुपनयेत् ॥ द्वादशवर्षेवैश्यमुपनयेत् ॥ अत्रापिकालावधिश्च ॥ आषोडशाद्वर्षाद्ब्राह्मणस्यानतीतःकालोभवत्याद्वाविंशाद्राजन्यस्याचतुर्विंशाद्वैश्यस्येति ॥ यथामंगलंवासर्वेषामुपनयनंकार्यं ॥ यथामंगलशब्देनस्मृत्यंतरोक्तंपंचवर्षादिकालाभिधानं ॥ कैश्चित्तु ॥ उपनयनशब्देनोपनयनमेवाभिधीयतेतदयुक्तं ॥ उपनयनविषयंप्रयोजकव्यापारस्योपनायनशब्दवाच्यत्वात्लक्षणायांमानाभावादितिहेमाद्रिः ॥ अन्येतुआचार्यसमीपनयनांगकंगायत्र्युपदेशप्रदानं॥गायत्र्याब्राह्मणमसृजदितिश्रुतौगायत्र्याब्राह्मणमुपनयीतेतिकात्यायनस्मृतौचोपनयनस्यगायत्र्युपदेशांगत्वदर्शनात्॥एवंचोपनयनपदंयोगरूढंसमिद्दर्शादिपदस्येवांगवाचिनोप्यु

पनयनपदस्यतत्संबंधेनप्रधानसंज्ञात्वोपपत्तेरित्याहुः ॥ परेतुपंकजपदस्येवएकत्रयौगिकस्यरूढस्यचयोगरूढपदवाच्यत्वात् ॥ अत्रतूपनयनेयोगस्यगायत्र्युपदेशेचरूढेश्चसद्भावेनैकत्रविद्यमानत्वाभावान्नयोगरूढत्वमुपनयनपदस्यतेनसमीपनयनस्यैवप्रधानत्वादित्याहुर्गृह्यमितिसंस्काररत्नमालायां ॥ वसंतेब्राह्मणंग्रीष्मेराजन्यंशरदिवैश्यमिति ॥ माघादिपंचमासेषुमेखलाबंधनंशिशोः ॥ ज्येष्ठमासेविशेषेणसर्वज्येष्ठस्यवर्जयेत् ॥ ज्येष्ठमासेनज्येष्ठस्यजन्ममासेनसर्वशः ॥ इतिस्मृत्यंतरे ॥ वृत्तशते ॥ नजन्मधिष्ण्येनचजन्ममासेनजन्मकालीयदिनेविदध्यात् ॥ज्येष्ठेनमासिप्रथमस्यसूनोस्तथासुतायाअपिमंगलानि ॥ १ ॥ संग्रहे ॥ मिथुनेसंस्थितेभानौज्येष्ठमासोनदोषकृत् ॥ राजमार्तंडे ॥ जातंदिनंदूषयतेवसिष्ठोह्यष्टौचगर्गोनियतंदशात्रिः ॥ जातस्यपक्षंकिलभागुरिश्चशेषाःप्रशस्ताःखलुजन्ममासे ॥ जन्ममासेतिथौ

भेचविपरीतदलेसति ॥ कार्यंमंगलमित्याहुर्गर्गभार्गवशौनकाः ॥ संग्रहे ॥ जन्ममासेनिषिद्धेपिदिनानिदशवर्जयेत्॥ आरभ्यजन्मदिवसाच्छुभाःस्युस्तिथयोपराः॥ जन्ममासेचजन्मर्क्षेनजन्मदिवसेपिच ॥ आद्यगर्भसुतस्याथदुहितुर्वाकरग्रहः इति॥ करग्रहोविवाहः ॥ इतिरत्नमालायां ॥ तच्चोदगयनेज्योतिःशास्त्रोक्तशुभमासेशुक्लपक्षेगुरुशुक्रास्तबाल्यवार्धक्यादिदोषरहितेप्रदोषानध्यायादितिथिरहितेदुष्टवासरर्क्षदुर्योगादिदोषरहितेशुभेदिनेसुलग्नेसुमुहूर्तेकार्यं॥ अथतिथ्यादि ॥ ज्योतिर्निबंधेनृसिंहः॥ तृतीयापंचमीषष्ठीद्वितीयावापिसप्तमी ॥ पक्षयोरुभयोश्चैवविशेषेणसुपूजिताः ॥ धर्मौकामौसितेपक्षेकृष्णेचप्रथमातथा ॥ कृष्णेत्रयोदशींकेचिदिच्छंतिमुनयस्तथा॥ द्वादश्यैकादशीचैवमध्यमेचप्रचक्षतइति ॥ धर्मौदशमी ॥ कामौत्रयोदशी ॥ सितेशुक्लेपक्षेधर्मकामौग्राह्यौ ॥ कृष्णेचेत्यत्रचकारःसितेपक्षेइत्यस्यानुकर्षणार्थः ॥ तेन

शुक्लप्रतिपदोपिग्रहणं ॥ केचिदाचार्याःकृष्णपक्षांतर्वर्तिनीमप्युपनयनेस्वीकुर्वंति॥ मध्यमेचेत्यत्रपक्षद्वयइतिज्ञेयम् ॥ टोडरानन्देवसिष्ठः ॥ नैमित्तिकमनध्यायंकृष्णेचप्रतिपद्दिनं ॥ मेखलाबंधनेशस्तंचौलेवेदव्रतेषुचेति ॥ अयंचप्रतिपद्दिनाविधिर्नैमित्तिकानध्यायविधिश्चातीतकालस्यार्तस्यबटोरुपनयनविषयः ॥ प्रशस्ताप्रतिपत्कृष्णेकदाचिच्छुभगेविधौ ॥चंद्रेबलयुतेलग्नेवर्षाणामतिलंघनमितिव्यासोक्तेः॥ एवंचंद्रेबलयुतेलग्नाच्छुभभावेशुभेक्षिते ॥ चतुर्दशींप्रशंसंतिकुमारेवयसाधिकइति॥चतुर्दशीविधिरपि ॥ स्वाध्यायवियुजोघस्राःकृष्णप्रतिपदादयः॥प्रायश्चित्तनिमित्तेतुमेखलाबंधनेमताइतिकालादर्शादिधृतवृद्धगार्ग्यवचनात्सर्वेषांनैमित्तिकानध्यायानांकृष्णप्रतिपदादिनित्यानध्यायानांचप्रायश्चित्तोपनयनपरतैवनापूर्वोपनयनपरता ॥ वियुजोविषमाघस्राःदिनानि ॥ स्वाध्यायवियुजोदिवसास्तृतीयापंचमीसप्तमीनवम्येका

दशीत्रयोदश्यंताःप्रायश्चित्तोपनयनेउपयुज्यंतइत्यर्थः ॥अमावास्यात्वत्रापिनिषिद्धेव॥ अमावास्यातुसर्वत्रनिंदिताशुभकर्मणीतिवचनात् ॥अपरार्के॥ नष्टेचंद्रेष्टमेशुक्रे निरंशेभास्करेतथा ॥ कर्तव्यंनोपनयनंनानध्यायेगलग्रहइति॥निरंशस्वरूपंज्योतिर्निबंधे ॥ राशेःप्रथमभागस्थोनिरंशःसूर्यंउच्यतइति ॥ अत्रिः ॥ पराजितेतिनीचस्थे नीचेशुक्रेगुरौतथा ॥ व्रतिनंयदिकुर्वीतसभवेद्वेदवर्जितइतिराजमार्तंडः॥नष्टेशुक्रेतथा जीवेनिरंशेचैवभास्करे ॥ उपनीतस्यशिष्यस्यजडत्वंमृत्युरेवचेति ॥ युगादिदिनानध्यायानामपिप्रतिप्रसवमाह ॥ भरद्वाजः ॥ याचैत्रवैशाखसितातृतीयामाघस्य सप्तम्यथफाल्गुनस्य ॥ कृष्णेद्वितीयोपनयेप्रशस्ताप्रोक्ताभरद्वाजमुनींद्रमुख्यैरिति॥ अत्रचैत्रसिततृतीयामाघशुक्लसप्तम्योर्मन्वाद्योःप्रतिप्रसवः ॥ मन्वादिषुतयोःस्मृत्यर्थसारेपाठात् ॥ वैशाखतृतीयायुगादेरपि ॥ मुहूर्ततत्वे ॥ त्रयोदश्यादिचतुष्कंसप्त

म्यादित्रयंचतुर्थींचअष्टौगलग्रहास्त्याज्यागर्गस्यमतेतथाषष्ठीति ॥ अत्राप्यपवादः ॥ षष्ठीसप्तमीत्रयोदशीनांविनियोगोपन्यासेनदर्शितः ॥ अयंगलग्रहापवादोमूकाद्युपनयनविषयइतिकेचित् ॥ स्मृत्यंतरे ॥ अनध्यायस्यपूर्वेद्युरनध्यायात्परेहनि ॥ व्रतारंभंविसर्गंचविद्यारंभंचवर्जयेदिति ॥ एतदपवादोद्वितीयासप्तमीत्रयोदशीनांविनियोगोपन्यासेनदर्शितः ॥ स्मृतिसारे ॥ सोपपदासूपनीतःपुनःसंस्कारमर्हतीति ॥ अयंचनिषेधोयजुर्वेदिनांनभवति ॥ वेदव्रतोपनयनेस्वाध्यायाध्ययनेतथा ॥ नदोषोयजुषांसोपपदास्वध्यापनेपिचेतिस्मृतिदर्पणेस्मृत्यंतरोक्तेरितिकेचित् ॥ महानिबंधेष्वदर्शनादिदंनिर्मूलंतेनतेषामपिनिषेधोस्त्येवेत्यन्ये ॥ ताश्चोक्तास्तत्रैव ॥ ज्येष्ठशुक्लद्वितीयातुआश्विनेदशमीसिता ॥ चतुर्थीद्वादशीमाघेएताःसोपपदास्मृताइति ॥ चतुर्थीद्वादशीमाघइत्यत्रासितेत्यनुषज्यते ॥ वासरानाहनारदः ॥ गुरुशुक्रबुधानांतुवाराः

श्रेष्ठतमाःस्मृताः ॥ अधमःसोमवारस्तुसूर्यवारस्तुमध्यमः ॥ वारौमंदारयोर्वर्ज्यौकृष्णेवर्ज्योनिशापतेः ॥ अस्तंगतस्यसौम्यस्यवारोवर्ज्योद्विजन्मनामिति ॥ मंदःशनिः आरोभौमः ॥ निशापतिश्चंद्रः ॥ सौम्योबुधः ॥ तथा ॥ सर्वेषांजीवशुक्रज्ञवाराः प्रोक्ताव्रतेशुभाः ॥ चंद्रार्कौमध्यमौज्ञेयौसोमबाहुजयोः कुजः ॥ शाखाधिपतिवारश्चशाखाधिपबलंतथा ॥ शाखाधिपतिलग्नंचदुर्लभंत्रितयंव्रतेइति ॥ गुरुशुक्रौभौमबुधावृग्वेदाद्यधिपाः स्मृताः ॥ सर्वेषांब्राह्मणादीनां ॥ जीवोबृहस्पतिः ॥ ज्ञोबुधः ॥ बाहुजः क्षत्रियः ॥ बलंगोचराष्टवर्गादि ॥ शाखाधिपबलासंभवेदोषमप्याहमदनरत्नेवृद्धगार्ग्यः ॥ शाखाधिपेबलिनिकेंन्द्रगतेचमौंजीबंधस्तदीयदिवसेषुशुभायक्लृप्तः ॥ अस्मिन्बलेनरहितेतुपुनर्द्विजानांस्याद्वर्णसंकरइतिप्रवदंतितज्ज्ञाइति ॥ तथा ॥ वर्णाधिपबलमप्यपेक्षते ॥ सदानुकूलेचैकस्मिन्वर्णेशेबलशालिनि ॥ ब्राह्मणा

देः प्रकुर्वीतकुमारंव्रतचारणमितिपराशरोक्तेः ॥ पतीसितेज्यौविप्राणांनृपाणांकुजभास्करौ ॥ वैश्यानांशशभृत्सौम्याविति वर्णाधिपाःस्मृताइतितेनैवव्यवस्थाप्रदर्शनाच्च ॥ मदनरत्नेराजमार्तंडः ॥ पितुःसूर्यबलंश्रेष्ठंशाखावर्णेशयोर्बटोः ॥ सर्वेषांगुरुचंद्रर्क्षबलंश्रेष्ठंव्रतादिषु ॥ मौंजीबंधेविवाहेचप्रतिष्ठायांविशेषतइति ॥ सर्वेषामित्यनेनयेषांनशाखाधिपोगुरुस्तेषामपिबहूनांतत्पितॄणांचगुरुबलमावश्यकं ॥ उभयोरलाभेबटोरावश्यकमितिध्वन्यते ॥ संकटेचंद्रताराद्यभावेप्यधिकारार्थदानमुक्तं ज्योतिर्निबंधे ॥ चंद्रेचशंखंलवणंचवारेदिनेविरुद्धेत्वथतंडुलांश्च ॥ धान्यंचदद्यात्करणेतथाभेयोगेविरुद्धेकनकंचदेयमिति ॥ दिनेतिथौ ॥ नित्यकालेबटोर्गुरुबलालाभेशांत्यातत्कालः ॥ अनित्यकालेनैवमित्याहनारदः ॥ बालस्यबलहीनोपिशांत्याजीवोबलप्रदः ॥ यथोक्तवत्सरेकार्यमनुक्तेनोपनायनमिति ॥ केषुचिद्दुष्टस्थानेषुस्थि

तेतु गुरौशांत्यापिनोपनयनाधिकारइत्याहवसिष्ठः ॥ बंधौतृतीयेरिपुराशिसंस्थइच्छंतिपूजांजनिगेव्ययस्थे ॥ पुरातनाअष्टमगेपिसूरौशांत्यापिनैवोपनयाधिकारइति ॥ बंधुश्चतुर्थः ॥ रिपुराशिःषः ॥ जनिर्जन्मराशिः ॥व्ययोद्वादशराशिः ॥ अतिसंकटेएतेष्वपिराशिषुपूजाहोमादेर्द्विगुणत्वादिवृद्धिकल्पनयोपनयनंकार्यमेव नतत्कृतसंवत्सरातिक्रमःकार्यः ॥तस्माद्ग्रहेभ्यःकालत्वाद्बलीसंवत्सरोमतइतिवचनात् ॥ राशिविशेषस्थस्यगुरोरष्टमादिस्थानस्थितस्यापिनाधिकारप्रतिबंधकत्वमित्याहभरद्वाजः ॥धनुर्मीनकुलीरस्थोजीवोजन्मांत्यमृत्युगः ॥अतिसौख्यंबटोःकुर्याद्वसिष्ठवचनंयथेति ॥ कुलीरःकर्कःसचगुरोरुच्चस्थानं॥यथाहुर्दैवज्ञाः ॥ अजवृषभमृगांगनाकुलीराझषवणिजौचादिवाकरादितुंगाइति ॥ अजोमेषः ॥ वृषभःप्रसिद्धोराशिः ॥ मृगोमकरः ॥ अंगनाकन्या ॥ कुलीरःकर्कः ॥ झषोमीनः ॥ वणिक्तुला ॥

दिवाकरादीनांसप्तानांग्रहाणांक्रमेणमेषादीनिसप्तोच्चस्थानानीत्यर्थः ॥ राजमार्तंडः ॥ व्रतेजन्मत्रिकारिस्थोजीवोपीष्टोर्चनात्सकृत्त ॥ शुभोतिकालेतुर्याष्ट॰व्ययस्थोद्विगुणार्चनादिति ॥ द्विपंचसप्तनवैकादशस्थोगुरुः शुभफलप्रदः ॥ जन्मतृतीयषष्ठदशमस्थानेषुपूजाहोमात्मकशांत्याशुभः ॥ चतुर्थाष्टमद्वादशस्थानेषुदुष्टफलः ॥ कर्कधनुर्मीनराशिषुचतुर्थादिस्थानेपिनदोषः ॥ अतिसंकटेचतुर्थद्वादशस्थोद्विगुणपूजाहोमादिनाशुभः ॥ अष्टमस्तुत्रिगुणपूजाहोमादिनाशुभः ॥ केचिदनिष्टोवामवेधेशुभइत्याहुस्तन्नेतिराजमार्तंडः ॥ अष्टमवर्षादिमुख्यकालेगुरुबलाभावेपिमीनगतरवियुतचैत्रेवाशांत्याव्रतबंधः कार्योनतुमुख्यकालातिक्रमः ॥ नित्यकालस्यबलीयस्त्वात्इतिधर्मसिंधौ ॥ नक्षत्राण्याहनारदः ॥ श्रेष्ठान्यर्कत्रयांत्येज्यचंद्रादित्युत्तराणिच ॥ विष्णुत्रयाश्विमित्राब्जयोनिभान्युपनायनेइति ॥ अर्कत्रयंहस्ताचित्रास्वातयः॥

अंत्यंरेवती ॥ ईज्यःतिष्यः ॥ चंद्रोमृगशिरः ॥ अदितिःपुनर्वसुः ॥ उत्तराशब्देनउत्तरात्रयं ॥ विष्णुत्रयंश्रवणधनिष्ठाशतभिषजः ॥ अश्विनौअश्विनी ॥ मित्रोनुराधा ॥ अब्जयोनिभंरोहिणीनक्षत्रं ॥ बृहस्पतिः ॥ त्रिषूत्तरेषुरोहिण्यांहस्तेमैत्रेचवासवे ॥ त्वाष्ट्रेसौम्यपुनर्वस्वोरुत्तमंह्युपनायनमिति ॥ वेदविशेषेणनक्षत्रविशेषविधिर्ज्योतिर्निबंधे ॥ मूलेहस्तत्रयेसार्पेशैवेपूर्वात्रयेतथा ॥ ऋग्वेदाध्यायिनांशस्तंमेखलाबंधनंबुधैः ॥ पुष्येपुनर्वसौपौष्णेहस्तेमैत्रेशशांकभे ॥ ध्रुवेषुचप्रशस्तंस्याद्यजुषांमौंजिबंधनं ॥ पुष्यवासवहस्ताश्विशिवविष्णूत्तरात्रयं ॥ प्रशस्तंमेखलाबंधेबहूनांसामवेदिनां ॥ मृगमैत्राश्विनीहस्तरेवत्यदितिवासवं ॥ अथर्ववेदिनांशस्तोभगणोयंव्रतार्पणेइति ॥ सार्पंआश्लेषा ॥ शैवंआर्द्रा ॥ पौष्णंरेवती ॥ मैत्रंअनुराधा ॥ शशांकभंमृगशिरः ॥ ध्रुवाणिउत्तरात्रयंरोहिणीच ॥ वासवंज्येष्ठा अश्विनौअश्विनी ॥ शिव

आर्द्रा ॥ विष्णुःश्रवणं ॥ अदितिःपुनर्वसुः ॥ एषामसंभवेसारसमुच्चये ॥ मघाग्नेयविशाखैंद्रयाम्यंहित्वाचवारुणं ॥ व्रतेशस्तानिसर्वेषांचेद्वेदोक्तंनलभ्यतइति ॥ आग्नेयंकृत्तिका ॥ ऐंद्रंज्येष्ठा ॥ याम्यंभरणी ॥ वारुणंशततारका ॥ तत्रापिपुन्नक्षत्राण्यतिप्रशस्तानि ॥ विशेषेणपुन्नामधेयइतिगृह्योक्तेः ॥ तानितुप्रागेवोक्तानि ॥ यस्तु ॥ ताराचंद्रानुकूलेषुग्रहाब्देषुशुभेष्वपि ॥ पुनर्वसौचोपनीतःपुनःसंस्कारमर्हतीतिराजमार्तंडवचनेपुनर्वसुनिषेधःसज्योतिर्विदप्रसिद्धवासिष्ठादिसंहितास्वदर्शनात् ॥ हेमाद्र्यादिमहानिबंधेषुपुनर्वसुविधेरेवप्रतीतेःदाक्षिणात्यसकलशिष्टानांपुनर्बसावुपनयनानुष्ठानाचरणस्योपलंभाच्चनिर्मूलः ॥ समूलत्वेपिनयजुर्वेद्यथर्ववेदिविषयः अनंतरेदाहृतज्योतिर्निबंधवचनेयजुर्वेद्यथर्ववेदिनांतस्याविहितत्वात् ॥ योगेषुव्यवस्थामाहश्रीपतिः ॥ सवैधृतिस्तुव्यतिपातनामासर्वोप्यनिष्टःपरिघस्यचार्धं ॥ तिस्रस्तुयोगेप्रथ

मे सवज्रेव्याघातसंज्ञेनवपंचशूले ॥ गंडेतिगंडेचषडेवनाड्यःशुभेषुकार्येषुविवर्जनीयाइति ॥ प्रथमोयोगोविष्कंभः ॥ उक्तानन्याविषयेत्वाहबृहस्पतिः ॥ शिष्टाष्टादशयोगेषुप्रशस्तमुपनायनमिति ॥ करणव्यवस्थापितेनैवोक्ता ॥ बवादीनांतुषट्कंस्यादुपनायेसुपूजितं ॥ शकुन्यादीनिविष्टींचवर्जयेच्चाविशेषतइति ॥ दिनभागव्यवस्थामाहमनुः ॥ सर्वदेशेषुपूर्वाण्हेमुख्यंस्यादुपनायनं ॥ मध्यान्हेमध्यमंप्रोक्तमपराण्हेचगर्हितमिति ॥ उत्तरार्द्धेपिसर्वदेशेष्वित्यनुषज्यते ॥ एवंव्यवस्थितेपिशुभकालेनिमित्तविशेषेणनिषेधमाहगर्गः ॥ ग्रहेरवींद्वोरवनिप्रकम्पेकेतौमहोल्कापतनादिदेषे ॥ व्रतेदशाहानिवदंतितज्ज्ञास्त्रयोदशाहानिवदंतिकेचिदिति ॥ वर्ज्यानीतिशेषः ॥ संकटेतुचंडेश्वरः ॥ दाहेदिशांचैवधराप्रकंपेवज्रप्रपातेचविदारणेच ॥ केतौतथोल्कांशुकणप्रतापेत्र्यहंनकुर्याद्व्रतमंगलानीति ॥ धर्मप्रकाशेगर्गः ॥ चंद्रसूर्योपरागेषुत्र्य

हंप्रागशुभंभवेत् ॥ सप्ताहमशुभंपश्चात्स्मृतंग्रहणसूतकमिति ॥ एतच्चार्धग्रासविषयं ॥ सर्वग्रासेषुसप्ताहमर्धग्रासेदिनत्रयं ॥ त्रिद्वयेकांगुलतोग्रासेदिनमेकंविवर्जयेदित्यंगिरसाविशेषस्योक्तेः ॥ विस्तरतोदुष्टकालांस्तुविवाहप्रकरणेवक्ष्यामः ॥ एतेषुसूक्तेषुसूत्रोक्तोमुख्यकालः स्मृत्युक्तस्तुसंकटेमुख्योविधिः ॥ स्वशाखोक्तइतरःस्यात्तुसंकटइतिवचनात् ॥ लल्लः ॥ व्रतेन्हिपूर्वसंध्यायांवारिदोयदिगर्जति ॥ तद्दिनेस्यादनध्यायोव्रतंतत्रविवर्जयेदिति ॥ व्रतेन्हिउपनयनदिवसे ॥ वारिदोमेघः ॥ तद्दिनेव्रतदिनेउपनयनदिनइतियावत् ॥ व्रतंउपनयनं ॥ अत्रअनध्याये ॥ अनेनवचनेनसर्वस्यैवोपनयनक्रियाकलापस्यनिषेधेप्राप्ते ॥ नांदीश्राद्धोत्तरंवेदारंभरहितस्यसर्वस्योपनयनस्यकर्तव्यतोक्ताज्योतिर्निबंधे ॥ नांदीश्राद्धेकृतेचेत्स्यादनध्यायस्त्वकालिकः ॥ मौंजीबंधंतदाकुर्याद्वेदारंभंनकारयेदिति ॥ मृगादिविशाखांतव्यतिरेकेषु

यद्वृष्टिगर्जनादिकंतदकालिकंतन्निमित्तोनध्यायोऽकालिकः ॥ सचनांदीश्राद्धोत्तरंचेत्तदामौंजीबंधंउपनयनंकुर्यात्॥तत्रत्यंवेदारंभमात्रंतुनैवकारयेदित्यर्थः॥नांदीश्राद्धेकृतइतिवचनान्नांदीश्राद्धात्प्राग्वारिदगर्जनेमौंजीबंधोपिनभवति ॥ वेदारंभंनकारयेदितिनिषेधस्तुयेषांसूत्रेवेदारंभस्तद्दिनएवविहितस्तत्परः ॥ सत्याषाढसूत्रानुसारिभिरकालिकानध्यायेपिमौंजीबंधएतस्माद्वचनात्कर्तव्यएव ॥ वेदारंभस्त्वविहितत्वादेवनभवति॥ननुगायत्र्यारंभेणैवसर्ववेदारंभोभवतिप्रयोगांतरेउक्तत्वात्गायत्र्युपदेशात्मकारंभएवसर्ववेदारंभंनकारयेदित्यनेननिषेधइतिचेन्न ॥ तस्याथर्ववेदव्यतिरिक्तसर्ववेदांतराध्यापनार्थकपुनरुपनयननिवृत्तिबोधनार्थत्वात् ॥नचात्रकिंमानमितिवाच्यं॥सर्वेभ्योदेवेभ्यःस्वसावित्र्यनूच्यतइतिहिब्राह्मणमितिधर्मसूत्रस्यअगृह्यमाणविशेषत्वादेकमेवोपनयंसर्वार्थमितिन्यायः ॥अस्मिन्नर्थेशाठ्यायनब्राह्मणमेवपठितं

॥अथर्ववेदस्यतुपृथगुपनयनंवचनात्कर्तव्यं॥ तथाचतत्रैवश्रुतं॥नान्यत्रसंस्कृतोभृग्वंगिरसोधीयीतेति॥अन्यत्रअन्यवेदार्थं॥ भृग्वंगिरसोथर्ववेदइत्युज्ज्वलाकृद्व्याख्यानस्यचमानत्वात् ॥ उपनयनारंभोत्तरंसूतकेप्राप्तेविशेषःसंग्रहे ॥ कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं॥चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेदितिसंस्काररत्नमालयां ॥ तच्चोदगयनेज्योतिःशास्त्रोक्तशुभमासेशुक्लपक्षेगुरुशुक्रास्तबाल्यवार्धक्यादिदोषरहितेप्रदोषानध्यायादितिथिरहितेदुष्टवासरर्क्षदुर्योगादिदोषरहितेशुभेदिनेसुलग्नेसुमुहूर्तेकार्यम् ॥माधवीयेकालनिर्णयेलग्नकालश्च॥प्राक्कपालेद्विजातीनांव्रतबंधःप्रशस्यते ॥ व्रतोद्वाहेद्विजातीनामपराण्हंविवर्जयेत् ॥ तत्कालःपितृकर्मणोमंगलेत्यशुभप्रदः ॥ रात्रौनिशीथात्परतआसुरःकालउच्यते ॥ तत्रैवपाणिग्रहणंसुलग्नेप्यशुभप्रदमिति ॥ पाराशरस्मृतौ ॥ अनन्यगतिकत्वेतुगौणपक्षंसमाचरेत् ॥ अन्यथा

स्वीकृतोदोषस्त्वनिष्टफलभाग्भवेदिति ॥ ॥ तत्राधिकारीच ॥ गार्ग्यः ॥ पितैवोपनयेत्पुत्रंतदभावेपितुःपिता ॥ तदभावेपितुर्भ्रातातदभावेतुसोदरइति ॥ व्रतबंधंकुमारस्यविनापितुरनुज्ञया ॥ यःकरोतिद्विजोमोहान्नरकंप्रतिद्यतेइति ॥ पितरिप्रोषितेप्रेतेसंन्यस्तेपतितेथवा ॥ विनाज्ञयाप्युपनयेदन्यत्रअधिकारिणेति ॥ अथाचार्यादिश्च ॥ ॥ याज्ञवल्क्यः ॥ सगुरुर्यःकृपांकृत्वावेदमस्मैप्रयच्छति ॥ उपनीयदद्द्वेदमाचार्यःसउदाहृतः ॥ ॥ मनुः ॥ एकदेशंतुवेदस्यवेदांगान्यथवापुनः ॥ योऽध्यापयतिवृत्त्यर्थमुपाध्यायःसउच्यते ॥ ॥ पारस्करः ॥ निषेकादीनिकार्माणियःकरोतियथाविधि ॥ संभावयतिचान्नेनसविप्रोगुरुच्यते ॥ अग्न्याधेयंपाकयज्ञमग्निष्टोमादिकान्मखान् ॥ यःकरोतिवृतोन्येनसद्विजोऋत्विगुच्यतेइति ॥ ॥ उपाध्यायाद्दशाचार्यआचार्याणांशतंपिता ॥ सहस्रंतुपितुर्मातागौरवेणातिरिच्यतेइति ॥ आधि

कारसिद्धयेप्रायश्चित्तमाहवृद्धविष्णुः ॥ कृच्छ्रत्रयंचोपनेतात्रीन्कृच्छ्रांश्चबटुश्चरेत् ॥ आचार्योंदशसाहस्रांगायत्रींचजपेत्तथा ॥ बटुप्रायाश्चित्तकारणं ॥ प्रागुपनयनात्कामैराचारःकामवादिभिः ॥ लशुनादीन्यभक्ष्याणिऋतौस्त्रीस्पर्शनादिभिः ॥ ॥ मंडपश्च ॥ संग्रहे ॥ दशद्वादशहस्तोल्पोमध्यमोऽर्कमनून्मितः ॥ षोडशाष्टादशकरउत्तमःपरिकीर्तितः ॥ युग्महस्तोविनिर्मायविषमकरोनैवच ॥ चतुरस्रसमःकार्यःषोडशस्तंभसंयुतः ॥ चूडाषोडशभिर्युक्तःद्वात्रिंशद्भिःप्रचूडकः ॥ सप्तर्षिमते ॥ मङ्गलेषुचसर्वेषुमंडपोगृहवामतः ॥ कार्यःषोडशहस्तोवात्यूनहस्तोदशावधीति ॥ सार्धंचत्वारिपंचैर्वासप्तहस्तसमुच्छ्रितः ॥ नारिकेलदलैर्बाह्येदुकूलादिभिरंतरे ॥ च्छादयेन्मंडपंसर्वंचतुर्द्वाराविवर्जितामिति ॥ ॥ वेदीच ॥ बटोर्वेदीप्रकर्तव्याचतुरस्राचतुःकरा ॥ करोन्नताबटोर्हस्तैःपृष्ठेसोपानसंयुता ॥ १ ॥ प्रयोगदीपेतु ॥ आचार्यस्यपदै

षड्भिश्चतुर्भिरथवासमैः ॥ विस्तृताचतुरस्राचबटोर्वेदीकरोन्नता ॥ प्राक्पश्चिमायां
पदषट्कयुक्तमुदीचियाम्यानिपदानिपंच ॥ एवंविधाज्योतिषरत्ननिर्मिताबटोःशता
युर्मुनयोवदंति ॥ आचार्यपदसंख्याकैर्वेदिकांकारयेद्बुधः ॥ बटोर्निर्गमदक्षिण्यांवि
वाहेविपरीतकेति ॥ विवाहेश्रीधरीवेदीविंशत्यस्रसमन्विता ॥ चतुर्विंशत्यस्रयुताव्र
तेवेदीप्रकीर्तिता ॥ १ ॥ विवाहोपनयेवेदीएतेषुवज्रउच्यते ॥ तदग्रेकलशाकाराभि
तियज्ञविदांमतं ॥ १ ॥ गृहान्निर्गमवामांगेवसोर्द्धाराश्चवेदिका ॥ कार्याविवाहेविद्
द्धिमौंजीनांगृहदक्षिणेइति ॥ १ ॥ गृह्यकारिकायां ॥ वेदीकुर्यात्स्वगेहस्यवामेमं
डपमंडिता ॥ हस्तोच्छ्रितांचतुर्हस्तांकन्यायाश्चव्रतेबटोः ॥ रत्नावल्यां॥पश्चिमाभिमु
खंद्वारंयद्वाचेदुत्तरामुखं ॥वेदिकातुनदाकार्यागृहान्निर्गमदक्षिणे॥निर्गमशब्देनगृहद्वा
रमुच्यते॥दक्षिणाभिमुखंद्वारंपूर्वाभिमुखमेववा ॥वामभागेतदाकार्याव्रतेवेदीयथात

थं ॥ एवंचनैर्ऋत्यांवेदीनभवतीतितात्पर्यार्थः ॥ विवाहोपनयेयज्ञेवेदींकुर्यात्प्रयत्नतः ॥ वेदींविनायदाहोमःकर्मभ्रष्टोभिजायतेइतिअश्वत्थामकारिकायां ॥ ऊखरेदुर्भगानारीशल्येचैवमृतप्रजा ॥ कोणवेधेह्यनापत्यंद्वारवेधेधनक्षयइति ॥ अथघटीयंत्रप्रकारमाह ॥ ॥ कालसाधनेयंत्रनिर्णयोयथा ॥ कालसाधनयंत्राणिबहूनिपृथिवीतले ॥ तन्मध्येमंगलेमुख्यंघटीयंत्रंप्रकीर्तितमितिसंस्कारकौमुद्यां ॥ ततःकुमारपितासुस्नातोधृताहततिलकोहस्तप्रमाणोर्ध्वदीर्घताम्रपात्रंजलेनापूर्यधान्यराशौसंस्थाप्यतद्ग्रेगणपतिवरुणौसंपूज्यस्थापितजलपूर्णपात्रेअधोभागकुंभार्धाकृतिंताम्रमयींदशपलैस्तुलितांषडंगुलोच्छ्रितांद्वादशांगुलविस्तृतांघटीमहोरात्रषाष्टितमपूर्णप्रमाणांकालसाधनार्थंमार्तंडमंडलार्धोदयंवीक्ष्याक्षिपेत् ॥ तामेवास्तसमयेअवशेषार्धबिंबंनिरीक्ष्याक्षिपेत् ॥ घटींगंधादिभिःसंपूज्यप्रार्थयेत् ॥ मुख्यात्वमसियंत्राणांब्र

ह्मणानिर्मिताघटि ॥ भवभावायबटवेकालसाधनकारणमिति ॥ ॥ प्रक्षिप्यघटीअष्टदिशांमध्येयद्दिग्गतातत्प्रागादितःक्रमेणफलानि ॥ यथा ॥ प्रार्थितासाघटीतोयेयांदिशंप्रतिगच्छाति ॥ पूर्वादिदिक्फलंचैवास्थितामध्येशुभप्रदा ॥ सुखंदुःखंतथामृत्यूरोगीप्रियसुबुद्धिमान् ॥ वेदविद्यारतःश्रीमान्फलंपूर्वादिदिक्क्रमात् ॥ यदाअनिष्टदिग्गताघटीपूर्णावातदाउपनयनानंतरंसुदिनेतिथिवारनक्षत्रलग्नदिक्पतीनांपूजनंतिथ्यादिदेवतानांउक्तमंत्रेणायुतजपंतद्दशांशतिलाज्यैर्होमंदानादिकंचकुर्यादितिघटीसूत्रे ॥ ॥ अथसंभाराः ॥ तत्रपरिधानवस्त्राणांसूत्रव्याख्या ॥ वासार्थंसिशाणक्षौमाविकानिब्राह्मणक्षत्रियविशां त्रयाणांब्रह्मचारिणांक्रमेण ॥ शणत्वङ्मयंशाणं ॥ क्षौमंक्षुमाआतसीतद्विकारमयंपट्टकूलं ॥ आविकंअवेर्मेषस्यरोमानिर्मितंनैपालकंबलं ॥ सर्वेषांकार्पासंवा ॥ शुक्लमहतंवासोब्राह्मणस्य ॥ मांजिष्ठंक्षत्रिय

स्य ॥ पीतंवैश्यस्येति ॥ संस्काररत्नमालायां ॥ उत्तरीयंधर्मसूत्रे ॥ हारिणमैणेयं वाकृष्णंब्राह्मणस्यकृष्णंचेदनुपस्तीर्णासनशायीस्याद्रौरवंराजन्यस्यबस्ताजिनंवैश्यस्याविकंसार्ववर्णिकमिति ॥ हरिणंमृगस्तस्यविकारंहारिणंचर्म ॥ एणीमृगीतस्याविकारऐणेयंतच्चकृष्णं ॥ कृष्णंचेद्विभृतंनकेवलंहारिणंतदातस्मिन्आस्तीर्णेनासिते नचशयीत रुरुर्बिंदुमान्मृगःतस्यविकारोरौरवं ॥ बस्तश्छागस्तस्याजिनं ॥ अविरूर्णायुर्मेषस्तस्यविकारआविकंतत्सर्वेषांवर्णानां ॥ तस्यहारिणादिभिर्विकल्पः ॥ कंबलोप्याविकएवसर्वेषामित्यर्थइतिव्याख्यातमुज्ज्वलाकृता॥प्रावरणपर्याप्तोत्तरीयाजिनासंभवेशाकलः ॥ अखंडंवात्रिखंडंवाष्टाचत्वारिंशदंगुलं ॥ चतुरंगुलविस्तीर्णं धारयेदजिनंसदेति ॥ खंडत्रयमानंस्मृत्यंतरे ॥ त्र्यंगुलंतुबहिर्लोमयद्वास्याच्चतुरंगुलं ॥ अजिनंधारयेद्विप्रश्चतुर्विंशाष्टषोडशैरिति ॥ चतुर्विंशांगुलएकः ॥ अष्टांगुलो

द्वितीयः ॥ षोडशांगुलस्तृतीयः ॥ एवंत्रिभिःखंडैरष्टाचत्वारिंशदंगुलपरिमंडलमजिनंधार्यमित्यर्थः ॥ अत्रपरिषेचनार्थंकिंचिदाधिकंग्राह्यं ॥ अन्यथाअष्टाचत्वारिंशदंगुलमाजिनंधार्यमित्यनेनविरोधापत्तिः॥अत्रांगुलानिसंस्कार्यस्यग्राह्याणि॥ स्मृत्यर्थसारे ॥ अहतंवस्त्रयुग्मंचश्वेतरक्तमथापिवा॥कार्ष्णरौरवबास्तानिविप्रादेरजिनानितुइति ॥ यथा ॥ अजिनंत्र्यंगुलंवापिचतुरंगुलविस्तृतं ॥ बाहिःसरोमसंगृह्यधारयेदुपवीतवत् ॥ यथावर्णस्यवसनंतत्तत्सूत्रेणधारयेदिति ॥ गदाधरेणकार्पासमयमंबरंईषद्धौतंनवंश्वेतंनान्यधारितंप्रावारार्थंकल्पितं ॥ ॥ मेखला ॥ मौजीमेखलांत्रिवृत्तांब्राह्मणस्यधनुर्ज्यार्ठंराजन्यस्याविसूत्रंवैश्यस्येति ॥ मौंजीमुंजतृणनिर्मितांत्रिवृतांत्रिगुणां ॥ धनुषोरज्जुर्ज्या ॥ अविसूत्रंअविलोममायीरज्जुः ॥ धर्मसूत्रेपि ॥ त्रिवृन्मौंजीमेखलाब्राह्मणस्यशक्तिविषयेशक्तौसत्यांदाक्षिणावृतानांज्याराजन्यस्यमौं

जीवाऽयोमिश्राविसूत्रंवैश्यस्यसैरीतामलीवेत्येकइति ॥ त्रिवृतत्रिगुणामुंजानांविकारोमौंजी ॥ एवंभूताब्राह्मणस्यमेखलाभवति ॥ साचशक्तिविषयेशक्तौसत्यांदक्षिणावृत्तानांकार्तव्या ॥ तद्धितार्थेगुणभूतानामपिमुंजानामेतद्विशेषणं ॥ ज्याधनुषोरज्जुः ॥ अथवामौजीसाचायोमिश्राक्वचित्कालायसेनबद्धा ॥ अविरेवाविअव्याःसूत्रमाविसूत्रंअविलोममयीरज्जुःसैरीसीरवाहयोक्त्ररज्जुः ॥ तामलोवृक्षस्तस्यत्वचाग्रथितातामलीएवंभूतासावैश्यस्यमेखलेत्येकेआचार्यामन्यंतइतिव्याख्यातमुज्वलाकृता॥विशेषमाहमनुः ॥ त्रिवृन्मौंजीसमाश्लक्ष्णाकार्याविप्रस्यमेखला॥क्षत्रियस्यतुमौर्वीज्यावैश्यस्यशणतांतवीतिसमानक्वचित्सूक्ष्मानक्वचित्स्थूलाकिंतर्हिसर्वतएवसमा॥श्लक्ष्णातंतुतनुत्वगुणयुक्तापरिधृष्टाच ॥ ज्याकदाचिच्चर्ममयीभवतिकदाचित्तृणमयीतत्रचर्ममयीव्यावृत्त्यर्थंमौर्वीज्याविशेषणं॥तयाधनुषोवतारितयाश्रोणिबंधःक

र्तव्यइतिमेधातिथिः ॥ ज्यायांत्रिवृत्त्वादिगुणेनस्वरूपनाशप्रसंगात् ॥ शणतांतव्या
स्त्वस्त्येवेतिज्ञेयं ॥ अनुकल्पमाहमनुः ॥ मुंजाभावेतुकर्तव्याकुशाश्मंतकबल्व
जैः ॥ त्रिवृताग्रंथिनैकेनात्रिभिःपंचभिरेववेति ॥ अत्रादिशब्दलोपोद्रष्टव्यः ॥ तेने
त्थंवाक्यंभवति ॥ मुंजाद्यभावइति ॥ ग्रंथयश्चप्रवरसंख्यया ॥ एकप्रवरस्यैकोग्रंथिः॥
त्रिप्रवरस्यत्रयः ॥ पंचप्रवरस्यपंचेतिवृद्धाः ॥ इतिसंस्काररत्नमालायां ॥ कात्या
यनस्तुचतुर्हस्तादीर्घामेखलाकार्या ॥ मौंजीरशनाब्रह्मणस्य ॥ धनुर्ज्याराजन्यस्य ॥
मौर्वीवैश्यस्य ॥ मुंज्यः शरः तत्त्रञ्ज्मयी ॥ धनुर्ज्याधनुर्गुणः ॥ मुंजाद्यभावेकुशाश्मं
तकबल्वजानां क्रमेणब्राह्मणादीनां ॥ अश्मंतकबल्वजस्तत्वङ्मयीवाश्मंतकाख्य
बल्वजाख्यतृणमयीतिभर्तृयज्ञव्याख्याने ॥ तांत्रिवलीकृतांबटोःकटिप्रदेशेप्रदक्षि
णवत्त्रिरावेष्ट्यअनंतरंग्रंथयस्त्रयः पंचवायथाप्रवरनियमेनकार्याः ॥ ॥ यज्ञोपवीतं॥

कार्पासोनिर्मलःप्रोक्तःशुचिक्षेत्रसमुद्भवः ॥ तच्चात्रेसूत्रनिष्कासंसंहतांगुलिमूलके ॥ आवेष्ट्यशणणवत्यातात्त्रिगुणीकृत्ययत्नतः ॥ अधिप्रदक्षिणावृत्तंसमंस्यान्नवसूत्रकं॥ तत्रिः प्रदक्षिणीकृत्यब्रह्मग्रंथिःप्रदीयते ॥ पृष्ठवंशेचनाभ्यांचधृतंयद्विंदतेकटिं ॥ स्तनादूर्ध्वमधोनाभ्यांतन्नधार्यंकदाचन ॥ तत्धार्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितं॥ विछिन्नंवाप्यधौतंवामुक्त्वानिर्मितमुत्सृजेत् ॥ ब्रह्मचारिणएकंस्यात्स्नातस्यद्वेबहूनिवा ॥ तृतीयमुत्तरीयार्थेवस्त्राभावेचतुर्थकमिति ॥ ॥ यज्ञोपवीतानिबहूनिचायुष्कामाभिरतमालायांदेवलः ॥ त्रीणिचत्वारिपंचाष्टौगृहिणःस्युर्दशापिवेति ॥ ॥ दंडः॥ पालाशोब्राह्मणस्यदंडोबैल्वोराजन्यस्यौदुंबरोवैश्यस्य ॥ सचअंगुष्ठमात्रस्थूलतरः अवक्रःसाग्रःसत्वक्पादादिललाटांतिमकेशसंमितदीर्घोब्राह्मगस्य ॥ बिल्ववृक्षोद्भवोललाटमूलसंमितोराजन्यस्य ॥ औदुंबरवृक्षोद्भवोदंडोघ्राणाग्रसंमितोवैश्यस्येति ॥

उपनयनेमात्रासहभोजनंअनुज्ञातंसंग्रहकारेण ॥ मात्रासहोपनयनेविवाहेभार्यया सह ॥ अन्यत्रसहभुक्तिश्चेत्पातित्यंप्राप्नुयान्नरइति ॥ कृच्छ्रत्रयात्मकप्रायश्चित्ताचरणोत्तरंकामचारकामवादकामभक्षणनिषेधप्रवृत्तेर्विनास्त्रियासहभुंजीतेतिनिषेधस्यापिप्रवृत्तत्वात्तस्यबाधोनेनक्रियते ॥ नचमात्रासहोपनयनइतिवचनादुपनयनमध्येयावंतिभोजनानितेषुसर्वेष्वपिमातृसाहितत्वमस्त्वितिवाच्यं ॥ आचारसंवादेनसूत्रोक्ताशनपर्यायकभोजनएवैतस्यप्रवृत्तेरुचितत्वेनप्रधानोत्तरकालिकेसूत्रकृताकंठरवेणानुक्तेभोजनेमात्रासहेत्यस्याप्रवृत्तेः ॥ यत्तु ॥ मात्रासहैवभुंजीतऊर्ध्वंमातारजस्वला ॥ व्रतबंधःप्रशस्तःस्यादित्याहभगवान्यमइतिवचनतःभोजनात्प्राक्मातरिरजस्वलायांव्रतबंधोनभवतीतिकेचित् ॥ अन्येतुएतस्यवचनस्यैवमहानिबंधेष्वदर्शनेननिर्मूलत्वात्कर्तव्यमेवेत्याहुः ॥ तदत्राचारानुरोधेनग्राह्यं ॥ मातृभोजनानं

तरंकुमारस्यवपनंकारयंतितच्छाखांतरविषयं ॥ इतिसंस्काररत्नमालायां ॥ ॥ अथक्रमकारिका ॥ दत्वाप्रेषद्वयंप्राग्वसनमथरशनाब्रह्मसूत्रोत्तरीयंदंडः पूर्णांजल्यर्धः प्रणतरविगुरोर्लंभपृच्छाप्रदानं ॥ वन्हिंचावृत्तचास्तेमनुमितहवनंस्वीयसावित्रिदानं वन्हेः कार्यंस्वभिक्षाकथयतिनियमंब्रह्मचर्योविकल्पः ॥ १ ॥अथसर्वसाधारणसंभाराः ॥ घटीयंत्रं ॥ सदशांतःपटः ॥ परिधानार्थंकौपीनं ॥ त्रिवलीकृतमेखला ॥ यज्ञोपवीतं ॥ कार्पासमयंअहतवाससउत्तरीयं ॥ अजिनमुत्तरीयार्थं ॥ अव्रणःसरलःसत्वक्साग्रःपालाशदंडः ॥ अंजलीपूरणार्थमुदकं ॥ पूगीफलानि ॥ चंदनाक्षतपुष्पाणि ॥ गायत्र्युपदेशार्थंआचारप्राप्तंकांस्यपात्रंसुवर्णशलाकातंडुलाश्च॥ कुशाः॥ इंधनानि ॥ समिधः ॥ भिक्षाचर्यपात्रंचेति ॥ अथप्रयोगः ॥ अत्रबहिःशालाभावति ॥ तत्रोदगयनेज्योतिःशास्त्रोक्तशुभमासेशुक्लपक्षेशुभेदिनेसुमुहूर्तेउपनयनंकर्तुंत

त्पूर्वेद्युःयजमानःपत्नीकुमाराभ्यांसहमंगलंस्नात्वाअहतवाससीपरिधायालंकृत्यघृततिलकोबहिःशालायांशुभासनेप्राङ्मुखउपविश्यस्वदक्षिणतःपत्नींतद्दक्षिणतःसंस्कार्यंचोपवेश्यधृतपवित्रपाणिराचांतःप्राणानायम्यदेशकालकीर्तनांतेस्वस्योपनेतृत्वाधिकारसिद्ध्यर्थंकृच्छ्रत्रयात्मकप्रायश्चित्तंवातत्प्रत्याम्नायगोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यदानपूर्वकंद्वादशसहस्रं द्वादशाधिकसहस्रंवागायत्रीजपमहंयथावकाशंकरिष्येअथवाब्राह्मणद्वाराकारयिष्येइतिकृत्वा ॥ अथकुमारेणापिदेशकालकीर्तनांतेममकामचारकामवादकामभक्षणादिदोषपरिहारार्थंकृच्छ्रत्रयात्मकप्रायश्चित्तप्रत्याम्नायगोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यदानपूर्वकं द्वादशसहस्रंद्वादशाधिकसहस्रंवागायत्रीजपंब्राह्मणद्वाराअहमाचरिष्ये इतिकारयित्वा ॥ उपनयनंकार्यं ॥ यजमानःपुनःदेशकालकीर्तनांतेअस्यकुमारस्याद्विजत्वसिध्यैवेदाध्ययनाधि

कारसिध्यर्थंश्रीपरमेश्वरप्रीत्यर्थंचउपनयनंश्वःवाअद्यकरिष्ये ॥ यदाचौलेनसहउपनयनंक्रियतेतदासंकल्पेचौलोपनयनाख्येकर्मणी अहंकरिष्येइत्यूहः॥तत्रादौनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंचाद्यकरिष्ये ॥ नांदीश्राद्धांतंकृत्वा ॥ अत्रपुण्याहवाचनांतेइंद्रःप्रीयतामित्यूहःकर्तव्यः ॥ यदातद्दिनेग्रहयज्ञंकरोतितदा ॥ अस्यकुमारस्यग्रहानुकूलतासिद्ध्यर्थंग्रहयज्ञंकरिष्ये ॥ तत्रादौनिर्विघ्नार्थं गणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंब्रह्माचार्यऋत्विग्वरणंदिग्रक्षणंपंचगव्यकरणंभूमिपूजनंअग्निस्थापनंनवग्रहस्थापनंरुद्रकलशस्थापनंचाद्यकरिष्ये ॥ नांदीश्राद्धानंतरंयजमानेनवंशपात्रंस्वयंगृहीत्वाअविघ्नगणपतिकलशंभार्ययाग्राहयित्वाघंटादिवाद्यघोषेणसहितःसब्रा

त्ति

ह्मणःस्वतिनऽइंद्रेत्यादिमंत्रान्वक्ष्यमाणाथैनाआप्याश्वपठन्सन्गृहमध्येगत्वाप्रति
ष्ठापनदेशमुपलेपयित्वातदुपरितंदुलान्प्रक्षिप्यतेषुतद्वंशपात्रं ॥ नर्यँप्रजाम्मेपाहिश
ठंस्यंपशून्मेपाह्यथंऽर्यँपितुम्मेपाहि ॥ इतिमंत्रेणप्रतिष्ठाप्यतत्रैवोत्तरतःकलशंभार्य
यानिधाप्यपंचोपचारैःसंपूजयेत् ॥ अथवादेवस्याग्रेस्थापनीयं ॥ तत्रमंत्रः ॥
ॐ अथैनाऽआप्यानवतीभ्यामभिमृशतीदमेवैतद्रेतःसिक्तमाप्यायतेसौमीभ्यांप्रा
णोवैसोमःप्राणन्तद्रेतसिदधातितस्माद्रेतःसिक्तंप्राणमभिसम्भवतिपूयेद्वषद्दतेप्राणा
त्सम्भवेदेषोहैवात्रसूददोहाःप्राणोवैसोमःप्राणःसूददोहाः ॥ १ ॥ ग्रहयज्ञंकरो
तिचेत्तदाआचार्यवरणादिहोमशेषंसमाप्य ॥ कृतस्यकर्मणःसांगतासिद्ध्यर्थं

नानानामगोत्रेभ्योब्राह्मणेभ्यःगंधादिनापूजयिष्ये ॥ तेभ्यश्चभूयसीं दक्षिणांदत्वा तैराशिषोगृह्णीयात् ॥ ततउपनयनदिनेकुमारपिताबहिःशालायांदेशकालकीर्तनांते उपनयनांगविहितंअस्यकुमारस्यवपनंकरिष्ये॥कारयित्वा ॥ पुनःअस्यकुमारस्यउपनयनेअधिकारार्थंत्रीन्ब्राह्मणान्भोजयिष्ये॥अनुच्छिष्टपाकेनब्राह्मणत्रयभोजनं ॥ तत्पंक्तौमुंडितशिराः सुस्नातः कुमारोभुंजीत॥भोजनानंतरंकुमारंस्नापयित्वा ॥ पुनः कुमारपिताबहिःशालायांवेद्युपरिशुभासनेउपविश्यअस्यकुमारस्योपनयनांगभूतंअग्निप्रतिष्ठापनंकरिष्ये ॥ वेद्युपरिस्थंडिलेपंचभूसंस्कारपूर्वकंसमुद्भवनामाग्निंप्रतिष्ठाप्य ॥ ततोबटुंपर्युप्तशिरसमलंकृतंवेद्यग्रेआचार्यसमीपमानयंति॥ वेद्याःसोपानेअवस्थाप्य॥ततःसद्वृत्तयःस्ववर्णदृढपुरुषाःमध्येंतःपटंधारयेयुः॥दैवज्ञाःसुमंगलपद्यानि पठेयुः॥ सुलग्नेसुमुहूर्तेमनोजूतिरितिमंत्रंएषवैप्रतिष्ठाइतिमंत्रंआचारात्द्विजाः पठेयुः

ॐप्रतिष्ठेतिपठित्वासुमुहूर्तेसुप्रतिष्ठितमास्त्वितिब्रूयुः ॥ अंतःपटंउदक्निःसार्यकुमारं आचार्यपादौप्रणाम्यतद्दक्षिणतःपश्चादग्नेरवस्थाप्य ॥ ततोब्राह्मणाःप्रतिष्ठामंत्रान्पठित्वामाणवकाशिरसिअक्षतान्समर्पयेयुः॥तत्रमंत्रः॥ॐमनोजूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमन्तंनोत्वरिष्टँयज्ञठंसमिमन्दंधातु ॥ विश्वेदेवासऽइहमादयन्तामोँ३प्रतिष्ठ॥१॥ब्राह्मणं॥मनोजूतिर्ज्जुषतामाज्यस्येतिमनसावाऽइदठंसर्वमाप्तन्तन्मनसैवैतत्सर्वमाप्नोतिबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञठंसमिमन्दधात्वितियद्विष्टठंतत्सन्दधातिविश्वेदेवासऽइहमादयन्तामितिसर्वेवैविश्वेदेवाःसर्वेणैवैतत्सन्दधातिसयदिकामयेतब्रूयात्प्रतिष्ठेति ॥१॥ एषवैप्रभूर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रभूतम्भव

ति ॥ २ ॥ एषवैविभूर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवविभूतंभवति ॥ ३ ॥
एषवैव्यष्टिर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवव्यष्टम्भवति ॥ ४ ॥ एषवैविधृति
तिर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवविधृतम्भवति ॥ ५ ॥ एषवैव्यावृत्तिर्नामय
ज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवव्यावृत्तम्भवति ॥ ६ ॥ एषवाऽऊर्जस्वान्नामयज्ञोयत्रै
तेनयज्ञेनयजंतेसर्वमेवोर्जस्वद्भवति ॥ ७ ॥ एषवैपयस्वान्नामयज्ञोयत्रैतेनयज्ञेनयज
न्तेसर्वमेवपयस्वद्भवति ॥८॥ एषवैब्रह्मवर्चसीनामयज्ञोयत्रैतेनयज्ञेनयजन्तऽआब्राह्म
णोब्रह्मवर्चसीजायते ॥ ९ ॥ एषवाऽअतिव्याधीनामयज्ञोयत्रैतेनयज्ञेनयजन्तऽ
आराजन्योतिव्याधीजायते ॥ १० ॥ एषवैदीर्घोनामयज्ञोयत्रैतेनयज्ञेनयजंतआदी

र्घारण्यज्ञायते ॥ ११ ॥ एषवैक्लृप्तिर्नामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवक्लृप्तम्भवति ॥ १२ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रतिष्ठितम्भवति ॥ ॥ १३ ॥ ॐ प्रतिष्ठासुप्रतिष्ठितमस्तु ॥ ब्रह्मवर्चसीभव ॥ आब्रह्मान्नित्याशिषंदद्युः ॥ ततःप्रेषद्वयं ॥ ब्रह्मचर्यमागामीतिब्रूहीत्याचार्योवदति ॥ ब्रह्मचर्यंआगामीतिकुमारोब्रूयात् ॥ ब्रह्मचारीप्राङ्मुखस्तिष्ठन्ब्रह्मचर्यमागामीतिब्रूयादितिगदाधरादयः॥उदङ्मुखइतिरेणुदीक्षिताः ॥ ब्रह्मचार्यसानीतिब्रूहीत्याचार्योवदति ॥ ब्रह्मचारीअसानीतिबटुर्ब्रूयात् ॥ अथाचार्योमाणवकस्यकटिसूत्रंबद्ध्वाकौपीनंपरिधापयति ॥ ॐ येनेन्द्रायबृहस्पतिर्वासःपर्यदधादमृतं ॥ तेनत्वापरिदधाम्यायुषेदीर्घायुत्वायबलायवर्चसे ॥ १ ॥ इत्यनेनमंत्रेण ॥ आचमनं ॥ ततआचार्योमाणवकस्यकटिप्रदेशे

मेखलांप्रदक्षिणांत्रिर्वेष्टयित्वायथोक्तलक्षणांयथाप्रवरग्रंथियुतांबध्नाति ॥ ॐ इयन्दुरुक्तम्परिबाधमानावर्णम्पवित्रम्पुनतीमऽआगात् ॥ प्राणापानाभ्याम्बलमाददानास्वसादेवीसुभगामेखलेयं ॥ इत्यनेनमंत्रेण ॥ आचमनं ॥ अत्रावसरेयज्ञोपवीतदानानि ॥ बटुःपूर्वोच्चारितद्विजत्वसिद्धिवेदाध्ययनाधिकारार्थंश्रौतस्मार्तकर्माधिकारासिद्ध्यर्थंयज्ञोपवीतधारणाधिकारार्थंश्रीसवितृसूर्यनारायणप्रीत्यर्थंनानानामगोत्रेभ्योब्राह्मणेभ्यःयथाशक्त्यायज्ञोपवीतदानानिकरिष्येइतिसंकल्पः॥इदंयज्ञोपवीतंसफलंदक्षिणासहितंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ इत्याचारः ॥ अथाचार्योयज्ञोपवीतमभिमंत्रयेत् ॥ तत्प्रकारः ॥ आपोहिष्ठेतितिसृभिर्ऋग्भिरुपवीतंप्रक्षाल्य ॥ब्रह्मयज्ञानं० ॥इदंविष्णु० ॥ नमस्तेरुद्र० ॥ इतितिसृभिर्ऋग्भिरुपवीतेअंगुष्ठंभ्रामयेत् ॥ पुनस्तथैवनवतंतुषुदेवताःविन्यसेत् ॥तद्यथा॥ओंकारंप्रथमतंतौन्यसामि॥अनेनप्रका

रैणाग्रेऽष्टसु ॥ ॐ कारश्चाऽग्निर्नागाश्चसोमइंद्रःप्रजापतिः ॥ वायुःसूर्योविश्वेदेवाइत्येतेनवतंतवः ॥ १ ॥ ॐ उपयामगृहीतोसिसावित्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि ॥ जिन्वंयज्ञजिन्वंयज्ञपतिम्भगायदेवायत्वासवित्रे ॥ १ ॥ इतिसूर्यायप्रदर्शयेत् ॥ ततउपवीतंकरसंपुटेनिधायदशगायत्र्याभिमंत्रयेत् ॥ ॐ तत्संवितु० ॥ १ ॥ ततोमाणवकोमंत्रंपठन्दक्षिणहस्तेनोर्ध्वकृतेनदक्षिणकरमध्येयज्ञोपवीतंप्रक्षिप्यवामेनवामस्कंधेधारयेत् ॥ ॐ यज्ञोपवीतम्परमम्पवित्रम्प्रजापतेर्यत्सहजम्पुरस्तात् ॥ आयुष्यमग्र्यम्प्रतिमुञ्चशुभ्रंयज्ञोपवीतम्बलमस्तुतेजः ॥ १ ॥ यज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि ॥ २ ॥ इत्यनेनमंत्रेण ॥ आचम्य ॥ ततः कार्पासमहतवासःप्रावारंउपवीतवत्प्रयच्छति ॥ ॐ युवासुवासाःपरि० ॥ १ ॥

अथाजिनंप्रयच्छति ॥ ॐ मित्रस्यचक्षुर्धरुणम्बलीयस्तेजोयशस्विस्थविरꣳसमिद्धम् ॥ अनाहनस्यम्वसनञ्जरिष्णुपरीदम्वाज्यजिनन्दधेहम् ॥ १ ॥ इतिमाणवकस्य मंत्रपाठः ॥ आचार्योमाणवकायदंडंप्रयच्छति ॥ तंप्रतिगृण्हाति ॥ ॐ योमेदंडः परापतद्वैहायसोधिभूम्याम् ॥ तमहम्पुनराददाम्यायुषेब्रह्मणेब्रह्मवर्चसाय ॥ १ ॥ इतिमाणवकस्यमंत्रपाठः ॥ दीक्षावदेकेदीर्घसत्रमुपैतीतिवचनात् ॥ अथाचार्यःस्वांजलिजलेनापूरितेनमाणवकांजलिंपूरयत्यापोहिष्ठेतितिसृभिर्ऋग्भिः ॥ आचार्यपठितेनमाणवकः सूर्यायार्घंदद्यात्त्रिः ॐ आपोहिष्ठा० ॥१॥ ॐयोवं÷शिव० ॥ २ ॥ ॐतस्माऽअरगं० ॥२॥ श्रीसूर्यायनमः ॥ इदमर्घंदत्तंनमम ॥ इत्याचार्यस्यमंत्रपाठः ॥ ततआचार्योमाणवकंसूर्यमुदीक्षस्वेतिप्रेषयेत् ॥ माणवकःसूर्यमुदीक्षते ॥ ॐ

तच्चक्षुर्द्देवहितं० ॥ १ ॥ इतिमाणवकस्यमंत्रपाठः ॥ अथमाणवकस्यदक्षिणस्कंधोपरिहस्तंनीत्वातस्यहृदयमालभतेआचार्यः ॥ ॐ ममव्रतेतेहृदयन्दधामिममचित्तमनुचित्तन्तेअस्तु ॥ ममवाचमेकमनाजुषस्वबृहस्पतिष्ट्वानियुनक्तुमह्यं ॥ १ ॥ इत्याचार्यस्यमंत्रपाठः ॥ ततोमाणवकस्यदक्षिणहस्तमाचार्योगृहीत्वा ॥ कोनामासि ॥ इत्याह ॥ एवंपृष्टःकुमारःप्रत्याह ॥अमुकशर्माअहंभोः॥एवंत्रिःआचार्यःप्रतिपृच्छतिमाणवकं ॥ कस्यब्रह्मचार्यसीतिआचार्यः ॥ भवतइत्युच्यमानेमाणवकेन॥माणवकंप्रतिआचार्योब्रूयात् ॥ इंद्रस्यब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासौ[1]अमुकशर्मन् ॥ अथैनंभूतेभ्यःपरिददात्याचार्यः ॥ ॐ प्रजापतयेत्वापरिददामिदेवायत्वासवित्रेपरिददाम्यद्भ्यस्त्वौषधीभ्यःपरिददामिद्यावापृथिवीभ्यान्त्वापरिददामि

---

[1] असावित्यस्यस्थानेकुमारस्यनामगृण्हीयादितिगदाधरः ।

विश्वेभ्यस्त्वादेवेभ्यःपरिददामिसर्वेभ्यस्त्वाभूतेभ्यःपरिददाम्यरिष्ट्यै ॥ १ ॥ इत्याचार्यपठितमंत्रेणबटुरक्षणं ॥ प्रदक्षिणमग्निंपर्युक्ष्योपविशत्याचार्यस्योत्तर[1]तोमाणवकः ॥ ततःब्रह्मोपवेशनादिपर्युक्षणांतंचरुवर्ज्यं ॥ पर्युक्षणानंतरंआघारावाज्यभागौमहाव्याहृतयः सर्वंप्रायश्चित्तंप्राजापत्यांतस्विष्टकृच्चेताश्चतुर्दशाहुतयः ॥ ॐ प्रजापतयेस्वा॰इदंप्रजापतयेनमम ॥ १ ॥ ॐ इंद्रायस्वा॰इदमिंद्रा॰ ॥ २ ॥ ॐ अग्नयेस्वा॰इदमग्न॰ ॥ ३ ॥ ॐ सोमायस्वा॰ इदंसोमा॰ ॥ ४ ॥ ॐ भूःस्वाहाइदमग्न॰॥ ॥ ५ ॥ ॐ भुवःस्वा॰इदंवायवेन॰ ॥ ६ ॥ ॐस्वः स्वाहाइदंसूर्याय॰ ॥ ७ ॥ ॐ त्वन्नोअग्ने॰स्मतस्वा॰ इदमग्नीवरुणाभ्यां॰ ॥ ८ ॥ ॐ सत्वन्नोऽअग्ने॰ एधिस्वा॰ इदमग्नीवरुणाभ्यां॰ ॥ ९ ॥ ॐ अयाश्चाग्ने॰ जर्ठस्वाहा ॥ इदमग्नयेअयसे॰॥ १० ॥

---

[1] पश्चादग्नेराचार्यस्योत्तरतउपविशतीतिजयरामवासुदेवहरिहरगदाधरादयः ॥ दीक्षितइतिगर्गः ॥

ॐ येतेशतं० स्वर्काःस्वा० इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्च० ॥ ११ ॥ ॐ उदुंत्तमम्० स्यामस्वा० इदंवरुणायादित्यायादितये० ॥ १२ ॥ ॐ प्रजापतयेस्वाहा० इदंप्रजाप० ॥ १३ ॥ ॐ अग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृतेन० ॥ १४ ॥ ततःसंस्रवप्राशनं ॥ पवित्राभ्यांमार्जनं ॥ अग्नौपवित्रप्रतिपत्तिः ॥ पूर्णपात्रवरयोरन्यतरस्यब्रह्मणेदानं ॥ तच्चताम्रादिपात्रे ॥ प्रणीताविमोकः ॥ ॐ आपःशिवाइतिमंत्रेणप्रणीताविमोकोदकेनमूर्द्ध्न्यभिषिंचेत् ॥ अथैनंब्रह्मचारिणमाचार्यःसꣳशास्ति ॥ ब्रह्मंचार्यसीत्याचार्योंवदति ॥ भवामीतिब्रह्मचारीवदति ॥ अपोशान ॥ इत्याचार्यः ॥ अशनानि ॥ इतिब्रह्मचारी ॥ कर्मकुरु ॥ इत्याचार्यः ॥ करवाणि ॥ इतिब्रह्मचारी ॥ मादिवासुषुप्थाः ॥ इत्याचार्यः ॥ नस्व

---

१ सप्तमंत्राणांलक्षणानिब्रह्मचर्यब्राह्मणे।

पामि॥इतिब्रह्मचारी॥वाचंयच्छइत्याचार्यः॥यच्छामिइतिब्रह्मचारी ॥ अध्ययनंसंपाद्य इत्याचार्यः ॥ यच्छामि ॥ इतिब्रह्मचारी ॥ समिधमाधेहि ॥ इत्याचार्यः ॥ आदधामि ॥ इतिब्रह्मचारी ॥ अपोशानइत्याचार्यः ॥ अशनानीतिब्रह्मचारी ॥ ॥ अथास्मैब्रह्मचारिणेसावित्रीमन्वाहआचार्यः ॥ तत्रादौआचारात्कांस्यपात्रेतंडुलान्प्रसार्यतदुपरिसुवर्णशलाकयाॐकारव्याहृतिपूर्वकंगायत्रींलिखित्वा ॥ अद्यपू० तिथौममब्रह्मवर्चससिद्ध्यर्थंवेदाध्ययनाधिकारसिद्ध्यर्थंगायत्र्युपदेशांगविहितंगायत्रीसावित्रीसरस्वतीपूजनपूर्वकंआचार्यपूजनंकारिष्ये ॥ मनोजूतिरितिप्रतिष्ठाप्य ॥ श्रीश्चतेइतिषोडशोपचारैःपूजनंकृत्वा॥ ततआचार्यपूजनंकुर्यात्॥कथंभूतायब्रह्मचारिणेइत्यपेक्षायांदक्षिणतस्तिष्ठतऽआसीनायउत्तरतोग्नेःव्यवस्थितायप्रत्यङ्मुखोपविष्टायपादोपसंग्रहणपूर्वकमुपसन्नाचार्यंसमीक्षमाणायस्वयमपिसमीक्षितायब्रूया

दाचार्यः ॥ कथं ॥ ओंकारव्याहृतिपूर्वकंप्रथमंपच्छः ॥ द्वितीयमर्धर्चशः ॥ तृतीयंसर्वशःपठेत् ॥ तत्रमंत्रः ॥ हरिः ॥ ॐ भूर्भुस्व÷तत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोन÷प्रचोदयात् ॥ १ ॥ एवंत्रिरुक्तोभयोरपिप्रणवपूर्वकंस्वस्तिकरणं॥ संवत्सरेषण्मास्येचतुर्विंशत्यहेद्वादशाहेवेत्येषांकालानामन्यतमेकालेक्षत्रियवैश्ययोः ॥ सद्यस्त्वेवगायत्रींब्राह्मणायानुब्रूयात् ॥ त्रिष्टुभंसावित्रींक्षत्रियस्य ॥ जगतींसावित्रींवैश्यस्यब्रूयात् ॥ इत्युपदेशः ॥ अत्रावसरेब्रह्मचारिणासमिदाधानं ॥ कुशोपग्रहोभूत्वातिस्रःसमिधआदायदंडसहितएवपश्चादग्नेरुपविश्य ॥ तत्रप्रथमंतावद्दक्षिणहस्तेनाग्नेःसंधुक्षणं ॥ संधुक्षणं[1] इंधनप्रक्षेपः ॥ वक्ष्यमाणमंत्रैःपंचभिः ॥ ॐ

---

[1] शुष्कगोमयखंडैरिंधनप्रक्षेपइतिगदाधरः ॥

अग्नेसुश्रवःसुश्रवसंमाकुरु॥१॥ॐ यथात्वमग्नेसुश्रवःसुश्रवाऽअसि ॥२॥ ॐ एवंमाꣳ सुश्रवःसौश्रवसंकुरु ॥ ३ ॥ ॐ यथात्वमग्नेदेवानांयज्ञस्यनिधिपाऽअसि ॥ ४ ॥ ॐ एवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् ॥ ५ ॥ इत्येतैःपंचभिर्मंत्रैःप्रतिमंत्रमिंधनप्रक्षेपः ॥ उभाभ्यांसंधुक्षणप्रसिद्धिरस्ति ॥ ततःप्रदक्षिणमग्निंजलेनपर्युक्ष्योत्तिष्ठन्समिधआदधाति ॥ ॐ अग्नयेसमिधमाहार्षम्बृहतेजातवेदसे ॥यथात्वमग्नेसमिधासमिध्यसऽएवमहामायुषामेधयावर्च्चसाप्रजयापशुभिर्ब्रह्मवर्चसेनसमिन्धेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्यन्नादोभूयासꣳ स्वाहा ॥ १ ॥ इत्यनेनमंत्रेणप्रथमां ॥ ततोनेनैवमंत्रेणद्वितीयांसमिधमादधाति ॥ एषातइतिवासमिदाधानमंत्रः ॥ मंत्रसमुच्चयोवा ॥ ततउपविश्यपूर्ववत्परिसमूहनम् ॥ प० समूहनंअग्नेसुश्रवइत्यादिपंचभिर्मंत्रैःप्रतिमंत्रमिंधनप्रक्षेपः ॥ तत

स्तूष्णींपाणीप्रतप्यवक्ष्यमाणैःसप्तभिर्मंत्रैःप्रतिमंत्रेणमुखंविमार्जनं ॥ ॐ तनूपाऽअंग्नेसितन्वम्मेपाहि ॥ १ ॥ ॐ आयुर्दाऽअंग्नेऽस्यायुर्मेदेहि ॥ २ ॥ ॐ वर्च्चोदाऽअंग्नेसिवर्चौमेदेहि ॥ ३ ॥ ॐ अग्नेयन्मेतन्वाऽउनन्तन्मऽआपृंण ॥ ४ ॥ ॐ मेधांमेदेवःसविताऽआदधातु ॥ ५ ॥ ॐ मेधांमेदेवीसरस्वतीआदधातु ॥ ६ ॥ ॐ मेधामश्विनौदेवावाधत्तांपुष्करस्रजौ ॥ ७ ॥ इत्येतेमुखमार्जनमंत्राः ॥ अत्रशिष्टाचारप्राप्ताःकेचनपदार्थालिख्यंते ॥ ॐ अङ्गानिचमऽआप्यायंतां ॥ इतिमंत्रेणशिरःप्रभृतिपादांतसर्वांगालंभनं ॥ ततोदक्षिणहस्ताग्रेण ॥ ॐ वाक्कमऽआप्यायतां ॥ इतिमुखालंभनं ॥ ॐ प्राणश्चमऽआप्यायतां ॥ इतिनासिकयोरालंभनं ॥ ॐ चक्षुश्चमऽआ

---

१ वाक्यभेदात्प्रतिवाक्यंपाण्योःप्रतपनंमुखमार्जनंचेतिगदाधरः ॥ ललाटादिचुबुकांतंस्पृशेदितिहरिहरः ॥

प्यायतां ॥ इतिचक्षुषीयुगपत् ॥ ॐ श्रोत्रंचमऽआप्यायतां ॥ इतिदक्षिणश्रोत्रं ॥ अनेनैवमंत्रेणवामं ॥ ॐ यशोबलंचमऽआप्यायतां ॥ इतिबाव्होरुपस्पर्शनं ॥ ततस्त्र्यायुषकरणं ॥ भस्मनाललाटेग्रीवायांदक्षिणेऽंसेहृदिच ॥ ॐ त्र्यायुषञ्जमदग्नेः ॥ इतिललाटे ॥ ॐ कश्यपस्यत्र्यायुषम् ॥ इतिग्रीवायां ॥ ॐ यद्देवेषुत्र्यायुषम् ॥ इतिदक्षिणेऽंसे ॥ ॐ तन्नोअस्तुत्र्यायुषम्इतिहृदि ॥ ततःगोत्रनामपूर्वकंवैश्वानरादीनामभि[1]वादनं ॥ ततोब्रह्मचारीदक्षिणश्रोत्रेसमौकरौकृत्वांभिवादयेत् ॥ अमुकसगोत्रःअमुकप्रवरान्वितःअमुकशर्माअहंभोवैश्वानरअभिवादयामिइतित्रिः ॥ ३ ॥ अमुकसगोत्र० ॥ भोसू[2]र्यंअभिवादयामि ॥ ३ ॥ अमुकसगोत्र० ॥ भोआचार्यंअ

---

१ अभिवादनेपाणिग्रहणंनास्तिपादस्पर्शनंकार्यमितिहरिहरः ॥ २ सायान्हे वरुणं ॥

भिवादयामि ॥ ३ ॥ अमुकसगोत्र० ॥ भोअध्यापकगुरोत्वामभिवादयामि ॥ ३ ॥ ततआचार्यादिःप्रत्यभिवादयेत् ॥ अभिवादयस्वआयुष्मान्भवसौम्य अमुकशर्मन् ॥ इतिप्रत्यभिवादनं ॥ ॥ यथाहयाज्ञवल्क्यः ॥ दक्षिणंपदमालभ्यपाणिनादक्षिणेनच ॥ सव्येनसव्यंपृष्टव्यमभिवादनकर्मणि ॥ व्यवस्थपाणिनाकार्यमग्निंसूर्यंगुरुंतथा ॥ उपसंग्रहणंयथाइतिपाठभेदः ॥ उभाभ्यामपिहस्ताभ्यांकारयेच्छ्रोत्रसदृशौ इति ॥ अन्यथादोषोस्ति यथा ॥ जन्मप्रभृतियत्किंचिच्चिकित्साधर्ममाचरत् ॥ सर्वंतन्निष्फलंयातिएकहस्ताभिवादनादिति ॥ अभिवादनंतु ॥ भोशब्दंकीर्तयेदंतेस्वस्यनाम्नोभिवादने ॥ आयुष्मान्भवसौम्येतिवाच्यःप्रत्यभिवादनेइति ॥ प्रत्यभिवादनाकरणे ॥ योनवेत्त्यभिवादस्यविप्रःप्रत्यभिवादनं ॥ नाभिवाद्यःसविदुषायथाशूद्रस्तथैवसः ॥ इत्यभिवादनं ॥ ॥ संध्यावंदनाधिकारस्तु ॥ यावद्ब्रह्मोपदेशोनताव

त्संध्यादिकंचन ॥ ततोमध्यान्हसंध्यादिसर्वंकर्मसमाचरेदिति ॥ ॥ अत्रभिक्षाचर्यचरणं ॥ ब्रह्मचारीपात्रंगृहीत्वा ॥ भवतिभिक्षांदेहि ॥ इत्येवमुक्त्वाब्राह्मणोभिक्षां याचते ॥ भिक्षाग्रहणोत्तरंब्रह्मचारी ॥ ॐ स्वस्तीत्याशीर्वचनंदद्यात् ॥ भिक्षांभवतिदेहीतिक्षत्रियः ॥ भिक्षांदेहिभवतीतिवैश्यः ॥ यत्रप्रत्याख्यानंनकुर्वंतितत्रभिक्षार्थंगच्छेत् ॥ तिस्रोवाभिक्षाग्राह्याःषड्द्वादशाऽपरिमितावा ॥ आत्मनआचार्यस्यच आहारपरिमितावधिवा ॥ मातुःसकाशात्प्रथमाभिक्षांयाचेतेत्येकेआचार्यामन्यंते॥ अयंप्रथमोधर्मेतिकर्कः ॥ एवंयथोक्तांभिक्षांभिक्षयित्वाआचार्यायभैक्षंनिवेदयेत् ॥ भुंक्ष्वेत्याचार्यानुज्ञातोभिक्षांस्वीकुर्यादितिभिक्षाचर्यचरणं ॥ वाग्यतोहः शेषंतिष्ठे

---

१ अत्रमध्यान्हसंध्याकार्येत्युक्तंगदाधरे प्रयोगपरिजातेच ॥ नेतिकृष्णभट्टीकारः ॥ ब्रह्मयज्ञस्तुद्वितीयदिनमारभ्यगायत्र्याकार्यइतिधर्मसिंधुः ॥

दित्येके अहिर्ठंसन्नरण्यात्समिधऽआहृत्यपूर्ववदाधायवाचंविसृजते ॥ वाग्यतोमौनी ॥ अहःशेषंतिष्ठेत्इति ॥ वाग्यमनेनियमःकेचिन्मते ॥ नेतिगदाधरः ॥ भिक्षानिवेदनोत्तरंयावदस्तमयंगुरुसेवनाध्ययनेतिष्ठेदित्येके आचार्यामन्यंते ॥ अहिंसन्इतिअच्छिंदन्स्वयंभग्नाः समिध आहृत्यपूर्ववदाधायइति ॥ पूर्ववत्संध्योपासनपूर्वकंतस्मिन्नेवाग्नौपरिसमूहनादित्र्यायुषकरणांतंसमिदाधानंअभिवादनंचकुर्यादित्यर्थः ॥ वाचंविसृजतइति ॥ वाग्विसर्गः ॥ यावद्व्रतंतावदग्निरक्षणंत्रिरात्रंवा ॥ अतआरभ्यआब्रह्मचर्यं परिसमाप्तेर्ब्रह्मचारिणोयमानियमाःकथ्यंते ॥ अधःशायीस्यात् ॥ अक्षारलवणाशीस्यात्॥दंडधारणंकर्तव्यं ॥ अरण्यात्स्वयंप्रशीर्णाःसमिधआहृत्य ॥ सायंप्रातःसंध्योपासनपूर्वकपरिसमूहनादित्र्यायुषकरणांतंयथोक्तंकर्मकर्तव्यं ॥ गुरुशुश्रूषाकर्तव्या ॥ सायंप्रातर्भोजनार्थेंभोजनसन्निधानेवारद्वयंभिक्षाचर

र्णंकर्तव्यं ॥ मधुमांसाशनंनकर्तव्यं ॥ मज्जनंनकर्तव्यं ॥ उद्धृतोदकेनस्नायादित्यर्थः ॥ कुशासनोपरिमसुरिकाद्युपधानंकृत्वानोपविशेत् ॥ स्त्रीणांमध्येअवस्थानंनकर्तव्यं ॥ अनृतंनकर्नव्यं ॥ अदत्तंनगृण्हीयात् ॥ स्मृत्यतरोक्ताश्चयमनियमाअनुष्ठेयाः ॥ यथा ॥ परिधृतवस्त्रंक्षालनंविनानदधीत ॥ भग्नंसुसँछिद्रितंविकृतंवस्त्रंनदधीत ॥ अस्तसमयेभास्करावलोकनंनकुर्यात् ॥ शुल्कवदनंपरिवारादिवर्जयेत् ॥ पर्युषितमन्नंभिस्सटान्नंचनभक्षयेत्॥कांस्यायसवंगमृद्पात्रेभोजनंतेनपानंचनकुर्यात् ॥ तांबूलभक्षणंनकुर्यात् ॥अभ्यंगमक्ष्णोरंजनमुपानच्छत्रादर्शंचवर्जयेत् ॥ इति॥ यस्यैवमध्ययवयसोश्चत्वारोवेदामयापठितव्याः सोष्टाचत्वारिंशद्वर्षाणिवेदब्रह्मचर्यंचरेदिति ॥ स्मृत्युक्तान्पंचाशत्संख्याकान्ब्राह्मणान्भोजयिष्येइति॥ ॥अथाशीर्वादः

॥ हरिःॐ ब्रह्मचर्यमागामित्याह ॥ ब्रह्मणऽएवैतदात्मानन्निवेदयतिब्रह्मचार्यसानी

त्याहब्रह्म॒णऽए॒वैत॒दात्मा॒नम्प॒रिददात्य॒थैनमाहकोना॒मासी॒तिप्रजा॒पतिर्वैकः॒प्राजापत्यमे॒वैनंन्त॒क्कृत्वो॒पनयते ॥१॥ अ॒थास्यह॒स्तंगृण्हाति॒ ॥ इंद्रस्यब्रह्मचा॒र्यस्य॒ग्निराचा॒र्यस्त॒वाहमाचा॒र्यस्तवासावि॒त्येतेवैश्रे॒ष्ठेब॒लिष्ठेदेव॒तेऽएता॒भ्यामे॒वैनठंश्रे॒ष्ठाभ्याम्ब॒लिष्ठाभ्यान्देव॒ताभ्याम्प॒रिददाति॒तथाहास्यब्र॒ह्मचारीनकां॒चना॒र्तिमा॒र्च्छतिनसय॒ऽएवंवेद ॥ २ ॥ अथैनंम्भूते॒भ्यःप॒रिददाति ॥ प्र॒जाप॒तयेत्वापरिददामिदेवा॒यत्वासवित्रेप॒रिददामी॒त्ये॒तेवैश्रे॒ष्ठेव॒र्षिष्ठेदेव॒तेऽएता॒भ्यामे॒वैनठंश्रे॒ष्ठाभ्याम्व॒र्षिष्ठाभ्यान्देव॒ताभ्याम्प॒रिददाति॒तथाहास्यब्र॒ह्मचारीनका॒ञ्चना॒र्त्तिमा॒र्च्छतिनसयऽएवंवे॒द ॥३॥ अद्भ्यस्त्वोषधीभ्यःप॒रिददामीति ॥ तदेनमद्भ्यश्चौ॒षधीभ्यश्चप॒रिददातिद्या॒वपृथिवी॒भ्यान्त्वापरिददा

मीतितदेनमाभ्यान्द्यावापृथिवीभ्याम्परिददातिययोरिदर्ठंसर्वमधिविश्वेभ्यस्त्वाभूतेभ्यःपरिददाम्यरिष्ट्याऽइतितदेनर्ठंसर्वेभ्योभूतेभ्यःपरिददात्यरिष्ट्यैतथाहास्यब्रह्मचारीनकाञ्चनार्तिमार्च्छतिनसयऽएवंवेद॥४॥ब्रह्मचार्यसीत्याह॥ब्रह्मणऽएवैनंन्तत्परिददात्यपोशानेत्यमृतँवाऽआपोमृतमशानेत्येवैनन्तदाहकर्मकुर्वितिवीर्यंवैकर्मवीर्यङ्कुर्वित्येवैनन्तदाहसमिधमाधेहीतिसमित्स्वत्मानन्तेजसाब्रह्मवर्चसेनेत्येवैनन्तदाहमासुषुप्याऽइतिमामृथाऽइत्येवैनन्तदाहापोशानेत्यमृतँवाऽआपोमृतमशानेत्येवैनन्तदाहतदेनमुभयतोऽमृतेनपरिगृण्हातितथाहास्यब्रह्मचारीनकञ्चनार्तिमार्च्छतिःनसयऽएवंवेद ॥ ५ ॥ अथास्मैसावित्रीमन्वाह ॥ तार्ठंहस्मैताम्पुरासंवत्सरेन्वाहु

संवत्सरसम्मितावैगर्भाःप्रजायन्तेजातऽएवास्मिंस्तद्वाचन्दध्मऽइति ॥ ६ ॥ अथषट्सुमासेषु ॥ षड्वाऽऋतवःसँवत्सरस्यसँवत्सरसम्मितावैगर्भाःप्रजायन्तेजातऽएवास्मिंस्तद्वाचन्दध्मऽइति ॥ ७ ॥ अथचतुर्विꣳशत्यहे ॥ चतुर्विꣳशतिर्वैसंवत्सरस्यार्धमासाःसँवत्सरसम्मितावैगर्भाःप्रजायन्तेजातऽएवास्मिंस्तद्वाचन्दध्मऽइति ॥ ८ ॥ अथद्वादशाहे ॥ द्वादशवैमासाःसंवत्सरस्यसंवत्सरसम्मितावैगर्भाःप्रजायन्तेजातएवास्मिँस्तद्वाचन्दध्मऽइति ॥ ९ ॥ अथषडहे ॥ षड्वाऽऋतवःसँवत्सरस्यसंवत्सरसम्मितावैगर्भाःप्रजायन्तेजातऽएवास्मिँस्तद्वाचन्दध्मऽइति ॥ ९ ॥ अथत्र्यहे ॥ त्रयोवाऽऋतवःसँवत्सरस्यसँवत्सरसम्मितावैगर्भाःप्रजायन्तेजातऽएवास्मिँस्तद्वाच

न्दध्मऽइति ॥ ११ ॥ तदपिश्लोकङ्गायन्ति ॥ आचार्योंगर्भीभवतिहस्तमाधायदक्षिणम् ॥ तृतीयस्याठंसजायतेसावित्र्यासहब्राह्मणऽइतिसद्योहत्वावब्राह्मणायानुब्रूयादाग्नेयोवैब्राह्मणःसद्योवाऽअग्निर्जायतेतस्मात्सद्यऽएवब्राह्मणायानुब्रूयात् ॥ १२ ॥ ताठंहैतामेके ॥ सावित्रीमनुष्टुभमन्वाहवाग्वाऽअनुष्टुप्तदस्मिन्वाचन्दध्मऽइतिनतथाकुर्याद्योहैनन्तत्रब्रूयादान्वाऽअयमस्यवाचमादितमूकोभविष्यतीतीश्वरोहतथैवस्यात्तस्मादेताङ्गायत्रीमेवसावित्रीमनुब्रूयात् ॥ १३ ॥ अथहैकेदक्षिणतः ॥ तिष्ठतेवासीनायवान्वाहुर्नतथाकुर्याद्योहैनन्तत्रब्रूयादुल्बन्वाऽअयमिममजीजनतदुल्वोभविष्यतीतीश्वरोहतथैवस्यात्तस्मात्पुरस्तादेवप्रतीचेसमीक्षमाणायानुब्रूयात् ॥ १४॥

तांवैयच्छोन्वाह ॥ त्रयोवैप्राणाःप्राणऽउदाना०व्यानस्तानेवास्मिंस्तद्दधात्यथार्धर्चशोद्वौवाऽइमौप्राणौप्राणोदानावेवप्राणोदानावेवास्मिँस्तद्दधात्यथकृत्स्नामेकोवाऽअयम्प्राणःकृत्स्नऽएवप्राणमेवास्मिंस्तत्कृत्स्नन्दधाति ॥१५॥ तदाहुः ॥ नब्राह्मणम्ब्रह्मचर्यमुपनीयमिथुनञ्चरेद्गर्भोवाऽएषभवतियोब्रह्मचर्यमुपैतिनेदिमम्ब्राह्मणँविषिक्ताद्रेतसोजनयानीति ॥ १६ ॥ तदुवाऽआहुः ॥ काममेवचरेद्द्वय्योवाऽइमाःप्रजादै०व्यश्चैवमनुष्यश्चतावाऽइमामनुष्यःप्रजाःप्रजननात्प्रजायन्तेच्छन्दाꣳसिवैदै०व्यःप्रजास्तानिमुखतोजनयतेतत ऽएतज्जनयतेतस्मादुकाममेवचरेत् ॥१७॥ तदाहुः ॥ नब्रह्मचारीसन्मध्वश्नीयादोषधीनाँवाऽएषपरमोरसोयन्मधुनदन्नाद्यस्यान्तङ्गच्छानीत्यथहस्माह

श्वेतकेतुरारुणेयोब्रह्मचारीसन्मध्वश्नँस्त्रय्यौवाऽएतद्विद्यायैशिष्टँयन्मधुसतुरसोयस्यै
दृक्शिष्टमितियथाहवाऽऋचंवायजुर्वासामवाभिव्याहरेत्तादृक्तद्यऽएवंविद्वान्ब्रह्मचा
रीसन्मध्वश्नातितस्मादुकाममेववाश्नीयात् ॥ १८ ॥ इत्येकादशेकाण्डेतृतीयप्रपा
ठकेपंञ्चमंब्राह्मणम् ॥ ॐब्रह्मवैमृत्यवेप्रजाः ॥ प्रायच्छत्तस्मैब्रह्मचारिणमेवनप्राय
च्छत्सोब्रवीदस्तुमह्यमप्येतस्मिन्भागऽइतियामेवरात्रिꣳसमिधन्नाहराताऽइतित
स्माद्याꣳरात्रिम्ब्रह्मचारीसमिधन्नाहरत्यायुषऽएवतामवदायवसतितस्माद्ब्रह्मचारीस
मिधमाहरेन्नेदायुषोवदायवसानीति ॥ १ ॥ दीर्घसत्त्रँवाऽएषऽउपैति ॥ यो
ब्रह्मचर्यमुपैतिसयामुपयन्त्समिधमादधातिसाप्रायणीयायाꣳस्नास्यन्त्सोदयनीया

थया॒ऽअ॒न्तरे॒णस॒त्त्या॒ऽए॒वास्यता॒ब्राह्मणो॒ब्रह्म॒चर्य॒मु॒पय॒न् ॥ २ ॥ चतु॒र्धा॒भूता॒निप्र॒वि
शति ॥ अ॒ग्नि॒म्पदा॒मृत्यु॒म्पदाचार्य॒म्प॒दात्म॒न्येवास्यचतुर्थःपा॒दःप॒रिशिष्यते ॥ ३ ॥
सय॒दग्न॒येसामि॒धमाहु॒रति ॥ य॒ऽए॒वास्याग्नौपा॒दस्त॒मेव॒तेनपरिक्रीणातित॒ꣳसंस्कृ॒त्या
त्म॒न्धतेस॒ऽएनमा॒विशति॒ ॥ ४ ॥ अथय॒दात्मा॒न ॥ न्दरिद्रीकृ॒त्येवा॒न्ह्री॒र्भूत्वाभिक्ष
तेय॒ऽए॒वास्यमृत्यौपा॒दस्त॒मे॒व॒तेन॒प॒रिक्रीणातित॒ꣳसंस्कृ॒त्यात्म॒न्धत्तेस॒ऽएनमा॒विश
ति ॥ ५ ॥ अ॒थय॒दाचार्यवचस॒ङ्क॒रोति ॥ य॒दाचार्या॒यक॒र्मकरो॒तियऽएवास्याचार्यै
पा॒दस्त॒मेव॒ते॒नप॒रिक्रीणाति॒त॒ꣳस॒ंस्कृ॒त्यात्म॒न्धत्तेस॒ऽएनमा॒विशति ॥ ६ ॥ न॒हवै॒स्ना
त्वा ॥ भि॒क्षेता॒पहवै॒स्नात्वाभि॒क्षाञ्जयत्य॒पज्ञातीना॒मशनाया॒मपपितृणाꣳस॒ऽएवँ॒विद्वा

न्यस्याऽएवाभूयिष्ठꣳश्लाघ्येतताम्भिक्षेतेत्याहुस्तच्छ्लोक्यमितिसयद्यन्याम्भिक्षित
न्यान्नविन्देदपिस्वामेवाचार्यजायाम्भिक्षेताथोस्वाम्मातरन्नैनꣳसप्तम्यभिक्षितातो
यात्तमेवम्विद्वाꣳसमेवञ्चरन्तꣳसर्वेवेदाऽआविशन्तियथाहवाऽअग्निःसमिद्धोरोचतऽ
एवꣳहवैसस्नात्वारोचतेयऽएवम्विद्वान्ब्रह्मचर्यञ्चरति ॥ ७ ॥ अष्टावष्टौकृत्वो ॥
ब्रह्मवर्चसकामस्याभिषुणुयादित्याहुरष्टाक्षरावैगायत्रीब्रह्मगायत्रीब्रह्मवर्चसीहैवभ
वति ॥ ८ ॥ सयःकामयेत ॥ ब्रह्मवर्च्चसीस्यादितिवसन्तेसऽआदधीतब्रह्मवै
वसन्तोब्रह्मवर्च्चसीहैवभवति ॥ ९ ॥ शतमानम्भवति ॥ शतायुर्वैपुरुषःशते
न्द्रियऽआयुरेवेन्द्रियँवीर्यमात्मन्धत्ते ॥ १० ॥ कां० ११, प्र० २,

ब्रा० ६ ब्रह्मवर्चसीभव ॥ आचार्यादीन्गंधादिभिःसंपूज्यतेभ्यश्चदक्षिणांदत्वातैराशिषोगृहीत्वा ॥ स्थापितमात्रादिदेवकोत्थापनंमंडपोद्वासनंचकार्यं ॥ तद्विधिश्चाग्रेवक्ष्यते ॥ इतिसंस्कारभास्करेउपनयनप्रयोगःसमाप्तः ॥ ॥ अथोपनयनादूर्ध्वंब्रह्मचारिणःसायंप्रातरग्निनित्योपासनविधिः ॥सायंसंध्योपासनंकृत्वाधृतदंडादिर्गृहीतेंधनाज्यसमित्स्थापिताग्निसमीपेस्वासनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेममसतेजोब्रह्मवर्चससिध्यर्थंअग्निनारायणप्रीतयेचसायमग्निपरिसमूहनंसमिदाधानादिकंचकरिष्ये ॥ अग्निमुखंकृत्वाचत्वारिशृंगेतिध्यात्वागंधादिनाभ्यर्च्य ॥ ततोग्ने सुश्रवइत्यादिपंचभिर्मंत्रैः प्रतिमंत्रंघृतप्लुतेंधनप्रक्षेपः ॥ जलेनाग्निंपर्युक्ष्य ॥ उत्थायआज्यप्लुतसमिधमेकांगृहीत्वाऽग्नयेसमिधमाहार्षमित्यारभ्यभूयासꣳस्वाहेत्यंतंमंत्रंपठित्वातामग्नौजुहुयात् ॥ अनेनैवमंत्रेणद्वितीयांतथातृतीयांसमि

धमादध्यात् ॥ पुनरग्ने सुश्रवइत्यादिपंचभिर्मंत्रैरिंधनंप्रक्षिप्य॥ तूष्णींपाणीप्रतप्य तनूपाअग्नेत्यादिमंत्रैः प्रतिमंत्रंमुखविमार्जनं ॥ पुनःअंगानिचमइत्यादियशोबलमित्यंतमंत्रैःप्रतिमंत्रंप्रत्यंगालंभनंकार्यं ॥ ततस्त्र्यायुषमितिप्रतिमंत्रेणभस्मललाटेग्रीवायांदक्षिणेंऽसेहृदिचसंधार्यं ॥ ततोगोत्रनामपूर्वकंवैश्वानरादीनामभिवादनं ॥ अनेनसायमग्निपरिचरेणअग्निनारायणःप्रीयतां ॥ एवंप्रातःस्नानसंध्योपासनोत्तरंआचमनादिदेशकालकीर्तनोत्तरंप्रातरग्निपरिसमूहनंसमिदाधानादिकंचकरिष्येइत्यूहेनइंधनप्रक्षेपादिअभिवादनांतंसर्वंकर्मकुर्यादिति ॥ उपनयनाग्नौनष्टेपुनरुत्पादनविधिः ॥ रेणुकारिकायां ॥ व्रताग्निनाशेव्रतिनात्रीन्कृच्छ्रांश्चव्रतंचरेत् ॥ प्राग्वदग्निंप्रतिष्ठाप्यकटिसूत्रादिकंपुनः ॥ स्पृशन्मंत्रान्पठेदग्नावाज्येनाहुतिपूर्ववत्॥ नगायत्र्युपदेशंचकृत्वाग्निपरिशुश्रूषांइति ॥ ॥ अथयमलजातपुत्रयोरुपनयनेनिर्णयः ॥ ॥

संस्कारक्रमार्थंज्येष्ठकनिष्ठभावउच्यते ॥ मनुः ॥ जन्मज्येष्ठेनचाव्हानंसुब्रह्मण्यास्वपिस्मृतं ॥ यत्तयोश्चैवगर्भेषुजन्मतोज्येष्ठतास्मृताइति ॥ देवलः ॥ यस्यजातस्ययमयोःपश्यंतिप्रथमंमुखं ॥ संतानःपितरश्चैवतस्मिन्ज्येष्ठ्यंप्रतिष्ठितं ॥ भागवतेतु ॥ द्वौतदाभवतोगर्भौसूतिर्वैशाविपर्ययादित्युक्तेः ॥ पश्चादुत्पन्नस्यज्यैष्ठ्यमुक्तं॥ वैद्यकेप्यात्रेयसंहितायां ॥ यदाविशेद्विधाभूतंबीजंपुष्पंपरिक्षरत् ॥ तदाभवेद्विधागर्भःसूतिर्वैशाविपर्ययादिति ॥ तथापिबहुसंमतंमनुवचनंयुक्तं ॥ निर्णयसिंधौ ॥ एकस्मिन्वासरेप्राप्तेकुर्याद्यमलजातयोः ॥ क्षौरंचैवविवाहंचमौंजीबंधनमेवचेति ॥ यमलयोर्युगपदेवसंस्कारकरणेएकमेवनांदीश्राद्धंकार्यमितिधर्मसिंधौनांदीश्राद्धप्रकरणांतेउक्तं ॥ यमलयोरेककालेएकमंडपेवासमानसंस्कारौनदोषायेतिधर्मसिंधौविवाहनिषेधापवादप्रकरणेउक्तं ॥ रेणुकारिकायां ॥ एकस्मिन्वत्सरेचैववासरेमंडपेत

था ॥ कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोः ॥ एकंचाभ्युदयंकार्यंपृथग्वेद्यौव्रतेषुच ॥ पृथक्कुर्वीतसंभारान्पृथगाचार्यमेवच ॥ यमलेकन्यकोद्वाहेपृथग्वरौचवेदिके ॥ पृथग्यौतिकदानंचऐरिण्यादितथैवचेति ॥ संग्रहे ॥ जातैककालेयमलौसुतौव्रतेतथैवकन्येअपिऊढकाले ॥ आचार्ययुग्मंखलुवेदियुग्मंकुर्वीतनांदीमुखमेकमेवेति ॥ अथयमलपुत्रयोः उपनयनेसर्वसंभारान्प्राग्वत्द्विगुणंसंपाद्य ॥ वेदिकेचद्वेविरच्यआचार्यौद्वौइति ॥ ॥ अथयमलपुत्रयोःउपनयनप्रयोगेविशेषः ॥ कर्तापत्न्यासहमंगलंस्नात्वाऽहतवाससीपरिधायधृतमंगलतिलकोमंडपमध्येशुभासनेप्राङ्मुखउपविश्यस्वदक्षिणतः पत्नींतद्दक्षिणतःयमलजातकुमारौउपवेश्यपवित्रपाणिराचांतःप्राणानायम्यदेशकालकीर्तनांतेअनयोःयमलजातकुमारयोःद्विजत्वसिद्ध्यैवेदाध्ययनाधिकारार्थंचउक्तप्रकारेणज्येष्ठस्यस्वयंकनिष्ठस्यान्यद्वाराउपनयनाख्यसं

स्कारौअद्यवाश्वःकरिष्ये ॥ ममोपनेतृत्वाधिकारसिध्यर्थंकृच्छ्रत्रयात्मकप्रायश्चित्तपूर्वकंद्वादशसहस्रंअथवाद्वादशाधिकसहस्रंगायत्रीजपंस्वयंवाब्राह्मणद्वाराअहमाचरिष्ये ॥ कुमारेणापिकामचारकामवादकामभक्षणादिदोषपरिहारार्थंकृच्छ्रत्रयात्मकप्रायश्चित्तपूर्वकंब्राह्मणद्वाराद्वादशसहस्रंवाद्वादशाधिकसहस्रंगायत्रजिपंअहमाचरिष्ये ॥ पुनःपिता ॥ अनयोःकुमारयोःग्रहानुकूलतासिध्यर्थंग्रहयज्ञंकरिष्ये ॥ तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंग्रहयज्ञांगंआचार्यादिवरणंदिग्रक्षणंपंचगव्यकरणंभूमिपूजनंपंचभूसंस्कारान्अग्निप्रतिष्ठापनंग्रहस्थापनंरुद्रकलशस्थपनंचाद्यकरिष्ये ॥ कालांतरेग्रहयज्ञकरणेसंकल्पेयथाकालंग्रहयज्ञंकरिष्येइत्यूहःकर्तव्यः॥ सर्वथाग्रहयज्ञाकरणेग्रहयज्ञसंकल्पमेवनकुर्यात् ॥ तत्पक्षेनांदीश्राद्धांतंसंकल्पंकु

र्यात् ॥ नांदीश्राद्धोत्तरंपूर्वोक्तप्रकारेणगृहमध्येमातृकाःस्थापयेत ॥ ग्रहयज्ञकरणे ग्रहयज्ञांतंकुर्यात् ॥ यदाचौलेनसहोपनयनंक्रियतेतदासंकल्पेचौलोपनयनाख्येकर्मणीअहंकरिष्येइत्यूहः ॥ अथपितास्वभ्रात्रादिभ्यःयमलजातकनिष्ठकुमारस्यचूडोपनयनादिवाउपनयनादिसंस्कारस्याधिकारंदद्यात् ॥ तद्यथा ॥ आदौगणपतिं संपूज्य ॥ अथाधिकारदानं ॥ भ्रात्रेममास्ययमलजातकनिष्ठकुमारस्यचूडोपनयनादिवाउपनयनादिसमावर्तनांतसंस्कारकर्माधिकारार्थंत्वामहंवृणे ॥ भ्रातरंगंधवस्त्रादिनापूजयेत् ॥ तथाचसंग्रहे ॥ भ्रातरस्यकुमारस्यचूडादिस्नातकावधि ॥ संस्कारकर्मकरणाधिकारंतेददाम्यहं ॥ १ ॥ इत्युक्त्वाकुमारंभ्रातुरुत्संगेदद्यात् ॥ तद्यथा ॥ गृहीतावक्ष्यमाणमंत्रेणगृण्हीयात् ॥ चूडादिस्नातकांतानिकर्माणितुतवाज्ञया ॥ भ्रातरस्यकुमारस्यकरिष्येहंस्वपुत्रवत ॥ इतिमंत्रेणकुमारंगृहीत्वाकुंकुमा

दिभिरलंकृत्यप्रयोगवत्संस्कारान्कुर्यात् ॥ अथयमलजातकन्यकोद्वाहप्रकारः ॥ तत्रसंभाराः ॥ वेद्यौद्वे ॥ यौतिकद्वयं ॥ सोपस्करंऐरिण्याख्यवंशपात्रद्वयं ॥ अंतःपटवस्त्रेद्वे ॥ मधुपर्कादिसर्वसामग्रीद्वयंसंपाद्येति ॥ यमलजातकन्ययोर्दिनांतरेणोद्वाहकरणेपितुरेवाधिकारः ॥ तत्रसंकल्पेममास्याः कन्यकायाःइत्यूहःकार्यः ॥ यमलजातकन्ययोरुद्वाहस्यैकदिनेकरणपक्षेनांदीश्राद्धांतंपितैवकुर्यात् ॥ विवाहदिनकृत्यंतुभ्रात्रादिनाकार्यं ॥ अत्रप्रधानसंकल्पेममानयोःकुमार्योःइत्यूहःकर्तव्यः ॥ दातृप्रतिगृहीत्रोरधिकारदानेप्रतिग्रहेचविशेषः ॥ अस्याःकुमार्याःइत्यूहः कर्तव्यःउभौगणेशंसंपूज्य ॥ भ्रातर्ममास्याःयमलजातकन्यायाःविवाहसंस्कारकर्माधिकारार्थंत्वामहंवृणे॥भ्रातरंगंधवस्त्रादिनापूजयेत्॥ संग्रहेअधिकारदानमन्त्रः॥ भ्रातर्ममास्याःकन्यायाःविवाहोत्साहकर्मसु ॥ अधिकारंप्रदास्यामिकुरुकर्मयथो

दितं ॥ इतिमंत्रेणकन्यांभ्रातुरुत्संगेदद्यात् ॥ गृहीतावक्ष्यमाणमंत्रेणगृह्णीयात् ॥ विवाहादीनिकर्माणिसांगानितुतवाज्ञया ॥ भ्रातरस्याःकन्यकायाःकरिष्येहंयथोदितं ॥ इतित्रेणकन्यांगृहीत्वाकुंकुमादिभिरलंकृत्यविवाहप्रयोगोक्तवत्संस्कारंकुर्यात्॥ विवाहोपनयनयोर्दैवकोत्थापनंपितैवकुर्यादितियमलजातविवाहोपनयनसंस्कारप्रकरणं ॥ अथविकलांगाद्युपनयनप्रकारः ॥ स्मृत्यर्थसारे ॥ षंढांधवधिरस्तब्धजडगद्गदपंगुषु ॥ कुब्जवामनरोगार्तशुष्कांगविकलांगिषु ॥ ध्वस्तपुंस्त्वेषुचैतेषुसंस्काराःस्युर्यथोचितं ॥ मत्तोन्मत्तौनसंस्कार्यौपतितश्चतथैवच ॥ तदपत्यंतुसंस्कार्यमपरेत्वाहुरन्यथेति ॥ पतितलक्षणंतु ॥ आषोडशाद्वर्षाद्ब्राह्मणस्यानतीतःकालोभवतिद्वाविंशद्वर्षाद्राजन्यस्यचतुर्विंशाद्वर्षाद्वैश्यस्य ॥ एतद्वर्षेऽनतिक्रांतएवोपनयनकालोवभति ॥ अतऊर्ध्वंपतितसावित्रीकाभवंति ॥ तेनैतान्नोपनयेयुर्नाध्यापयेयु

नैयाजयेयुर्नचैभिर्व्यवहरेयुस्तदपत्यंसंस्कारयेयुः॥ ब्राह्मण्यांब्राह्मणादुत्पन्नोब्राह्मणऽएवेतिश्रुतेः॥ अन्येतुसंस्कार्यमित्याहुः॥ होममाचार्यःकरोति॥ उपनयनंआचार्यसमीपानयनं॥ अग्निसमीपेवा॥ सावित्रीवाचनंवा॥ अन्यदंगंयथासंभवंकार्यमिति॥ त्रयाणांपक्षाणामन्यतमेनप्रधानासिद्धिरित्याशयः॥ मूकबधिरादेःसावित्रीवाचनासंभवेस्पृष्ट्वाआचार्येणजपःकार्यः॥ वाचकश्चेत्तर्हिमंत्रोलिखित्वाचार्येणदर्शयितव्यः॥ तेनमनसाचिंतितव्यः॥ यथा॥ संस्कारमंत्रहोमादीन्करोत्याचार्यएवतु॥ उपनेयाश्चविधिवदाचार्यस्यसमीपतः॥ आनीयाग्निसमीपेतुसावित्रीस्पृष्ट्वावाचयेदितिपारस्करवचनं॥ अन्यत्समानं॥ उपनेयस्यवासःपरिधानादिषुयेसंस्कारमंत्रास्तानाचार्यःपठेदित्यर्थः॥ तेषांत्रिरात्रोर्ध्वंनदीर्घव्रतं॥इतिसंस्कारभास्करेविकलांगाद्युपनयनप्रकारः॥ अथपुनरुपनयनकारणंतद्विधिश्च॥ तत्रपु

नरुपनयनकारणमाह ॥ तच्चप्रत्यवायनिमित्तकंप्रायश्चित्तभूतंपुनरुपनयनमाद्यं॥तच्च जातकर्मादिसहितंतद्रहितंप्रायश्चित्तांतरसहितंकेवलंचेत्यनेकविधं॥कृतस्योपनयनस्योक्तकालाद्यंगवैगुण्येनवैफल्यापत्तावपरं ॥ तत्रप्रथमंयथा॥ अमत्या औषधान्तरानाश्यरोगनाशार्थंपैष्ट्याःसुरायाःपानेत्रिमासकृच्छ्राचरणंपुनरुपनयनंच ॥ मत्या पैष्ट्यन्यसुरायाऔषधार्थंपानेकृच्छ्रातिकृच्छ्रौपुनरुपनयनंचपैष्टीपानेद्वादशाब्दं ॥ अज्ञानाद्वारुणीगौडीमाध्वीसुरापीताचेत्तप्तकृच्छ्रंपुनरुपनयनं॥अज्ञानाद्रेतोविण्मूत्राणामशनेसुरासंसृष्टान्नजलादिभक्षणेचतप्तकृच्छ्रंपुनःसंस्कारश्च ॥ ज्ञात्वाविण्मूत्राद्यशनेचांद्रायणपुनःसंस्कारौ ॥ लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटनरगोमांसभक्षणेद्विजातीनांतत्तत्प्रायश्चित्तांतेपुनरुपनयनं ॥ माधवमतेरक्तालशुनकृष्णवृंताकभक्षणेनपुनरुपनयनं ॥ अविखरोष्ट्रहस्तिनीवडवामानुषीक्षीरपानेतप्तकृच्छ्रंपुनःसं

स्कारश्च ॥ रासभोष्ट्राद्यारोहणेकृच्छ्रंपुनसंस्कारश्च ॥ इदंहेमाद्रिमतमिति ॥ सिंधौक्वचित् ॥ मिताक्षरास्मृत्यर्थसारादिमतेरासभोष्ट्रारोहेउपवासत्रयादिमात्रंनतुपुनःसंस्कारः ॥ कौस्तुभाशयोप्येवं ॥ वृषभारोहणेअमत्याकृच्छ्रंमत्याकृच्छ्रत्रयादि ॥ केचिद्वृषारोहेपुनःसंस्कारंकुर्वंतितत्रमूलंमृग्यं ॥ एवमजबस्तमहिषारोहेपि ॥ मांसभक्षकमलभक्षकपशोर्विट्भक्षणेपुनरुपनयनमात्रं ॥ केचिन्मानुषमलभक्षणेपिपुनःसंस्कारमात्रमाहुः ॥ प्रेतशय्याप्रतिग्राहीपुनःसंस्कारमर्हति ॥ जीवतोमृतवार्तांश्रुत्वापुत्रादिनांऽत्यकर्मकरणेतंघृतकुंभेनिमज्ज्योत्धृत्यस्नापयित्वाजातकर्माद्युपनयनांतसंस्कारान्कृत्वात्रिरात्रव्रतांतेपूर्वभार्ययांतस्यांमृतायामन्यभार्ययावाविवाहःकार्यः ॥ आहिताग्निश्चेत्पुनराधानायुष्मदित्यादि ॥ तीर्थयात्रांविनाकलिंगांगवंगांध्रसिंधुसौवीरप्रत्यंतवासिदेशगमनेपुनःसंस्कारः ॥ चांडालान्नभक्षणेचांद्रायणंबु

द्धिपूर्वंभक्षणंकृच्छ्राब्दंउभयत्रपुनः संस्कारश्च अजिनंमेखलादंडोभैक्ष्यचर्याव्रतानिच॥निवर्ततेद्विजातीनांपुनःसंस्कारमर्हति ॥ वपनमेखलेतिस्मृत्यंतरेपाठः॥ एवंगणिकान्नभक्षणेपिब्रह्मचारिणोमधुमांसाशनेपुनरुपनयनंप्राजापत्यंत्रिरात्रोपवासोवा ॥ मत्याभक्षणेपराकः ॥ अभ्यासेद्विगुणंपुनःसंस्कारश्च ॥ पितृमातृगुरुभ्योभिन्नस्यप्रेतस्यांत्यकर्मकरणेब्रह्मचारिणःपुनरुपनयनं ॥ हस्तमथितदधिभक्षणेबहिर्वेदिपुरोडाशाशनेअभ्यासेकृच्छ्रःपुनःसंस्कारश्च ॥ यःसंन्यासंगृहीत्वाततोनिवृत्त्यगार्हस्थ्यंचिकीर्षतिसषण्मासंकृच्छ्रान्कृत्वाजातकर्मादिसंस्कारैःसंस्कृतःशुद्धोगार्हस्थ्यंकुर्यात्॥ एवमनशनंमरणार्थंसंकल्प्यानिवृत्तोपिकुर्यात् ॥ कर्मनाशाजलस्पर्शात्करतोयाविलंघनात् ॥ गंडकीबाहुतरणात्पुनःसंस्कारमर्हति ॥ ॥ अथानध्यायादेश्चद्वितीयं ॥ प्रदोषेनिश्यनध्यायेमंदेकृष्णेगलग्रहे ॥ अपराण्हेचोपनीतःपुनःसंस्कारमर्हति ॥

अत्रप्रदोषःप्रदोषदिनं ॥ कृष्णःकृष्णपक्षएकादश्यादिरंत्यत्रिकरूपोपराण्हश्चदिनतृतीयभागरूपइत्युक्तं ॥ अनध्यायाअपिनित्याएवपौर्णिमाप्रतिपदादयःपुनरुपनयननिमित्तं ॥ नतुनैमित्तिकाः ॥ अकालवृष्ट्यादिनिमित्तकत्रिरात्रादयः ॥ नैमित्तिकेषुप्रातर्गर्जितनिमित्तानध्यायएवपुनःसंस्कारनिमित्तं ॥ अत्रविस्तरःकौस्तुभे ॥ अंसाभिमर्शकबटोःसमीपमानयनंप्रधानकर्मतस्यविस्मरणेपुनरुपनयनं ॥ एवंगायत्र्युपदेशविस्मरणेपि ॥ अत्रापितेषांनदीर्घव्रतं ॥ ब्रह्मपुराणेनारदः ॥ सावित्रीग्रहणादूर्ध्वंतद्दिनेवाचतुर्थके ॥ पंचमेष्टेद्वादशेवावत्सरेव्रतमुत्सृजेत् ॥ मनुः ॥ पक्षेमासेचवर्षेचमौंजीमोक्षः प्रशस्यते ॥ तृतीयदिवसेकार्यंपंचमेचविशेषतइति ॥ पुनरुपनयनकारणनिर्णयः ॥ ॥ अथयजुर्वेदिनांप्रायश्चित्तैःसहपुनरुपनयनप्रयोगः ॥ प्रायश्चित्तार्थंव्रतबंधेविशेषः ॥ तत्रनिमित्तानंतरमेवकरणे

उदगयनपुण्यनक्षत्राद्युक्तकालोनापेक्ष्यते ॥ अन्यथातुयथोक्तकालापेक्षा ॥ तत्र कर्तापितातदभावेपितृव्यादिःसपिंडः ॥ तदभावेन्यःकश्चित् ॥ यत्रपुनरुपनयनं प्रायश्चित्तत्वेनोक्तंतत्रपर्षदुपदिष्टविधिनातदेवकार्यं ॥ यत्रतुप्रायश्चित्तांतरसहितंतत्रोक्तविधिनाप्रायश्चित्तंसंस्कार्येणकारयित्वाऽऽचार्येणतस्योपनयनंकार्यं॥ यत्रजातकर्मादिसंस्कारसहितमुपनयनंविहितंतत्रजातादिचौलांतसंस्कारान्कृत्वाकार्यं ॥ तत्रादौब्रह्मचारिणःपितृज्येष्ठाभ्यामन्योच्छिष्टभोजनेस्त्रियासहभोजनेवाश्राद्धसूतकान्नगणिकान्नाशनेवाअमुकदोषपरिहारार्थंपर्षदुपदिष्टंप्रायश्चित्तंकरिष्येइति कृत्वा ॥ आचार्यस्तुअमुकदोषपरिहारार्थंपुनरुपनयनसंस्कारसिद्धिद्वाराश्रीपर० द्वादशसहस्रगायत्रीजपंअहंवाब्राह्मणद्वाराकरिष्ये ॥ ब्रह्मचारीस्थंडिलेग्निंप्रतिष्ठाप्य अग्निमुखंकृत्वाआज्यंसंस्कृत्यादिआघाराज्यभागांतंकृत्वाआज्यप्लुतपलाशसमिधं

गृहीत्वा ॐ पुनस्त्वादि०कामाःस्वाहा ॥ १ ॥ ॐ पुनर्म्मैनःपुनरायुर्म्मैऽआगन्पुन÷प्राणःपुनरात्मामऽआगन्पुनश्चक्षुःपुनःश्रोत्रम्मऽआगन् ॥ वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्न्न÷पातुदुरितादवद्यात्स्वाहा ॥ २ ॥ ततश्चरुहोमः ॥ ॐ सप्ततेअग्ने०घृतेनस्वाहा ॥ १ ॥ यत्तेपवित्रमर्च्चिष्यग्नेविततमन्तरा ॥ ब्रह्मतेनपुनातुमास्वाहा ॥ २ ॥ पवमान÷सोऽअद्यनःपवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमास्वाहा ॥ ३ ॥ उभाभ्यांदेवसवितःपवित्रेणसवेनच ॥ माम्पुनीहिविश्वत÷स्वाहा ॥ ४ ॥ ततःस्विष्टकृदादिनवाहुतीर्हुत्वाहोमशेषंसमाप्य ॥ गांदत्वाअथवागोनिष्क्रयंदद्यात् ॥ ततःकृतमंगलस्नानोधृततिलकःकर्ताशुभासनेउपविश्य ॥ दक्षिणतःसंस्कार्यंचोपवेश्य ॥

आचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यसंस्कार्यस्यपुनःसंस्कारसिद्धिद्वारा श्रीपरमेश्वर० जातकर्माद्युपनयनांतान्संस्कारान्करिष्ये ॥ अथवाकेवलंउपनयनसंस्कारंकरिष्येइतिसंकल्पः ॥ तदंगविहितंनिर्विघ्नतासिद्ध्यर्थंगणेशपूजनादिमंडपप्रतिष्ठानांदीश्राद्धांतंकृत्वा ॥ अधिकारार्थंब्राह्मणान्भोजयित्वाकुमारवपनादिकंकृत्वाप्रयोगानुसारेणउपनयनंकृत्वावाजातकर्मप्रभृत्युपनयनांतसंस्कारान्कृत्वा ॥ इत्याद्यपक्षः ॥ अथापरमापरिधानात्कृत्वापालाशींसमिधमादायव्रात्यप्रायश्चित्तंहुत्वाव्याहृतीर्जुहोति ॥ इतिद्वितीयपक्षः ॥ अथापरोब्राह्मणवचनात्सावित्र्याशतकृत्वोभिमंत्रितंघृतंप्राश्यकृतप्रायश्चित्तोभवतीत्यादिकमवदत्इतितृतीयपक्षः ॥ ॥ तत्रोक्तपक्षाणांशक्ताशक्तभेदेनव्यवस्था इदंकौस्तुभेद्रष्टव्यं ॥ ॥एवंशाखांतरेष्वपिवपनमेखलाजिनदंडभैक्ष्यचर्याव्रतादिकंवैकल्पिकव्यवस्थयानुष्ठायस्वस्वशाखो

क्तोपनयनंकार्यं ॥ ॥ इतिसंस्कारभास्करेसंक्षिप्तपुनरुपनयनप्रयोगः ॥ ॥ अथब्रह्मचारिव्रतलोपेप्रायश्चित्तं ॥ बौधायनः ॥ अत्रशौचाचमनसंध्यावंदनदर्भभिक्षाअग्निकार्यराहित्यशूद्रादिस्पर्शकौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनत्यागदिवास्वापच्छत्रधारणपादुकाद्यारोहणमालाधारणोद्वर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्याभिरतिपाखंडादिभाषणपर्युषितभोजनादिव्रतलोपसकलदोषपरिहारार्थंकृच्छ्रत्रयंचरेन्महाव्याहृत्यादिअनादिष्टहोमंचकुर्यात् ॥ तद्यथा ॥ आचम्यप्राणानायम्यदेशकालकीर्तनांतेपूर्वोक्तशौचाचमनादिव्रतनियमानांमध्येकश्चिद्व्रतलोपस्तज्जनितदोषपरिहारार्थंकृच्छ्रत्रयप्रायश्चित्तंवातत्प्रत्याम्नायगोनिष्क्रयीभूतरजतद्रव्यदानंमहाव्याहृत्यादिअनादिष्टहोमंचकरिष्ये ॥ तत्रादौगोनिष्क्रयरजतद्रव्यंदत्वा ॥ व्रतलोपजनितदोषपरिहारार्थंकृच्छ्रत्रयात्मकप्रत्याम्नायेनइदंयथाशक्तिगो

निष्क्रयद्रव्यंअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेइति॥ ततःस्थंडिलेपंचभूसंस्कारपूर्वकंविटनामानमग्निंप्रतिष्ठाप्य ॥ ब्रह्मोपवेशनाद्याज्यभागांतेव्यस्तसमस्तव्याहृतीश्चतस्रः पंचवारुणेत्यादिनवाहुतीश्चाज्येनजुहुयात् ॥ तद्यथा ॥ ॐ भूःस्वाहा इदमग्नयेनमम ॥ ॐ भुवःस्वाहाइदंवायवेन॰ ॐ स्वःस्वाहाइदंसूर्याय॰ ॥ ॐ भूर्भुवःस्वःस्वाहाइदंप्रजापतयेन॰ ॥ ॐ त्वन्नोऽअग्ने॰ स्मत्स्वाहा॰इदमग्नीवरुणाभ्यां न॰ ॥ ॐ सत्वन्नोअग्ने॰ एधिस्वा॰ इदमग्नीवरुणा॰ ॥ ॐ अयाश्चाग्ने॰ जꣳस्वा॰इदमग्नयेअयसेनमम ॥ ॐ येतेशतं॰स्वर्काःस्वा॰ इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यश्चन॰ ॥ ॐ उदुत्तमम्व॰ स्यामस्वाहा॰ इदंवरुणायादित्यायादितयेचनमम ॥ एताअनादिष्टनवाहुतयः ॥ अनंतरंमहाव्याहृत्यादिस्विष्टकृदंतादशाहुतीराज्येनहुत्वा ॥ संस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमा

प्य ॥ ॥ त्रुटितानांमेखलादीनांपुनर्ग्रहणंकार्यं ॥ तथाचमनुः ॥ मेखलामजिनंदंडमुपवीतंकमंडलुम् ॥ अप्सुप्रास्यविनष्टानिगृहीत्वान्यानिमंत्रवदितिव्रतलोपेप्रायश्चित्तं ॥ ॥ अथवेदारंभनिर्णयः ॥ तत्रवेदब्रह्मचर्यंचरेदित्यनेनवेदाध्ययनांगतयाब्रह्मचर्याचरणमुक्तं ॥ वेदाध्ययनारंभकालस्येतिकर्तव्यताचनोक्ता ॥ केवलंसमावर्तनकर्मसूत्रकारेणारब्धं ॥ वेदꣳसमाप्यस्नायात् ॥ अत्रवेदस्यारंभंविनासमाप्तिः कर्तुंन शक्यते ॥ अतउपनयनानंतरमेववेदारंभस्यसमयः इत्येवगम्यते ॥ इतिकर्तव्यता ॥ पुनः एतदेवव्रतादेशनविसर्गेष्विति ॥ उपाकर्महोमातिदेशाद्व्रतादेशनंवेदारंभःप्राप्नोति ॥ अतश्च ॥ उपनीयगुरुःशिष्यंमहाव्याहृतिपूर्वकं ॥ वेदमध्यापयेदेनंशौचाचारांश्चशिक्षयेदिति ॥ अत्रापिनांदीश्राद्धंविनानारभ्यते ॥ अतः कारणाज्जोतिःशास्त्रोक्तेशुभेदिनेकार्यं ॥ सचस्वशाखापूर्वकोवेदारंभः ॥ वसिष्ठः ॥ पारंपर्यागतोयेषां

वेदःसपरिबृंहणं ॥ यच्छाखाकर्मकुर्वीततच्छाखाध्ययनंतथा ॥ १ ॥ अधीत्यशाखामात्मीयामन्यशाखांततःपरं ॥ स्वशाखांयःपरित्यज्यशाखारंभःसउच्यते ॥ ॥ २ ॥ पराशरः ॥ वेदस्याध्ययनंसर्वंधर्मशास्त्रस्यचैवहि ॥ अजानतोर्थंतद्व्यर्थंतुषाणांकंडनंयथा ॥ १ ॥ मनुः ॥ योनधीत्यद्विजोवेदमन्यत्रकुरुतेश्रमं ॥ सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयः ॥ १ ॥ इति ॥ अत्रप्रतिवेदस्यारंभणंपृथक्पृथक् ॥ तत्पक्षेप्रतिवेदस्याहुतिद्वयंब्रह्मणेइत्यादिनवाहुत्यनंतरंमहाव्याहृत्यादिस्विष्टकृदंतादशाहुतीर्हुत्वाहोमशेषंसमाप्यवेदारंभंकृत्वाअभ्यसेत् ॥ ततःपरंद्वितीयस्यनांदीश्राद्धाद्यारंभः ॥ एवंसर्वत्र ॥ तदशक्तौएकतंत्रेणनांदीश्राद्धमेकमेवेतिप्रतिवेदस्याहुतिद्वयंब्रह्मणेछंदोभ्यश्चहुत्वाअंतेप्रजापत्यादिसप्ताहुतीर्हुत्वाअनंतरंमहाव्याहृत्यादिदशाहुतयः ॥ तत्रायंक्रमः ॥ वेदाख्येमातृनांदीमुखमथजुहुयाद्वन्हिवक्त्रेंऽतरिक्षंवायुं

ब्रह्मादिहुत्वानवयजुषिभवेन्मुख्यतोभूर्भुवाद्याः ॥ ऋग्वेदेप्राक्पृथिव्याग्नयइतिचादिवेसूर्यमेवंचसामाथर्वेदिग्भ्यश्चचंद्रमसइतिनिखलातत्वसंख्याहुतीनां ॥ १ ॥ अथ प्रयोगः ॥ तत्रआचार्यउपनयनोत्तरमनध्यायरहितेज्योतिःशास्त्रोक्तशुभदिनेब्रह्मचारिणमाहूयशुभासनेस्वस्योत्तरतउपवेश्य ॥ व्रतादेशोवेदारंभस्तत्रप्राणानायम्यदेशकालकीर्तनांतेअस्यब्रह्मचारिणः अद्यकरिष्यमाणानांवेदव्रतचतुष्टयारंभणकर्मणां स्वशाखापूर्वकवेदारंभमहंकरिष्ये॥तत्रनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनं मातृकापूजनंवसोर्द्धारानांदीश्राद्धंचकरिष्येइतिकृत्वा ॥ तत्रपुण्याहवाचनांतेअपापकःप्रीयतामित्यूहः ॥ ततः स्थंडिलेपंचभूसंस्कारपूर्वकंसमुद्भवनामानमग्निंप्रतिष्ठाप्य ॥ ततोब्रह्मोपवेशनाद्याज्यभागांतंचरुवर्जंकृत्वा ॥ आज्यभागानंतरंयजुर्वेदाहुतीर्जुहोति ॥ ॐ अंतरिक्षायस्वाहाइदमंतरिक्षायनमम ॥ ॐ वायवे॰इदंवायवेन॰॥

ॐ ब्रह्मणेस्वा॰ इदंब्रह्मणे॰ ॥ ॐ छंदोभ्यःस्वा॰ इदंछंदोभ्यो॰ ॥ अथऋग्वेदाहुतीर्जुहोति ॥ ॐ पृथिव्यैस्वा॰ इदंपृथिव्यै॰ ॥ ॐ अग्नयेस्वा॰ इदमग्नये॰ ॥ ॐ ब्रह्मणेस्वा॰ इदंब्र॰ ॥ ॐ छंदोभ्यःस्वा॰ इदंछंदोभ्यो॰ ॥ अथसामवेदाहुतीर्जुहोति ॥ ॐ दिवेस्वा॰ इदंदिवे॰ ॥ ॐ सूर्यायस्वा॰ इदंसूर्या॰ ॥ ॐ ब्रह्मणेस्वा॰ इदंब्रह्म॰ ॥ ॐ छंदोभ्यःस्वा॰ इदंछंदोभ्यो॰ ॥ ॥ अथाथर्ववेदाहुतीर्जुहोति ॥ ॐ दिग्भ्यःस्वा॰ इदंदिग्भ्योन॰ ॥ ॐचद्रमसेस्वा॰ इदंचंद्र॰ ॥ ॐ ब्रह्मणेस्वा॰ इदंब्र॰ ॥ ॐ छंदोभ्यःस्वा॰ इदंछंदो॰ ॥ ॐ प्रजापतये॰ इदंप्र॰ ॥ ॐ देवेभ्यःस्वा॰इदंदेवे॰ ॥ ॐ ऋषिभ्यःस्वा॰इदंऋ॰ ॥ ॐ श्रद्धायैस्वा॰इदंश्रद्धायै॰ ॥ ॐ मेधायै॰ इदंमेधायै॰ ॥ ॐ सदसस्पतयेस्वा॰इदंसदसस्पतये॰ ॥ ॐ अनुमतयेस्वा॰इदंअनुमतये॰ ॥ ततो महाव्याहृत्यादिस्विष्टकृदंतादशाहुतयः ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहो

मशेषंसमाप्य ॥ ततोवेदाध्ययनमारभेत् ॥ तच्चकारिकायां ॥ वेदारंभेवसानेचपादौ ग्राह्यौगुरोःसदा ॥ व्यवस्थपाणिनाकार्यमुपसंग्रहणंगुरोः ॥ १ ॥ सव्येनसव्यःस्पृष्टव्योदक्षिणेनतुदक्षिणः॥ब्राह्मणः प्रणवंकुर्यादादावंतेचसर्वदा॥२॥ प्रत्यङ्मुखायोपविष्टायोपसमीक्षतेगुरुः ॥ वेदारंभमनुब्रूयाद्यथाशास्त्रमतंद्रितः ॥ ३ ॥ हस्तौतुसंयुतौधायौंजानुनोरुपरिस्थितौ ॥ गुरोरनुमतिंकुर्यात्पठनान्यमतिर्भवेत् ॥ ४ ॥ हस्तहीनंतु योधीतेस्वरवर्णविवर्जितं ॥ ऋग्यजुःसामभिर्दग्धोवियोनिमधिगच्छति ॥ ५ ॥ प्रणवंप्राक्प्रयुंजीतव्याहृतीस्तदनंतरं ॥ सावित्रींचानुपूर्वेणततोवेदान्समारभेत् ॥ १ ॥ प्रणवमादावंतेचकुर्यात् ॥ ततःशिष्टाचारात्ब्रह्मचारिणावेदसरस्वतीपूजनंकार्यं ॥ अद्यपू० तिथौब्रह्मवर्चससिद्ध्यर्थंवेदसरस्वतीपूजनंचकरिष्ये॥वेदसरस्वतींस्थाप्य॥ वेदोसियेनत्वं॥ श्रीश्चतेइतिऋग्भ्यांषोडशोपचारैःसंपूज्य॥ ततःप्रत्यङ्मुखायोपवि

ष्टायपादोपसंग्रहणपूर्वकंआचार्यमुखमीक्षमाणायअनसूयकायस्वहस्तौजानुभ्यामु
परिकृतवत्तेब्रह्मचारिणेवेदंप्रयच्छति ॥ ॐ भूर्भुवस्वः ॐ तत्सवितु० ॥ १॥ ॐ इषेत्वो
र्जेत्वावायवस्थदेवोवः सविताप्रार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याऽइ
न्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गो
पतौस्यातबह्वीर्यजमानस्यपशून्पाहि ॥ १ ॥ इतियजुर्वेदः ॥ ॐ अग्निमीळेपुरोहि
तंयज्ञस्यदेवमृत्विजं॥ होतारंरत्नधातमं ॥१॥ इतिऋग्वेदः ॥ ॐ अग्नऽआयाहिवीत
येगृणानोहव्यदातये ॥ निहोतासात्सिबर्हिषि ॥ १ ॥ इतिसामवेदः ॥ ॐ शन्नो
देवीरभिष्टयऽआपोभवंतुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥१॥ इत्यथर्ववेदः ॥ ॐ स्व
स्तीत्युक्त्वा ॥ इतिस्वशाखाविधिवत्स्वशाखावेदंपरशाखाविधिवत्परशाखावेदंचपठे

त् ॥ ब्राह्मणभोजनम् ॥ यांतुमातृगणेतिमातॄणांविसर्जनं ॥ इतिसंस्कारभास्करेवेदव्रतचतुष्टयं ॥ ॥ अथकेशांतकर्मोच्यते॥ जन्मतःसप्तदशेवर्षेनोचेद्व्रतविसर्गात्पूर्वं कालापकर्षणंकृत्वाउदगयनेशुक्लपक्षेचौलोक्ततिथ्यादौगोदानंकुर्यात्॥ ततआचार्यो बहिःशालायांपत्न्यासहशुभासनेउपविश्य॥ तद्दक्षिणतःब्रह्मचारिणमुपवेश्य॥ आचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यब्रह्मचारिणः[1]केशांत[2]कर्माहंकरिष्ये ॥ तदंगविहितंगणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंचकरिष्येइतिकृत्वा ॥ अत्रपुण्याहवाचनांते

---

[1] ब्रह्मचारिणःरेतोत्सर्गादिप्रायश्चितंप्रयोगरत्नादिभ्योवगंतव्यं । [2] केशांतकालनिर्णयोगदाधरादिभ्योज्ञेयः ॥ मंडपप्रतिष्ठाकर्तव्या ॥ तथापीदानींतनानाम्अकरणन्नात्रलिखिता ।

प्रजापतिःप्रीयतामित्यूहःकर्तव्यः ॥ बहिःशालायांस्थंडिलेपंचभूसंस्कारपूर्वकंसूर्यंनामाग्निंप्रतिष्ठाप्य ॥ ततोब्रह्मोपवेशनादिपात्रासादनंचरुवर्जं ॥ पात्रासादनानंतरंउपकल्पनीयानि ॥ शीतोदकं ॥ उष्णोदकं ॥ नवनीतपिंडः ॥ घृतपिंडोवा ॥ त्र्येणीशलली ॥ सप्तविंशतिकुशतरुणानि ॥ ताम्रपरिष्कृतआयसक्षुरः ॥ आनडुहगोमयपिंडः ॥ नापितोवरश्च ॥ अत्रगौरेववरः ॥ एतान्युपकल्प्य ॥ पवित्रच्छेदनादिपर्युक्षणांतेआघारावाज्यभागौचहुत्वा ॥ ततोमहाव्याहृत्यादिस्विष्टकृदंतदशाहुतयः ॥ तद्यथा ॥ ॐ प्रजापतयेस्वाहा॰ इदंप्रजा॰॥ ॐ इंद्रायस्वा॰ इदंइंद्रा॰॥ॐ अग्नयेस्वा॰ इदम॰ ॥ ॐ सोमायस्वा॰इदंसोमा॰ ॥ ॐ भूःस्वाहाइदमग्न॰ ॥ ॐ भुवःस्वा॰ इदंवा॰ ॥ ॐ स्वःस्वा॰ इदंसूर्याय॰ ॥ ॐ त्वन्नोअग्ने॰इदमग्नीवरु॰ ॥

ॐ सत्वन्नोऽअग्ने०इदमग्नीव० ॥ ॐ अयाश्चाग्ने०इदमग्नयेअ० ॥ ॐ येतेशतं०इदं
वरुणा० सवि०॥ॐ उदुत्तमं० इदंवरुणायादि०॥ ॐ प्रजापत० इदंप्रजा० ॥ ॐ अ
ग्नयेस्विष्टकृते० इदं० ॥ ततः संस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥
ततोमातुरंकेब्रह्मचारिणमुपवेश्य ॥ एकस्मिन्पात्रेसीतास्वप्सूष्णाआपआसिंचति॥
उदकासेकमंत्रेविशेषः ॥ ॐ उष्णेन० केशश्मश्रुवपेति ॥ अथात्रनवनीतपिंडंप्रास्य
ति ॥ ततउदकमादायदक्षिणगोदानमुंदति ॥ ॐ सवित्राप्रसूताइतिमंत्रेण ॥ ततः
त्र्यैण्याशलल्याविनयति ॥ त्रीणिकुशतरुणान्यंतर्दधाति ॥ ॐ ओषधेत्रायस्वइ
तिमंत्रेण ॥ ताम्रपरिष्कृतायसक्षुरग्रहणं ॥ ॐ शिवोनामासि० इतिमंत्रेण ॥ ततः
केशकुशक्षुरसंलग्नीकरणं ॥ ॐ निवर्तयाम्या० इतिमंत्रेण ॥ छेदनमंत्रस्तु ॥ ॐ ये

नावपत्सवि० इतिमंत्रेणप्रच्छिद्यानडुहेगोमयपिंडेप्रास्यत्युत्तरतोध्रियमाणे ॥ एवमेवापरंवारद्वयंदक्षिणगोदानेतूष्णींकर्मकर्तव्यं ॥ ततःपश्चिमगोदानेउंदनादिसंलग्नकरणांतमेकवारंपूर्ववत्समंत्रकंकुर्यात् ॥ छेदनमंत्रस्तु ॥ ॐ त्र्यायुषञ्जमद० ॥ इतिमंत्रेणप्रच्छिद्या० ॥ पश्चिमगोदानेएवंपुनर्वारद्वयंतूष्णींकर्मकर्तव्यं ॥ ततःउत्तरगोदानेउंदनादिसंलग्नकरणांतमेकवारंपूर्ववत्समंत्रकंकुर्यात् ॥ छेदनमंत्रस्तु ॥ ॐ येनभूरिश्च० ॥ इतिमंत्रेणप्रच्छिद्यान० ॥ पुनरुत्तरगोदानेएवंपुनर्वारद्वयंतूष्णींकर्मकर्तव्यं ॥ ततःशिरःसमंतान्मुखांतंक्षुरंत्रिवारंभ्रामयित्वा ॥ मंत्रोविशेषः ॥ ॐ यत्क्षुरेणमज्ज०शिरोमास्यायुःप्रमोषीर्मुखम् ॥ १ ॥ इतिमंत्रेण॥ ततःशिरःसमुंद्यनापितायक्षुरंप्रयच्छति ॥ ॐ अक्षण्वंपरिवपेत्यनेनमंत्रेण ॥ नापितःशिखांरक्षित्वाकेशश्मश्रुवपनंकुर्यात् ॥ ब्रह्मचारिणःस्नानं ॥ केशांतेआचार्यायगांददाति ॥ स

वैषुसंस्कारकर्मस्वाधानादिविवाहांतेषुपितैवकर्ता ॥ तदभावेअन्यः ॥ यथाशक्तिब्राह्मणान्भोजयिष्ये ॥ यांतुमातृइतिमातृणांविसर्जनं ॥ ॥ संवत्सरंब्रह्मचर्यमवपनंचइतिकेशांतकर्मानंतरंब्रह्मचारीब्रह्मचर्यव्रतंचरेत् ॥ अवपनंचकेशांतोत्तरंसंस्कृतःसंवत्सरंवपनंवर्जयेत ॥ द्वादशरात्रंषड्रात्रंत्रिरात्रमंततःइतिविकल्पः ॥ इतिसंस्कारभास्करेकेशांतप्रयोगः ॥ ॥ अथसमावर्तनकर्मोच्यते ॥ समावर्तनंउदगयनेकार्यंतथापिकर्मवशात्मार्गशीर्षेविवाहप्रसक्तौदाक्षिणायनेपिकार्यं ॥ इतिधर्मसिंधौ ॥ समावर्तनकालः ॥ सावित्रीग्रहणादूर्ध्वंतद्दिनेवाचतुर्थके ॥ तृतीयेद्वादशेवर्षेवत्सरेव्रतमुत्सृजेत् ॥ पूर्वार्धोक्तकालौ अन्यथागौणेतिकारिकाकारः ॥ वेदमधीत्यगुरुणानुज्ञातःस्नायात ॥ ब्रह्मचर्यंवाष्टाचत्वारिंशद्वर्षाणिसमाप्यस्नायात् ॥ द्वादशवार्षिकंवाव्रतंसमाप्यगुर्वनुज्ञातःस्नायात् ॥ उभयंवासमाप्यस्ना

यात् ॥ वेदशब्देनविधिर्विधेयस्तर्कइत्येतत्त्रयमुच्यते ॥ विधिःविधायकंब्राह्मणवाक्यं ॥ विधेयोमंत्रः ॥ तर्कोर्थवादः ॥ शिक्षाकल्पोव्याकरणंनिरुक्तंछंदोज्योतिषमित्येभिःषडंगैःसहितंवेदमधीत्यावगम्यचस्नानमिच्छंत्येकेआचार्याः ॥ नकल्पमात्रेग्रंथमात्रेअधीतेअनवबुद्धेस्नानमिच्छंति ॥ अनुष्ठानायोग्यत्वात् ॥ ग्रंथमात्राध्ययनेपिकृतेयाज्ञिकोयज्ञविद्याकुशलःकामंस्नायात् ॥ तच्चज्योतिःशास्त्रोक्तशुभदिनेब्रह्मचारीकृतनित्यक्रियोऽर्थादिनागुरुंसंपूज्यतेनानुज्ञातःसमावर्तनाख्यंकर्मकुर्यात् ॥ वागीशादितिसौम्यपौष्णदिनकृन्मित्रोत्तरारोहिणीगोविंदेषुशशांकभानुगुरुविच्छुक्रार्कवारादिषु ॥ रिक्तापर्वतथाष्टमींप्रतिपदंमेषंचकीटंहरिंहित्वाशुद्धियुतेष्टमेन्हिविमलेकुर्यात्समावर्तनंइतिश्रीधरः ॥ तत्रायंक्रमः ॥ स्नानेच्छोमातृनांदीसप्तत्रिहुतिसमित्वष्टकुंभाभिषेकोमौंजींमुक्त्वारवीक्षादधितिलवपनंदंतधावावनेजौ ॥ लेपो

वासांसि सूत्रंस्रजमथशिरसोवेष्टनंकर्णभूषांकृत्वानेत्रांजनादिरपिचपदत्राणयष्टिप्रवासाः ॥ ततआचार्यंउक्तदिनेकृतनित्यक्रियःसभार्यःब्रह्मचारिणासहशुभासनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेअस्यब्रह्मचारिणः गृहस्थाश्रमांतरप्राप्तिद्वाराश्रीपरमेश्वरप्रीत्यर्थंसमावर्तनाख्यंकर्मकरिष्ये ॥ तदंगविहितंगणपतिपूजनं स्वस्तिपुण्याहवाचनंमातृकापूजनंवसोर्धाराआयुष्यमंत्रजपंनांदीश्राद्धंचकरिष्येइतिकृत्वा ॥ अत्रपुण्याहवाचनांतेसुश्रवःप्रीयतामितिवदेत्॥ ततःभोआचार्यअहंस्नास्येइत्यनुज्ञाप्रार्थनाब्रह्मचारिणः ॥ स्नाहीतिप्रत्यनुज्ञागुरोः ॥ ततःपादोपसंग्रहणं गुरोः ॥ ततःपरिश्रितेपंचभूसंस्कारपूर्वकंसूर्यनामानमग्निंप्रतिष्ठाप्य ॥ ततोब्रह्मोपवेशनादिपात्रासादनंचरुवर्जं ॥ पात्रासादनानंतरंउपकल्पनीयानि ॥ संधुक्षणानि ॥ पर्युक्षणार्थमुदकं ॥ समिधः ॥ हरिताः कुशाः ॥ अष्टौवारिकुंभाः ॥ धौतवस्त्रं ॥ द

धितिलावा ॥ नापितः ॥ स्नानार्थमुदकं ॥ औदुंबरंकनिष्ठिकाग्रवत्स्थूलंद्वादशांगुलं
दीर्घंसरलंसत्वचंदंतधावनकाष्ठंब्राह्मणस्यदशांगुलदीर्घंराजन्यस्य ॥ अष्टांगुलदीर्घंवैश्यस्य॥उद्वर्तनद्रव्यं ॥ स्नानार्थमुष्णोदकं ॥चंदनं ॥ अहतेवाससी ॥ यज्ञोपवीतं ॥
पुष्पाणि ॥ उष्णीषं ॥ कर्णालंकारौ ॥ अंजनं ॥ आदर्शः ॥ छत्रं ॥ उपानहौ ॥ वैणवदंडः ॥ पूर्णपात्रं ॥ वरोवा ॥ एतान्युपकल्प्य ॥ पवित्रच्छेदनादिपर्युक्षणांतेआघाराज्यभागौचजुहुयात् ॥ ॐ प्रजपतयेस्वा० इदंप्र० ॥ ॐ इंद्रायस्वा० इदमिं० ॥ ॐ
अग्नयेस्वा० इदम० ॥ ॐ सोमाय०इदंसो० ॥ इत्याज्यभागानंतरंस्वशाखावेदारंभणाहुतिहोमः ॥ अनंतरंब्रह्मणेछंदोभ्यइत्याहुतिद्वयमपिजुहोति ॥ यदिवेदचतुष्टयमधीत्यस्नानंकरोतितदाप्रतिवेदंवेदाहुतिद्वयंहुत्वाब्रह्मणेछंदोभ्यइत्याहुतिद्वयंपुनर्जुहोति ॥ ततःप्रजापतयइत्यारभ्यानुमत्यंताःसप्ताहुतीर्जुहोति ॥ एवंवेदद्वयत्रयाध्य

यनेपियोज्यं ॥ ततोमहाव्याहृत्यादिस्विष्टकृदंतादशाहुतयः ॥ तद्यथा ॥ ॐ अंतरिक्षायस्वा० इदमंत० ॥ ॐ वायवेस्वा० इदंवा० ॥ ब्रह्मणेस्वा० इदंब्र० ॥ ॐ छंदोभ्यः स्वा०इदंछं० ॥ इतियजुः ॥ ॐ पृथिव्यैस्वा०इदंपृ०॥ॐ अग्नयेस्वा०इदमग्नये० ॥ ॐ ब्रह्मणेस्वा० इदंब्र० ॥ ॐ छंदोभ्यःस्वा० इदं० ॥ इतिऋक् ॥ ॐ दिवेस्वा०इदंदि० ॥ॐसूर्यायस्वा० इदंसू० ॥ॐ ब्रह्मणेस्वा० इदंब्र०॥ ॐ छंदोभ्यःस्वा० इदंछं० ॥ इतिसाम ॥ ॐ दिग्भ्यः स्वा० इदंदि० ॥ ॐ चंद्रमसे० इदंचं० ॥ ॐ ब्रह्मणे० इदंब्र० ॥ ॐ छंदोभ्यःइदंछं० ॥ इत्यथर्वः ॥ ॐ प्रजापतये०इदंप्र० ॥ ॐ देवेभ्यःस्वा०॥ ॐ ऋषिभ्यःस्वा०॥ ॐ श्रद्धायै० ॥ॐमेधायै० ॥ ॐ सदसस्पतये० ॥ ॐ अनुमतये०॥ ॐ भूःस्वा० इद० म०॥ॐ भुवःस्वा० इदं० वा० ॥ ॐ स्वस्वाहा०

इदंसू॰ ॥ ॐ त्वन्नोअग्ने॰ इदमग्नीव॰ ॥ ॐ सत्वन्नोअग्ने॰ इदमग्नीव॰ ॥ ॐ अयाश्चाग्ने॰ इद म॰अ॰ ॥ येतेशतं॰ इदं व॰ स॰ वि॰ ॥ ॐ उदुत्तमं॰॥इ॰ व॰ दित्या॰॥ ॐप्रजाप॰ इदं प्र॰ ॥ ॐ अग्नयेस्विष्टकृ॰ इद म॰ स्वि॰॥ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ ततः परिसमूहनादिन्यायुषकरणांतंसामिदाधानंब्रह्मचारीकरोति ॥ आचार्यस्योत्तरतउपविश्य ॥ दक्षिणहस्तेनाग्नेः संधुक्षणप्रक्षेपः वक्ष्यमाणमंत्रैःपंचभिः॥ॐअग्नेसु॰ ॥ ॐ यथात्वमग्ने॰ ॥ ॐ एवंमाꣳ॰॥ॐ यथात्वम॰॥ ॐ एवमहंम॰ ॥ इत्येतैः पंचभिर्मंत्रैःप्रतिमंत्रमिंधनप्रक्षेपः ॥ प्रदक्षिणमग्निंपर्युक्ष्योत्तिष्ठन्त्समिधआदधाति ॥ ॐ अग्नयेस॰ ॥१॥ इतिमंत्रेणप्रथमसमिधमादधाति ॥ अनेनैवमंत्रेणद्वितीयांतथातृतीयां ॥ उपविश्यपुनः ॥ अग्नेसुश्रवेत्यारभ्यपं

चैंधनप्रक्षेपः ॥ ॥ तूष्णींपाणीप्रतप्यवक्ष्यमाणैः सप्तभिर्मंत्रैःप्रतिमंत्रंमुखविमार्जनं ॥ ॐ तनूपा॰ तन्वंमे॰ ॥ ॐ आयुर्दा॰ स्यायु॰ ॥ ॐ वर्चोदा॰ वर्चो॰ ॥ ॐ अग्नेयन्मे॰ ॥ ॐ मेधांमेदेवः ॥ ॐ मेधांमेदेवी॰ ॥ ॐ मेधामश्वि॰॥इत्येतैर्मुखमार्जनं ॥ अत्रशिष्टाचारः ॥ ॐ अंगानिचम॰ इतिमंत्रेणप्रतप्तपाणिभ्यांशिरःप्रभृतिपादपर्यंतानिसर्वाण्यंगान्यालभते॥ ततोदक्षिणहस्ताग्रेण॥ॐ वाङ्मआ॰ इतिमुखालंभनं॥ ॐ प्राणश्च॰ इतिनासारंध्रेयुग॰॥ॐ चक्षुश्च॰चक्षुषीयु॰ ॥ ॐ श्रोत्रंच॰ इ॰ श्रोत्रेच॰ इ॰श्रोत्रेयु॰ ॥ ॐ यशोबलंच ॥ इतिबाह्वोरुपस्पर्शनं ॥ ततत्र्यायुषाणिकरोति ॥ अनामिकयाभस्मगृहीत्वाभस्मनाललाटेग्रीवायांदक्षिणेंऽसेहृदिच॥ त्र्यायुषमिति प्रतिमंत्रं ॥ ॐ त्र्यायुषंजमदग्नेः॰ ॥ १ ॥ इतिमंत्रस्यप्रतिपादेन ॥ ततोगोत्रनामपूर्वकंवैश्वानरादीनामभिवादनं ॥ ततआचार्यःपरिश्रितस्योत्तरतोष्टानामुदकुंभानां

दक्षिणोत्तराणांस्थापनं ॥ उदकुंभानांपुरस्तात्प्रागग्रकुशास्तरणं ॥ तेषुस्नानकर्ता तिष्ठेदुदङ्मुखः ॥ ॐ येस्वंतरग्नयः प्रविष्टागोह्यऽउपंगोह्योमयूखोमनोहास्खलुविरुजस्तनुदुषुरिंद्रियहातान्विजहामियोरोचनस्तामिहगृण्हामि॥इत्यनेनमंत्रेणैकस्मादुदकुंभादुदकंगृहीत्वातेनोदकेनाभिषिंचेतित्स्नानकर्तात्मानं ॥ॐ तेनमामभिषिंचामि श्रियैयशसेब्रह्मणेब्रह्मवर्चसा ॥१॥ इतिमंत्रेणाभिषिंचति ॥ पुनःयेप्स्वंतरग्नयइतिमंत्रेणैवद्वितीयोदकुंभादुदकमादाय ॥ ॐ येनाश्रियमकृणुतांयेनावमृशताꣳसुरान् ॥ येनाक्षावभ्यषिंचतांयद्वांतदश्विनायशः ॥ १ ॥ इतिमंत्रेणाभिषिंचति ॥ पुनः येप्स्वंतरग्नयइत्यनेनतृतीयोदकुंभादुदकमादाय ॥ ॐ आपोहिष्ठा० ॥ १ ॥ इतिमंत्रेणाभिषिंचति॥ पुनःयेप्स्वंतरग्नयइत्यनेनचतुर्थोदकुंभादुदकमादाय ॥ योवः शिव० ॥

॥ १ ॥ इतिमंत्रेणाभिषिंचति ॥ पुनःयेप्स्वंतरग्नय० ॥ १ ॥ इतिमंत्रेणपंचमोदकुंभादुदकमादाय॥ॐतस्माऽअरंग०॥१॥इतिमंत्रेणाभि०॥ पुनःयेप्स्वंतरग्नयइत्यनेनमंत्रेणषष्ठसप्तमाष्टमोदकुंभेभ्यःप्रत्येकमुदकमादायतूष्णींवारत्रयमभिषिंचतिस्नानकर्तात्मानं ॥ ततउदुत्तममितिमंत्रेणमेखलांशिरोमार्गेणनिःसार्यभूमौनिधाय ॥ तथैवाजिनंचोत्तार्यं ॥ दंडत्यागंकृत्वा तमुदगग्रंभूमौनिधाय ॥ अन्यद्वासस्तूष्णींपरिधायादित्यमुपतिष्ठतेब्रह्मचारी ॥ ॐ उद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिरस्तात्प्रात्तर्यांवभिरस्तादशसनिरसिदशसनिंमाकुर्वांविदन्मागमयोद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिरस्ताद्दिवायावभिरस्ताच्छतसनिरसिशतसनिंमाकुर्वांविदन्मागमयोद्यन्भ्राजभृष्णुरिंद्रोमरुद्भिरस्तात्सायंयावभिरस्तात्सहस्रसनिरसिसहस्रसनिंमाकुर्वांविदन्मागमय ॥ १ ॥ इत्यादित्योपस्थानमंत्रः ॥ ततोदधिप्राशनंतिलप्राशनंवातूष्णीं ॥ जटालो

मनखानांनिकृंतनं ॥ स्नानं ॥ औदुंबरकाष्ठेनदंतधावनं ॥ ॐ अन्नाद्यायव्यूहध्वꣳसोमोराजायमागमत् ॥ समेमुखंप्रमार्क्षतेयशसाचभगेनच ॥ १ ॥ इतिमंत्रेणदंतान्धावयेत् ॥ ततःसुगंधिद्रव्येणोद्वर्तनं[1] ॥ उष्णोदकेनस्नानं ॥ अंगप्रोच्छनं ॥ ततश्चंदनाद्यनुलेपनंमध्यमानामिकाभ्यांगृहीत्वामुखनासिकयोरालंभनं ॥ ॐ प्राणापानौमेतर्पयचक्षुर्म्मेतर्प्पयश्रोत्रंम्मेतर्प्पय ॥ १ ॥ इतिमंत्रेणालंभनं ॥ ततःपाण्योर[2]वनेजनंकृत्वातदुदकमादायापसव्यंकृत्वादक्षिणाभिमुखोभूत्वातदुदकंदक्षिणस्यांदिशिनिषिंचेत् ॥ ॐ पितरःशुन्धन्तां ॥ इत्यनेनमंत्रेण ॥ ततोयज्ञोपवीतीभूत्वा ॥ उदकोपस्पर्शनं ॥ ततश्चंदनादिनात्मानमनुलिप्यजपेत् ॥ ॐ सुचक्षाअहमक्षीभ्या

---

[1] चंदनेनमुखनासिकेचानुलिंपयतोतिगदाधरः सर्वशरीरोद्वर्तनंकार्यमितिहरिहरः ॥ [2] अत्रपाणिभ्यांचंदनंग्राह्यंपाण्योरवनेजननिषिंचेदिनिवक्ष्यमाणत्वाद्गदाधरः॥

म्भूयासꣳसुवर्चामुखेन ॥ सुश्रुत्कर्णाभ्यांभूयासम् ॥ १ ॥ इत्यनेनमंत्रेणानुलिप्य ॥ सकृद्धौताहतवासःपरिधानं ॥ ॐ परिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि ॥ शतंचजीवामिशरदःपुरूचीरायस्पोषमभिसँव्ययिष्ये ॥ १ ॥ इत्यनेनमंत्रेणवासःपरिधाय ॥ अथयज्ञोपवीतधारणं ॥ ॐ यज्ञोपवीतम्पर० ॥ १ ॥ आचम्य ॥ अथोत्तरीयधारणं ॥ ॐ यशसामाद्यावापृथिवीयशसेन्द्रायबृहस्पति ॥ यशोभगश्चमाविदद्यशोमाप्रतिपद्यतां ॥ इतिमंत्रेणात्मानमाच्छादयीत ॥ एकंचेद्वासोभवतितदातस्यैवपरिधानीयवाससउत्तरार्धमुत्तरीयंकुर्यात् ॥ ॐ याऽआहरज्जमदग्निःश्रद्धायैकामायेन्द्रियाय ॥ ताऽअहम्प्रतिगृह्णामियशसाचभगेनच ॥ १ ॥ इतिमंत्रे

---

१ धारयेद्वैणवीं यष्टींसोदकं च कमंडलुं ॥ यज्ञोपवीतद्वंद्वंच शुभेरुक्मेचकुंडलेतिमनुः ॥ हरिहरोपि एकंचेत्पूर्वस्योत्तरवर्गेणप्रच्छादयीतेतिगदाधरादयः ॥

णपुष्पमालाग्रहणं ॥ ततस्तांपुष्पमालांशिरसिबध्नीयात् ॥ ॐ यद्यशोप्सरसामिन्द्रश्चकाराविपुलंपृथु ॥ तेनसङ्ग्रथिताःसुमनसऽआबध्नामियशोमयि ॥१॥ इत्यनेनपुष्पमालाबंधनं ॥ उष्णीषेणाशिरोवेष्टयते ॥ ॐ युवासुवासाःपरिवीतऽअगात्सऽउश्रेयान्भवतिजायमानः ॥ तन्धीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः ॥ इत्यनेनमंत्रेणोष्णीषं ॥ ॐ अलङ्करणमसिभूयोलङ्करणम्भूयात् ॥ इत्यनेनमंत्रेणकर्णवेष्टकौप्रतिमुंचते ॥ प्रथमंदक्षिणकर्णेंततोऽनेनैवमंत्रेणवामकर्णें ॥ ॐ वृत्रस्यासिकनीकंश्चक्षुर्दाअसिचक्षुर्मेंदेहि ॥ १ ॥ इत्यनेनमंत्रेणाक्षिणीकज्जलंअंक्ते ॥ प्रथमंदक्षिणंततोनेनैवमंत्रेणवामं ॥ सौवीरांजनमितिहरिहरः ॥ अत्रचसव्यंनेत्रमंक्त्वाततोदक्षिणांजनमंत्रावृत्त्यासव्यंवाअग्रेमानुषेतिमंत्रलिंगादयंगदाधराशयः ॥

प्रथमंदक्षिणंततोवामेतिहरिहराशयः ॥ मंत्रेणोपानहौप्रतिमुंचयतेपादयोर्युगपत् ॥ ॐ विश्वाभ्योमानाष्ट्राभ्यस्पारिपाहिसर्वतः ॥ १ ॥ इतिमंत्रेणवैणवंदंडमादत्ते ॥ मेखलोन्मोचनादिदंडदानांतंस्नानकर्ताकर्मकरोतिनाचार्यः ॥ दंतप्रक्षालनादीनि नित्यमपिमंत्रवत्भवंति ॥ वासच्छत्रोपानहांचनवानामुपादानेमंत्रोभवति ॥ नतु नित्यधारणे ॥ ततआचार्यःस्नातस्यनियमान्वदेत् ॥ शूद्रादिस्पर्शनंनकर्तव्यं ॥ इच्छयाशूद्रोपिअस्नातकोनियमेष्वधिक्रियते ॥ नृत्यगीतवादित्राणिनप्रतिगच्छेत् ॥ इच्छयापरैःक्रियमाणंसङ्गीतंश्रोतुंगच्छेत् ॥ रागसहितंसङ्गीतं ॥ स्वयंचनकुर्यात् ॥ क्षेमेसतिरात्रौग्रामांतरंनगच्छेत् ॥ अक्षेमेतुकामंगच्छेत् ॥ क्षेमेसतिनधावेत्इतिनशीघ्रंगच्छेत् ॥ उदपानावेक्षणइतिकूपमध्येअवलोकनंनकर्तव्यं ॥ वृक्षारोहणंनकर्तव्यं ॥ फलप्रपतनंइतिफलत्रोटनंनकर्तव्यं ॥ संधिसर्पणइतिसंध्यासम

येगमनंवाअपमार्गेगमनंनकर्तव्यं ॥ विवृतइतिनग्नस्नानंनकर्तव्यं ॥ विषमलंघनमितिपर्वतगर्तादेर्लंघनंनकर्तव्यं ॥ शुष्कवदनंइतिलज्जाकरंदुःखकरंअमंगलभाषणंनकर्तव्यं ॥ संध्यादित्यप्रेक्षणंइतिसंध्यासमयेउपरक्तसूर्यबिंबावलोकनंनकर्तव्यं ॥ भैक्षणानिइतिसवर्णंविनासिद्धभिक्षाचर्यानकर्तव्या ॥ अप्स्वात्मानंनावेक्षेतइतिजलमध्येस्वमुखंनपश्येत् ॥ अजातलोम्नींइतिअनुत्पन्नलोम्नींस्त्रीं ॥ पुंसींइतिपुरुषाकृतिंस्त्रीं ॥ षंढंचइतिनपुंसकंप्रसिद्धं ॥ एतान्नोपहसेत् ॥ इतिअभिगमनंनकारयेत् ॥ गर्भिणींविजन्याइतिब्रूयात् ॥ सकुलमितिनकुलंब्रूयात् ॥ भगालमितिकपालं ॥ मणिधनुरितींद्रधनुर्ब्रूयात् ॥ गांधयंतींपरस्मैनाचक्षीतइतिपरस्यगांवत्संपाययंतींतांपरस्मैस्वामिनेवानकथयेत् ॥ उर्वरायामनंतर्हितायांभूमौइतिसस्यवत्यांवाकुशादियज्ञियतृणवत्यांभूमौमूत्रपुरीषोत्सर्गंनकुर्यात् ॥ उत्सर्पींस्तिष्ठन्इतितथैवधाव

मानःसन्उत्तिष्ठन्त्सन्मूत्रपुरीषोत्सर्गंनकुर्यात्॥स्वयंप्रशीर्णेनकाष्ठेनगुदंप्रमृजीतइतिआत्मनःप्रयत्नंविनापातिनेनयाज्ञियरहिताकंटककाष्ठेनगुदंप्रोच्छेत्॥यथा॥तृणाद्यंतर्हितभूमौशिरःप्रावारैरावेष्ट्ययज्ञोपवीतंनिवीतंकृत्वाअलंबितंकर्णेंकृत्वादिवोदङ्मुखोरात्रौदक्षिणाभिमुखउपविश्यमौनीभूत्वामूत्रपुरीषोत्सर्गंकुर्यात् ॥ यज्ञोपवीतस्यनिवीतत्वंविनैवकर्णेंधारणमनाचारः॥ मूत्रात्सर्गेशुद्धमिदंलिंगेसकृत्त्रिवारंवामकरेद्विवारमुभयोःकरयोर्दत्त्वातावद्वारंजलेनक्षालयेत्॥ पुरीषेतुशुद्धमृदंएकांलिंगेगुदेतिस्रःवामकरेदशउभयोःकरयोःसप्तपंचत्रिर्वापिपादयोर्दत्वातावतैवजलेनक्षालयेत्॥ मूत्रेचत्वारिगंडूषाणिपुरीषेद्वादशगंडूषोद्गीरणमिति ॥ विकृतंवासोनाच्छादयीतइतिनील्यादिरंजितवस्त्रंनपरिदधीत ॥ दृढव्रतइतिस्थिरसमारब्धव्रतोभवेत् ॥ वधत्रःस्यात्सर्वतऽआत्मानंगोपायेत्सर्वेषांमित्रमिवेतिवधात्॥ धातात्रायकःस्वेषांपरेषांचमित्र

भिवसखेवज्ञायेत ॥ स्नातकस्यसतोऽहोरात्रत्रयंव्रतचर्योच्यते ॥ अमांसाशीभवति॥ अमृन्मयेनपात्रेणउदकादिकंपिबति ॥ ऋतुमतीस्त्रीशूद्रभाषणंनकरोति ॥ शवंप्रसिद्धं ॥ कृष्णशकुनिरितिकाकः ॥ शुनामितिश्वाकुक्कुरः ॥ एतेषांदर्शनंचनकुर्यात् ॥ शावोमृतकःतस्मिन्जातेसतिक्रीत्वालब्ध्वाज्ञातिभिर्यदद्यतेतच्छावान्नंनाद्यात्नगृण्हीयान्नभक्षयेदित्यर्थः ॥ शूद्रस्यअवरवर्णस्यनापितादेरपिअन्नंतच्छूद्रान्नंनाद्यात् नगृण्हीयादित्यर्थः॥ सूतकेप्रसवाशौचेसतिज्ञातीनामन्नंतत्सूतकान्नंनाद्यात्नभक्षयेदित्यर्थः ॥ मूत्रपुरीषेष्ठीवनंचातपेनकुर्यादितिमूत्रपुरीषेप्रसिद्धेष्ठीवनंमुखाल्लालादि आतपेचनकुर्यात्॥सूर्याच्चात्मानंनांतर्द्धीतेतिछत्रादिनामूत्रोत्सर्गंनकुर्यात् ॥ तप्तेनोदकाथान्कुर्वीतइति॥ तप्तेनोदकेनशौचाचमनादिकाःक्रियाःकार्याः॥अवज्योत्य

दीपादिनारात्रौभोजनंनकर्तव्यं ॥ सत्यवदनमेववाकर्तव्यं ॥यथा॥ रागंद्वेषमहंकारंत्यक्त्वाचत्वारिअभ्यसेत् ॥ क्षमादयाशांतिसत्यंसवैज्ञानीसमोक्षभागिति ॥ नाधस्तनाअमांसादयोयमनियमाःकर्तव्याः ॥ यदिप्रवर्ग्यवान्महावीरःसोमयागार्थंस्वीकृतदीक्षःदीक्षितोभवतितदामूत्रपुरीषष्ठीवनादिअवज्योत्यरात्रौभोजनांतानिनकुर्यादितियमनियमाअनुष्ठेयाः ॥ यथाशक्तिब्राह्मणान्भोजयिष्ये ॥ आचार्यादिपूजनंतेभ्यश्चदक्षिणांदत्वातैराशिषोगृहीत्वा मातृणांविसर्जनंकृत्वाकर्मेश्वरार्पणंकुर्यात् ॥ ॥ इतिसंस्कारभास्करेसमावर्तनप्रयोगः ॥ अथातुरदशायांसमावर्तनविधिः॥ आतुरदशायांयथोक्तसमावर्तनाभावेसंक्षेपतस्तत्कार्यं ॥ तत्रप्रयोगसंकल्पंकृत्वाब्रह्मचारीलिंगानिमेखलादीनित्यक्त्वातीर्थेस्नात्वावासःपरिधानाचमनातिलकधारणानिकृत्वाग्निंप्रतिष्ठाप्यप्रजापतिंमनसाध्यात्वातूष्णींसमिधमादध्यात् ॥ अन्यदपि

अविरोधितूष्णीं कर्तव्यमितिसमावर्तनानुकल्पइतिधर्मसिंधुः ॥ ॥ इति संस्कारभास्करेसमावर्तनेआतुरदशायांसमावर्तनविधिःसमाप्तः ॥ ॥ ॥

अथक्रमप्राप्तोविवाहः ॥ तत्रअनाश्रमिनिर्णयःप्रायश्चित्तंच ॥ यथा ॥ अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजः ॥ आश्रमेणविनातिष्ठन्प्रायश्चित्तीभवेद्द्विजइतिदक्षस्मृतेः ॥ एतत्प्रायश्चित्तनिष्कृतिर्मिताक्षरायां ॥ अनाश्रमिप्रायश्चित्तंयथा ॥ अनाश्रमीसंवत्सरंप्राजापत्यकृच्छ्रंचरित्वाश्रममुपेयात् ॥ द्वितीयेऽतिकृच्छ्रंतृतीयेकृच्छ्रातिकृच्छ्रमतऊर्ध्वंचांद्रायणमितिहारितोक्तेः ॥ धेनोरभावेनिष्कःस्यात्तदर्धंपादमेववा ॥ गुंजाअशीतिःकर्षस्तुकर्षाश्चत्वारिनिष्ककः ॥ सुवर्णंरजतंवापिदद्याच्छक्त्यनुसारत

इति ॥ अशीतिगुंजात्मकःकर्षःचत्वारःकर्षाएकोनिष्कश्चेति ॥ ॥ प्राजापत्यकृच्छ्रंद्वादशदिनसाध्यंतद्यथा ॥ प्रथमत्रिदिनेप्रातःएकभुक्तंषड्विंशतिग्रासपरिमितंहविष्यान्नंभोक्तव्यं ॥ द्वितीयेत्रिदिनेनक्तंद्वाविंशतिग्रासपरिमितंभोक्तव्यं ॥ तृतीयेत्रिदिनेअयाचितंचतुर्विंशतिग्रासपरिमितंमध्यान्हेभोक्तव्यं ॥ अत्रसर्वत्रहविष्यान्नंभोक्तव्यं ॥ अयाचितंयाश्चारहितं ॥ चतुर्थेत्रिदिनेअनशनमितिप्राजापत्यकृच्छ्रं ॥ एतत्प्रत्याम्नायेगौरेका ॥ ॥ अतिकृच्छ्रंयथा ॥ प्रथमेत्रिदिनेएकभुक्तंपाणिपूरितंहविष्यान्नंभोक्तव्यं ॥ द्वितीयेत्रिदिनेअयाचितंपाणिपूरितंभोक्तव्यं ॥ तृतीयेत्रिदिनेउपवासइतिनवदिनसाध्यंअतिकृच्छ्रं ॥ एतत्प्रत्याम्नायेगोद्वयं ॥ ॥ कृच्छ्रातिकृच्छ्रंयथा ॥ एकग्रासपर्याप्तस्यप्राणधारणपर्याप्तस्यवादुग्धस्यएकविंशतिदिनेषुभक्षणेकृच्छ्रातिकृच्छ्रं ॥ एतत्प्रत्याम्नायेगोचतुष्टयंत्रयंवा ॥ ॥ चांद्रायणंयथा ॥ हविष्या

न्नस्यमयूरांडप्रमाणमेकग्रासमेवंशुक्लप्रतिपदमारभ्यपौर्णिमांतंएकैकवर्धितग्रासंकृष्णप्रतिपदमारभ्यअमांतमैकैकग्रासन्यूनंचेतियवमध्यचांद्रायणव्रतम् ॥ पक्षेतिथिवृद्ध्याषोडशग्रासाः ॥ क्षयेचतुर्दशग्रासाश्चेति ॥ ग्रासान्नंगायत्र्याभिमंत्रयेदितिमहार्णवे ॥ एतत्प्रत्याम्नायेष्टौपंचचतस्रोवागावइति ॥ प्रथमाब्देप्राजापत्यकृच्छ्रव्रतेसंकल्पः ॥ देशकालकीर्तनांतेअमुकशर्मणःममब्रह्मचर्यव्रतविसर्गदिनमारभ्यएकाब्दपर्यंतंवातन्न्यूनदिनपर्यंतंअनाश्रमस्थितिजन्यदोषपरिहारार्थंप्राजापत्यकृच्छ्रव्रतप्रत्याम्नायैकगोनिष्क्रयीभूतंयथाशक्तिरजतमुद्राद्रव्यदानमहमाचरिष्ये॥ इतिसंकल्पांतेब्राह्मणंसंपूज्यपूर्वकल्पितद्रव्यंगृहीत्वा ॥ इमांप्राजापत्यकृच्छ्रप्रत्याम्नायैकगोनिष्क्रयीभूतरजतद्रव्यमुद्रांअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे ॥ द्वितीयाब्देअतिकृच्छ्रव्रतेसंकल्पः ॥ देश० ममब्रह्मचर्यव्रतमारभ्यअब्दद्वयपर्यंतंअ

नाश्रमस्थितिजन्यदोषपरिहारार्थंअतिकृच्छ्रव्रतप्रत्याम्नायगोद्वयनिष्क्रयीभूतंयथाशक्तिरजतमुद्राद्रव्यदानमहमाचरिष्ये ॥ इतिसंकल्पांतेब्राह्मणंसंपूज्यपूर्वकल्पितंद्रव्यंगृहीत्वा ॥ इदंअतिकृच्छ्रप्रत्याम्नायगोद्वयनिष्क्रयीभूतंरजतमुद्राद्रव्यंअमु० तुभ्यमहंसंप्रददे॥ तृतीयाब्देकृच्छ्रातिकृच्छ्रव्रतेसंकल्पः ॥ देश० ममब्रह्मचर्यव्रतमारभ्यअब्दत्रयपर्यंतंअनाश्रमस्थितिजन्यदोषपरिहारार्थंकृच्छ्रातिकृच्छ्रव्रतप्रत्याम्नायगोचतुष्टयनिष्क्रयीभूतंयथाशक्तिरजतमुद्राद्रव्यदानमहमाचरिष्ये ॥ इतिसंकल्पांतेब्राह्मणंसंपूज्य ॥ कृच्छ्रातिकृच्छप्रत्याम्नायगोचतुष्टयनिष्क्रयीभूतांरजतद्रव्यमुद्रांअमु०तुभ्यमहंसंप्रददे॥ तृतीयाब्दोर्ध्वंकस्मिंश्चिद्वर्षेचांद्रायणव्रतेसंकल्पः॥ देश० ममब्रह्मचर्यव्रतमारभ्यअद्यदिनपर्यंतंअनाश्रमस्थितिजन्यदोष० चांद्रायणव्रतंतत्प्रत्याम्नायपंचगोनिष्क्रयीभूतयथाशक्तिरजतद्रव्यमुद्रादानेनाह० ॥ इति

संकल्पांतेब्राह्मणंसंपूज्यपूर्वकल्पितंद्र०व्यंगृ० ॥ इमांचान्द्रायणव्रतप्रत्याम्नायपंच
गोनिष्क्रयीभूतरजतद्र०व्यमुद्रांअमु०तुभ्यमहंसंप्रददेइतिअनाश्रमित्वप्रायश्चित्तं ॥
विवाहोपयोगिकन्यादिप्रकारोनिर्णयश्च ॥ गुरवेतुवरंदत्वास्नायीततदनुज्ञया ॥ वेद
व्रतानिवापारंनीत्वाह्युभयमेववा ॥ अविप्लुतब्रह्मचर्योलक्षण्यांस्त्रियमुद्वहेत् ॥ अनन्य
पूर्विकांकांतामसपिंडायवीयसीं ॥ आरोगिणींभ्रातृमतीमसमानार्षगोत्रजामिति
याज्ञवल्क्योक्तेः ॥ त्रिविधोपिवेदव्रतोभयस्नातकोऽविलंबेनलक्षणादिविशिष्टांस्त्रियं
परीक्षितामुद्वहेत ॥ अनन्यपूर्विकामितिअन्येषांवाग्दानादिनानपूर्वंदत्तां ॥ असपिं
डांसापिंड्यसंबंधरहितां ॥ यवीयसींन्यूनवयस्कां ॥ असमानार्षगोत्रजांस्वसमान
गोत्रप्रवररहितामिति ॥ अत्रापिकुलमग्रेपरीक्षेतेतिगृह्यादिवचनादादौसदाचारादि
गुणवत्हीनक्रियत्वादिदोषरहितंकुलंपरीक्ष्यतज्जोद्वाह्या ॥ तदनुलक्षणान्यपिपरीक्ष

णीयानि ॥ लक्षणानिचशुभाशुभसूचकानि ॥ तनुलोमकेशदशनादीनिप्रत्यक्षावगम्यानिबाह्यानि ॥ तथाचमनुः ॥ अव्यंगांगींसौम्यनाम्नींहंसवारणगामिनीं ॥ तनुलोमकेशदशनांमृद्वंगीमुद्वहेत्स्त्रियमिति ॥ ॥ कात्यायनः ॥ अव्यंगांदोषरहितांसुरूपांवयपूर्विकां ॥ सवर्णसुकुलोत्पन्नांशुभलक्षणसंयुतां ॥ प्रतिगृहीतांतांकन्यांकुलसंतानवर्धिनीमिति ॥ तथाचज्योतिर्निबंधे ॥ मृद्वंगीगूढगुल्फासमकुचनयनावृत्तनाभोरुवक्राकृष्णभ्रूनेत्रकेशास्थिरतरसुनखादीर्घनेत्राविलोमा ॥ मृद्वाणीस्वल्पभाललघुललितगमापाणिपादोष्ठरक्तासाकन्योद्वाहिताचेत्सुतधनविपुलान्नायुरारोग्यदास्यादिति ॥ अथकन्यादोषाः ॥ निर्गुणाशुल्कसंभाषीक्रोधयुक्तासरोगिणी ॥ विषयोगावंध्ययोगाकुलविध्वंसयोगका ॥ दरिद्रजारयोगाचहीनाचरणसंयुता ॥ एतद्दोषदशैर्युक्तातांकन्यांनप्रतिगृहेदिति ॥ अथवरगुणाः ॥ तत्रबुद्धिमतेकन्यांप्रयच्छेदितिबव्हृ

चगृह्ये॥तथाचज्योतिर्निबंधे ॥ विद्यावंतंसुरूपंउभयकुलशुचिंज्ञातशीलंदृढांगंनिर्व्याधिंशांतियुक्तंद्विजसुरप्रणतौकिंचिदाढ्यंप्रयुक्तं ॥ सम्यक्पृष्टोच्चपृच्छांप्रचुरतरधियंमूत्रधारंसुलिंगमेतद्रूपंवरिष्ठवरमिहवरयेत्कन्यकायाःसुवेशम्॥१॥यमः ॥ कुलंचशीलंचवयश्चरूपंविद्यांचवित्तंचसनाथतांच॥ एतान्गुणान्सप्तपरीक्ष्यदेयाकन्याबुधैःशेषमचिंतनीयं ॥ १ ॥ अथवरदोषाः ॥ मूकोंधोबधिरःकुब्जःस्तब्धःपंगुर्नपुंसकः ॥ कुष्ठीरोगीअपस्मारीदशदोषाःप्रकीर्तिताः ॥ अन्यच्च ॥ आचारहीनोमूर्खश्चकुरूपश्चौरजारकः ॥ पाखंडीचतथोन्मत्तोगूहकःकुलदूषकः ॥ द्यूतकर्मरतश्चैवदशदोषाःप्रकीर्तिताः ॥ एवद्दोषप्रयुक्तायेतेषुकन्यानदीयते ॥ अन्यच्च ॥ षंढमूकांधबधिरकाणकुब्जाश्चवामनः ॥ अश्रोत्रीपंगवश्चैवतेषुकन्यानदीयते ॥ अन्यच्च ॥ श्वित्रीकुष्ठीअपस्मारीकुनखीश्यावदंतकः ॥ व्रणयुक्तोव्याधियुक्तस्तेषुकन्यानदीयतेइति ॥

पतितःप्रागुक्तः ॥ असपिंडामितिसापिंडयंवर्जनीयं ॥ अथसापिंड्यनिर्णयः ॥ वध्वावरस्यवातातःकूटस्थाद्यदिसप्तमः ॥ पंचमीचेत्तयोर्मातातत्सापिंड्यंनिवर्ततेइति॥ कूटस्थइतिमूलपुरुषमारभ्यात्रगणना ॥ कूटस्थोमूलपुरुषोयतःसंतानभेदतः ॥ संस्कारकौस्तुभे ॥ दशभिःपुरुषैःख्याताच्छ्रोत्रियाणांमहाकुलात् ॥ उद्वहेत्सप्तमादूर्ध्वंतदभावेतुसप्तमीं ॥ पंचमींतदभावेतुपितृपक्षेष्वयंविधिरिति ॥ सप्तमींचतथाषष्ठींपंचमींचतथैवच ॥ एवमुद्वाहयेत्कन्यांनदोषःशाकटायनः ॥ चतुर्थींवातृतीयांवापक्षयोरुभयोरपि ॥ विवाहयेन्मनुःप्राहपाराशर्योंगिरायमः ॥ १ ॥ चतुर्थीमुद्वहेत्कन्यांचतुर्थःपंचमोवरः ॥ पराशरमतेषष्ठींपंचमोनतुपंचमीं ॥ इतिसापिंडयदीपिकायां ॥ पंचमवरपंचमीकन्योद्वाहेऽव्यवस्थोक्ताविश्वरूपनिबंधे ॥ द्वौपुत्रौपूर्वजातस्यातांतयोरपिचसंततिः ॥ पंचमःपंचमींकन्यांनतत्रवरयेद्विजः ॥ १ ॥ द्वेक

न्येपूर्वजात्स्यातांसंततिःस्यात्तयोरपि ॥ पंचमःपंचमींकन्यांवरस्तत्रसमुद्वहेत् ॥
॥ २ ॥ कन्यापुत्रौतुसंभूतौपूर्वजातसंततिस्तयोः ॥ यदिस्याद्वरयेत्तत्रपंचमःपंचमी
मपीति ॥ ३ ॥ असपिंडाचयामातुरसपिंडाचयापितुः ॥ साप्रशस्ताद्विजातीनांदा
रकर्मणिमैथुने ॥ यत्तुदोषानुरूपेणकुलमार्गेणचोद्वहेत ॥ नित्यंसंव्यवहार्यःस्याद्वे
दोक्तैस्तत्प्रतीर्यंतेइति ॥ तच्चयथाशाखोक्तप्रकारेणयथादेशाचारकुलाचारानुसारेण
कुलदीर्घसंकोचितविचारतोव्यवस्थाज्ञेया ॥ विस्तरस्तुग्रंथांतरेज्ञेयः ॥ मातुलक
न्यानिषेधस्तु ॥ यथा ॥ मातुलस्यसुतांविप्रोदाक्षिणेतांसमुद्वहेत् ॥ वर्जनीयाप्रयत्ने
नसर्वैर्वाजसनेयिभिरिति ॥ तत्रगोत्रप्रवरविचारेणोद्वहेत ॥ गोत्रप्रवरैक्येमहद्दोषः ॥
अथदत्तकसापिंड्यनिर्णयः ॥ तद्विवरणंयथा ॥ गौतमः ॥ ऊर्ध्वंसप्तमात्पितृबंधु
भ्योबीजिनश्च ॥ मातृबंधुभ्यःपंचमादिति ॥ उक्तंच ॥ वसुदेवांगजाताचकौंतेयस्य

विरुद्ध्यतइतिवार्तिकव्याख्यावसरेन्यायसुधाकृतादत्तकविषयमेतदित्यंगीकृत्यकुंत्याजनककुलेसाप्तपूरुषंसापिंड्यमितिव्याख्यातंतद्विषयत्वेनैवसापिंड्यमीमांसायाम् ॥ अतःकुलद्वयेपिसाप्तपूरुषंसापिंड्यंप्रतीयते ॥ पैठीनसस्तु ॥ त्रीन्मातृतःपंचपितृतःसप्तपुरुषानतीत्योद्वहेदित्याह ॥ व्याख्यातमेतदपरार्केदत्तकादिपुत्रान्पितृपक्षतीनिवृत्तपिंडगोत्रार्षेयान्प्रत्येतदुच्यतेपंचापितृतइति ॥ अतश्चप्रतिग्रहीतृकुलेसाप्तपूरुषंसापिंड्यंप्रतीयतेप्रतिगृहीतृमातृपितृककुलयोस्त्रिपुरुषसापिंड्यमितिप्राञ्चः ॥ अथात्रव्यवस्थोक्तासापिंड्यदीपिकायां ॥ दत्तक्रीतादीनांजनकगोत्रेणोपनयनेकृतेजनककुलेसाप्तपूरुषंसापिंड्यं ॥ प्रतिगृहीतृमातृपितृकुलेनिर्वाप्यपिंडलक्षणंत्रिपूरुषंसापिंड्यं ॥ प्रतिगृहीतृगोत्रेउपनयनमात्रेकृतेपंचपूरुषं ॥ जातकर्माद्युपनयनांतेकृतेसाप्तपूरुषमितिपैठीनसिवचःसाफल्यायव्याख्येयं ॥ नकेवलंदत्तकस्य

परिणयनार्थमेवैषसापिंड्योपन्यासः॥ किंतुतत्संततेस्तत्पित्रादिकुलोत्पन्नैःसहसंबंधसंभवनिर्णयार्थमपि॥ अन्यथापार्थसुभद्र्योरदत्तकयोःसंबंधासंभवशंकायाअर्जुनसुभद्र्योरदत्तकयोःसंबंधासंभवशंकाया आचार्यकर्तृकोपन्यासस्यतदुपपत्त्यैसुधायांगौतमीयोपन्यासस्यालग्नकतापत्तेःयादृशदत्तकस्ययथासापिंड्यमुक्तंतत्संततावपितथैवतद्बोध्यम्॥अतएवयन्मदनपारिजातोक्तं॥दत्तपुत्र्याःसुतस्यमातुःप्रतिग्रहीतृमातुःकुलेत्रिपूरुषंसापिंड्यं॥ दत्तकपुत्रसुतस्यस्वजनककुलेपंचपूरुषामितितदपिपूर्वोक्तरीत्यादत्तकविशेषसंततिविषयत्वेनव्याख्येयम्॥ मुख्यावयत्रानुवृत्त्यभावेपिद्वितीयसापिंड्यप्रकारमाह॥ सुमंतुः॥ पितृपत्न्यःसर्वामातरस्तद्भ्रातरोमातुलास्तद्भगिन्योमातुःस्वसारस्तद्दुहितरश्चभगिन्यस्तदपत्यानिभागिनेयानि अन्यथासंकरकारिणःस्युरितिमदनपारिजातेमाधवीयेचतद्भगिन्यइतिपठितेअन्यग्रंथेषुतुपठ्यते॥ अत्र

यावद्वचनंवाचनिकमितिन्यायेनपरिणीतेष्वेवातिदेशिकंसापिंड्यंनतुपंचमसप्तमा
दिपर्यंतमितिभट्टचरणप्रभृतयोबहवइति॥ यवीयसींस्वापेक्षयावयसावपुषाचन्यूनां॥
अरोगिणींअचिकित्स्यराजयक्ष्मादिरोगरहितां ॥ भ्रातृमतीमितिपुत्रिकाकरणशं
कानिवृत्त्यर्थं ॥ यत्रतुपुत्रिकाकरणाभावनिश्चयस्तत्रतामभ्रातृकामप्युद्वहेत् ॥ इति
दत्तकसापिंड्यनिर्णयः ॥ अथगोत्रप्रवरनिर्णयः ॥ विश्वामित्रोजमदग्निर्भरद्वाजो
थगौतमः ॥ वसिष्ठोत्रिःकश्यपश्चइत्येतेसप्तऋषयः ॥ सप्तानामृषीणामगस्त्याष्ट
मानांयदपत्यंतद्गोत्रमित्याचक्षतइति ॥ असमानार्षगोत्रजामिति ॥ ऋषेरिदमार्षं
गोत्रप्रवर्तकस्यमुनेर्व्यावर्तकःप्रवरइत्यर्थः॥गोत्रंवंशपरंपरयाप्रसिद्धं॥स्वसमानेआर्षे
गोत्रेयस्यतस्माज्जातायानभवतितांयास्कमाधूलमौकानांभिन्नगोत्राणामपिभार्गव
वैतहव्यसावेतसेतिप्रवरैक्यमस्तितत्रविवाहोमाभूदितिअसमानार्षजामित्युक्तम्॥आं

गिरसांबरीषयौवनाश्वेतिमांधात्रांबरीषयौवनाश्वेति ॥ आंगिरसमांधातृप्रवरभेदे
पियौवनाश्वगोत्रैक्यं ॥ तादृशविवाहवारणायासमानगोत्रजामित्युक्तं ॥ तथाचगो
त्रप्रवरौपृथक्पर्युदासेनिमित्तभूतौ ॥ प्रवरैक्येविशेषमाहबौधायनः ॥ पंचानांत्रिषु
सामान्यादविवाहस्त्रिषुद्वयोः ॥ भृग्वंगिरोगणेष्वेवंशेषेष्वेकोपिवारयेदितिविवाहमि
तिशेषः ॥ भृगूणांनविवाहोस्तिचतुर्णामादितोमिथः ॥ श्येतादयस्त्रयस्तेषांविवाहोमि
थइष्यते ॥ षण्णांवैगौतमादीनांविवाहोनेष्यतेमिथः ॥ दीर्घतमाऔतथ्यश्चकक्षी
वांश्चैकगोत्रजाः ॥ भरद्वाजाग्निवैश्याश्चशृंगाःशैशिरयःकृताः ॥ एतेसमानगोत्राःस्यु
र्गर्गानेकेवदंतिवै ॥ पृषदश्वामुद्गलाविष्णुवृद्धाएकोगस्त्योहारीतःसंस्कृतयाक्रपिः॥
यस्कश्चैषांमिथइष्टोविवाहःसर्वैरन्यैर्जामदग्यादिभिश्च ॥ यावत्समानगोत्राःस्यु
र्विश्वामित्रोनुवर्तते ॥ तावद्वासिष्ठश्चात्रिश्चकश्यपश्चपृथक्पृथक् ॥ द्व्यार्षेयाणांत्र्या

र्षेयःसन्निपातोऽविवाहस्त्र्यार्षेयाणांपंचार्षेयःसन्निपातोऽविवाहः ॥ एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते ॥ तावत्समानगोत्रत्वमृतेभृग्वंगिरोगणादित्यसमानप्रवरैर्विवाहः ॥ भरद्वाजाश्चकपयोगर्गारौक्षायणाइति ॥ चत्वारोपिभरद्वाजानोद्वहेयुःपरस्परम् ॥ १ ॥ औतथ्यप्रवरोयेषांगौतमानांभवेदिह ॥ तैःसर्वैरपिनैवेष्टाभरद्वाजस्यसंगतिः ॥ १ ॥ इतिसंक्षिप्तगोत्रप्रवरनिर्णयः ॥ अथदत्तकस्यगोत्रादिनिर्णयः ॥ तत्रयश्चप्रतिगृहीत्राजातकर्मादिभिश्चूडादिभिर्वासंस्कृतस्तदेकगोत्रः ॥ एवमभिंप्रेत्यैवगोत्ररिक्थेजनयितुर्नभजेदंतिमःसुतइतिशास्त्रमपिप्रवृत्तम् ॥ एतदन्यस्तुप्रतिगृहीत्रोपनयनमात्रसंस्कृतस्तदुत्तरतःप्रतिगृहीतोवादेवरातवद्द्विगोत्रएवेति०व्यवस्थाप्रागवादि ॥ तथाप्येषां०व्यवस्थाअभिवादनश्राद्धादिगतगोत्रनिर्द्देशार्था ॥ विवाहेतुदत्तकमात्रेणबीजिप्रतिगृहीत्रोःपित्रोर्गोत्रप्रवरवर्जनंकार्यं ॥ प्रवरमंजर्यादिनिबंधेषुतन्निषेधोक्तेः॥ इ

तिदत्तकस्यगोत्रप्रवरनिर्णयः॥अथप्रत्युद्वाहादिनिषेधोनारदेन॥ प्रत्युद्वाहोनैवकार्यो नैकस्मैदुहितृद्वयं ॥ नचैकजन्ययोःपुंसोरेकजन्येतुकन्यके ॥ नैवंकदाचिदुद्वाहोनै कदामुंडनद्वयमिति ॥ यत्कुटुंबोत्पन्नाकन्यकास्वकुलआनीयतेतत्कुटुंबेएवस्वकुटुंबोत्पन्नकन्यकाप्रदानंप्रत्युद्वाहइत्युच्यते ॥ प्रायस्तत्रविरुद्धसंबंधसद्भावात् ॥ तथाच गृह्यपरिशिष्टे ॥ कन्यांयवीयसीमसपिंडामसगोत्रामविरुद्धसंबंधामुपयच्छेदिति ॥ विरुद्धोलौकिकसंबंधोयस्याःसातथा ॥ भार्यास्वसुर्दुहितापितृव्यपत्नीस्वसाभ्रातृदुहितृकन्यादेवरकन्याचेत्यादयः ॥ प्रकृतेतुभ्रातृदुहितृकन्यादेवरकन्याचकन्यैव व्यवह्रियतइतिकृत्वानस्त्रीपरिणयनं ॥ लोकविरुद्धसंबंधएवमादौविरुद्धसंबंधेसत्येवप्रत्युद्वाहनिषेधोनान्यत्रेतिवेदितव्यं ॥ आसांप्रत्युद्वाहोनकार्यएव ॥ तथैकस्मै वरायदुहितृद्वयंनदद्यात् ॥ ज्येष्ठायांजीवत्यांसत्यांकनिष्ठांनदद्यात् ॥ मृतौत

स्यैववरस्यकनिष्ठांदद्यात् ॥ अन्यथाविरुद्धसंबंधाभावात् ॥ इदमपिप्राग्विरुद्धसंबंधेसतिवेदितव्यं ॥ एवंविधउद्वाहःकदाचिन्नकार्यः ॥ तथैकस्मिन्नेवकालेमुंडनद्वयं नकार्यं ॥ तथाच ॥ एकजन्येतुकन्येद्वेपुत्रयोर्नैकजन्ययोः ॥ नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेति ॥ इतिप्रत्युद्वाहनिर्णयः ॥ अथसोदरकन्यापुत्रयोर्विवाहयोःसमानसंस्कारत्वेप्येकवर्षैकर्तव्यत्वमनुज्ञातंज्योतिःशास्त्रे ॥ सोदर्ययोःकन्यकयोःसुतयोरेकवत्सरे ॥ विवाहोनस्मृतइति ॥ अत्रैकवर्षनिषेधेनभिन्नवर्षैकर्तव्यताविधीयते ॥ निषेधस्त्वेकवर्षेपिषण्मासादर्वागेव ॥ तथाचसारसमुच्चये ॥ एकोदरभ्रातृविवाहकृत्यंस्वस्रोर्नपाणिग्रहणंविधेयं ॥ षण्मासमध्येमुनयःसमूचुर्नमुंडनंमंडनतोपिकुर्यात् ॥ अतएकवर्षनिषेधाद्भिन्नवर्षेतुषण्मासादर्वागपिनैवदोषः ॥ यदितुज्येष्ठमासेयस्यविवाहादौकृतेकार्तिकेमार्गशीर्षेतत्सोदरस्यविवाहादौक्रियमाणेषण्मासाभ्यंतरे

पिचतुर्मासातिक्रमणान्नदोषः ॥ यदुक्तंवाक्यसारे ॥ एकःकर्ताशुभंकुर्यान्नपुत्र्योःपुत्रयोरपि ॥ षण्मासेवाचतुर्मासेवर्षभेदेतुशोभनमिति ॥ षण्मासमध्येचतुर्मासमध्येवापुत्र्योःपुत्रयोरपिशुभंविवाहादिकमेकःकर्तानकुर्यात् ॥ वर्षभेदेतुषण्मासातिक्रमाभावेपिशुभंस्यादिति ॥ तदुपलक्षणेनात्रप्रवेशनिर्गमादिदोषोनास्तीतिगम्यते ॥ तथाचज्योतिःसारे॥ नैकस्मिन्वत्सरेकुर्यात्प्रवेशान्निर्गमंक्वचित्॥अतिक्रांतेवत्सरेस्यात्तथामासचतुष्टयेइतिद्वितीयादिविवाहेपुनरुपनयनादौचसमानसंस्कारत्वाविचारः॥ जातकर्मसंस्कारत्वाद्वृद्धिश्राद्धादौस्वयमेवकर्तव्यत्वाच्च ॥ तथाचवचनं ॥ जातकर्मादिसंस्कारेपिताकुर्वीतनांदिकं ॥ समावृत्तौस्वयंकुर्यादाद्येपाणिग्रहेपितेति ॥ पुनरुपनयनेआश्वलायनः ॥ अथोपेतपूर्वस्यकृताकृतंकेशवपनंमेधाजननंचानिरुक्तंपरिदानंकालश्चेति ॥ अत्रपरिदानादीनामभावात्स्वयमेवकर्तृत्वंसिद्धं ॥ देशव्यवस्था

यामपिनदोषःपठ्यते ॥ ज्योतिःशास्त्रे ॥ एकोदर्योःकरतलग्रहणंयदिस्यादेकोदरस्थवरयोःकुलनाशनंच ॥ एकाब्दिकेहिविधवाभवतीहकन्यानद्यंतरेपिशुभदंपृथुशैलरोधेइति ॥ एकाब्दमध्येएकोदर्योःकन्ययोःकरतलग्रहणंयदिस्यात् ॥ एकोदरस्थवरयोर्वाकरतलग्रहणंस्यात्तदाकुलनाशनंकन्याविधवाचभवति ॥ नदीव्यवधानेपृथुशैलव्यवधानेपिशुभदंभवति ॥ नद्यंतरेणशैलांतरंचलक्ष्यते ॥ तथाचस्मृतिः ॥ व्यवधानंमहानद्यागिरिर्वाव्यवधायकः ॥ वाचोयत्रविभिद्यंतेतद्देशांतरमुच्यते ॥ अतःपृथुपदंनद्यापिसंबंधनीयंतेननदीमहतीगृह्यते ॥ चतुर्विंशतियोजनायामहानद्योगोदावर्यादयोद्वादशपुराणादौप्रसिद्धाः ॥ पृथुशैलःसह्यविंध्यादिः ॥ अयंचसकलभिन्नाब्दादौविधिःप्रवेशनिर्गमनिर्णयेवेदितव्यः ॥ समानन्यायत्वात् ॥ अथैकमातृप्रसूतयोर्निर्णयःसंहितासारावल्यां ॥ एकमातृ

प्रसूतानामेकस्मिन्वत्सरेयादि ॥ विवाहंनैवकुर्वीतवदंतिमुनयोयथा ॥ १ ॥ ॥ स्मृत्यंतरे ॥ ॥ विवाहस्त्वेकजन्यानामेकस्मिन्नुदयेकुले ॥ नाशंकरोत्येकवर्षे स्यादेकविधवायतः ॥ २ ॥ उदयोलग्नं ॥ एकजन्यानामेकस्मिन्लग्नेविवाहःकुलविनाशंकरोति ॥ एकवर्षेत्वेकविधवास्यादित्यन्वयः ॥ विवाहोव्रतबंधादीनामुपलक्षणं ॥ तथाचज्योतिःशास्त्रे ॥ एकमातृजयोरेकवत्सरेपुरुषास्त्रियोः ॥ नसमानक्रियांकुर्यान्मातृभेदेविधीयते ॥ पुरुषौचास्त्रियौचपुरुषास्त्रियौ ॥ पृथक्त्वाविवक्षायांबहुत्वासंभवान्नबहुत्वं ॥ एकमातृजयोर्द्वयोःस्त्रियोरेकवर्षेसमानक्रियांनकुर्यादित्यर्थः ॥ समानक्रियातुल्यसंस्कारः ॥ अत्रवर्षंतुमनुजमानेन ॥ मनुजवर्षेणसंवत्सरव्यवहारात् ॥ तद्वर्षंचैत्रादिफाल्गुनामांतग्रहगणितेप्रसिद्धं ॥ यत्तुगर्गवचनं ॥ भ्रातृयुगेस्वसृयुगेभ्रातृस्वसृयुगेतथा ॥नजातुमंगलंकुर्यादेकस्मिन्मंडपेहनीति ॥एकस्मिन्मंड

पेहनीतिनिषेधादेकवर्षेपिभिन्नेहानिकर्तव्यतार्थसिद्धा ॥ अपिच ॥ पुत्रीपरिणयादूर्ध्वंयावद्दिनचतुष्टयं ॥ पुत्र्यंतरस्यकुर्वीतनोद्वाहमितिसूरयः ॥ दिनचतुष्टयमध्येपुत्र्यंतरस्यविवाहनिषेधाद्दिनचतुष्टयोत्तरमेकवर्षेपिपुत्र्यंतरस्यविवाहोविधीयतइत्युक्तत्वाद्दिनचतुष्टयग्रहणेमंडपोद्वासनांतानिविवाहसमाप्तिकर्माणिलक्ष्यंते ॥ प्रायश्चतुर्थदिनेतेषांविधानात् ॥ अतएववराहः ॥ उद्वाह्यपुत्रींनपिताविदध्यात्पुत्र्यंतरस्योद्वहनंनजातु ॥ दिनानिचत्वारिहिमंगलस्यसमापनंतावदतोविदध्यात्इति ॥ अतश्चैकमंडपेशोभनद्वयस्यनिषेधोस्तीतिसिद्धं ॥ तथाचयमलजातेनिर्णयसिंधौ ॥ एकस्मिन्वासरेप्राप्तेकुर्याद्यमलजातयोः ॥ क्षौरंचैवविवाहंचमौंजीबंधनमेवच ॥ अत्रविशेषःभट्टकारिकायां ॥ एकस्मिन्वत्सरेचैववासरेमंडपेतथा ॥ कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोःइति ॥ ननुस्त्रीणामुपनयनस्थानेविवाहइत्युक्तत्वात् ॥ सो

दरकन्यापुत्रयोर्विवाहोपनयनयोःसमानसंस्कारत्वमितिचेत् उच्यते ॥ अष्टमेवर्षेब्राह्मणमुपनयेदित्याश्वलायनवचनेनकुमारमित्यनुवर्तते ॥ कुमारीनिवृत्त्यर्थमिदमितिवृत्तिकृताव्याख्यातं ॥ हरदत्तेनापिब्राह्मणग्रहणंचात्रस्त्रीशूद्रादिनिवृत्तयइति॥ अतोऽध्ययनानधिकारात्स्त्रीणामुपनयननिषेधएव ॥यथाहभारद्वाजः॥उपनयनाख्यंयत्कर्मविद्यार्थंसमुदीरितमिति ॥ अतएवाहोपनयेद्गुरुःशिष्यं ॥ जाताधिकराज्जननादष्टमेऽब्देभवेदिदं ॥ कुमाराधिकृतेश्चापिनस्त्रीणामिदमुच्यतइत्यतःस्त्रीणामुपनयननिषेधएव॥ एवंचेत्तर्हिस्त्रीणांद्विजन्मत्वंनस्यात्॥तस्मात्स्त्रीणांद्विजन्मत्वसिद्ध्यर्थमेवोपनयनस्थानेविवाहइत्युक्तमेतदेवस्पष्टीकृतंमनुना ॥ वैवाहिकोविधिःस्त्रीणामौपनायनिकःस्मृतः ॥ पतिसेवागुरौवासोगृहस्थाग्निपरिक्रियेति ॥ अतःस्त्रीणांविवाहविधिरेवोपनयनमितिकृत्वाकन्यापुत्रयोर्विवाहोपनयनयोःसमानसंस्कारत्वमितिउ

च्यते ॥ पुरुषाणामुपनयनादूर्ध्वंस्त्रीणांविवाहादूर्ध्वंयथावर्णपूर्णमाशौचंइत्युक्तत्वात्स्त्रीणांविवाहएवचेत्स्त्रीणांविवाहएवोपनयनंस्यात्तदापुरुषाणांस्त्रीणांचोपनयनादूर्ध्वंपूर्णमाशौचमित्यवक्ष्यत् ॥ अपिच ॥ स्त्रीणांविवाहकालेचेद्गुरुशुद्धिर्नविद्यते ॥ द्विजानांचोपनयनेगुरुंतत्रैवपूजयेत् ॥ इत्यादौस्त्रीनरयोःपृथगुपादानात् ॥ स्त्रीविवाहस्तुविवाहएव ॥ एतत्तुमनुवचनेविवाहएवोपनयनंतत्स्त्रीणांद्विजन्मत्वोपादानपरं ॥ अन्यथाश्वलायनादिवचनैर्विरुध्यते ॥ अतःकन्यापुत्रयोरुद्वाहोपनयनयोर्नसमानसंस्कारत्वमितिसिद्धं ॥ अतःसोदरकन्यापुत्रयोर्विवाहोपनयनेएकवर्षेपिकर्तव्येएव ॥ तत्रापिपुत्रोपनयनकर्मसमाप्यपुत्र्युद्वाहंकुर्यात् ॥ नमुंडनंमंडनतोपिकुर्यादितिनिषेधात् ॥ परिवेत्तृत्वंतुपुत्रकृतंपुत्रस्यकन्याकृतंकन्यायाएव ॥ तथाविधगर्गादिवचनदर्शनात् ॥ अतःकन्यापुत्रयोःपरस्परकृतोनपरिवेत्तृत्वपरिवेत्तित्ववि

चारः ॥ अथप्रवेशनिर्गमनिर्णयः ॥ तत्रज्योतिःशास्त्रे ॥ स्त्रीविवाहःकुलेंनिर्गमःकथ्यतेपुंविवाहःप्रवेशोमुनींद्रैःस्मृतः॥ निर्गमादादितोनप्रवेशःशुभस्त्वेकसंवत्सरांतावधिःकीर्तितः ॥ कुलेसापिंड्ये ॥ उभयत्रकुलस्यान्नमित्यादिषुविज्ञानाचार्यविद्येंद्रारण्यादिमुनिभिस्तथाव्याख्यातत्वात्॥ सापिंड्यंसप्तपूरुषंप्रसिद्धं ॥ वासिष्ठे ॥ नपुंविवाहोर्ध्वमृतुत्रयेपिविवाहकार्यंदुहितुःप्रकुर्यात् ॥ नमंडनाच्चापिहिमुंडनंतुगोत्रैकतायांयदिनाब्दभेदेइति ॥ गोत्रैकतायामितिसापिंड्येद्रष्टव्यम् ॥ सापिंडानामेवाविवाहसंबंधनिषेधइति॥तथाचस्मृतिः॥नित्यश्राद्धमधीतंचस्नानंचाशिशिरैर्जलैः॥ सपिंडोनैवकुर्वीतपिंडान्नोद्वासनावधीति॥तथाचगार्ग्यः ॥ नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनं॥दर्शश्राद्धंक्षयश्राद्धंस्नानंशीतोदकेनच॥ अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच ॥ ब्रह्मयज्ञंचाध्ययनंनदीसीम्नोश्चलंघनं॥उपवासव्रतंचैवश्राद्धभोजनमेवच॥अप

सव्यंस्वधाकारंनित्यश्राद्धंतथैवच ॥ नैवकुर्युःसपिंडाश्चमंडपोद्वासनावधीत ॥ विवाहव्रतचूडासुवर्षमर्द्धंतदर्धकं ॥ पिंडान्सपिंडानोदद्युःप्रेतपिंडंविनानरेति ॥ ॥ स्मृत्यन्तरे ॥ पुत्रोद्वाहान्नैवपुत्रीविवाहोपिऋतुत्रये ॥ अब्दांतरान्मुंडनंचनैकदामुंडनद्वयं ॥ पूर्वार्द्धंस्पष्टं ॥ विवाहानंतरंअब्दांतरादब्दमध्येमुंडनंचनकार्यं ॥ तथा ॥ एकदाएकस्मिन्नेवकालेमुंडनद्वयंनकार्यं ॥ एतदपिसापिंडयेद्रष्टव्यं ॥ भिन्नवर्षादिषुतुनदोषइतिप्रागुक्तमेव ॥ तथाचज्योतिःसागरे ॥ संवत्सरेविदेशेतुमंडनादपिमुंडनं ॥ नरोद्वाहात्स्त्रीविवाहंप्राहुर्गर्गमुखाअपि ॥ तथाच ॥ संवत्सरेकियन्न्यूनेनरोद्वाहेकृतेसति ॥ राजांतरंयदिभवेच्छस्तःपाणिग्रहःस्त्रियइतिराजांतरंवत्सरांतरं ॥ ज्योतिःशास्त्रेपि ॥ षण्मासमध्येयदिभूभृदंतरंभवेद्विवाहःपुरुषेविवाहिते ॥ स्त्रीणामपीच्छंतिपराशराद्याःकुलेविवाहव्रतपूर्वकंचेति ॥ भूभृदंतरंराजां

तरं ॥ तच्चोत्तरवर्षेएवभवति ॥ अतोभूभृदंतरंवर्षांतरमित्यर्थः ॥ तथाचोक्तं ॥ यश्चैत्रशुद्धप्रतिपद्यदैकोवारःसराजामुनिभिःप्रतिष्ठितइति ॥ वर्षंतुमानुषमानेनेतिप्रागुक्तं ॥ कुलेसापिंडयेशेषंस्पष्टं ॥ यत्तुमेधातिथिवचनं ॥ पुरुषत्रयपर्यंतंप्रतिकूलंचगोत्रिणां ॥ प्रवेशनिर्गमौतद्वत्तथामंडनमुंडनमिति॥ एतद्भिन्नजातीयेषुसापिंडयेवेदितव्यं ॥ यतस्तेषांसापिंडयंत्रिपुरुषमेव ॥ तथाहशंखः ॥ यद्येकजातबहवःपृथक्क्षेत्राःपृथक्जनाः ॥ एकपिंडाःपृथक्शौचाःपिंडेष्वावर्ततेत्रिष्विति ॥ अथशोभनसन्निपातनिर्णयः ॥ तत्रसायणीये ॥ एकस्मिञ्च्छोभनेवृत्तेद्विशुभंनैवकारयेत् ॥ यदिकुर्यात्प्रमादेनतत्रनस्याच्छुभंध्रुवमिति ॥ वृत्तेप्रवृत्तेसमाप्तइतियावत् ॥ ततःसंवत्सरेवृत्तेचूडाकर्मविधीयते ॥ द्वितीयेवातृतीयेपिकर्तव्यंश्रुतिचोदनादित्यादिप्रयोगदर्शनात् ॥ इदमेकमंडपविषयं ॥ एकमंडपेशोभनद्वयस्यप्राङ्निषिद्धत्वात्

एकग्रहेपिसहशोभनस्यनिषेधः ॥ मंदिरवामभागेवेदीविधानाद्वेद्यास्तुमंडपमध्येविधानाच्चएकगृहेएकमंडपःस्यादितिअतएवस्पष्टमुक्तंप्रयोगसारे ॥ एकलग्नेद्विलग्नेवाद्वेगृहेयस्यशोभने ॥ तयोरेकंप्रनष्टंस्याद्वर्द्धंतेन्यदितिश्रुतिरिति ॥ यस्यगृहेएकलग्नेद्वयोर्लग्नयोर्वाद्वेशोभनेभवतइत्यन्वयः ॥ शोभनंविवाहोपनयनादि ॥ एवमेकमंडपेएकगृहेवाएककर्तरिवाशोभनद्वयस्यनिषेधइति ॥ यत्त्वाचार्यवचनम् ॥ एकमातृप्रसूतेद्वेकन्येवापुत्रकौतयोः ॥ सहोद्वाहंनकुर्वीततथैवव्रतबंधनमिति॥अत्रसोदर्ययोरेककालउद्वाहादिनिषेधात्भिन्नमातृकयोःसहोद्वाहादिकरणमागतंतद्भिन्नकर्तृत्वेनभिन्नगृहेसतिवेदितव्यं ॥ अन्यथापूर्ववचनविरोधः ॥ एवंद्वयोर्निषेधेआदिनिषेधःसिद्धएव ॥ कर्तृत्वमेवात्रविवक्षितं ॥ वृद्धिश्राद्धाधिकारिपित्रादेरेवनतुविवाहहोमकर्तुर्वरस्य॥उद्वाह्यपुत्रींनपिताविदध्यात्पुत्र्यंतरस्योद्वहनंनजातु॥ इत्यादिवचनालिंग

दर्शनात् ॥ अन्यथाकन्याविवाहेकर्तृत्वासंभवाच्च ॥ ॥ अथमंडनमुंडनविचारः ॥ संहितासारावल्यां ॥ नमंडनान्मुंडनमूर्ध्वमिष्टंनपुत्रयोर्मुंडनमेकवर्षे ॥ नपुंविवाहोर्ध्वमृतुत्रयेपिविवाहकार्यंदुहितुश्चकुर्यादिति ॥ एतत्सापिंडतायांज्ञातव्यं ॥ कुलेऋतुत्रयादर्वाक्नकुर्यान्मुंडनत्रयं ॥ प्रवेशान्निर्गमंपश्चान्मंडनान्नतुमुंडनमितिगदितत्वात् ॥ मंडनंविवाहः ॥ मुंडनंचौलोपनयनादि ॥ तथाचसारसमुच्चये ॥ पाणिपीडनविधेरनंतरंचौलकोपनयनेविवर्जयेदिति ॥ चौलोपनयनाभ्यांगोदानसमावर्तनयोरपिग्रहणमतिदेशत्वात् ॥ तथाचश्रीपतिः ॥ व्रतबंधवद्विधेयंनियतव्रतविसर्गश्च ॥ केशांतकर्मविहितंचौलसमंषोडशेवर्षेइति ॥ एतदेवस्पष्टीकृतं ज्योतिर्निबंधे ॥ व्रतंसमावर्तनकंसचौलंकेशांतमेतानिवदंतितज्ज्ञाः ॥ क्षौरंपुरस्कृत्यभवंतियस्माच्चत्वारितस्मादिहमुंडनानीति ॥ केचिच्चौलकर्मैवमुंडनमितिवदंतितद्बहुवाक्यविरोधाद

नादरणीयंशिष्टसमाचाराद्भिन्नवर्षादिषुनदोषइतिप्रागुक्तमेव ॥ तदेवोदाहृतंसंहितासारावल्यां ॥ फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने ॥ भेदादब्दस्यकुर्वीतनर्तुत्रयउल्लंघनमिति ॥ एतद्बहुवाक्यतायांनसंशयनिवृत्तिः ॥ किंतुषोडशवर्षेकेशांतोद्वादशद्वादशवर्षाण्येकैकस्यवेदस्यब्रह्मचर्यमितिवेदप्रामाण्येनकुलेत्रिपुरुषसापिंड्येविवाहःकिंनभवतिइत्यादिशंकयामुंडनशब्दार्थनिश्चयेकात्यायनः ॥ मुंडनंचौलमित्युक्तंव्रतोद्वाहौतुमंडनं ॥ चौलंमुंडनमित्युक्तंवर्जयेद्वरणात्परम् ॥ मौंजीचोभयतःकार्यायतोमौंजीनमुंडनम् ॥ मौंजीप्राधान्यमित्युक्तंमौंज्यंगंमुंडनंस्मृतम् ॥ मौंज्यांमुंडनंअंगंनप्रधानंइति ॥ वरणात्परंकन्यावरणोत्तरमितिसंस्काररत्नमालायां ॥ मंडनेकृतेपुनरुपनयनादेश्चनायंनिषेधः ॥ तत्रकेशमुंडनस्यकृताकृतत्वात्पुनरुपनयनादेःप्रायश्चित्तात्मकत्वेनविहितस्यकालातिक्रमेप्रायश्चित्तावृत्तिभयादनुक्तकालत्वाच्च ॥ इ

तिमंडनमुंडननिर्णयः ॥ ॥ अथगुरुलघुमंगलनिर्णयः ॥ ॥ सारसमुच्चये ॥ चूडाकेशांतसीमंतविवाहोपनयनंबुधाः ॥ गुरुमंगलमित्याहुस्तद्वर्ज्यंलघुमंगलं ॥ तच्चगुरुमंगलाल्लघुमंगलंनिषिध्यते ॥ ज्योतिःशास्त्रे ॥ ज्येष्ठंकृत्वातुषण्मासंनकुर्याल्लघुमंगलं ॥ कुर्वंतिमुनयःकेचिदन्यस्मिन्नपिवत्सरइति ॥ तथाच ॥ मातृयज्ञक्रियापूर्वंज्येष्ठंकृत्वातुमंगलं ॥ ऋतुत्रयंपुनर्यावन्नकुर्याल्लघुमंगलं ॥ मातृयज्ञोमातृपूजातस्याःक्रियावृद्धिश्राद्धादिः ॥ तथाचचतुर्विंशतिमते ॥ तिस्रःपूज्याःपितुःपक्षेतिस्रोमातामहेतथा ॥ इत्येतामातरःप्रोक्ताःपितुर्मातुःस्वसाष्टमी ॥ ब्राह्म्याद्यास्तुततःसप्तदुर्गांक्षेत्रगणाधिपान् ॥ वृद्ध्यादौपूजयित्वातुपश्चान्नांदीमुखान्पितॄन् ॥ मातृपूर्वान्पितॄन्पूज्यततोमातामहानपि ॥ मातामहीततःपूज्यायुग्माभोज्याद्विजातयः ॥ एतद्विधिपूर्वकंगुरुमंगलंकृत्वाषण्मासाभ्यंतरेलघुमंगलंनकार्यमित्युक्तंभवति ॥ मातृपू

जादीनांचूडाकर्मादिषुप्राधान्येनविहितत्वाच्चूडाकर्मादिकंगुरुमंगलमित्युच्यते ॥ तथाचगृह्यकारिकायां ॥ पुंसवनेचसीमंतचौलोपनयनेष्विह ॥ विवाहेचानलाध्येयप्रभृतिश्रौतकर्मसु ॥ इदंश्राद्धंप्रकुर्वीतबीजवृद्धिनिमित्तकं ॥ अन्येषोडशसंस्कारेश्रावण्यादिष्वपीष्यतइति ॥ अत्रपुंसवनग्रहणात्सीमंतसाहचर्याच्चपुंसवनमपिगुरुमंगलंभवति ॥ चौलातिदेशात्केशांतमपि ॥ अयंगुरुमंगलानंतरंलघुमंगलस्यनिषेधः कालातिपन्नस्यैव ॥ नयथाकालप्राप्तस्य ॥ सिंहस्थगुरौगुरुशुक्रास्ताधिमासादिषु चास्यविधानात् ॥ जातकर्मादेराशौचांतरप्राप्तावपिविधानाच्च ॥ तथाचज्योतिःशास्त्रेउक्तं ॥ सीमंतजातकादीनिप्राशनांतानिचक्रमात् ॥ कर्तव्यानिनदोषोस्तिपंचाननगतेगुरौ ॥ वृद्धमनुः ॥ अग्न्याधेयंप्रतिष्ठांचयज्ञदानव्रतानिच ॥ वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥ मांगल्यमभिषेकंचमलमासेविवर्जयेत् ॥ बाल्येवायदि

वावृद्धेशुक्रेचास्तमुपागते ॥ मलमासइवैतानिवर्जयेद्देवदर्शनमिति ॥ अत्रचूडाकरणादीनांवर्जनाच्छेषाणांनदोषइतिज्ञापितं ॥ तथाचबृहस्पतिः ॥ यस्याःक्रियायाः संप्राप्तः कालोमासैर्द्दिनैरपि ॥ नतत्रमौढ्यदोषोस्तिअस्तोवागुरुशुक्रयोरिति ॥ आवश्यकत्वमाहाश्वलायनः ॥ ततोमृतेवापतितेसंन्यस्तेवाविदेशगे ॥ तद्गोत्रजेनश्रेष्ठेनकार्याःपुंसवनादयइति ॥ अतःकालप्राप्तस्यजातकर्मादेरावश्यककर्तव्यत्वादयंदोषोन ॥ अयंचनिषेधःप्रायएककर्तृकस्येतिगम्यते ॥ गुरुलघुमंगलयोर्भिन्नकर्तृकत्वेतुनदोषः ॥ वाक्यद्वयेपिज्येष्ठंकृत्वेतिउक्त्वा ॥ प्राप्त्यप्रदर्शनादेककर्तुःप्रतीयमानत्वाद्विशेषादर्शनाच्चाभिन्नवर्षादिष्वपिनदोषइतिप्रागुक्तमेवसमावर्तनसंज्ञकमिति ॥ एतद्दिगवलंबेनान्यदपिसुधीभिर्निर्णेतव्यं ॥ इतिगुरुलघुमंगलनिर्णयः ॥ ॥ अथपरिवेत्रादिनिर्णयः ॥ तल्लक्षणमाहमनुः ॥ दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते ॥ परि

वेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजइति स्मृत्यंतरे ॥ ज्येष्ठायांयद्यनूढायांकन्यानोद्वाह्यतेनुजा ॥ स्याद्ग्रेदिधिषुर्ज्ञेयापूर्वान्यादिधिषुःस्मृता ॥ परिवेत्रादिस्वरूपकथनपूर्वकंतत्प्रायश्चित्तमाहहारितः ॥ ज्येष्ठेऽनिविष्टेकनीयान्निविशमानःपरिवेत्ताभवतिपूर्वपरिवित्तिःपरिवेदिनीकन्यापरिदायीदातापरियष्टायाजकःतेसर्वेपतिताःसंवत्सरंप्राजापत्येनकृच्छ्रेणपावयेयुरिति ॥ एतत्कामतःपित्राद्यनुज्ञातोद्वाहविषयं ॥ अकामतःपित्रादिदत्तोद्वाहेतुमानवतंत्रेमासिकं ॥ अज्ञानतःपित्राद्यदत्तोद्वाहेयाज्ञवल्कीयंव्रतचतुष्टयं ॥ उपपातकशुद्धिःस्यादेवंचांद्रायणेनवा ॥ पयसावापिमासेनपराकेणाथवापुनरिति ॥ एवमितिगोवधप्रायश्चित्तातिदेशः ॥ अज्ञानतःपित्रादिदत्तोद्वाहेतुयमः ॥ कृच्छ्रद्वयपरिवेत्ताकन्यायाःकृच्छ्रएवतु ॥ अतिकृच्छ्रंचरेद्दाता यष्टाचांद्रायणंचरेत्इति ॥ प्रायश्चित्तांतेविशेषमाहवसिष्ठः ॥ परिवेदनःकृच्छ्रातिकृच्छ्रौचरित्वा

तस्मैदत्वापुनर्निविशेत्तांचैवोपयच्छेदिति ॥ परिवेदनइतिपरिवेत्तुरेवसंज्ञा ॥ तस्मैज्येष्ठायब्रह्मचर्यैतंभैक्ष्यमिवनिवेद्यपुनरुद्वहेत्कामित्युक्तेतामेवेतिव्याचष्टेविज्ञानेश्वरः ॥ तथाग्रादिधिषुपत्यादेरपिविशेषंवासिष्ठः ॥ अग्रेदिधिषुपतिःकृच्छ्रातिकृच्छ्रौद्वाशरात्रिंचरित्वानिविशेततांचैवोपयच्छेतेति ॥ दिधिषुपतिःकृच्छ्रातिकृच्छ्रौचरित्वातस्मैपुनर्निविशेदितिचरित्वाज्येष्ठायामन्येनोढायांपश्चात्तामेवोद्वहेत् ॥ तस्मैकनीयस्याःपूर्ववज्ज्येष्ठांदत्वाअन्यामुद्वहेतेतिव्याख्यातंपारिजातादौएवंनिर्णयति ॥ परिवेदनदोषस्यापवादमाहयमः ॥ पितृव्यपुत्रान्सापत्नान्परपुत्रांस्तथैवच ॥ दाराग्निहोत्रधर्मेषुनदोषःपरिवेदिनइति ॥ परपुत्रादत्तकादयइतिपारिजातः ॥ सोदर्यविषयेपित्वाहकात्यायनः ॥ देशांतरस्थान्क्लीबांश्चतथाकुष्ठव्रणानपि ॥ वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ॥ जडमूकांबधिरकुब्जवामनखेलकान् ॥ अतिवृद्धानभा

यांश्चकृषिसक्तानपास्यच ॥ धनवृद्धिप्रसक्तांश्चकामतःकारिणस्तथा ॥ कुहको
न्मत्तचौरांश्चपरिवेत्तानदुष्यति ॥ खेलकोभग्नपादद्वयः ॥ अभार्यानैष्ठिकब्रह्मचा
रिणः ॥ कामतःकारिणोविवाहादिच्छायानिवृत्ताइतिव्याख्यातंपारिजाते ॥
देशांतरगतज्येष्ठस्यप्रतीक्षावधिमाहवासिष्ठः ॥ अष्टौद्वादशवर्षाणिज्येष्ठभ्रातरमसंनि
विष्टमप्रतीक्षमाणःप्रायश्चित्तीभवतीति ॥ द्वादशेतुमुख्यपक्षः ॥ द्वादशैवतुवर्षाणि
श्रेयान्धर्मार्थयोगतः ॥ न्याय्यःप्रतीक्ष्यतंभ्राताश्रूयमाणःपुनःपुनरिति ॥ अत्राप्यप
वादःकार्ष्णाजिनिः ॥ उन्मत्तःकिल्बिषीकुष्ठीपतितःक्लीबएववा ॥ राजयक्ष्मामया
वीचनन्याय्यंस्यात्प्रतीक्षितुमिति ॥ कन्याविषयेप्युक्तदोषापवादंगर्गः ॥ एकमा
तृप्रसूतानांकन्यानांपरिवेदने ॥ दोषःस्यात्सर्ववर्णेषुनदोषोभिन्नमातृष्विति ॥
वृद्धमनुः ॥ विवाहेनाधिकारेणज्येष्ठकन्यास्थितायदि ॥ तदानुज्ञांविनाचापिकनि

ष्ठामुद्वहेत्तदेति ॥ अन्यत्सर्वंपरिवेदनोक्तमनुसंध्येयमितिपारिजातः ॥ इतिपरिवेत्रादिनिर्णयः ॥ ॥ अथविवाहेअशौचप्राप्तौतदपोह्यसद्यःशौचंचंद्रिकाकारआह ॥ ॥ तत्रयाज्ञवल्क्यः ॥ दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे ॥ आपद्यपिचकष्टायां सद्यःशौचंविधीयते ॥ दातुर्वरस्यकन्यायाःसद्यःशौचंविधीयतेइतिषट्त्रिंशन्मते ॥ विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके ॥ परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः ॥ व्रतयज्ञविवाहेषुश्राद्धेहोमार्चनेजपे ॥ प्रारंभेसूतकंनस्यादनारंभेतुसूतकं ॥ प्रारंभश्च तेनैवोक्तः ॥ प्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः ॥ नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति ॥ वरणंतुमधुपर्कांतेज्ञेयं ॥ तथाचब्राह्मे ॥ गृहीतमधुपर्कस्ययजमानाच्चऋत्विजइत्युक्तेः ॥ एतच्चवरणमस्त्येव ॥ अवरणवत्स्वाधानेष्टिपशुबंधादिषु तुस्वीयाद्यपदार्थेप्रवर्तनमेवारंभः ॥ तथाचदर्शपूर्णमासयोरवृतस्यहोतुःसामिधेनी

षुप्रवृत्तस्याशौचाभावः ॥ कन्यायाःवरापितरंप्रतिदानमेवविवाहः ॥ वरंप्रतितुहोमं
पाणिग्रहणादि ॥ प्रारब्धपाकेश्राद्धकर्तुः ॥ कृतनिमंत्रणेश्राद्धेतुश्राद्धभोक्तुरिति॰व्यव
स्येतिकालविवेचनकारादयः ॥ शंकरभट्टकृतधर्मप्रकाशेतुतत्तत्स्मृतिषुपाकनिष्पत्ति
कृतसंकल्पितनिमंत्राणांत्रयाणामपिआशौचाभावनिमित्तत्वोक्तेर्निमित्तत्रयसमुच्च
यएवश्राद्धेनाशौचंतथैवशिष्टसमाचारादित्युक्तं ॥ मुहूर्तांतरालाभेसामग्र्यांकृतायां
सूतकिनोप्यधिकारोपायमाहपारिजातेविष्णुः ॥ अनारब्धविशुद्ध्यर्थंकुष्मांडैर्जुहु
याद्घृतं ॥ गांदद्यात्पंचगव्याशीततःशुध्यतिसूतकीति ॥ ततःशुध्यतीतिपुनरुक्ति
र्विवाहाद्युपयोगिपाकपरिवेषणादावपिशुद्धिज्ञापनार्था ॥ गांपयस्विनींदद्यात् ॥
संकटेसमनुप्राप्तेसूतकेसमुपस्थिते ॥ कूष्मांडीभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं ॥
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् ॥ यदैवसूतकप्राप्तिस्तदैवाभ्युदयक्रियेतिसं

ग्रहोक्तेः ॥ स्मृतिकौस्तुभेचौलप्रसंगेतुआरंभोत्तरंसूतकेप्राप्तेविशेषः ॥ संग्रहेइत्युक्त्वाकूष्मांडीभिर्घृतंहुत्वेतिसंग्रहवाक्यमुपन्यस्तं ॥ एवंशुद्धिपूर्वकंविवाहाद्यनुष्ठाने तदंगत्वेनसंकल्पितान्नभोजनेनदोषइतिबृहस्पतिनोक्तं ॥ विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके ॥ पूर्वसंकल्पितान्नेननदोषःपरिकीर्तितइति ॥ मृतसूतकमध्येविवाहाद्यनुष्ठानेउक्तशुद्धिपूर्वकमारब्धेइत्यर्थः ॥ नांदीश्राद्धोत्तरंसूतकादौविवाहारंभोत्तरमपि संकल्पितान्नेनैवविशेषइतिषट्त्रिंशन्मते ॥ पूर्वार्धंतुपूर्ववत् ॥ परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैरिति ॥ विवाहादिमध्येसूतकादिप्राप्तावित्यर्थः ॥ पूर्वसंकल्पितान्नभोजनसमयेसूतकादौतुविशेषस्तत्रैव ॥ भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके ॥ अन्यगेहोदकाचांताःसर्वेतेशुचयःस्मृताइति ॥ भोक्तृभिर्भुक्तशेषस्त्याज्यः ॥ पक्वशेषः सूतकीभिर्भोक्तव्यइत्याशयः ॥ ॥ अथविवाहेवधूवरजननीरजोदोषनिर्णयः ॥

वधूवरान्यतरयोर्ज्जननीचेद्रजस्वला ॥ तस्याःशुद्धेःपरंकार्यंमांगल्यंमनुरब्रवीत् ॥
॥ १ ॥ माधवीये ॥ प्रारंभात्प्राग्विवाहस्यमातायदिरजस्वला ॥ निवृत्तिस्तस्यकर्त
व्यासहत्वश्रुतिचोदनात् ॥ १ ॥ प्रारंभात्प्रागितिनांदीश्राद्धात्प्रागितिज्ञेयं ॥
नांदीमुखंविवाहादावित्यादिनातस्यैवप्रारंभः ॥ वृद्धमनुः ॥ विवाहव्रतचूडासुमा
तायदिरजस्वला ॥ तदानमंगलंकार्यंशुद्धौकार्यंशुभेप्सुभिः ॥ मेधातिथिः ॥ चौले
चव्रतबंधेचविवाहेयज्ञकर्मणि ॥ भार्यारजस्वलायस्यप्रायस्तस्यनशोभनं ॥ गर्गः ॥
यस्योद्वाहादिमांगल्येमातायदिरजस्वला ॥ तदानतत्प्रकर्तव्यमायुःक्षयकरंयतः ॥
बृहस्पतिः ॥ वैधव्यंचविवाहेस्याज्जडत्वंव्रतबंधने ॥ चूडायांचशिशोर्मृत्युर्विघ्नोया
त्राप्रवेशयोः ॥ रजोदर्शनस्यनांदीश्राद्धोत्तरमुत्पत्तौततःपूर्वमुत्पत्तावपिमुहूर्तांतरा
लाभेश्रीपूजनादिकांशांतिंकृत्वातदैवचौलादिकार्यं ॥ यथाकारिकानिबंधे ॥ सूत

कोदक्ययोःशुद्ध्यैगांदद्याद्धोमपूर्वकं ॥ प्राप्तेकर्मणिशुद्धास्यादितरास्मिन्नशुध्यति ॥ अलाभेसुमुहूर्तस्यरजोदोषेह्युपस्थिते ॥ श्रियंसंपूज्यतत्कुर्याद्वृत्रहत्याभयंकरीम् ॥ हैमींमाषमितांपद्मांश्रीसूक्तविधिनाचरेत् ॥ प्रत्यृचंपायसंहुत्वाऽभिषिच्यशुभमाचरेत् ॥ श्लोकभेदेनप्रतिपदोक्तारंभस्यमुहूर्तांतरालाभस्यश्रवणान्नपरस्परसापेक्षत्वं ॥रजोदर्शनादिसंभावनायांनांदीश्राद्धस्यापकृष्यानुष्ठानेप्यवाधिरुक्तःप्रयोगरत्ने ॥ एकविंशत्यहर्यज्ञेविवाहेदशवासराः ॥ त्रिषट्चौलोपनयनेनांदीश्राद्धंविधीयते ॥ अथ कन्यारजोदर्शनेनिर्णयः ॥ विवाहात्पूर्वंकन्यारजोदर्शनेजातेविवाहयोग्यतासिद्ध्यर्थं उपायमाहाश्वलायनः ॥ पिताऋतून्स्वपुत्र्यास्तुगणयेदादितःसुधीः ॥ दानावधिगृहे यत्नात्पालयेच्चरजोवतीं ॥ दद्यात्तदृतुसंख्यागाःशक्तःकन्यापितायदि ॥ दातव्यैकापि यत्नेनदानेतस्यायथाविधि ॥ दद्याद्वाब्राह्मणेष्वन्नमतिनिःस्वःसदाक्षिणं ॥ तदतीतर्तु

संख्येषुवरायप्रतिपादयेत् ॥ उपोष्यत्रिदिनंकन्यारात्रौपीत्वागवांपयः॥अदृष्टरजसदद्यात्कन्यायैरत्नभूषणं ॥ तामुद्वहन्वरश्चापिकूष्मांडैर्जुहुयाद्घृतमितिविष्णुः॥यद्देवेतिचक्रकृत्सूक्तंकूष्मांडंपरिकीर्तितं ॥ नवावृत्त्याहुनेदाज्यंहोमःकूष्मांडिकीर्तितः ॥ तस्याःकन्यायादानेकर्तव्येयथाविधिसुवर्णशृंगादिगोदानविधिनेत्यर्थः।वरायेतिउक्तप्रकाराणामन्यतमेनदातुःकन्यादानेयोग्यताभवतीत्यर्थः ॥ उपोष्येतिश्लोकेनदृष्टरजस्ककन्यायाउपवासत्रयांतेगव्यपयःपानपूर्वकं अदृष्टरजसेकुमार्यैरत्नभूषणदानेनविवाहयोग्यताउच्यते ॥ तामुद्वहन्नितिवरस्यकूष्मांडहोमेनतदुद्वाहयोग्यतेतिबोद्धव्यं ॥ अथविवाहहोमकालेकन्याऋतुमतीचेत्तत्रयज्ञपार्श्वे ॥ विवाहविहितेतंत्रेहोमकालउपस्थिते ॥ कन्यामृतुमतींदृष्ट्वाकथंकुर्वंतियाज्ञिकाः ॥ स्नापयित्वातुतांकन्यामर्चयित्वायथाविधि ॥ युञ्जानाज्याहुतिंहुत्वाततःकर्मणियोजयेत् ॥ अन्यच्च ॥

युंजानःप्रथमंमंत्रैरष्टाविंशतिसंख्यया ॥ आज्याहुतिंचजुहुयाद्गांचदद्यात्पयस्विनीं ॥ यद्वा ॥ स्मृत्यर्थसारे ॥ विवाहहोमेप्रक्रांतेयदिकन्यारजस्वला ॥ त्रिरात्रंदंपती स्यातांपृथक्शय्यासनाशिनौ ॥ चतुर्थेहनिसंस्नातौतस्मिन्नग्नौयथाविधि ॥ विवाहहोमंकुर्वीतइत्यादिस्मृतिसंग्रहइति ॥ ॥ अथप्रतिकूलनिर्णयः ॥ कृष्णभट्टीये ॥ वधूवरार्थेघटितेसुनिश्चितेवरस्यगेहेप्यथकन्यकायाः ॥ म्रियेतकश्चिन्मनुजोथ नारीतदानकुर्युःखलुमंडनंते ॥ मनुः ॥ वाग्दानानंतरंयत्रउभयस्यकुलेषुच ॥ त्र्यब्दोनबालमरणेप्रतिकूलंनविद्यते ॥ स्मृतिरत्नावल्यां ॥ ऊनद्विवार्षिकेप्रेतेनतस्यप्रतिकूलता ॥ शांतिःस्याच्छुभदानृणांकूष्मांडगणहोमतः ॥ वाङ्निश्चयेकृतेपश्चात्पितरौनिधनंगतौ ॥ तयोस्तत्प्रतिकूलंस्यान्नान्येषांतुकदाचनेतिवृद्धवसिष्ठः ॥ वरवध्वोःपितामातापितृव्यश्चसहोदरः ॥ एतेषांप्रतिकूलंस्यान्महाविघ्नप्रदंभवेत् ॥ पि

तापितामहश्चैवमाताचैवपितामही ॥ पितृव्यस्त्रीसुतोभ्राताभगिनीवाविवाहिता ॥ एभिरेवविपन्नैश्चप्रतिकूलंबुधैःस्मृतं ॥ अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेदिति ॥ मांडव्यः ॥ वाग्दानानंतरंमातापिताभ्राताविपद्यते ॥ विवाहोनैवकर्तव्यःस्ववंशहितमिच्छतेति ॥ ॥ अथसंकटेप्रवृत्तिप्रकारमाहमेधातिथिः ॥ ॥ वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः ॥ ततःसंवत्सरादूर्ध्वंविवाहः शुभदोभवेत् ॥ पुरुषत्रयपर्यंतंप्रतिकूलंस्वगोत्रिणां ॥ प्रवेशान्निर्गमस्तद्वत्तथामंडनमुंडने ॥ प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियां ॥ आचतुर्थंततः पुंसिपंचमेशुभदंभवेदिति ॥ स्मृतिरत्नावल्यां ॥ पितुरब्दमिहाशौचंतदर्धंमातुरेवच॥ मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः ॥ अन्येषांतुसपिंडानामाशौचंमाससंमितं ॥ तदंतेशांतिकंकृत्वाततोलग्नंविधीयत इति ॥ ज्योतिःप्रकाशे ॥ प्रतिकूलेपिकर्तव्योविवाहोमासमंतरा ॥ शांतिंविधायगांद

त्वावाग्दानादिचरेत्पुनरिति ॥ स्मृत्यंतरे ॥ प्रतिकूलेपिकर्तव्यंकेप्याहुर्बहुसंप्लवे ॥ प्रतिकूलेसपिंडस्यमासमेकंविवर्जयेत् ॥ विवाहस्तुततःपश्चात्तयोरेवविधीयतइति ॥ ज्योतिःसागरे ॥ दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये ॥ प्रौढायामपिकन्यायांनानुकूलंप्रतीक्षतइति ॥ अन्यत्रापि ॥ दीर्घरोगाभिभूतस्यदूरदेशस्थितस्यच ॥ उदासीनास्थितस्यापिप्रतिकूलंनविद्यते ॥ संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना ॥ शांतिरुक्तागणेशस्यकृत्वातांशुभमाचरेत् ॥ अकृत्वाशांतिकंयस्तुनिषिद्धेसतिदारुणे ॥ प्रकरोतिशुभंकर्मविघ्नस्तस्यपदेपदे ॥ वृद्धवासिष्ठः ॥ प्रतिकूलेतुसंप्राप्तेविवाहंनैवकारयेत् ॥ अंतेदोषविनाशायकुर्याच्छांतिमिमांशुभां ॥ श्रियैजातइतिश्रियं ॥ इदंविष्णुरितिविष्णुं ॥ गौरीर्मिमायेतिगौरीं ॥ त्र्यंबकमितित्र्यंबकं ॥ परंमृत्योरितियमं ॥ पूजयित्वातिलाज्यंचहुनेदष्टोत्तरंशतं ॥ ॐ भूःस्वाहामृत्युर्न

श्यतांस्नुषायैसुखंवर्धतांस्वाहा ॥ ततोहोमंसमाप्य गोदक्षिणाभवेदिति ॥ स्मृतिचंद्रिकायां ॥ कृतेवाङ्निश्चयेपश्चान्मृत्युर्भवतिगोत्रिणः ॥ तदानमंगलंकार्यंनाशवैधव्यदंध्रुवं ॥ वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः ॥ तत्रोद्वाहोनैवकार्यः स्ववंशक्षयदोषकृत्‌इति ॥ अत्रयद्यपिम्रियेतकस्यचिदिति मृत्युर्भवति कस्यचिदितिचाविशेषेणोक्तं ॥ तथापिपितामहादीनामपिमरणस्यप्रतिकूलदोषनिमित्तत्वेनक्वचिदकीर्तनादविवाहितायाभगिन्याइतिविवाहितायामरणस्यतथात्वानुक्तेर्मेधातिथिवाक्येस्वगोत्रिणामितिचंद्रिकावाक्येमर्त्यस्यगोत्रिणइतिचकीर्तनाद्वध्वावरस्यवासगोत्रसपिंडेषुत्रिपुरुषांतर्गतेमर्त्येमृतेप्रतिकूलदोषइतिमंतव्यं ॥ स्त्रीचवरस्यद्वितीयादिविवाहसमयेपूर्वोढासुतास्तस्यांपूर्वोत्पन्नः एतत्पौत्रोपलक्षणं ॥ एवंपितृव्यग्रहणंतत्पुत्रस्यएवंवरमारभ्यजनकत्रिपुरुषीकूटस्थमारभ्यसंतानभेदेचत्रिपुरुषी

अत्रबोद्धव्या॥ वधूवरयोःसमानगृहेतन्मरणेकंचित्कालंप्रतीक्ष्यैवविवाहइति ॥ तदाकुर्युरित्यादिशब्दैर्बोध्यते॥ तयोस्तत्प्रतिकूलंस्यादितिकालप्रतीक्षाशांतिभ्यामसमाधेयोदोषःद्वयोर्युगपन्मरणजइत्यर्थः ॥ अतएवोक्तंनान्येषांतुकदाचनेति अन्येषांसपिंडानांतयोरप्येकैकमरणजस्तुसमाधेयइतिआशयः ॥ वृद्धवसिष्ठवाक्येचतुर्णांमरणस्यमहाविघ्नकरत्वकथनेतत्रप्रतीक्षासहिताकेवलंवाविनायकशांतिरितिकथनार्थं ॥ अतएवतद्विधिवाक्यशेषेणशांत्यकरणेपदेपदेइतिविघ्नस्यमहत्त्वंप्रदर्शितं ॥ एभिरेवविपन्नैरितिकालप्रतीक्षासहितायाः श्रीपूजनादिशांतेर्निमित्तमेतन्मरणमेवेत्याशयः ॥ अतएवमांडव्यवाक्येनैवकर्तव्योनिमित्तानिमित्तानंतरमितिव्याख्येयं॥ इतिप्रतिकूलनिर्णयः ॥ अथचूडोपनयनोद्वाहानांप्रारंभोत्तरंमुहूर्तांतरालाभेजननाशौचपातेसंकटवशात्प्राप्तकर्मकरणेतच्छुद्ध्यर्थंप्रायश्चित्तभूतमार्तंडानुसारी

कूष्मांडीहोमप्रयोगः ॥ ॥ कृतस्नानादिर्यजमानः पत्न्यासंस्कार्येणचसहपीठादावुपविश्याचम्य अस्यामुकसंस्कार्यस्यजननाशौचमध्येसंकटवशेनअमुकसंस्कारंकर्तुंकूष्मांडमंत्रैराज्यहोमंपयस्विनीगोदानंतन्निष्क्रयंवापंचगव्यप्राशनंचकरिष्येइति ॥ तत्रादौनिर्विघ्नतार्थंगणपतिपूजनंस्वस्तिवाचनमपिकुर्वंति॥कूष्मांडहोमंकर्तुंअस्मिन्स्थंडिलेपंचभूसंस्कारपूर्वकंविटंनामानमग्निंप्रतिष्ठाप्यसंपूज्य ॥ तत्रदेवताभिध्यानं ॥ तत्रप्रजापतिंइंद्रंअग्निंसोमं ॥ प्रधानंअग्निंवायुंसूर्यंकूष्मांडमंत्रैः ॥ अग्निंवायुंसूर्यंअग्नीवरुणौअग्नीवरुणौअग्निंवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतःस्वर्कान्वरुणंआदित्यंअदितिंप्रजापतिंअग्निंस्विष्टकृतंएताअंगप्रधानार्थादेवताःआज्येनास्मिन्कर्मण्यहंयक्ष्ये ॥ ततोदक्षिणतोब्रह्मासनादिआज्यभागांतंकृत्वा॥नात्रचरुः॥कू

---

१ कूष्मांडहोमस्य प्रायश्चित्तत्वात् ॥

ष्मांडहोममंत्राः ॥ ॐ यद्देवादेवहेडनंदेवासश्चकृमावयम् ॥ अग्निर्मातस्मादेनंसोविश्वान्मुंचत्वꣳहसःस्वाहा ॥ १ ॥ इदमग्नयेनमम ॥ ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमावयम् ॥ वायुर्मातस्मादेनंसोविश्वान्मुंचत्वꣳहसःस्वाहा ॥ २ ॥ इदंवायवे० ॐ यदिजाग्रद्यदिस्वप्नऽएनाꣳसिचकृमावयम्॥ सूर्य्योमातस्मादेनंसोविश्वान्मुंचत्वꣳहसःस्वाहा ॥ ३ ॥ इदंसूर्यायनमम ॥ ततोभूराद्याःस्विष्टकृदंतादशाहुतयः ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ ततःपयस्विनीगोदानं ॥ प्रतिगृहीतृब्राह्मणपूजनं ॥ गांवस्त्रालंकारादिभिःसंपूज्य ॥ दानमंत्रः ॥ गवामंगेषुतिष्ठंत्विति ॥ इमांगांपयस्विनींयथाशक्त्यलंकृतांजननाशौचदोषनिरसनार्थंकूष्मांडीप्रायश्चित्तहोमसांगतासिद्ध्यर्थंप्राप्तकर्मकरणेअधिकारार्थंचअमुकशर्म

णेब्राह्मणायतुभ्यमहंसंप्रददे ॥ दानसांगता० इमांदक्षिणां० अथवागोनिष्क्रयीभूतं निष्कार्धंपादंवासुवर्णमूल्यरजतद्रव्यंसदक्षिणाकंतुभ्यमहं० ततोविधिवत्पंचगव्यंकृत्वा॥ यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमामके ॥ प्राशनात्पंचगव्यस्यदहत्यग्निरिवेंधनंइतिपठितमंत्रपूर्वकं ॥ ॐ इत्यनेनप्राशयेत्॥ यथाशक्तिब्राह्मणभोजनसंकल्पः ॥ ब्राह्मणान्संपूज्यतैराशिषोगृहीत्वाअग्निंविसृज्य ॥ अनेनकृतेनकर्मणाश्रीपरमेश्वरःप्रीयतां ॥ इतिसंस्कारभास्करेकूष्मांडीहोमप्रयोगः ॥ अथविवाहहोमकालेकन्याऋतुमतीचेत्तत्रहोमप्रयोगः ॥ कन्यासुस्नाताशुभासनेउपविश्य ॥ ऋतुदोषविनाशार्थं प्राप्तकर्मणियोग्यतासिद्ध्यर्थंयुंजानहवनंपयस्विनीगोदानंपयःप्राशनंचकरिष्ये॥ निर्विघ्नतासिद्ध्यर्थंगणेशंसंपूज्य॥ युंजानहोमंकर्तुंअहमस्मिन्स्थंडिलेपंचभूसंस्कारपूर्वकंविटनामानमाग्निंप्रतिष्ठाप्यसंपूज्य ॥ दक्षिणतोब्रह्मासनाद्याज्यभागांतेनात्रचरुः ॥

युंजानःप्रथमं॥ युंजतेमनऽइतिऋग्भ्यांचतुर्दशावृत्त्याष्टाविंशत्याहुतीराज्येनहुत्वा ॥ तौचमंत्रौ ॥ ॐ युञ्जानःप्रथमंमनस्तत्वायसविताधियंः ॥ अग्निर्ज्योतिर्निचाय्यपृथिव्याऽअध्याभरत्स्वाहा ॥ इदंसवित्रेनमम ॥ १॥ युञ्जतेमनऽउतयुञ्जतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥ विहोत्रादधेवयुनाविदेकऽइन्महीदेवस्यसवितुःपरिष्टुतिःस्वाहा ॥ १ ॥ इदंसवित्रेनमम ॥ ततोभूराद्याःस्विष्टकृदंतादशाहुतयः ॥ संस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ ततःपयस्विनींगांदद्यात् ॥ गांवस्त्रालंकारादिभिःसंपूज्य ॥ प्रतिगृहीतृब्राह्मणंसंपूज्य ॥ दानमंत्रः ॥ गवामंगेषुतिष्ठंति भुवनानिचतुर्दश ॥ यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच ॥ इमांगांपयस्विनीं यथाशक्त्यलंकृतांक्रतुदोषनिरासार्थंयुञ्जानप्रायश्चित्तहोमसिद्ध्यर्थंप्राप्तकर्मकरणेअ

धिकारार्थंचब्राह्मणायतुभ्यमहंसंप्रददे ॥ दानसांगतासिद्ध्यर्थंइमांदक्षिणांतुभ्यमहं
संप्रददे ॥ अथवागोनिष्क्रयीभूतंनिष्कंनिष्कार्धंवासुवर्णमूल्यरजतद्रव्यंसदक्षिणा
कंतुभ्यमहंसंप्रददे ॥ ततःपयःप्राशनं ॥ कामधेनुसमुद्भूतंघृतबीजंशशिप्रभं ॥ त
स्यप्राशनमात्रेणरजोदोषोविनश्यतु ॥ इदंरजोदोषनिवृत्त्यंतंत्रिदिनंपयःप्राश्यं ॥
अग्निंविसृजेत् ॥ इतिसुज्ञानहोमविधिः ॥ ॥ अथवधूवरमातृरजःप्राप्तौनांदीश्राद्धो
त्तरंमुहूर्तांतरालाभेसंकटेप्राप्तकर्माधिकारार्थंश्रीशांतिकरणेप्रयोगः ॥ आचम्यदे
शकालौसंकीर्त्यअस्यसंस्कार्यस्यविवाहादिमंगलमध्येअस्मत्पत्न्यारजउत्पन्नदो
षनिरासार्थंसकलारिष्टशांत्यर्थंसंस्कार्यस्यबव्हायुष्यप्राप्त्यर्थंश्रीशांतिंकरिष्ये ॥ त
दंगत्वेनगणपतिपूजनंस्वस्तिवाचनंकृत्वाआचार्यंवृत्वास्थंडिलेपंचभूसंस्कारपूर्वकंव
रदनामानमग्निंप्रतिष्ठाप्यसंपूज्य ॥ तत्पुरतःभद्रपीठेतंदुलाष्टदलंविरच्यतदुपरिकल

शंसंस्थाप्योपरिपूर्णपात्रंनिधायवस्त्रयुग्मेनसंवेष्ट्यतदुपरिअग्न्युत्तारणप्राणप्रतिष्ठापूर्वकंस्वर्णमयींश्रीमूर्तिंप्रतिष्ठाप्य ॥ श्रीसूक्तेनषोडशोपचारैःसंपूज्यप्रार्थयेत् ॥ महालक्ष्मिनमस्तुभ्यंसहस्रकरमंडिते ॥ आयुःश्रीमंगलंदेहिरजोदोषंनिवारयेति ॥ दक्षिणतोब्रह्मासनाद्याज्यभागांतंकृत्वापंचदशर्चाश्रीसूक्तेनप्रत्यृचंतिलाज्यपायसहोमंकृत्वा ॥ भूरादिस्विष्टकृदंतादशाहुतीर्हुत्वाज्येन ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ गवामंगेष्वितिगांवातन्निष्क्रयद्रव्यंदत्वा ॥ ऐंद्रवारुणपावमानीयमंत्रैरंगसूक्तैराभिषेकमंत्रैश्चसंस्कार्येणसहाभिषिंच्य ॥ प्रतिमामाचार्यायदत्वादक्षिणांदत्वाविप्राशिषोगृहीत्वाब्राह्मणभोजनसंकल्पंकृत्वाप्रतिमाग्निंविसृज्य ॥ यस्यस्मृत्येतिनत्वाकर्मसंपूर्णतांवाचयेदितिसंस्कारभास्करेश्रीशांतिप्रयोगः ॥ अथविघ्नपरिहारायविनायकशांतिरुच्यते ॥ ॥ तत्रकालः ॥ विष्णुधर्मे ॥

हस्तपुष्याश्वयुक्सौम्येवैष्णवेचोत्तरात्रये ॥ नक्षत्रेचमुहूर्तेचमैत्रेवाब्रह्मदैवते ॥ शुक्लपक्षेचतुर्थ्यांचवासरेधिषणस्यच ॥ विघ्नस्यपरिहारार्थंशांतिंकुर्याद्विनायकीमिति ॥ अथविनायकशांतिसंभाराः ॥ सिद्धार्थाः ॥ गोघृतं ॥ सर्वौषध्यः ॥ प्रियंगुः ॥ नागकेशरं ॥ चंदनं ॥ अगरु ॥ कर्पूरः ॥ कस्तूरी ॥ सप्तमृदः ॥ अश्वस्थानात् ॥ गजस्थानात् ॥ वल्मीकात् ॥ सरित्संगमात् ॥ अशोष्यह्रदात् ॥ राजद्वारात् ॥ गोगोष्ठात् ॥ ७ ॥ गोरोचनं ॥ चंदनं ॥ कुंकुमं ॥ अगरुप्रभृतयोगंधाः ॥ गुग्गुलः ॥ अव्रणाश्चत्वारःकुंभाः ॥ आनडुहंरोहितचर्म ॥ भद्रासनं ॥ श्रीपर्णिपीठं ॥ चूतादिपंचपल्लवाः ॥ चतस्रःस्रजः ॥ अहतवस्त्राणि ॥ श्वेतवस्त्रं ॥ सार्षपतैलं ॥ औदुंबरवृक्षोद्भवःस्रुवः ॥ शूर्पं ॥ सकृत्फलीकृतास्तंडुलाः ॥ तिलपिष्टं ॥ तिलपिष्टमिश्रितोदनः ॥ शूद्रवर्णे ॥ पक्वापक्वंमांसं ॥ पक्वापक्वाश्चमत्स्याः ॥ द्विजवर्णेमा

अथ विनायक शांति

षपिष्टमयंमत्स्यमांसंच ॥ चित्रविचित्राणिपुष्पाणि ॥ सुगंधिद्रव्याणिच ॥ शूद्रवर्णे ॥ त्रिविधासुरा ॥ गौडी ॥ पैष्टी ॥ माध्वीच ॥ द्विजवर्णे ॥ पयोगुडलवणमिश्रगौडी ॥ पयोलवणमाषपिष्टमिश्रपैष्टी ॥ पयोमधुलवणमिश्रमाध्वी ॥ मूलकः ॥ कंदाकारोभक्ष्यइत्यर्थः ॥ पूरिकाः ॥ अपूपाः ॥ ३ ॥ स्नेहपक्वगोधूमविकारइत्यर्थः ॥ उंडेरकस्रजः ॥ ३ ॥ माषपिष्टदामयापोतास्रजइत्यर्थः ॥ दध्योदनं ॥ पायसं ॥ गुडमिश्रशाल्यादिपिष्टं ॥ मोदकाः ॥ दूर्वाः ॥ यजमानपत्न्योरहतवस्त्राणि ॥ विनायकांबिकयोः सौवर्ण्यौद्वेप्रतिमे ॥ इतिविनायकशांतौसंभाराः ॥ अथप्रयोगः ॥ उक्तकालेपवित्रपाणिरधिकारीप्राणानायम्यदेशकालौसंकीर्त्य ॥ अद्ये० ममअमुकस्यकर्तव्यउपनयनेविवाहेनिश्चयोत्तरंकस्यचित्अमुकसपिंडगोत्रजपुरुषस्यसंजातमृतिजनितप्रतिकूलसकलदोषपरिहारद्वारावधूवरयोः आयुरभि

वृद्धिपूर्वकसंतत्यविच्छेदसकलभूतिसिद्ध्यर्थंश्रीपरमेश्वरप्रीत्यर्थंसनवग्रहमखांविनायकशांतिंकरिष्ये ॥ वाअस्यकुमारस्यउपनयनकर्मणोनिर्विघ्नफलसिद्ध्यर्थंविनायकशांतिंकरिष्ये ॥ इतिसंकल्पः ॥ तदंगत्वेनगणेशपूजनादिनांदीश्राद्धांतंकृत्वाऽऽचार्यवरणंकुर्यात् ॥ आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः० ॥एवंचतुरःपराशरमतेष्टौवाऋत्विजोवृणुयात अष्टौचेत्तेषुचत्वारोस्वस्तिवाचकाः ॥ तथाचत्वारःस्वस्तिवाचकाइतिमदनरत्ने ॥ अस्ययागस्य० ॥ १ ॥ तेषांवस्त्रादिभिःपूजनं ॥ ततःसाचार्योयजमानोवामहस्तेगौरसर्षपान्गृहीत्वारक्षोहणंइत्यादिमंत्रैःसर्षपान्विकीर्य ॥ गायत्र्यादिभिर्मंत्रैःपंचगव्यंकृत्वा ॥ आपोहिष्ठेतित्रिभिर्मंत्रैःकर्मभूमिंप्रोक्ष्य ॥ भूरसीतिमंत्रेणभूमिंसंपूजयेत् ॥ ततआचार्यःपंचवर्णैःशुक्लैर्वापिष्टैर्मध्येस्व

---

१ यज्ञियमध्यदेशे ॥

स्तिकंकृत्वातदुपरिआनडुहंचर्मप्राग्ग्रीवमुत्तरलोमतदभावेप्रागग्रकुशानास्तीर्यतत्र श्रीपर्णिकाष्ठजंपीठंउत्तरच्छदंसंस्थाप्यतच्छ्वेतवस्त्रेणाच्छाद्यतच्चतुर्दिक्षुचत्वारिस्वस्तिकानिकृत्वातेषुप्रागादितएकवर्णांश्चतुरःकुंभान्महीद्यौरित्यादिमंत्रैःपूर्णपात्रांतं चतुर्ब्राह्मणैःपृथक्पृथक् मंत्रावृत्त्यासंस्थापयेत् ॥ तत्रविशेषः ॥ कलशेषु-ह्रदोदकं नदीसंगमोदकेनापूर्यपंचमृदःक्षिपेत् ॥ पंचमृद्यथा ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदादिति ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतंइतिमंत्रेणक्षिपेत् ॥ गंधनिक्षेपेचंदनागरुकेशरकस्तूरीकर्पूरगोरोचनगुग्गुलुंनिक्षिपेदिति ॥ चंदनमालाविभूषितान्कृत्वा ॥ कलशस्यमुखेविष्णुरित्यादिदेवदानवइत्यंतंपठेत् ॥ ततश्चतुर्दिक्षुचत्वारऋत्विजःत्वन्नोऽ अग्नेतिमंत्रे

णवरुणमावाह्यषोडशोपचारैःसंपूज्य ॥ आनोभद्राः ॰ ॥ १ ॥ शन्नोवातः॰ ॥ ॥ २ ॥ इत्यादिस्वशाखोक्तशांतिकमंत्रान्पठेयुः ॥ ततआचार्योभद्रासनस्यपूर्वतो होमार्थंस्थंडिलंकृत्वा ॥ तदीशान्यांहस्तमात्रवेदिकायांपीठेवस्त्रादौवामहीद्यौरित्यादिपूर्णपात्रांतंकलशंसंस्थाप्य ॥ ततःस्वर्णमयविनायकांबिकामूर्त्योरग्न्युत्तारणपूर्वकप्राणप्रतिष्ठांकृत्वा॥ कलशोपरिसंस्थाप्य॥आवाहयेत्[1] ॥ तत्रमंत्रः ॥ ॐ तत्पुरुषायविद्महेवक्रतुंडायधीमहि ॥ तन्नोदंतिःप्रचोदयात् ॥ इतिविनायकं ॥ सुभगायैविद्महेकाममालिन्यैधीमहि॥तन्नोगौ॰इत्यंबि॰हेमप्र॰ गौरीमावा॰ अपरार्केभविष्येत्वन्याअपिउक्ताःतत्परितोयथावकाशंप्रतिमास्वक्षतपुंजेषुवा॰न्यो[2]मकेशं ॥ पार्वतीं ॥ भीम

---

[1] गणानान्त्वाअम्बिकेतिमंत्राउक्तौशांतिमयूखे ॥ [2] एतादेवताः अपरार्कोक्तभविष्यत्पुराणानुसारेण ॥

जं ॥ वासुदेवं ॥ अर्कमंडलं ॥ सोममंडलं ॥ भौमं ॥ बुधं ॥ बृहस्पतिं ॥ शुक्रं ॥ शनैश्चरं ॥ राहुं ॥ केतुं ॥ बाहुलेयं ॥ विष्णुं ॥ एतान् ॥ इंद्रादिलोकपालांश्चावाह्यादिनैवेद्यांतैरुपचारैःसंपूज्य ॥ भद्रासनस्यपूर्वतःकृतेस्थंडिलेग्निस्थापनंकुर्यात् ॥ ॥ तद्यथा ॥ अद्यपू० अस्मिन्सग्रहमखविनायकशांत्याख्येकर्मणिअस्मिन्स्थंडिलेपंचभूसंस्कारपूर्वकं अग्निस्थापनंकरिष्ये ॥ पंचभूसंस्कारान्कृत्वावरदनामानमग्निंस्थापयेत् ॥ विनायकादुत्तरतःग्रहवेद्यांग्रहावाहनंकुर्यात् ॥ अद्यपू० प्रारिप्सितकर्मणःसांगतासिद्ध्यर्थंआदित्यादिग्रहाणांस्थापनंपूजनंचकरिष्ये ॥ तत्रग्रहपीठमध्येआदित्यादिअनंतपर्यंतंरजोदर्शनशांतिवत्ग्रहाणांस्थापनंपूजनंचकार्यं ॥ तदैशान्यांदध्यक्षतादिभूषितंकलशंविधिनास्थाप्यतत्रवरुणंपूजयेत् ॥ देवदानव० भवसर्वदा ॥ ततोग्निसमीपमागत्यान्वाधानंकुर्यात् ॥ अद्य० अस्मिन्सग्रहमख

विनायकशांत्याख्येकर्मणिदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ पूर्वैणगमनमित्यादिपदार्थानहंकरिष्ये ॥ अथदेवताभिध्यानं ॥ तत्रप्रजापतिंइंद्रं अग्निंसोमंआज्येनएकैकयाहुत्यायक्ष्ये ॥ अत्रप्रधानं ॥ आदित्यादिनवग्रहान् अर्कादिसमिच्चरुतिलाज्यद्रव्यैः प्रत्येकंप्रतिद्रव्येणचतुश्चतुःसंख्याकाभिराहुतिभिर्यक्ष्ये ॥ विनायकादिपंचदेवताः क्षेत्रपालंवास्तोष्पतिंइंद्रादिलोकपालांश्चतैरेवद्रव्यैः प्रत्येकंप्रतिद्रव्येणद्वाभ्यांद्वाभ्यांआहुतिभ्यांयक्ष्ये ॥ पुनरत्रप्रधानं ॥ मितं ॥ सभितं ॥ शालं ॥ कटंकटं ॥ कूष्मांडं ॥ राजपुत्रं ॥ प्रत्येकंएकैकयाचर्वाहुत्या ॥ व्योमकेशादीन्प्रत्येकंएकैकयाचर्वाहुत्यायक्ष्ये ॥ शेषेणास्विष्टकृतमित्यादि ॥

---

१ अष्टाष्टसंख्याकाभिराहुतिभिः तथाचअधिदेवताप्रत्यधिदेवतानांतैरेवद्रव्यःप्रत्येकंप्रतिद्रव्येण ॥

दक्षिणतोग्नेर्ब्रह्मासनादिपरिस्तरणांतंपात्रासादनं ॥ पवित्रच्छेदनादर्भास्त्रयः ॥ पवित्रेद्वे ॥ प्रोक्षणीपात्रं ॥ आज्यस्थाली ॥ चरुस्थाली ॥ ग्रहहोमार्थंगृहासिद्धचरुस्थाली॥संमार्गकुशाःपंच॥उपयमनकुशाःसप्त॥ समिधस्तिस्रः ॥ स्रुवः ॥ आज्यं ॥ तंडुलाः ॥ पूर्णपात्रं ॥ पवित्रच्छेदनादिपात्रप्रोक्षणांतंकृत्वा ॥ आज्यस्थाल्यामाज्यनिर्वापः ॥ सपवित्रकेचरुपात्रेतंडुलावापःप्रणीतोदकमासिच्य ॥ दक्षिणतआज्याधिश्रयणं ॥ चरोरधिश्रयणमाज्यस्योत्तरतइत्यादिचरूद्वासनांतंकुर्यात ॥ ततःगव्याज्यलोलीकृतेनगौरसर्षपकल्केनोद्वर्तितसर्वांगंसर्वौषधीभिःसर्वगंधैश्चलिप्तशिरसंयजमानंआचार्योमंगलवेदघोषैर्भद्रासनेउपवेशयेत् ॥ ततोयजमानःपूर्वव

---

१ कृतोद्वर्तनादिकस्ययजमानस्यभद्रासनेउपवेशनंकार्यमितिविज्ञानेश्वरमहार्णवबृहत्पाराशराः ॥ उपवेशनोत्तरंउद्वर्तनादिकंकार्यमितिमदनरत्नः ॥

तैश्चतुर्भिर्ऋत्विग्भिःस्वस्तिवाचनंकुर्यात् ॥ भोब्राह्मणाःममगृहेअद्यकरिष्यमाणसग्रहमखविनायकशांत्याख्यस्यकर्मणःबहुपुण्याहंभवंतोब्रुवंतु ॥ अस्तुपुण्याहंइतिद्विजावदेयुः ॥ एवंकल्याणादि० ॥ ततोजीवत्पतिपुत्राभिःसुवासिनीभिर्नीराजनंकार्यं ॥ ताभ्यश्चयजमानोवस्त्रकंचुक्यादिदद्यादित्याचारः ॥ ततआचार्योयजमानदक्षिणतउदङ्मुखस्तिष्ठन्पूर्वदेशस्थकलशमादाय ॥ सहस्राक्षंशतधारमृषिभिःपावनंकृतं ॥ तेनत्वामभिषिंचामिपावमान्यःपुनंतुते ॥ इतिमंत्रेणयजमानमभिषिंचेत् ॥ कुंभमध्येकिंचिज्जलमवशेषणीयं ॥ दक्षिणंकुंभमादाय ॥ भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः ॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः ॥ इतिदक्षिणकुंभेनयजमानमभिषिंचेत् ॥ ततःपश्चिमकुंभमादाय ॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्द्धनि ॥ ललाटेकर्णयोरक्ष्णोरापस्तत्घ्नंतुसर्वदा ॥ इतिपश्चिमकुंभेनयजमानमभि

षिंचेत् ॥ ततउत्तरकलशमादाय ॥ सहस्राक्षंशतधारमृषिभिःपावनंकृतं ॥ तेनत्वामभिषिंचामिपावमान्यःपुनंतुते ॥ भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः ॥ भगमिंद्रश्चवायुश्चभगंसप्तर्षयोददुः ॥ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि ॥ ललाटेकर्णयोरक्ष्णोरापस्तत्घ्नंतुसर्वदा ॥ [1]इतिमंत्रैरभिषिंचेत् ॥ [2]ततश्चतुर्भिर्मिलितैःकुंभैरभिषेकः ॥ तत्रमंत्राः ॥ एतद्वैपावनंस्नानंसहस्राक्षमृषिस्मृतं ॥ तेनत्वांशतधारेणपावमान्यःपुनंत्विमाः ॥ शक्रादिदशदिक्पालाब्रह्मेशकेशवादयः ॥ आपस्तेघ्नंतुदौर्भाग्यंशांतिंददतुसर्वदा ॥ ॐ सुमित्रियानऽआपऽओषधयःसंतुदुर्मित्रियास्तस्मैसंतुयो

---

१ अपरार्कमते सहस्राक्ष मितित्रिभिर्मंत्रैरेकैक कुंभेनाभिषेकः ॥

२ चतुःकुंभैःस्नपनंएतत् बृहत्पराशरमते ॥

स्मान्द्वेष्टियंचवयंद्विष्मः॥ समुद्रागिरयोनद्योमुनयश्चपतिव्रताः ॥ दौर्भाग्यंघ्नंतुतेसर्वेशांतिंयच्छंतुसर्वदा ॥ पादगुल्फोरुजंघास्यनितंबोदरनाभिषु ॥ स्तनोरुबाहुहस्ताग्रग्रीवास्वंसांगसंधिषु ॥ नासाललाटकर्णेषुकेशांतेषुचयत्स्थितं ॥ तदापोघ्नंतुदौर्भाग्यंशांतिंयच्छंतुसर्वदा ॥ ततआचार्यःप्राङ्मुखोयजमानस्यपश्चात्तिष्ठन्सव्यपाणिनाकुशान्यजमानस्यशिरसिप्रागग्रान्निधाय॥तत्रसार्षपंतैलंऔदुंबरस्त्रुवेणादाय ॐमितायस्वाहाइदंमितायनमम॥यजमानस्यत्यागः ॥ ॐसंमितायस्वाहाइदंसंमि०॥ ॐ शांलायस्वाहाइदंशालाय०॥ ॐ कटंकटायस्वाहाइदंकटंकटाय० ॥ ॐ कूष्मांडायस्वाहाइदंकूष्मांडाय० ॥ ॐ राजपुत्रायस्वाहाइदंराजपुत्राय ॥ इति

---

१ अपरार्कमतेशालकटंकटाभ्यामेकैकाकूष्मांडराजपुत्राभ्यामेकैकाइतिचतस्राहुतयः ॥

मस्तके सोमादि द्रव्यप्रक्षेपः

षडाहुतीर्मस्तकेजुहुयात् ॥ ततोग्निसमीपमागत्य ॥ पवित्रेणाज्योत्पवनादिसोमायस्वाहेत्यंतंकुर्यात् ॥ षड्भिरग्नौश्रपितचरुणाजुहुयात्॥ॐ [२]मितायस्वा०मिताय०॥ ॐ संमितायस्वा०इदंसंमिताय० ॥ ॐ शालायस्वा०इदंशालाय० ॥ ॐ कटंकटायस्वा०इदंकटंकटाय० ॥ॐ कूष्मांडायस्वा०इदंकूष्मांडाय०॥ ॐ राजपुत्रायस्वा०इदंराजपुत्राय० ॥ तेनैवचरुणाव्योमकेशादीनांहोमः ॥ ॐ व्योमकेशाय०स्वा०इदंव्योमकेशाय० ॥ यथामंत्रलिंगंत्यागः ॥ ॐ पार्वत्यै०॥ ॐभीमजाय०॥ ॐवासुदेवाय० ॥ ॐअर्काय०॥ॐ सोमाय० ॥ ॐ भौमाय०॥ ॐ बुधाय० ॥ ॐ बृहस्पतये० ॥ ॐशुक्राय०॥ॐ शनये०॥ ॐ राहवे०॥ ॐ केतवे० ॥ ॐ बाहुलेयाय० ॥ ॐ विष्णवे०॥ॐ इंद्राय० ॥ अग्नये० ॥ ॐ यमाय० ॥ ॐ निर्ऋतये०॥ॐ वरुणाय० ॥

---

[२] एतानिषड्विनायकनामानीतिविज्ञानेश्वरः ॥

ॐ वायवे० ॥ ॐ कुबेराय० ॥ ॐ ईशानाय० ॥ ततोयजमानेनद्रव्यत्यागः कार्यः ॥ इमानिसंपादितानिहवनीयद्रव्याणियायायक्ष्यमाणदेवतास्ताभ्यस्ताभ्यःमयापरित्यक्तानिनमम ॥ ततोगणेशायवराहुतिः ॥ ततोग्रहहोमंपूर्ववत्कुर्यात् ॥ ततःस्थापितदेवतानांपंचोपचारपूजा ॥ स्विष्टकृदादिप्राजापत्यांतोहोमः ॥ ततोबलिदानंपूर्ववत् ॥ क्षेत्रपालबलिः ॥ हस्तपादप्रक्षालनं ॥ ततोहुतशेषचरुणा इंद्रादिलोकपालेभ्योनाममंत्रैर्बलिंदत्वा ॥ शुद्धोदकेनसुस्नातोयजमानःविनायकसमीपेउपविश्य ॥ ॐ तत्पुरुषायवि०तन्नोदंतिः० ॥ १ ॥ ॐ सुभगायैवि०तन्नोगौरी० ॥२॥ द्वाभ्यांमंत्राभ्यांविनायकांबिकाभ्यांनमःध्यायामीत्येवंषोडशोपचारैःसंपू

---

१ अत्रमितादिषड्भ्योमाषभक्तबलिर्देयेतिशांतिमयूखे ॥

ज्य ॥ [1]कृताकृततंडुलान् ॥ तिलयुक्तौदनम् ॥ [2]पक्वापक्वमत्स्यान् ॥ [3]पक्वापक्वमांसं ॥ [4]त्रिविधांसुरां ॥ [5]पक्वमांसं ॥ [6]मूलका[7]पूपपूरिकोंडेरजस्रक्दध्यन्नपायसगुडमिश्रपिष्टमोदकलड्डुकानिचित्रसुगंधपुष्पकूष्मांडफलानिचैकपात्रेशूर्पेवाकृत्वा ॥ ॐ तत्पुरुषा० तन्नोदंतिः० ॥१॥ ॐ सुभगायै० तन्नोगौरी० विनायकांबिकाभ्यांनमः इमंउपहारं निवेदयामि ॥ इतिनिवेद्य ॥ कुंकुमगंधदूर्वासर्षपसहितोदकेनांजलिमापूर्य ॥ ॐ तत्पुरुषाय० ॥ ॐ सुभगायै० ॥ इतिमंत्राभ्यांविनायकांबिकाभ्यांइदमर्घंसमर्पयामि ॥ [8]अर्घं

---

[1] कंडीताकंडिततंडुलाः ॥ [2] माषमयान् ॥ [3] माषमयं ॥ [4] पात्रत्रयमध्येलवणयुतं दुग्धं ॥ [5] माषमयं ॥ [6] कंदाकारोभक्षविशेषोभूमिकंदः ॥ [7] क्षुद्रापूपाइत्यपरार्केमहार्णवेतुवर्तुलश्चतुरस्रश्चदीर्घैः पिष्टविकारनिर्मिताःसृजः एंडेरकाउच्यते अस्नेहपक्वगोधूमविकारापूपाः ॥ पूरिकाःप्रसिद्धाः ॥ [8] अर्घ्यदानंचोपस्थानं चतुष्पथवल्यनंतरंकार्यमितिमदनरत्ने ॥

दत्वा ॥ भूमौशिरःकृत्वा ॥ रूपंदेहिजयंदेहिभगवन्देहिमेभगं ॥ पुत्रान्देहिधनं देहिसर्वान्कामांश्चदेहिमे[१] ॥ इतिविनायकंरूपं ॥ देहियशोदेहिभगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे ॥ इत्यंबिकांचोपतिष्ठेत् ॥ सौभाग्यमंबिके देहिरूपंभाग्यंयशोपिच ॥ स्त्रियंपुत्रांश्चकामांश्चतथाशौर्यंचदेहिमे ॥ गणेशमातरंबालेयत्किंचिन्मदभीप्सितं ॥ एकनाम्नैवतद्देहिदेहिगौरिवरानने ॥ ततआचार्यः शूर्पेकुशानास्तीर्यकृताकृताद्युपहारंपूर्वोक्तंसर्वंतत्रनिधायचतुष्पथेगत्वा ॥ तत्रभूमिं जलेनाभ्युक्ष्यतत्रकुशानास्तीर्य ॥ तत्रमंत्रोक्तदेवताःसंपूजयेत् ॥ आदित्यादिमंत्रोक्तदेवताभ्योनमःध्यायामीत्येवंषोडशोपचारैःपूजयेत् ॥ तत्रशूर्पेनिधायबलिंदद्या

---

[१] इदंप्रार्थनांतरंबृहत्पराशरोक्तं ॥

त् ॥ मंत्रास्तु ॥ बलिंगृण्हंत्विमेदेवाआदित्यावसवस्तथा ॥ मरुतश्चाश्विनौदेवाः सुपर्णाःपन्नगाग्रहाः ॥ असुरायातुधानाश्चपिशाचामातरोगणाः ॥ शाकिन्यो यक्षवेतालायोगिन्यःपूतनाग्रहाः ॥ जृंभकाःसिद्धगंधर्वानागाविद्याधरानगाः ॥ दिक्पालालोकपालाश्चयेचविघ्नस्यनायकाः ॥ जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः ॥ माविघ्नमाचमेपापंमासंतुपरिपंथिनः ॥ सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः ॥ ततोयजमानोगृहमागत्यहस्तौपादौचप्रक्षाल्याचामेत् ॥ ततआचार्यः कृतस्यसग्रहमखविनायकशांत्याख्यस्यकर्मणःसांगतासिद्ध्यर्थंवसोर्द्धारासमन्वितं पूर्णाहुतिहोमंकरिष्ये ॥ उक्तविधिनापूर्णाहुतिंवसोर्द्धारांचहुत्वाभस्मधारणंकुर्यात् ॥ संस्रवप्रा० ॥ कृतस्यसग्रहमखविनायकशांत्याख्यस्यकर्मणःसांगता० ॥ प्रणीताविमोकः ॥ श्रेयोदानं ॥ यजमानःकृतस्यसग्रहमखविनायकशांत्याख्यस्यकर्मणःसां०

श्रेयःस्वीकरणंकरिष्ये ॥ आचार्यःकृतस्यस० श्रेयोदानंकरिष्ये ॥ शिवाआपःसंत्वित्यादि॥ भवन्नियोगेनमयाअस्मिन्सग्रहमखविनायकशांत्याख्येकर्मणियत्कृतं आचार्यत्वं० ॥ ततआचार्यंगंधादिनापूजयेत् ॥ ततोग्रहकलशोदकेनयजमानस्य सकुटुंबस्याभिषेकः ॥ विनायकांबिकयोःपंचोपचारैःपूजांकृत्वा ॥ यांतुदेवेतिविसृज्य ॥ इमेविनायकांबिकयोर्मूर्तीआचार्यायतुभ्यमहंसंप्रददे ॥ इदंग्रहपीठंतुभ्य०॥ अग्निंगंधादिनासंपूज्य ॥ गच्छगच्छेतिविसृज्य ॥ कृतस्यसग्रहमखविनायकशांत्याख्यस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये ॥ अनेनकृतेनकर्मणाश्रीपरमेश्वरःप्रीयतां ॥ ब्राह्मणेभ्योभूयसींदत्वातेभ्यश्चाशिषोगृण्हीयादितिसंस्कारभास्करेविनायकशांतिप्रयोगः ॥ अथगुर्वर्कबलंज्योतिर्निबंधेगर्गः॥ स्त्रीणांगुरुबलंश्रेष्ठंपुरुषाणांरवेर्बलं ॥ तयोश्चंद्रबलंश्रेष्ठमितिगर्गेणभाषितं ॥ जन्मत्रिदशमारिस्थः

पूजयाशुभदोगुरुः॥विवाहेथचतुर्थाष्टद्वादशस्थोमृतिप्रदः॥देवलः॥नष्टात्मजाधनवतीविधवाकुशीलापुत्रान्विताहतधवासुभगाविपुत्रा॥स्वामिप्रियाविगतपुत्रधवाधनाव्यावंध्याभवेत्सुरगुरौक्रमशोभिजन्म ॥ बृहस्पतिः॥ झषचापकुलीरस्थोजीवोप्यशुभगोचरः ॥ अतिशोभनतांदद्याद्विवाहोपनयादिषु ॥ राजमार्तंडः॥ तृतीयषष्ठगश्चैवदशमैकादशास्थितः ॥ रविः शुद्धोनिगदितोवरस्यैवकरग्रहे ॥ जन्मस्थेचद्वितीयस्थेपंचमेसप्तमेपिवा ॥ नवमेभास्करेपूजांकुर्यात्पाणिग्रहोत्सवे ॥ चतुर्थेवाष्टमेचैवद्वादशेभास्करेस्थिते ॥ वरःपंचत्वमाप्नोतिकृतेपाणिग्रहोत्सवे ॥ लल्लः ॥ द्वादशदशमचतुर्थेजन्मनिषष्ठाष्टमेतृतीयेच ॥ प्राप्तेपाणिग्रहणेजीवेवैधव्यमाप्नोतिसाकन्या ॥ मुहूर्तदीपिकायां ॥ व्ययत्रिदिग्बंधुमृति १२ । ३ । १० । ४ । ८ ॥ स्थितोपिस्त्रियोधनास्तांकसुतायगैश्च ॥ विद्धोग्रहैर्देवपुरोहितश्चशुभप्रदश्चोतिवासि

ष्ठ आह ॥ गर्गः ॥ सर्वत्रापिशुभंदद्याद्द्वादशाब्दात्परंगुरुः ॥ पंचषष्ठाब्दयोरेवशु
भगोचरतामता ॥ सप्तमात्पंचवर्षेतुस्वोच्चस्वर्क्षगतोयदि ॥ अशुभोपिशुभंदद्याच्छु
भर्क्षेषुकिंपुनः ॥ रजस्वलायाः कन्यायागुरुशुद्धिंनचिंतयेत् ॥ अष्टमेपिप्रकर्त
व्योविवाहस्त्रिगुणार्चनात् ॥ अर्कगुर्वोर्बलंगौर्यारोहिण्यर्कबलास्मृता ॥ कन्याचंद्र
बलाप्रोक्तावृषलीलग्नतोबला ॥ अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी ॥ दशवर्षाभवे
त्कन्या अतऊर्ध्वंरजस्वला ॥ ॥ अथबृहस्पतिशांतिः ॥ शौनकः ॥ कन्यको
द्वाहकालेतुआनुकूल्यंनविद्यते ॥ ब्राह्मणस्योपनयनेगुरोर्वैधिरुदाहृतः ॥ सुवर्णेनगुरुं
कृत्वापीतवस्त्रेणवेष्टयेत् ॥ ऐशान्यांधवलंकुंभंधान्योपरिनिधायच ॥ मदनंमधुपु
ष्पंचपलाशंचैवसर्षपान् ॥ मांसीगुडूच्यपामार्गविडंगीशंखिनीवचा ॥ सहदेवीह
रिक्रांतासर्वौषधिशतावरी ॥ बलाचसहदेवीचनिशाद्वितयमेवच ॥ कृत्वाज्यभाग

पर्यंतंस्वशाखोक्तविधानतः ॥ ग्रहोक्तमंडलेभ्यर्च्यंपीतपुष्पाक्षतादिभिः ॥ देवपूजोत्तरेकालेततःकुंभानुमंत्रणं ॥ अश्वत्थसमिधश्चाज्यंपायसंसर्पिषायुतं ॥ यवव्रीहितिलाःसाज्यामंत्रेणैवबृहस्पतेः ॥ अष्टोत्तरशतंसर्वंहोमशेषंसमापयेत् ॥ पुत्रदारसमेतस्यअभिषेकंसमाचरेत् ॥ कुंभान्निमंत्रणोक्तैश्चसमुद्रज्येष्ठमंत्रतः ॥ प्रतिमांकुंभवस्त्रंचआचार्यायनिवेदयेत् ॥ ब्राह्मणान्भोजयेत्पश्चाच्छुभदःस्यान्नसंशयः ॥ इतिबृहस्पतिशांतिः ॥ ॥ अथाष्टौविवाहभेदाः ॥ तत्रमनुरुद्देशपूर्वकंक्रमेणतल्लक्षणमाह ॥ ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ गांधर्वोराक्षसश्चैवपैशाचश्चतथाष्टमः ॥ आच्छाद्यचार्हयित्वाचश्रुतशीलवतेस्वयम् ॥ आहूयदानंकन्यायाब्राह्मोधर्मः प्रकीर्तितः ॥ यज्ञेतुविततेसम्यगृत्विजेकर्मकुर्वते ॥ अलंकृतसुतादानेदैवधर्मंप्रचक्षते ॥ एकंगोमिथुनंद्वेवावरादादायधर्मतः ॥ कन्याप्रदानंविधिवदार्षोधर्मःसउच्य

ते॥सहोभौचरतांधर्ममितियश्चानुभाष्यतु ॥ कन्याप्रदानमभ्यर्च्यप्राजापत्योविधिःस्मृतः ॥ अत्रविशेषंपारिजातेभगवान् ॥ अन्येष्वपिविवाहेषुधर्मस्यचरणंसह ॥ यद्यप्युक्तंतथाप्यत्रविशेषोक्तिर्ग्रहाश्रमात् ॥ आश्रमांतरसंप्राप्तिर्निषेधार्थेतिगम्यते ॥ नचात्रतस्यांजीवत्यांविवाहस्यपरिग्रहः ॥ आश्रमांतरयोगोवामृतायांभवतस्तुताविति ॥ अन्येतुपुत्रादावनग्निसाध्येषुसाहित्यनियमार्थासेति ॥ जातिभ्योद्रवणंदत्वाकन्यायाश्चस्वशक्तितः ॥ कन्याप्रदानंस्वच्छंदादासुरोधर्मउच्यते ॥ इच्छयान्योन्यसंयोगःकन्यायाश्चवरस्यच ॥ गांधर्वःसइतिज्ञेयोमैथुनेकामसंभवः॥ हत्वाच्छित्त्वाचभित्त्वाचक्रोशंतींरुदतींगृहात् ॥ प्रगृह्यकंन्याहरणंराक्षसोविधिरुच्यते ॥सुप्तांमत्तांप्रमत्तांवाहोरात्रौयःप्रयच्छति ॥ सपापिष्ठोविवाहानांपैशाचःप्रथितोष्टमः ॥ आर्षंगोमिथुनादानंचकन्यार्हणं ॥ नतुतावत्कंन्याविक्रयेणनिंद्य

त्वमित्यपिमनुनैवोक्तम् ॥ आर्षेगोमिथुनंशुल्कंकेचिदाहुर्मृषैवतदित्युपक्रम्य॥ शुल्कं मूल्यं ॥ अर्हणंतत्कुमारीणामानृशंस्यंहिकेवलमिति ॥ तद्गोमिथुनं आनृशंस्यं अनिंदितम् ॥ किंतुतत्कुमारीणामर्हणंपूजनमित्येवमाचारमदनरत्नेव्याख्यातं ॥ एषांव्यवस्थामाहमनुः ॥ षडानुपूर्व्याविप्रस्यक्षत्रस्यचतुरोवरान् ॥ विट्शूद्रयोस्तुतानेवविंद्याद्धर्म्यानराक्षसान्॥ तत्रब्राह्मादीन्गांधर्वान्तान्ब्राह्मणस्यधर्म्यान्धर्मादनपेन्ताविंद्यात्॥क्षत्रस्यआसुरगांधर्वराक्षसपैशाचान् ॥ वैश्यशूद्रयोराक्षसवर्जितान्आसुरगांधर्वपैशाचानितिव्याख्यातंमदनपारिजाते ॥ एषामपिप्राशस्त्यव्यवस्थामाहमनुः ॥ चत्वारोब्राह्मणस्याद्याःशस्तागांधर्वराक्षसौ ॥ राज्ञस्तथासुरोवैश्येशूद्रेचांत्यस्तुगर्हितइत्यष्टौविवाहभेदाः॥ कन्याविवाहकालः॥सोमोददद्गंधर्वायगंधर्वोददद्ग्नयेइतिश्रुतिः ॥ तथाचज्योतिर्निबंधे ॥ षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंयतः ॥

सोमोभुंक्तेततस्तद्वद्गंधर्वश्चतथानलः ॥ यमः ॥ सप्तसंवत्सरादूर्ध्वंसर्ववर्णस्यकन्यका ॥ विवाहेशस्यतेराजन्नन्यथाधर्मगर्हितइति ॥ यथा ॥ अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी ॥ दशवर्षाभवेत्कन्याअतऊर्ध्वंरजस्वला ॥ १ ॥ गौरींददन्नाकलोके वैकुंठेरोहिणींददत् ॥ कन्यांददद्ब्रह्मलोकेरौरवेतुरजस्वलां ॥ २ ॥ द्वादशेब्देरजस्वलांइत्यन्यपाठः ॥ रत्नमालायांदेवलः ॥ ऊर्ध्वंदशाब्दाद्याकन्यावर्षएकादशेतुसा ॥ गांधारीस्यात्समुद्वाह्याचिरंजीवितुमिच्छतेति ॥ तत्रसप्तमाष्टमाब्दउत्तमः ॥ नवमदशमोमध्यमः ॥ एकादशाब्दअधमइति ॥ अत्रकन्यावयोब्दोर्ध्वंद्विगुणाब्दवयस्कवरायकन्यांदद्यात् ॥ अन्यथादानेदोषभागीस्यादिति ॥ ॥ कन्यादानाधिकारी ॥ माधवीयेनारदः ॥ पितादद्यात्स्वयंकन्यांभ्रातावानुमतेपितुः ॥ मातामहोमातुलश्चसकुल्योजननीतथा ॥ मातात्वभावेसर्वेषांप्रकृतौयदिवर्तते ॥

तस्यामप्रकृतिस्थायांकन्यांदद्युःस्वजातयः ॥ यदातुनैवकाश्चित्स्यात्कन्याराजानमाव्रजेदिति ॥ अप्रकृतिस्थाउन्मत्तादिदोषयुतागम्येत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरमिति ॥ दानप्रशंसा ॥ संवर्तः ॥ अलंकृत्यतुयःकन्यांभूषणाच्छादनादिभिः ॥ दत्वास्वर्गमवाप्नोतिपूज्यतेवासवादिभिरिति ॥ ऋष्यशृंगः ॥ वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकं ॥ नामसंकीर्तयेद्विद्वान्कन्यायाश्चैवमेवहीति ॥ दानेविशेषस्तु॥सर्वत्रप्राङ्मुखोदाताप्रतिग्राहीउदङ्मुखः॥एषएवविधिर्यत्रकन्यादानेविपर्ययइति॥विवाहेमंडपस्तुप्रागुक्तः॥वेदिकाप्रकारः॥नारदः ॥ हस्तोच्छ्रितांचतुर्हस्तांचतुरस्रांसमंततः ॥ वरस्येतिशेषः ॥ वेदींप्राक्प्रवणाचतुर्वरकराहस्तोच्छ्रिताग्र्यस्यदोर्जादेद्द्वित्रियुगांगुलैरपचितासोक्ताबहिर्वामतः ॥ इतिमुहूर्तमार्तंडेउक्तः ॥ हस्तोच्छ्रायावेदहस्तैःसमंतात्तुल्यावेदीसद्मतोवामभागे ॥ विवाहेकन्याहस्तेनैववेदीनिर्माणमि

तिमुहूर्तचिंतामणौ ॥ कन्याहस्तैःपंचभिःसप्तभिर्वावेदींकुर्यान्मंदिरेवामभागेइतिसंग्रहे ॥ अथविवाहदिनात्प्राक्विवाहांगमंगलकार्यंकर्तव्यतोच्यते ॥ वराहः ॥ कार्यंविवाहकार्यांगंविवाहोदितभैर्जनैः ॥ विबलंचविधुंहित्वात्रिषष्ठनवमंदिनं ॥ १ ॥ हेरंबपूजनंतैलहरिद्राचांकुरार्पणं ॥ पेषणंकंडनाद्यंचवेदिकामंडपादिकं ॥ यवारकुंकुमादिश्चलड्डुकाव्यंजनादिनीति ॥ यवारंचिकसा ॥ विवाहेदिनशुद्धिस्तु ॥ उदगयनआपूर्यमाणपक्षेपुण्याहेकुमार्याःपाणिंगृण्हीयात् ॥ तथाच ॥ विवाहशुद्धिंप्रवदंतिसंतोवात्स्यादयःस्त्रीजनिजन्ममासादिति॥ अत्रवधूवरयोर्घटितादिविचारोगुरुबलादिकंपुण्याहादिविनिर्णयोलग्नशुद्धिश्चेत्यादिज्योतिःशास्त्रेज्ञेयं ॥ विस्तरभयान्नात्रलिखितं॥ इतिसंस्कारभास्करेविवाहोपयोगीसापिंड्यादिसंक्षिप्तनिर्णयः॥

अथमुख्यब्राह्मविवाहांगभूतोवाग्दानविधिरुच्यते ॥ ज्योतिर्विदादिष्टेविवाहनक्षत्रादियुतेशुभकालेप्रशस्तवेषैर्युग्मब्राह्मणैःपुरंध्रीभिर्ज्ञातिबांधवैश्चसहवरपितागंधाक्षतपुष्पयुग्मवस्त्रभूषणतांबूलादिगृहीत्वातूर्यमंगलवाद्यादिभिर्युतःकन्यागृहेआगत्यशुभवस्त्रपीठासनेप्रत्यङ्मुखउपविशेत् ॥ तद्ददासनेकन्यापिताप्राङ्मुखउपविश्यस्वदक्षिणतःप्राङ्मुखींकन्यामुपवेश्य ॥ स्वपुरतःगणपतिंकलशंचसंस्थाप्य ॥ श्रीगणपत्यादिस्मरणपूर्वकंदेशकालकीर्तनांतेकरिष्यमाणकन्याविवाहांगभूतंवाग्दानमहंकरिष्ये इतिकन्यापितुःसंकल्पेऊहः ॥ करिष्यमाणपुत्रविवाहांगभूतंकन्यानिरीक्षणंपूजनंच करिष्येइतिवरपितुःसंकल्पः ॥ तदंगंविहितंगणपतिपूजनंवरुणपूजनंचकरिष्येइति

---

१ गणपतिपूजनंकन्यापितुरेवोक्तंरत्नगदाधराभ्यांप्रयोगदर्पणेधर्मसिंधौचउभयोरप्युक्तम् ॥

उभौकृत्वा ॥ ततोवरपिता[1]अमुकगोत्रोत्पन्नायअमुकप्रवरान्वितायअमुकशर्मणे वरायअमुकगोत्रोत्पन्नांअमुकप्रवरान्वितांअमुकीनाम्नींकन्यांभार्यात्वेनवृणीमहे ॥ इतिकन्यापितरंप्रतिब्रूयात् ॥ ततोदाताभार्यासुहृद्बंध्वनुमतिंगृहीत्वायथोक्तमनु[2]वाद्यवांवृणीध्वमितिवदेत् ॥ ततोवरपिताकन्यानिरीक्षणपूर्वकंकुंकुमाक्षतपुष्पयुग्म वस्त्रभूषणतांबूलादिभिःकन्यांस्थानेपूजयेत्संप्रदायागतमंत्रैः ॥ ततोदाताप्रत्य ङ्मुखोपविष्टवरपितरंगंधतांबूलादिभिःपूजयेत् ॥ सचवरपितादातारंपूजयेत् ॥ ततोदाताहरिद्राखंडयुतपंचपूगीफलानिगृहीत्वापठेत् ॥ अव्यंगेऽपतितेऽक्लीबेदश दोषविवर्जिते ॥ इमांकन्यांप्रदास्यामिदेवाग्निद्विजसान्निधौ ॥ १ ॥ अमुकसगोत्रो

---

[1] गादाधरेणगोत्राद्युच्चारंविनैवकन्यावरणमुक्तम् । [2] गोत्रोच्चारपूर्वकंवृणीध्वमित्यंतंपुनर्वारद्वयंकार्यमिति प्रयोगरत्नाशयःउक्तस्यपुनर्भाषणंअनुवादः । कन्यापूजनंवाचादत्तेतिस्वीकारांतंगदाधरेणोक्तम् ॥

त्पन्नायअमुकप्रवरान्वितायअमुकशर्मणःप्रपौत्रायअमुकशर्मणःपौत्रायअमुकशर्मणःपुत्रायअमुकशर्मणेवराय ॥ अमुकगोत्रोत्पन्नांअमुकप्रवरान्वितांअमुकशर्मणःप्रपौत्रींअमुकशर्मणःपौत्रींअमुकशर्मणःपुत्रींअमुकीनाम्नींइमांकन्यांज्योतिर्विदादिष्टेमुहूर्तेदास्येइतिवाचासंप्रददे ॥ यदाबध्नन्नितिमंत्रेणहारिद्राखंडपूगीफलानिवरपितृवस्त्रप्रांतेबद्ध्वाग्रंथिंचंदनेनार्चयित्वापठेत् ॥ वाचादत्तामयाकन्यापुत्रार्थेस्वीकृतात्वया ॥ कन्यावलोकनविधौनिश्चितस्त्वंसुखीभव ॥ १ ॥ ततोवरपितापूर्ववत्हरिद्राखंडयुतपूगीफलानिगृहीत्वाअमुकगोत्रोत्पन्नांअमुकप्रवरान्वितांअमुकशर्मणःप्रपौत्रींअमुकशर्मणःपौत्रींअमुकशर्मणःपुत्रींअमुकीनाम्नींइमांकन्यांअमुकसगोत्रोत्पन्नायअमुकप्रवरान्वितायअमुकशर्मणःप्रपौत्रायअमुकशर्मणःपौत्रायअमुकशर्मणःपुत्रायअमुकशर्मणेवरायभवंतोनिश्चिताभवंत्वितिदातृवस्त्रप्रांतेपूर्वव

वामांगेतिष्ठेत्

न्मंत्रेणबद्ध्वाग्रंथिंचंदनेनार्चयित्वापठेत् ॥ वाचादत्तात्वयाकन्यापुत्रार्थंस्वीकृतामया ॥ वरावलोकनविधौनिश्चितस्त्वंसुखीभव ॥ १ ॥ ततोदातापात्रस्थसिततंदुलपुंजोपरिशचीमावाह्यकन्याहस्तेनसंपूज्यप्रार्थयेत् ॥ देवेंद्राणिनमस्तुभ्यंदेवेंद्रप्रियभामिनि ॥ विवाहंभाग्यमारोग्यंपुत्रलाभंचदेहिमे ॥ १ ॥ पुरंध्रीभिर्नीराजनादिमांगलिकंकार्यं ॥ विप्रेभ्योगंधतांबूलदक्षिणादिभिःसंपूज्य ॥ तैराशिषोगृहीत्वा ॥ गणपत्यादिविसर्जयेत् ॥ इतिसंस्कारभास्करेवाग्दानविधिः ॥ ॥ ततोविवाहदिनात्पूर्वंतृतीयषष्ठनवमरहितान्यशुभदिनेविवाहनक्षत्रादियुतेवधूवरयोस्तैलहरिद्रारोपणंगोधूमपूजनंचकार्यं॥ सिंहासनेरथारोहेदंपत्योःपादक्षालने ॥ अभिषेकेसौख्यकृत्येतिष्ठेत्पत्नीतुवामतः ॥ २ ॥ श्राद्धेसदैववामांगेपत्नीचोदकमाहरेत् ॥ वृद्धिश्राद्धादिमांगल्येदक्षिणांगेसदाभवेत् ॥ २ ॥ लाजहोमंसमिद्धोमंमूर्ध्निहोमंतथै

उत्थाय इत्यर्थः

वच ॥ पूर्णाहुतिंवसोर्द्धारांतिष्ठतैवहिकारयेत् ॥ ३ ॥ ततोविवाहदिनात्पूर्वदिने स्वेस्वेगृहेकन्यापितावरपिताचसपत्नीकःकन्यापुत्राभ्यांसहमंगलंस्नात्वाऽहतवाससीपरिधायधृततिलकोलंकारादिभिरलंकृतोबहिःशालायांशुभासनेउपविश्य ॥ स्वदक्षिणतःपत्नींतद्दक्षिणतःसंस्कार्यंचोपवेश्य ॥ आचम्यप्राणानायम्यदेशकालौ संकीर्त्यअस्यअमुकशर्मणःममपुत्रस्यदेवपितृऋणापाकरणधर्मप्रजोत्पादनासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंश्वःकरिष्यमाणविवाहाख्यंसंस्कारकर्माहंकरिष्येइतिवरपक्षे ॥ अस्याःअमुकीनाम्न्याःममकन्यकायाःभर्त्रासहधर्मप्रजोत्पादनगृह्यपरिग्रहधर्माचरणेष्वधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंश्वःकरिष्यमाणविवाहाख्यंसंस्कारकर्माहंकरिष्येइतिकन्यापक्षे ॥ कन्यायाःयदागर्भाधानादिचौलांताष्टसंस्काराःस्वस्वकालेनकृताश्चेत्तदातिक्रांतसंस्कारलोपजनितप्रायाश्चित्तसंकल्पमनादिष्ट

होमंचयथोक्तंकृत्वाविवाहःकार्यः ॥ तदंगंविहितंनिर्विघ्नार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंअविघ्नपूजनंमंडपस्थापनंमातृकापूजनंआयुष्यमंत्रजपंवसोर्द्धारानांदीश्राद्धंचाद्यकरिष्ये ॥ अत्रपुण्याहवाचनांतेप्रजापतिःप्रीयतामितिवदेत् ॥ ग्रहानुकूलतासिद्ध्यर्थंग्रहमखंकरिष्येइतिकरणंउभयपक्षेसमानं ॥ इत्येवंविवाहदिनात्पूर्वेन्हिसर्वंकुर्यादिति ॥ ॥ अथविवाहदिनकर्तव्यमुच्यते ॥ ॥ घटीयंत्रनिर्माणस्थापनपूजनप्रार्थनाप्रकारस्तुउपनयनप्रकरणेज्ञेयः ॥ प्रक्षिप्तघटीअष्टदिशांमध्येयद्दिग्गतातत्प्रागादितःक्रमेणफलानि ॥ यथा ॥ प्रार्थितासाघटीतोयेयांदिशंप्रतिगच्छति ॥ पूर्वाशादिफलंवक्ष्येस्थितामध्येशुभप्रदा ॥ सौभाग्यंनिधनंचैवअपमृत्युरुजान्विता ॥ भर्तुःप्रियाचवश्याचमान्यासुखधनान्वितेति ॥ यद्यनिष्टदिग्गतापूर्णावातदातिथिवारनक्षत्रलग्नदिक्पतीनांविवाहमंगलोत्तरंपूजनंउक्तमंत्रेणायुतजपंतद्द

शांशतिलाज्यैर्होमंगोदानादिकंचकुर्यादिति ॥ ॥ अथगौरीहरपूजनं ॥ ततःकन्यामातासुधालिप्तकुड्येआम्रवृक्षंकुंकुमेनचंदनेनवाविलिख्यतदग्रेभूमौरंगवल्लींविरच्यतत्रकोणचतुष्टयेस्थापितकलशश्रेणीनांमध्येसूत्रवेष्टितदृषदंनिधायतदुपरिअग्रभागेउपलंनिधायतत्रवस्त्रेवातंदुलपुंजेअन्योन्यालिंगितगौरीहरयोःप्रतिमांसुवर्णरौप्यादिनिर्मितांकात्यायनीमहालक्ष्मीशचीभिःसहपूजयेत् ॥ तत्रमंत्रः ॥ सिंहासनस्थांदेवेशींसर्वालंकारसंयुतां ॥ पीतांबरधरंदेवंचंद्रार्धकृतशेखरं ॥ करेणाथसुधापूर्णकलशंदक्षिणेनतु ॥ वरदंचाभयंवामेनाश्लिष्यचतनुप्रियामितिध्यानमंत्रः ॥ गौरीहरमहेशानसर्वमंगलदायक ॥ पूजांगृहाणदेवेशसर्वदामंगलंकुरु॥ इतिपूजामंत्रः ॥ कन्यादेहप्रमाणेनसप्तविंशतितंतुभिः ॥ कृतवर्तिकयादीपंप्रज्वाल्यतैलपूरितं ॥इति॥ सुवासिनीब्राह्मणान्भोजयेत्॥ततोवधूर्मंगलसुस्नातादृषदग्रेपरिहितासने

पीतवस्त्रंपरिधायकुंकुममाल्यादिभिर्भूषिताउपविश्य ॥ कुंकुममाल्याक्षतान्पुनः पुनःगौरीहरोपरिउभाभ्यांहस्ताभ्यांप्रक्षिपेत्इति॥अथशिष्टाचारप्राप्तंसीमंतिकार्चनमपिलिख्यते ॥ तत्रायंक्रमः ॥ पादप्रक्षालनांतेकुरुशुभतिलकंअक्षताभालदेशेउष्णीषंपुष्पमालांशिरसिचकुरुतैलारोपणंनारिहस्तात् ॥ दद्याद्धस्तप्रपूर्णंशुभफलमथतत्संमुखंनारिकेलंएवंसीमंतपूजांप्रकुरुतविधिवत्आगमार्थंवरस्य ॥ ततोदातागंधाक्षतपुष्पवस्त्रोष्णीषनीराजनफलतांबूलादिगृहीत्वापुरंध्रीभिर्ब्राह्मणैश्चसहमंगलतूर्यघोषपुरःसरंवरगृहेवास्थलेगच्छेत् ॥ वरःप्रशस्तवेशालंकृतोवस्त्राच्छादितपीठे प्राङ्मुखउपविशेत् ॥ तत्पुरतःदाताप्रत्यङ्मुखउपविश्याचम्यदेशकालौस्मृत्वा कन्याविवाहार्थंआगतायस्नातकायवरायसीमंतिकेनार्चयिष्ये ॥ तदंगत्वेननिर्विघ्नतार्थंगणपतिवरुणपूजनंकरिष्येइतिकृत्वा ॥ ततोवरपूजनं ॥ ॐ विराजोदोहो

सिविराजोदोहमसीयमयिपाद्यायैविराजोदोहः ॥ १ ॥ इतिमंत्रेणपादप्रक्षालनं ॥
ॐ सुचक्षा॰इतिमंत्रेणगंधं ॥ अनाधृष्टाइत्यक्षतावंदनं ॥ ॐ युवासुवासेतिवस्त्रो
ष्णीषं ॥ ॐ यद्यशोप्सरसामि॰इतिमंत्रेणपुष्पं ॥ ॐ वसोःपवित्रमसीतितै
लारोपणंकार्यं ॥ तैलंमस्तकेक्षिपेत् ॥ ॐ ऋतवंस्त्थऽऋतावृधंऽऋतुष्ठास्थंऽऋतावृ
धंः॥ घृतश्च्युतोमधुश्च्युतोंविराजोनामंकामदुघाऽअक्षीयमाणाः ॥ १॥ ॐ ऋतव
स्त्थेयृतवोह्येताऽऋतावृधऽइतिसत्यवृधऽइत्येतदृतुष्ठास्थऽऋतावृधऽइत्यहोरात्राणि
वाऽइष्टकाऽऋतुषुवाऽअहोरात्राणितिष्ठंतिघृतश्च्युतोमधुश्च्युतऽइतितदेनाघृतश्च्युतश्च
मधुश्च्युतश्चकुरुते ॥ १ ॥ विराजोनामेत्येतद्वैदेवाऽएताऽइष्टकानामभिरूपाᳲह्वयन्तय
थायथैनाऽएतदाचक्षतेताऽएमानभ्युपावर्तंताथलोकंपृणाऽएवपराच्यस्तस्थुरहितना

ध्योनिमेमिहत्यस्ताविराजोनामाकुर्वतताऽएनानभ्युपावर्तंततस्माद्दशदशेष्टकाऽउपधायलोकंप्रेणयाभिमंत्रयतेतदेनाविराजःकुरुतेदशाक्षराहिविराट्कामदुघाऽअक्षीयमाणाऽइतितदेनाः कामदुघाऽअक्षीयमाणाःकुरुते ॥ २ ॥ इतिमंत्रेणवरहस्तेसन्मुखं श्रीफलंदेयंसुमुहूर्तमस्त्वितिविप्राःपठेयुः ॥ अनेनवरपूजनेनलक्ष्मीनारायणःप्रीयतां नानानामगोत्रेभ्योब्राह्मणेभ्योभूयसींदक्षिणांदत्वा ॥ तैराशिषोगृहीत्वा ॥ अन्येभ्यस्तांबूलादिकंदत्वागणपत्यादिविसर्जयेत् ॥इतिसंस्कारभास्करेसीमांतपूजनं॥ततः शिष्टाचाराद्वरपिताएवंविधिनावस्त्रकुंकुमपुष्पफलैर्वधूं[1]पूजयेदिति ॥वरःकृतनित्यक्रियोविधिवत्कृतस्वस्तिवाचनोब्राह्मणैःसहसात्विकाहारंभुक्त्वावाईषद्धौतंनवंश्वेतंसदशं

---

[1] इदंरत्नगदाधरादिषुनदृश्यतोसिंधुदर्पणाभ्यांलिखितं ॥

परेणाधृतंवस्त्रयुगलंपरिधायस्वेष्टदेवतापित्रादीन्नमस्कृत्यतैरनुमोदितोयथाविभवंअश्वादियानमारुह्यधृतासितच्छत्रस्वावित्तैर्ज्ञातिबांधवैःस्वस्तिनइन्द्रेतिसुमंगलसूक्तपठनपरैर्ब्राह्मणैःपुरंध्रीभिःपूर्णकलशोदकपात्रंकन्यापुष्पाक्षतदीपमालाध्वजलाजैर्मंगलतूर्यघोषैश्चसहवधूगृहेगत्वातद्वारदेशेप्राङ्मुखस्थितनीराजनपूर्णकुंभयुतैःस्त्रीपुरुषैःप्रत्युद्यातोनीराजितस्तन्मंडपंप्रविशेत् ॥ तत्रायंक्रमः ॥ साधूक्तिर्विष्टरंपाद्यमपरमुदकार्घ्यंमधुप्राशनंत्रीनाचामेद्वाङ्मलेपःसुमनसमुपवीतानिवस्त्राणिभूषाः ॥ कालंस्मृत्वाग्निंसंस्थापयतिअथवरोवस्त्रमेनांप्रदद्यात्सन्मुख्यंपाणिपीडाजिगमिषतियदैषीतिवन्हिंहस्मरित्वा ॥ आघारौभूर्भुवाद्याष्टयजातिचक्रताषाडितिद्वादशैताश्चित्ताद्याविश्वसंख्याकृतिपरिमितयोभ्यात्तसंज्ञाग्निपंच ॥ वध्वाचोत्थायलाजायजातिदशमितस्यात्प्रजानांपतेसोदीचींक्रामेत्यदानिस्थितवतउदकेनोत्तरेणाभिषिंचेत् ॥ सू

स्मृत्वा

येंक्षात्वन्हिचास्तेध्रुवमासिहृदयालंभसौभाग्यदानंचर्मण्याथोनिवेश्यंत्विहृजपतिवरः स्विष्टमेताद्विसप्तारिति ॥ अथमधुपर्कः ॥ तत्रवरस्यार्घदानंस्मर्यते ॥ तत्प्रसंगेनयावंतोर्घ्यास्तेकथ्यंते ॥ षडर्घ्याभवंति ॥ आचार्यऋत्विग्वैवाह्योराजाप्रियःस्नातकइति ॥ अथसर्वसाधारणोर्घविधिरुच्यते ॥ बाहुमात्रंहस्तमात्रंवादीर्घंवामावर्तेनपंचविंशतिकुशैर्घटितंविष्टरद्वयं ॥ आचमनार्थंजलम् ॥ पाद्यंपादप्रक्षालनार्थंजलं॥ अर्घार्थंशंखपात्रस्थंजलं ॥ चंदनाक्षतपुष्पाणि ॥ मधुपर्कार्थं[2]दधिमधुघृतंकांस्यपा

---

१ विष्टरलक्षणंविष्टरस्त्रिवृदरत्निमात्रंकौशेरज्ज्वविशेषेतिभर्तृयज्ञः ॥ प्रादेशमात्रंत्रिवृतंकौशंअथवाकाशनिर्मितमितिरेणुः ॥ पंचविंशतिदर्भतरुणमयंकूर्चमितिहरिहरः ॥ पाणिभ्यांविष्टरंगृण्हीयादितिहरिहरः ॥ एकेनपाणिनेतिगदाधरः ॥ आर्द्राभ्यांपाणिभ्यामितिहरिहरः ॥ शुष्केणेतिगदाधरः ॥ २ दध्यलाभेपयोजलंवामध्वलाभेगुडः सर्पिर्वाप्रतिनिधिः ॥

त्रेएकीकृतंकांस्यपात्रेणापिहितं ॥ यज्ञोपवीतवस्त्रालंकरणानि ॥ एवमासाद्य ॥ ततोवरंशुभवस्त्राच्छादितपीठेप्राङ्मुखउपवेश्य ॥ दाताउदङ्मुखःप्रत्यङ्मुखोवा उपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वा ॥कन्याविवाहांगत्वेन आगतंस्नातकं वरंमधुपर्केणार्चयिष्ये ॥ तत्रनिर्विघ्नार्थंगणपतिंस्मृत्वा ॥ ॥ ततोदातावरस्याग्रेकृतांजलिपुटस्तिष्ठन्पठेत् ॥ ॐ साधुभवानास्तामर्चयिष्यामोभवंतं ॥ ॐ अर्चय ॥ इतिवरोब्रूयात् ॥ विष्टरादीनिअन्यःसंबोधयति ॥ तद्यथा ॥ अर्चकादपरोविप्रोविष्टरादीनिमधुपर्कांतानित्रिःसंबोधयति ॥ विष्टरोविष्टरोविष्टरःप्रतिगृह्यतां ॥ ततोर्ह्योर्हयितुःसकाशाद्विष्टरंप्रतिगृण्हाति ॥ ॐ वर्ष्मोस्मिसमानानामुद्यतामिव

---

१ विष्टरस्तुपंचविंशतिमयैर्दर्भैरधोमुखाग्रैर्वामावर्तैर्नयथावेणीभवतितथाग्रेगुंफितैःग्रंथियुतैर्विष्टरंसंपाद्येतिरत्नमालायां ॥

सूर्यः ॥ इमंतमभितिष्ठामियोमाकश्चाभिदासति ॥ १ ॥ इतिमंत्रेणविष्टरमुदगग्रमासनेनिधायउपविशति ॥ पा[१]दार्थमुदकंपादार्थमुदकंपादार्थमुदकंप्रतिगृह्यतां ॥ प्रतिगृण्हामि ॥ सव्यंपादंप्रक्षाल्यदक्षिणंप्रक्षालयतिब्राह्मणश्चेद्दक्षिणंप्रथमं ॥ ॐ विराजोदोहोसिविराजोदोहमसीयमयिपाद्यायैविराजोदोहः ॥१॥ इत्यनेनमंत्रेणदक्षिणंपादंप्रक्षाल्य ॥ ततोवाममनेनैवभेदेनमंत्रावृत्तिः॥ पूर्ववद्द्वितीयोविष्टरः ॥ इयांस्तुविशेषोविष्टरमुदगग्रंभूमौकृत्वातस्योपरिपादौकरोति ॥ ॐ वर्ष्मोस्मीत्यनेनमंत्रेण ॥ ततोर्घयितुरर्घदानं ॥ अ[२]र्घोऽर्घोऽर्घः प्रतिगृह्यतां ॥ ॐ आपःस्थयुष्माभिःस

---

[१] पादप्रक्षालनार्थंसुखोष्णोदकंताम्रादिपात्रस्थमितिसर्वे. ॥ [२] अर्घ्यजलंगंधपुष्पाक्षतबदरीमिश्रंशंखपात्रस्थमितिभर्तृयज्ञः ॥ गंधपुष्पाक्षततिलशुभ्रसर्षपदूर्वादध्यन्वितंसुवर्णपात्रस्थमितिहरिहरः ॥

र्वान्कामानवाप्नवानीतिमंत्रेणोभाभ्यांप्रतिगृण्हाति ॥ ततोर्घं[1]शिरसाभिवंद्यप्रागुदग्वा
निनयन्नभिमंत्रयते ॥ ॐ समुद्रंवःप्रहिणोमिस्वांयोनिमभिगच्छत ॥ अरिष्टास्माकं
वीरामापरासेचिमत्पयः ॥ १ ॥ इत्यनेनमंत्रेणार्घंनिनयेत् ॥ आचमनीयमुदक
माचमनीयमुदकमाचमनीयमुदकंप्रतिगृह्यतां॥अर्घ्यंआचामति॥ ॐ [2]आमागन्यश
सासर्ठंसृजवर्चसा ॥ तंमाकुरुप्रियम्प्रजानामधिपतिम्पशूनामरिष्टिंतनूनाम् ॥ १ ॥
इत्यनेनमंत्रेण ॥ ततोद्विराचमनं ॥ मधुपर्कोमधुपर्कोमधुपर्कःप्रतिगृह्यतां ॥ ततो
र्घयितुर्हस्तेस्थितंमधुपर्कमर्घ्यइक्षते ॥ ॐ मित्रस्यत्वाचक्षुषाप्रतीक्षतेइत्यनेनमंत्रेण॥
देवस्यत्वेतिप्रतिगृण्हाति ॥ ततोमधुपर्कंप्रतिगृह्यसव्येपाणौकृत्वापिधानंनिष्कास्य

---

१ अर्घ्यंशिरसाभिवंद्य भूमौप्रवाह्याभिमंत्रयेदितिहरिहरगदाधरौ अत्रतुवासुदेवाशयोगृहीतः ॥

२ आचमनार्थकमंडलुसंभृतंजलं॥स्मार्ताचमनंकेशवाद्यैस्त्रिभिःपीत्वेत्यादि ॥

दक्षिणस्यानामिकयात्रिःप्रयौतिमधुपर्कंत्रिःप्रदाक्षिणमालोडयति ॥ ॐ नमःश्यावास्यायान्नशनेयतऽआविद्धंतत्तेनिष्कृन्तामि ॥ १ ॥ इत्यनेनमंत्रेणअनामिकांगुष्ठेनचत्रिर्निरूक्षयति ॥ तस्यात्रिःप्राश्नाति ॥ ॐ यन्मधुनोमधव्यम्परमꣳरूपमन्नाद्यम् ॥ तेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपरमोमधव्योन्नादोसानि ॥ इत्यनेनमंत्रेणाश्नाति ॥ पुनरप्यनेनैवमंत्रेणवारद्वयंउच्छिष्टमेवप्राश्नाति ॥ तांबूलेक्षुफलेचैवभुंक्तेस्नेहानुलेपने ॥ मधुपर्केचसोमेचनोच्छिष्टंमनुरब्रवीत्इतिवचनात् ॥ मधुमतीभिर्वाप्रत्यृचंपुत्रायांतेवासिनेवोत्तरतऽ आसीनायोच्छिष्टंदद्यात्सर्वंवाप्राश्नीयात्प्राग्वासंचरेनिनयेत् ॥ आचम्य ॥ [1]प्राणान्संमृशति ॥ ॐ वाङ्मऽ आस्येस्तु ॥ इ

---

[1] प्राणायतनस्पर्शःसजलपाणिनाकार्यइतिहरिहराशयः॥ जलरहितेनपाणिनेतिगदाधरः ॥ प्राणायतनस्पर्शांतमेवमधुपर्ककर्मकलौभवतीतिसंप्रदायभाष्ये ॥

तिमुखंकराग्रेणस्पृशेत् ॥ ॐ नसोर्मेप्राणोस्तु ॥ इतितर्जन्यंगुष्ठाभ्यांनासारंध्रद्वयंस्पृशेत् ॥ ॐ अक्ष्णोर्मेचक्षुरस्तु ॥ इतिअनामिकांगुष्ठाभ्यांचक्षुर्द्वयंयुगपत् ॥ ॐ कर्णयोर्मेश्रोत्रमस्तु ॥ इतिमध्यमांगुष्ठाभ्यांदक्षिणकर्णं ॥ अनेनैववामकर्णं ॥ ॐ बाह्वोर्मेबलमस्तु ॥ इतिकराग्रेणदक्षिणबाहुं ॥ एवंवामबाहुं ॥ ॐ ऊर्वोर्मेऽओजोस्तु ॥ इतियुगपद्धस्तेनोरू ॥ ॐ अरिष्टानिमेङ्गानितनूस्तन्वामेसहसंतु ॥ ॥ इति शिरः प्रभृतिपादांतानिसर्वांगानि[1]उभाभ्यांहस्ताभ्यामालभते ॥ ॥ [2]अथगवा

---

[1] सर्वांगालंभउभाभ्यांकार्यंइतिहरिहरः एकेनपाणिनेतिगदाधरः ॥ [2] यज्ञविवाहयोरमांसोगौर्नभवतियज्ञमधिकृस्यविवाहंचाधिकृत्यकुरुतेत्येवंप्रयोगः ॥ गोरालंभश्चकलिवर्जितेकालेभवति ॥ उत्सर्गस्यचविवाहयज्ञयोरप्राप्तत्वात् ॥ गौरीत्याद्युच्चारणंविवाहयज्ञयोःकलौनप्रवृत्तिरितिगदाधरः ॥ गोर्निषेधात्तत्स्थानेअजालंभःपायसंवेतिजयरामः ॥किंचिद्द्रव्यंदेयमितिसंस्कारकौस्तुभे ॥

लंभनं ॥ ॥ यद्यपिसूत्रकारेणगवालंभोनियमेनउक्तस्तथापिमधुपर्कैंयशोवर्धनइतिस्मृत्यंतरबलात्त्याज्यएव ॥ अतःकलियुगेउत्सर्गएव ॥ अथवातन्निष्क्रयद्रव्योत्सर्गः ॥ तत्प्रयोगस्तु ॥ वरस्यसमीपेभूमौउदगग्रदर्भानास्तीर्य ॥ दातावरहस्ते निष्क्रयद्रव्यंदत्वागौर्गौर्गौरितिपठेत् ॥ वरोद्रव्यंगृहीत्वामंत्रंपठेत् ॥ ॐ मातारुद्राणान्दुहितावसूनाꣳस्वसादित्यानाममृतस्यनाभिः ॥ प्रनुवोचंचिकितुषेजनाय मागामनागामदितिंवधिष्ठ ॥ ममचामुकशर्मणोयजमानस्यपाप्माहतः ॥ ॐ उत्सृजततृणान्यत्त्विवतिब्रूयात् ॥ १ ॥ इत्यनेनवरः कुशोपरिद्रव्यमुत्सृजेत् ॥ ॐ कारउपांशूत्सृजतेत्याद्युच्चैः ॥ अत्रशिष्टाचारप्राप्ताः केचनपदार्थाः लिख्यंते ॥ गंधाद्यलंकारान्तेषुवरस्यैवमंत्रपाठः ॥ ॐ सुचक्षा० इतिगंधं ॥ ॐ अनाधृष्टेत्यक्षताः ॥ ॐ परिधास्यैइत्यनेनपरिधानवस्त्रं ॥ ॐ यज्ञोपवीतं० इतियज्ञोपवीतं ॥ आचम्य ॥ ॐ

यशसामेत्युत्तरीयं ॥ ॐ याऽआहाराज्य० इतिपुष्पमालाग्रहणं ॥ अथावबध्नीते ॥ ॐ यद्यशोप्सर०इतिमंत्रेण ॥ अथालंकारान् ॥ ॐ अलंकरण० इतिप्रथमंदक्षिणकर्णे ॥ ततोनेनैववामे ॥ ब्राह्मणेभ्योभूयसींदत्वा ॥ तैराशिषोगृहीत्वादाताअनेनमधुपर्कार्चनेनश्रीलक्ष्मीनारायणः प्रीयतांइतिजलमुत्सृजेत् ॥ इतिसंस्कारभास्करेमधुपर्कप्रयोगः ॥ ॥ ततोवरोविवाहवेद्यांगत्वाशुभासनेउपविश्य आचम्य प्राणानायम्यदेशकालौस्मृत्वा ॥ एवंगुण० तिथौधर्मार्थकामप्रजासिद्ध्यर्थंदारपरिग्रहणनिमित्तंअग्निस्थापनंकरिष्ये ॥ हरिद्राचूर्णनिर्मितेअरत्निमात्रस्थंडिलेपंचभूसंस्कारान्कृत्वायोजकनामाग्नेःस्थापनं ॥ पश्चादग्नेस्तेजन्याःवधूपादनिवेशनार्थंस्थापनं ॥ तेजनीतृणपूलिका ॥ अत्रदेशाचारतोऽव्यवस्था ॥ दाक्षिणात्यानामाचारादिदमपिकर्तव्यं॥ पतिपुत्रान्वितसुमंगलीस्त्रियावामहस्तेपयःपूरितपा

त्रंधृत्वादक्षिणेनशर्करांसंगृह्यसुमुहूर्तेओंप्रतिष्ठेतिशब्दसमयेपयःपात्रेगृहीतशर्कराप्रक्षिप्या ॥ तथैवान्यसुभगास्त्रियामंगलपद्यसावधानसमयेवधूवरमस्तकेमंगलाक्षतासमर्प्याइतिशिष्टाचारः ॥अग्निस्थापनोत्तरंगृहमध्येगत्वाप्राङ्मुखींकन्यामवस्थाप्यप्रत्यङ्मुखोवरस्तिष्ठेत् ॥ वधूवरांतरालेअविधुरसुहृदसहृत्तयःपुरुषाउदग्दशमंतःपटंधारयेयुः ॥ तत्रदैवज्ञामंगलस्मृतीनांपठनंकुर्युः ॥ विंशोपकाउच्चारणीयाः ॥ सुमुहूर्ते ॐ प्रतिष्ठइत्युच्चैःशब्दंकुर्युः ॥ अत्रावसरेवधूवरकरालंभेवधूःकरधृतपुष्पग्रथितवरणमालांवरकंठेसमर्पयेत् ॥ उदक्संस्थंधृतांतःपटनिःसरणंकार्यं ॥ ततोवरप्राङ्मुखउपविश्यकन्यांप्रत्यङ्मुखीमुपवेशयेत् ॥ ततआचार्यादिद्विजगणाःप्रतिष्ठामंत्रब्राह्मणंपठेयुः ॥ ॐ मनोजूतिर्जुषतामा० ॥ १ ॥ ब्राह्मणं ॥ ॐ मनोजूतिर्जुष० ॥

॥ १ ॥ एषवैप्रभूर्नाम० ॥ १ ॥ एषवैविभूर्नाम० ॥ २ ॥ एषवैव्यष्टिर्नाम० ॥ २ ॥ एषवैविधृतिर्ना० ॥ ४ ॥ एषवैव्यावृत्तिर्नाम० ॥ ५ ॥ एषवाऽऊर्ज्जस्वान्ना० ॥ ६ ॥ एषवैपयस्वान्ना० ॥ ७ ॥ एषवैब्रह्मवर्च्चसी० ॥ ८ ॥ एषवाऽअतिव्याधी० ॥ ९ ॥ एषवैदीर्घोनाम० ॥ १० ॥ एषवैक्लृप्तिर्नाम० ॥ ११ ॥ एषवैप्रतिष्ठानाम०॥१२॥ ॐ प्रतिष्ठासुप्रतिष्ठितमस्तु ॥ दंपत्योरविच्छिन्नाप्रीतिरस्तु ॥ ततोवरोवध्वैपरिधानार्थं वासोदद्यात् ॥ कुमार्यावासःपरिधानं ॥ ॐ जराङ्गच्छपरिधत्स्ववासोभवाकृष्टीनामभिशस्तिपावा ॥ शतंचजीवशरदःसुवर्च्चारयिंचपुत्राननुसंव्ययस्वायुष्मतीदंपरिध

---

१ वस्त्रचतुष्टयमध्येवरःकन्यायाःवस्त्रद्वयंमंत्रेणदत्वाद्वयंमंत्रेणधत्तेइतिहरिहरः ॥ हरिहरगदाधरयोर्मतेवरकर्तृकंपरिधानं भर्तृयज्ञमतेआचार्यकर्तृकं ॥

त्स्ववासः ॥ १ ॥ [1]इतिमंत्रपाठोवरस्य ॥ अथोत्तरीयंवासोवरःकन्यायैसमर्पयतिमंत्रमुक्त्वातांपरिधापयति ॥ ॐ याऽ अकृन्तन्नवयंयाऽअतन्वत ॥ याश्चदेवीस्तन्तूनभितोततन्थ ॥ तास्त्वादेवीर्जरसेसंव्ययस्वायुष्मतीदम्परिधत्स्ववासः ॥ १ ॥ ततः कन्यापितावधूवरयोःपरस्परंसमंजेथामितिप्रेषंदद्यात्॥[2]संमंजनंसम्मुखीकरणं ॥ॐ समञ्जन्तुविश्वेदेवाःसमापोहृदयानिनौ ॥ सम्मातरिश्वासन्धातासमुदेष्ट्रीदधातुनौ ॥ १ ॥ सन्मुखीभूतोवरोमंत्रपठति ॥ ततआचारप्राप्तंमांगल्यतंतुबंधनंकण्ठे तत्रमंत्रः ॥ मांगल्यतंतुनानेनममजीवनहेतुना ॥ कंठेबध्नामिसुभगेत्वंजीवशरदांशतं ॥ १ ॥ ॐयदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः॥तन्मऽआबध्ना

---

[1] वरस्यैवमंत्रपाठेतिहरिहरगदाधरौ ॥ उभयोर्मंत्रपाठेतिभर्तृयज्ञः ॥

[2] समंजनंसंमुखीकरणमिति हरिहरगदाधरौ॥परस्परंगात्रविश्लेषेतिभर्तृयज्ञः॥परस्परानुलेपनंइतिकेचित्

मिशुतशारदायायुष्माञ्जरदंष्टिर्यथासम् ॥ इतिमंत्रंवरःपठति॥अथसूत्रवेष्टनप्रकारः॥ यत्सूत्रंद्विगुणीकृतंशरमितंकंठेवधूंवेष्टयेत्सप्ताख्यंवरवेष्टितंचकटितस्तंतुश्चतुर्विंशति ॥ ईशान्यामपिऊर्ध्वनिष्कविधिवत्संपूज्यऊर्णायुतंबध्नीयात्खलुकंकणंद्विजकरेउच्चार्यघोषान्वितैः॥सूत्रेणपंचवारंचसप्तेनद्विगुणेनच॥परित्वेतिचसूक्तेनवेष्टयेत् ॥ विस्तीर्णहस्तचत्वारिचतुर्विंशतितंतुभिः ॥ ब्राह्मसूत्रमिदंप्रोक्तंब्रह्मणानिर्मितंपुरेतिअश्वत्थदीपिकायां ॥ ततोद्विजाःपरित्वागिर्वणोगिरइत्यनुवाकेनजुषाणोऽप्तुराज्यस्यव्वेतुस्वाहेत्यंतेनवधूवराववि च्छिन्नचतुर्विंशातितंतुभिर्द्विगुणीकृतसूत्रेणयथाचारंवेष्टयेयुः ॥तच्चवधूदक्षिणस्कंधमारभ्यउभयोःस्कंधेपंचवारंकटिप्रदेशेसप्तवारंवेष्टयेदिति ॥ तत्रमंत्राः॥ॐपरित्वागिर्व्वणोगिरंऽइमाभवंतुविश्वतः ॥ वृद्धायुमनुवृद्धयोजुष्टाभवंतु

जुष्टंयः ॥ १ ॥ इन्द्रस्यस्यूरसींद्रस्यध्रुवोसि ॥ ऐंद्रमसिवैश्वदेवमंसि ॥ २ ॥ विभू
रसिप्रवाहणोवन्हिरसिहव्यवाहनः ॥ श्वात्रोसिप्रचेतास्तुथोसिविश्ववेदाऽउशिगं
सि ॥ ३ ॥ उशिगंसिकविरङ्घारिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्जा
लीयःसम्राडसिकृशानुःपरिषद्योसिपवमानोनभोसिप्रतक्वामृष्टोसिहव्यसूदन
ऽऋतधामासिस्वर्ज्योतिःसमुद्रोसि ॥ ३ ॥ समुद्रोसिविश्वव्यचाऽअजोस्येकपाद
हिरसिबुध्न्योवागस्यैन्द्रमसिसदोस्यृतस्यद्वारौमामासंताप्तमध्वनामध्वपतेप्रमा
तिरस्वस्तिमेस्मिन्पथिदेवयाने भूयान्मित्रस्यमा ॥ ५ ॥ मित्रस्यमाचक्षुषेक्षध्व
मग्नयःसगराःसगरास्थसगरेणनाम्नारौद्रेणानीकेनपातमाग्नयः पिपृतमाग्नयोगोपा

यतंमानमोंवोस्तुमामांहिꣳसिष्ट ॥ ६ ॥ ज्योतिंरसिविश्वरूपम्विश्वेंषान्देवानाꣳसमित् ॥ त्वꣳसोमतनूकृद्भ्योद्वेषोंभ्योन्यकृतेभ्यऽउरुयंतासिवरूथꣳस्वाहांजुषाणोअप्तुराज्यंस्यवेतुस्वाहा ॥ ७ ॥॥ अथकन्यादानसंकल्पः ॥ ॥ ततोदातास्वदक्षिणे पत्न्यासहदक्षिणवरपार्श्वभागेशुभासनेउदङ्मुखउपविश्याचम्यप्राणानायम्यदेशकालौस्मृत्वा ॥ एवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौअस्मिन्पुण्याहेअस्याःकन्यायाः अनेनवरेणधर्मप्रजयाउभयोःवंशयोःवंशवृद्ध्यर्थंतथाचममसमस्तपितॄणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तयेअनेनवरेणअस्यांकन्यायामुत्पादयिष्यमाणसंतत्यांदशपूर्वान्दशपरान्मांचएकविंशतिपुरुषानु

द्धर्तुंब्राह्म[1]विवाहविधिनाश्रीलक्ष्मीनारायणप्रीतयेकन्यादानमहंकरिष्ये ॥ ततोवरहस्तेसुप्रोक्षितादिकरणं ॥ शिवाआपःसंत्वित्यादिवचनप्रतिवचने ॥ शिवाआपःसंतु ॥ संतुशिवाऽआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यं॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टंच ॥ अत्राःपांतु॥सुप्रोक्षितमस्तु ॥ गंधाःपांतु ॥ सुमंगल्यंचास्तु ॥ अक्षताःपांतु ॥ आयुष्यमस्तु ॥ पुष्पंपातु॥सौश्रियमस्तु ॥ यत्पापंरोगंअशुभंअकल्याणंतद्दूरेप्रतिहतमस्तु ॥ ततोवरस्यगोत्रोच्चारः ॥ अमुकसगोत्रस्यअमुकप्रवरस्य अमुकशर्मणःप्रपौत्राय ॥ अमुकसगोत्रस्यअमुकप्रवरस्यअमुकशर्मणःपौत्राय॥ अमुकसगोत्रस्यअमुकप्रवरस्य अमुकशर्मणः पुत्राय अमुकशर्मणेश्रीधररूपिणेवराय ॥ ततःकन्यायाश्चगोत्रोच्चारः ॥ अमुकसगोत्रस्यअमुकप्रवरस्यअमुकशर्म

---

[1] योग्यंवरमाहूयालंकृत्यकन्यादानविधिनातस्मैकन्यादानंब्राह्मोविवाहः ॥

णःप्रपौत्रीं ॥ अमुकसगोत्रस्यअमुकप्रवरस्यअमुकशर्मणःपौत्रीं ॥ अमुकसगोत्रस्यअमुकप्रवरस्यअमुकशर्मणःपुत्रीं ॥ अमुकीनाम्नींश्रीरूपिणींइमांकन्यां ॥ इत्येकःपर्यायः ॥ एवमेवपुनःपर्यायद्वयमुक्त्वा ॥ पुनःअमुकसगोत्रोत्पन्नायअमुकप्रवरान्वितायशुक्लयजुर्वेदांतर्गतमाध्यंदिनीयशाखाध्यायिनेअमुकशर्मणेश्रीधररूपिणेवराय ॥ अमुकगोत्रोत्पन्नांअमुकप्रवरान्वितांअमुकीनाम्नींश्रीरूपिणींइमांकन्यां यथाशक्त्यलंकृतांउपकल्पितोपस्कारसहितांप्रजापतिदैवत्यांपुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रफलप्राप्तिकामःप्रजोत्पादनार्थंभार्यात्वेनतुभ्यमहंसंप्रददे ॥ इत्युक्त्वासकुशजलंकन्यादक्षिणहस्तंवरदक्षिणहस्तेदद्यात्॥वरःप्रतिगृण्हातितांकन्यां ॥ ॐ द्यौस्त्वाददातुपृथिवीत्वाप्रतिगृण्हातु ॥ इत्यनेनमंत्रेण ॥ कृतैतत्कन्यादानप्रति

---

१ सकृदितिगंगाधरः ॥

ष्ठासिद्ध्यर्थंइमांयथाशक्तिस्वर्णमयींदक्षिणांतुभ्यमहंसंप्रददेनमम ॥ स्वस्तीतिवरोब्रूयात् ॥ ततोदाताभाजनगोभूदासीमहिषीगजाश्ववाहनगृहशय्यावस्त्रालंकारादियथाविभवंसंकल्पपूर्वकंदद्यात् ॥ तत्रगोदानमंत्रः ॥ यज्ञसाधनभूतायाविश्वस्याघौघनाशिनी ॥ विश्वरूपधरोदेवःप्रीयतामनयागवा ॥ १ ॥ हिरण्यगर्भसंभूतसौवर्णंचांगुलीयकं ॥ सर्वप्रदंप्रयच्छामिप्रीणातुकमलापतिः ॥ इत्यंगुलीयकस्य ॥ क्षीरोदमथनेपूर्वमुत्धृतंकुंडलद्वयं ॥ श्रियासहसमुद्भूतंददेश्रीःप्रीयतामिति ॥ कुंडलयोः ॥ कांचनंहस्तवलयंरूपकांतिसुखप्रदं ॥ विभूषणंप्रदास्यामिविभूषयतुतेसदेतिवलययोः॥ परापवादपैशून्यादभक्ष्यस्यचभक्षणात् ॥ उत्पन्नपापंदानेनताम्रपात्रस्यनश्यतु ॥ इतिताम्रजलपात्रस्य ॥यानिपापानिकाम्यानिकामोत्थानिकृतानिच ॥ कांस्यपात्रप्रदानेनतानिनश्यंतुमेसदा ॥ इतिभोजनार्थंकांस्यपात्रस्य ॥ अग

म्यागमनंचैवपरदाराभिमर्शनं ॥ रौप्यपात्रप्रदानेनतानिनश्यंतुमेसदेतिजलार्थस्य भोजनार्थस्यचरौप्यपात्रस्य ॥ पूरितंपूगपूगेननागवल्लीदलान्वितं ॥ पूर्णेनचूर्णपात्रेणकर्पूरपिष्टकेनच ॥ सपूगखंडनंदिव्यंगंधर्वाप्सरसांप्रियं ॥ ददेदेवानिरातंकंत्वत्प्रसादात्कुरुष्वमामिति ॥ तांबूलस्य ॥ दीपस्तमोनाशयतिदीपःकांतिंप्रयच्छति ॥तस्माद्दीपप्रदानेनममवंशप्रवर्धनं ॥ इतिदीपस्य ॥ एवंदासीमहिषीगजाश्वभूमिस्वर्णपात्रपुस्तकशय्यागृहरजतवृषभानांदानमंत्राःकौस्तुभेद्रष्टव्याः ॥ ॥ ततःकन्यापितापठति ॥ ॥ धर्मार्थकामाभिर्नामैर्योनरैःसाध्यतेपरः ॥ धर्मस्त्वयानयासार्धमाचर्तव्यःसर्वैश्चिरं ॥ १ ॥ धर्मेचार्थेचकामेचत्वयेयमतिचारतः ॥ नत्याज्याऽज्याहुतिरिवभूतौसंसारभूतिदा ॥ २ ॥ यस्त्वयाधर्मश्चरितव्यःसोनयासह ॥ धर्मेचार्थेचकामेचत्वयेयंनातिचरितव्या ॥ वरः ॥ अहंनातिचरामीहयदुक्तंभवताततः ॥ ध

मर्थकामकैः कायैर्देहाच्छायेयसर्वदा ॥ १ ॥ नातिचरामीतिवरोवदेत् ॥ कोदादितिकामस्तुतिंपठेत् ॥ ॐ कोदात्कस्माऽअदात्कामोदात्कामायादात् ॥ कामोदाताकामः प्रतिगृहीताकामैतत्ते ॥ १ ॥ ॐ अथयदन्यद्ददातिकामेनैवतद्ददातीदम्मेप्यपुत्रासदितितत्प्रत्येतिकोदात्कस्माऽअदात्कामोदात्कामायादात् ॥ कामोदाताकामंप्रतिगृहीताकामैतत्ते ॥१॥ एवंयस्त्वयेत्यादिकामस्तुतिश्चपुनर्द्विरुक्तव्या॥ अत्रवैदिकाः सयः कामयेतब्राह्मणंपठित्वादंपतीभ्यांसुवर्णाभिषेकंकुर्युः ॥ अत्रब्राह्मणेअग्नयेस्वाहेत्यादिहवनपरपदंनिर्दिष्टंपरंसंस्रवमवनयतीतिसुवर्णरेताअग्निःस्वर्णष्ठीवीतितन्मंथेनसुवर्णसंस्रवतीतिसिद्धं॥सयःकामयेदितिब्राह्मणंदिवैवपठित्वानतुरात्रौ ॥

---

१ कामस्तुतिंपठेदितिवासुदेवहरिहरौ ॥

किंतुबृहदारण्यंगतत्वेनारण्येनूच्यमानत्वात् ॥ गृहेमंगलमध्येरात्र्यादौअशुचिभिः
पठननिषेधात् ॥श्रुतिवाक्यादिप्रमाणैरवियुक्तत्वात्प्रयोगपशुभावविघाताच्चान्यदवि
रुद्रंपुरुषसूक्तंऋचंवाचमध्यायंवादेवस्यत्वेत्यादिअभिषेकमंत्रान्पठेत् ॥ इतिखंडभ
ट्टायाचितपद्धतौ ॥ ॥ॐसयꣳकामयेतमहत्प्राप्नुयामित्युदगयनऽआपूर्यमाणपक्षेपु
ण्याहेद्वादशाहमुपसद्व्रतीभूत्वौदुंबरेकꣳसेचमसेवासर्वौषधम्फलानीतिसम्भृत्यपरि
समुह्यपरिलिप्याग्निमुपसमाधायावृताज्यꣳसँस्कृत्यपुꣳसानक्षत्रेणमन्थꣳसन्नीयजु
होति ॥ १ यावन्तोदेवास्त्वयिजातवेदः ॥ तिर्यञ्चोघ्नन्तिपुरुषस्यकामान् ॥ तेभ्यो
हंभागधेयञ्जुहोमितेमातृप्ताःकामैस्तर्पयंतुस्वाहा ॥ २ ॥ यातिरश्चीनिपद्यसेऽहँ
विधरणीऽइति ॥ तान्त्वाघृतस्यधारयायजेसꣳराधनीमहꣳस्वाहा ॥ प्रजापतेनत्व

दे॒तान्य॒न्यऽइतितृतीयाञ्जुहोति ॥ ३ ॥ ज्ये॒ष्ठायस्वाहाश्रे॒ष्ठायस्वाहे॒ति ॥ अग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिप्रा॒णायस्वाहा॒वसिष्ठायैस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयति॒वाचेस्वा॒हाप्रति॒ष्ठायैस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्र॒वम॒वनयतिच॒क्षुषेस्वाहा॒सम्प॒देस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिश्रो॒त्रायस्वाहा॒यतनायस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिम॒नसेस्वा॒हाप्रजा॒त्यैस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिरे॒तसेस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयति ॥ ४ ॥ भू॒तायस्वाहे॒ति ॥ अग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिभ॒विष्य॒तेस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिवि॒श्वायस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसꣳस्रवम॒वनयतिसर्वा॒यस्वाहे॒त्यग्नौहुत्वाम॒न्थेसꣳस्रवम॒वनयति ॥

॥ ५ ॥ पृथिव्यैस्वाहेति ॥ अग्नौहुत्वामन्थेसर्ठंस्रवमवनयत्यन्तरिक्षायस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिदिवेस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिदिग्भ्यःस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिब्रह्मणेस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिक्षत्रायस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयति ॥ ६ ॥ भूःस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिभुवꣳस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिस्वꣳस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिभूर्भुवःस्वःस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयति ॥ ७ ॥ अग्नयेस्वाहेति ॥ अग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिसोमायस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतितेजसेस्वाहेत्यग्नौहुत्वामन्थेसर्ठंस्रवमवनयतिश्रियैस्वाहेत्यग्नौहुत्वा

म॒न्थेसर्ठंस्रवम॒वनयतिल॒क्ष्म्यैस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसर्ठंस्रवम॒वनयतिस॒वित्रेस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसर्ठंस्रवम॒वनयतिस॒रस्वत्यैस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसर्ठंस्रवम॒वनयतिवि॒श्वेभ्योदेवे॒भ्यःस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसर्ठंस्रवम॒वनयतिप्रजा॒पतयेस्वाहे॒त्यग्नौ॒हुत्वाम॒न्थेसर्ठंस्रवम॒वनयति ॥ ८ ॥ अ॒थैनमभि॒मृशति ॥ भ्र॒मसिज्वल॒दसिपूर्ण॒मसिप्रस्तब्धमस्येकसभ॒मसिहिङ्कृत॒मसिहिङ्क्रियमाण॒मस्युद्गी॒थमस्युद्गीयमा॒नमसिश्रावितमसिप्र॒त्याश्रावित॒मस्यार्द्रंसन्दी॒प्तमसिविभू॒रसिप्रभूरसिज्यो॒तिरस्य॒न्नमसिनिधनमसिसँवर्गोसी॒ति ॥ ९ ॥ अ॒थैनमुद्यच्छति ॥ अमो॒स्यामर्ठंहि॒तेमयि ॥ स॒हिराजे॒शानोधिपतिःस॒माराजे॒शानो॒धिपतिङ्करोत्विति ॥ १० ॥ अ॒थैनमा॒चाम॒ति ॥

तत्सवितुर्वरेण्यंमधुवाताऽऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नꣳसंन्त्वोषधीः ॥ भूꣳ
स्वाहा ॥ ११ ॥ भर्गोदेवस्यधीमहि॥ मधुनक्तमुतोषसोमधुमत्पार्थिवठंरजꣳ॥मधुद्यौ
रस्तुनꣳपिताभुवःस्वाहा ॥ १२ ॥ धियोयोनः प्रचोदयात् ॥ मधुमान्नोवनस्पतिर्म
धुमाँ २ अस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ॥ स्वꣳस्वाहेतिसर्वांश्चसावित्रीम
न्वाहसर्वांश्चमधुमतीꣳसर्वांश्चव्याहृतीरहमेवेदठंसर्वम्भूयासम्भूर्भुवꣳस्वꣳस्वाहेत्यंत
तऽआचम्यप्रक्षाल्यपाणीजघनेनाग्निम्प्राक्शिराःसँविशति ॥ १३ ॥ प्रातरादि
त्यमुपतिष्ठते ॥ दिशामेकपुण्डरीकमस्यहम्मनुष्याणामेकपुंडरीकंभूयासमितियथे
तमेत्यजघनेनाग्निमासीनोवठंशज्ञपति ॥ १४ ॥ तठंहैतमुद्दालकऽआरुणिर्वाजस

नेयायाज्ञवल्क्यायांतेवासिनऽउक्थोवाचापियऽएनꣳशुष्केस्थाणौनिषिंचेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १५ ॥ एतमुहैववाजसनेयोयाज्ञवल्क्योमधुकायपैङ्ग्यायान्तेवासिनऽउक्थोवाचापियएनꣳशुष्केस्थाणौनिषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १६ ॥ एतमुहैवमधुकः पैंग्यश्चूडायभागवित्तयेन्तेवासिनऽउक्थोवाचापियएनꣳशुष्केस्थाणौनिषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १७ ॥ एतमुहैवचूडोभागवित्तिर्जानकयऽआयस्थूणायान्तेवासिनऽउक्थोवाचापियएनꣳशुष्केस्थाणौनिषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ १८ ॥ एतमुहैवजानकिरायस्थूणः सत्यकामायजाबालायान्ते

वासिनऽउक्थोवाचापियएनꣳशुष्केस्थाणौनिषिञ्चेज्जायेरञ्छाखाःप्ररोहेयुःपलाशा
नीति॥१९॥एतमुहैवसत्यकामोजाबालोन्तेवासिभ्यउक्थोवाचापियएनꣳशुष्केस्था
णौनिषिंचेज्जायेरञ्छाखाःप्ररोहेयुःपलाशानीतितमेतन्नापुत्रायवानंतेवासिनेवाब्रू
यात॥२०॥ चतुरौदुंबरोभवत्यौदुंबरश्चमसऽऔदुंबरःस्रुवऽऔदुंबरऽइध्मऔदुंबर्याऽ
उपमन्थिन्यौ॥२१॥दशग्राम्याणिधान्यानिभवंति॥व्रीहियवास्तिलमाषाऽअणुप्रियं
गवोगोधूमाश्चमसूराश्चखल्वाश्चखलकुलाश्चतान्त्सार्धम्पिष्ट्वादध्नामधुनाघृतेनोपसिं
चत्याज्यस्यजुहोति॥२२॥सर्वेषाँवाऽएषवें०॥१॥कांड१४प्र०७ब्रा०५सुवर्णाभिषेको
स्तु॥ततोदातावरंप्रार्थयेत॥कन्येममाग्रतोभूयाःकन्येमेदेविपार्श्वयोः॥कन्येमेपृष्ठ

तोभूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ १ ॥ कन्यांलक्षणसंपन्नांकनकाभरणैर्युतां ॥ दास्यामिब्रह्मणेतुभ्यंब्रह्मलोकजिगीषया ॥ २ ॥ पृथिव्यादिमहद्भूताःसाक्षिणःसर्वदेवताः ॥ इमांकन्यांप्रदास्यामिपितॄणांतारणायच ॥ ३ ॥ ममवंशकुलेजातापोषितावत्सराष्टकं ॥ तवंविप्रमयादत्तापुत्रपौत्रप्रवर्द्धिनी ॥ ४ ॥ इमांकन्यांशुभांविप्रयथाशक्तिविभूषितां ॥ गोत्रायशर्मणेतुभ्यंदत्तांविप्रसमाश्रय ॥ ५ ॥ इतिप्रार्थ्य ॥ अत्रचतुर्थश्लोकस्यद्वितीयपादेयथाकन्यावयोऽब्दास्तथैवोच्चारणीयं ॥ पोषितानववर्षकंदशवर्षकमिति ॥ ब्राह्मणेभ्योगंधतांबूलभूयसींदक्षिणांचदत्वा ॥ तैराशिषोगृहीत्वा यथाशक्तिब्राह्मणभोजनसंकल्पः ॥ अनेनकन्यादानाख्येनकर्मणाश्रीलक्ष्मी

तुभ्यं

नारायणःप्रीयतां ॥ इतिकन्यादानविधिः ॥ ॥ अथाचारप्राप्तं[१]गणपतिपूजनंकंकणबंधनंअक्षतारोपणंआम्रसिंचनमपिकार्यम् ॥ ॥ ततोवरःदेशकालसंकीर्तनांतेममचवध्वाःब०हायुष्यप्राप्त्यर्थंगणपतिपूजनंकंकणबंधनंअक्षतारोपणंआम्रसिंचनंचकरिष्ये ॥ गणानांत्वेतिमंत्रेणगणपतिंसंपूज्य ॥ कंकणप्रकारः ॥ वधूवरयोःपरित्वेत्यनुवाकेनवेष्टितान्कंठदेशस्थान्सूत्रतंतूनधोनिष्कास्यत्रिवलीकृत्यकुंकुमाक्तान्कृत्वातेषुऊर्णायुतवृद्धिहरिद्राखंडंबद्ध्वातत्कंकणंवधूवामहस्तेयदाबध्नन्नितिमंत्रेणवरोबध्नीयात् ॥ कटिप्रदेशस्थांस्तंतूनूर्ध्वंनिष्कास्यतादृशकंकणंकृत्वातेनैवमंत्रेणवरदाक्षिणहस्तेवधूर्बध्नीयात् ॥ अक्षन्नमीतिमंत्रेणवधूवरयोःपरस्परंअक्षतारोपणं॥

---

[१] पूजनंचगणेशस्यप्रणम्यचपरस्परं ॥ परस्परंमुखोच्छिष्टंकर्तव्यंप्रीतिहेतवे ॥ आम्रावृक्षस्यसेकोथगौरीपूजनपूर्वकं ॥ कुंकुमद्रव्यपंकेनस्त्रीणांगीतपुरःसरं ॥ इतिसंस्कारमुक्तावल्याम् ॥

वध्वावसोःपवित्रेत्याम्रासिंचनं ॥ पित्रा[१]प्रत्तामादायगृहीत्वानिष्क्रामति ॥ ततोवरः पित्राजनकेनप्रत्तांसंकल्प्यदत्तांवधूंआदायप्रतिग्रहविधिनाप्रतिगृहीत्वापश्चात्तांगृहीत्वाहस्तेधृत्वानिष्क्रामतिगृहमध्यान्मंडपेअग्निसमीपंगच्छेदित्यर्थः ॥ यदैषिमनसादूरंदिशोनुपवमानोवा ॥ हिरण्यपर्णोवैकर्णः सत्वामन्मनसांकरोतुअमुकीति वधूनामग्रहणंमंत्रपाठोवरस्य॥ निष्क्रमणप्रभृतिएकःपुरुषउदकुम्भंस्कंधेकृत्वादक्षिणतोग्नेर्वाग्यतःस्थितोभवतिउत्तरतोवाअभिषेकपर्यंतं ॥ अथैनौसमीक्षयति कन्यापितापरस्परंसमीक्षेथामितिप्रेषेण ॥ ॐ अघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यः सुमनाःसुवर्चाः ॥ वीरसूर्देवकामास्योनाशन्नोभवद्विपदेशंचतुष्पदे ॥ सोमःप्रथमो विविदेगंधर्वोविविदउत्तरः ॥ तृतीयोग्निष्टेपतिस्तुरीयोहंमनुष्यजः ॥ सोमोददद्गं

---

[१] आदायप्रतिग्रहविधिनाप्रतिगृह्य ॥ गृहीत्वाहस्तेधृत्वेतिहरिहरः ॥ वस्त्रप्रांतेधृत्वेतिगदाधरः ॥

धर्वायगंधर्वोददद्ग्नये ॥ रयिंचपुत्रांश्चादादग्निर्मह्यमथोऽइमां ॥ सानःपूषाशिवतमामेरयःसानऽऊरूऽउशतीविहर ॥ यस्यामुशंतः प्रहरामशेफंयस्यामुकामाबहवोनिविष्टयै ॥ १ ॥ इत्यंतंवरस्यमंत्रपाठः ॥ इत्येतस्यमंत्रस्यांतेवेदीसन्निधौपरस्परमुभयोर्निरीक्षणं ॥ ततोवधूवरौप्रदक्षिणमग्निंपर्याणीयैकेपश्चादग्नेस्तेजनींकटंवादक्षिणपादेनप्रवृत्योपविशतः ॥ देशकालौ० प्रतिगृहीतायामस्यांवध्वांभार्यात्वसिद्ध्येविवाहहोमंकरिष्ये ॥ ततोदक्षिणतोब्रह्मासनादिपात्रासादनंकृत्वानात्रचरुः ॥ पात्रासादनानंतरंउपकल्पनीयानि॥शमीपलाशमिश्रालाजाः॥अश्मा ॥ लोहितमानडुहंचर्म ॥ तदभावेबर्हिषः ॥ कुमार्याभ्राता ॥ शूर्पं ॥ दृढपुरुषः ॥ उदकुंभः ॥ आचा

---

१ तृणपूलकस्यदक्षिणपादेनोल्लंघनंवध्वासहकृत्वोपरिउपविशेत् ॥ इतिहरिहरभर्तृयज्ञयोराशयः ॥ उल्लंघनंविनैवोपविशेदितिप्रयोगरत्नाशयः ॥

यीयवरद्रव्यमिति ॥ पवित्रच्छेदनादिपर्युक्षणांते[1]आघारावाज्यभागौचजुहुयात् ॥ तद्यथा ॥ मनसा ॥ ॐ प्रजापतयेस्वाहा ॥ इदंप्रजा० ॥ ॐ इन्द्रायस्वाहाइदमिंद्रा० ॥ ॐ अग्नयेस्वा० इदम० ॥ ॐ सोमायस्वा० ॥ इदंसो० ॥ अथभूराद्याः प्रायश्चित्ताष्टाहुतयः ॥ ॐ भूःस्वाहाइदम० ॥ॐ भुवःस्वाहाइदंवा०॥ ॐस्वःस्वाहा इदंसूर्या० ॥ ॐ त्वन्नोंअग्ने० ॥ इदमग्नीव० ॥ ॐ सत्वन्नोंअग्ने० ॥ इदमग्नीव० ॥ ॐ अयाश्चाग्ने० इदमग्नयेअयसे० ॥ ॐ येतेशतं० इदंव० सवि० मरु० स्वर्केभ्य० ॥ॐ उदुत्तमं० ॥ इदंवरुणायादित्यायादि० ॥ इदंसर्वप्रायश्चित्ताख्यं ॥ ॥ अथराष्ट्रभृ

---

[1] पूर्वाघारस्तूष्णींस्वाहांविनाहोतव्यः ॥ नस्वाहेतिचनानिरुक्तोहिनोनिरुक्तंहोतातूष्णीमितिमंत्रलिंगादितिगदाधराशयः ॥ प्रजापतय[illegible] ॥

द्धोमः ॥ ॥ ॐ ऋताषाडृतधामाग्नि [illegible] ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट् ॥ इदमृतसाहेऋतधाम्नेअग्नयेगंधर्वायनमम ॥ १ ॥ ॐ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदोनामंताभ्यःस्वाहा ॥ इदमोषधीभ्योप्सरोभ्योमुद्भ्योनमम ॥ ॥२॥ ॐ सर्ठंहितोविश्वसामासूर्योगन्धर्वःसनइदम्ब्रह्मंक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदंसर्ठंहितायविश्वसाम्नेसूर्यायगन्धर्वायन० ॥ ३ ॥ ॐ सर्ठंहितोविश्वसामासूर्योगन्धर्वस्तस्यमरीचयोप्सरसऽआयुवोनामंताभ्यःस्वाहा॥ इदंमरीचिभ्याप्सरोभ्यआयुभ्योनम० ॥४॥ ॐसुषुम्णःसूर्यरश्मिश्चन्द्रमागन्धर्वःसनइदम्ब्रह्मक्षत्रंपातुतस्मैस्वाहावा

---

१ ऋताषाडित्यादिद्वादशमंत्राः राष्ट्रभृत्संज्ञाः ॥ स्वाहाकुर्यान्नवाडंतेनचैवजुहुयाद्धविः ॥ स्वाहाकारेणहुत्वाग्नौपश्चान्मन्त्रंसमापयेत् ॥ एतेषुमंत्रेषुस्त्रीपुंस्त्वादिहेतुर्महीधरभाष्ये ॥

ट्॥इदंसुषुम्णायसूर्यरश्मयेचन्द्रमसेगन्धर्वायन० ५ ॐसुषुम्णःसूर्यरश्मिश्चन्द्रमाग
न्धर्वस्तस्यनक्षत्राण्यप्सरसोभेकुरयोनामताभ्यःस्वाहा॥इदंनक्षत्रेभ्योप्सरोभ्योभेकु
रीभ्योन० ॥६॥ ॐइषिरोविश्वव्यचावातोगन्धर्वःसनऽइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावा
ट्॥इदमिषिरायविश्वव्यचसेवातायगन्धर्वायन० ॥७॥ ॐ इषिरोविश्वव्यचावातो
गन्धर्वस्तस्यापोप्सरसऽऊर्जोनामताभ्यःस्वाहा ॥ इदमद्भ्योप्सरोभ्यऽऊर्ग्भ्योनम
म ॥ ८ ॥ ॐ भुज्युःसुपर्णोयज्ञोगन्धर्वःसनइदम्ब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् ॥ इदं
भुज्यवेसुपर्णाययज्ञायगन्धर्वायन० ॥ ९ ॥ ॐ भुज्युःसुपर्णोयज्ञोगन्धर्वस्तस्यदक्षि
णाअप्सरसस्तावानामताभ्यःस्वाहा ॥ इदंदक्षिणाभ्योप्सरोभ्यस्तावाभ्योन० ॥

॥ १० ॥ ॐ प्रजापतिर्विश्वकर्मा मनो गंधर्वः मन इदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्॥ इदंप्रजापतयेविश्वकर्मणेमनसेगन्धर्वायनमम ॥ ॥ ॐ प्रजापतिर्विश्वकर्मामनोगन्धर्वस्तस्यऋक्सामान्यप्सरसऽएष्टयोनामताभ्यःस्वाहा ॥ इदमृक्सामेभ्यो प्सरोभ्यऽएष्टिभ्योनमम ॥ १२ ॥ अथजयाहोमः ॥ ॥ ॐ चित्तंचस्वाहाइदंचित्तायन० १ ॥ ॐ चित्तिश्चस्वा० ॥ इदंचित्त्यैन० ॥ २ ॥ ॐ आकूतंचस्वा० ॥ इदंआकूताय० ॥ ३ ॥ ॐ आकुतिश्चस्वाहा ॥ इदंआकूत्यैन० ॥ ४ ॥ ॐ विज्ञातंचस्वा० इदंविज्ञातायन० ॥ ५ ॥ ॐ विज्ञातिश्चस्वा० इदंविज्ञात्यैन० ॥ ६ ॥ ॐ मनश्चस्वा

---

१ चित्तंचेत्यादिजयामंत्राणांचित्तायस्वाहेतिचतुर्थ्यंतेनहोमइतिभर्तृयज्ञः ॥ नेतिकर्कादयः ॥ नचेमानिदेवतानामानिकिंतर्हिमंत्राश्चैतेचयथाम्नातंप्रयोक्तव्याइतिगदाधरादयः ॥

हा ॥ इदंमनसे० ॥ ७ ॥ ॐ शक्कर्यश्चस्वा० इदंशष्करीभ्योन० ॥ ८ ॥ ॐ दर्शश्चस्वा० इदंदर्शाय० ॥ ९ ॥ ॐ पौर्णमासंचस्वा० इदंपौर्णमासायन० ॥ १० ॥ ॐ बृहच्चस्वा० इदंबृहतेन० ॥ ११ ॥ ॐ रथंतरंचस्वा० इदंरथंतरा० ॥ १२ ॥ ॐ प्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रःपृतनाजयेषु ॥ तस्मैविशःसमनमंतःसर्वाःस उग्रःसऽइहव्योबभूवस्वाहा ॥ इदंप्रजापतयेजयानिन्द्रायनम० ॥ १३ ॥ ॥ अथाभ्यातानहोमः ॥ ॥ ॐ अंग्निर्भूतानामधिपतिःसमावत्वास्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्याम्पुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याꣳस्वाहा ॥ इदमग्नयेभूतानामधिपतयेनमम ॥ १ ॥ एवमभ्यातानहोमेप्रत्याहुतौसमावत्वास्मिन्नित्यारभ्य

---

१ अग्निर्भूतानामित्यादयःपित [illegible] यातानसंज्ञाइतिहरिहरगदाधरौ ॥
अग्निर्भूतानामित्यादिसुगन्नःपंथा [illegible] र्ककारिकाकारौ ॥

सर्वत्रसमानं ॥ ॐ इन्द्रोज्येष्ठानामधिपतिस्समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्याम्पुरोधायामस्मिन्कर्मण्यस्यान्देवहूत्याठंस्वाहा ॥इदमिन्द्रायज्येष्ठानामधिपतयेनमम ॥ २ ॥ ॐ यमःपृथिव्याअधिपतिःसमावत्वस्मिन्ब्रह्मण्य० स्वाहा ॥ इदंयमायपृथिव्याअधिपतयेन० ॥ ३ ॥ दक्षिणस्यांअन्यपात्रंनिधायतन्मध्येत्यागः ॥ ॥ प्रणीतोदकोपस्पर्शः ॥ ॐ वायुरंतरिक्षस्याधिपतिःस० स्वाहा ॥ इदंवायवेन्तरिक्षस्याधिपतयेन० ॥ ४ ॥ सूर्योदिवोधिपतिःस० स्वाहा ॥ इदंसूर्यायदिवोधिपतयेन० ॥ ५ ॥ ॐ चन्द्रमानक्षत्राणामधिपतिःसमा० स्वाहा ॥ इ

---

१ पूर्वेत्यागःपरंमृत्योयमत्यागंतुदक्षिणे ॥ पश्चिमेपितृत्यागंचरुद्रत्यागंतथोत्तरे ॥ एषउदकस्पर्शःइतिकारिकाकारः ॥ एकेप्राशनांतेएकेआचार्याःसंस्रवप्राशनांतेएतामाहुतिमिच्छंति ॥ तत्पक्षेपरंमृत्युरितिहोमांतेपुनरेतस्यसंस्रवप्राशनमितिगदाधरः ॥

दंचंद्रमसेनक्षत्राणामाधिपतयेन० ॥६॥ ॐबृहस्पतिर्ब्रह्मणोधिपतिःसमा० स्वाहा ॥ इदंबृहस्पतयेब्रह्मणोधिपतयेन० ॥ ७ ॥ ॐ मित्रःसत्यानामधिपतिःसमा० स्वाहा ॥ इदंमित्रायसत्यानामधिपतयेन० ॥ ८ ॥ ॐ वरुणोपामधिपतिःसमा० स्वाहा ॥ इदंवरुणायापामधिपतयेन० ॥ ९ ॥ ॐ समुद्रःस्रोत्यानामधिपतिःसमा० स्वाहा ॥ इदंसमुद्रायस्रोत्यानामधिपतये० ॥ १० ॥ ॐ अन्नꣳसाम्राज्यानामधिपतितन्मा० स्वाहा ॥ इदमन्नायसाम्राज्यानामधिपतिनेन० ॥ ११ ॥ ॐ सोमऽओषधीनामधिपतिःसमा० स्वाहा ॥ इदंसोमायौषधीनामधिपतयेन० ॥ १२ ॥ ॐ सविताप्रसवानामधिपतिःस० स्वाहा ॥ इदंसवित्रेप्रसवानामधिपतयेन० ॥ १३ ॥ ॐ रुद्रःपशूनामधिपतिःसमा० स्वाहा ॥ इदंरुद्रायपशूनामधिपतयेन० ॥ १४ ॥ ऐशान्यां अन्यपात्रंनिधायतन्मध्येत्यागः ॥ उदकस्पर्शनम् ओँ त्वष्टारूपाणामधिपतिःस

मा॰ स्वाहा ॥ इदंत्वष्ट्रेरूपाणामधिपतयेनमम॰ [illegible] ॥ ॐ विष्णुःपर्वतानामधिपतिःसमा॰ स्वाहा ॥ इदंविष्णवेपर्वतानामधिपतयेन॰ ॥ १६ ॥ ॐ मरुतोगणानामधिपतयस्तेमा॰ स्वाहा ॥ इदंमरुद्भ्योगणानामधिपतिभ्योन॰ ॥ १७॥ ॐ पितरःपितामहाःपरेवरेततास्ततामहाः ॥ इहमावन्त्वस्मिन्ब्रह्म॰ स्वाहा ॥ इदंपितृभ्यःपितामहेभ्यःपरेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यश्चनमम॥१८॥दक्षिणाग्न्योर्मध्येअन्यपात्रंनिधायतन्मध्येत्यागः ॥ उदकोपस्पर्शः ॥ एतेष्टादशमंत्राअभ्यातानसंज्ञकाः ॥ अथाग्निरित्यादिपंचकं ॥ ॥ ॐ अग्निरैतुप्रथमोदेवतानाꣳसोस्यैप्रजांमुंचतुमृत्युपाशात् ॥ तदयर्ठंराजावरुणोनुमन्यतांयथेयर्ठंस्त्रीपौत्रमघंनरोदात्स्वाहा ॥ इदमग्नये॰ ॥१॥ ॐ इमामग्निस्त्रायतांगार्हपत्यःप्रजामस्यैनयतुदीर्घमायुः ॥ अशून्योपस्थाजीवतामस्तुमातापौत्रमानंदमभिप्रबुध्यतामियꣳस्वाहा ॥ इदमग्नयेन॰ ॥

॥ २ ॥ ॐ स्वस्तिनोऽअग्नेदिवापृथिव्याविश्वानिधेह्ययथायजत्र ॥ यदस्यांमयि दिविजातंप्रशस्तंतदस्मासुद्रविणंधेहिचित्रꣳस्वाहा ॥ इदमग्नये० ॥ ३ ॥ ॐ सुगंन्नुपंथांप्रदिशन्नऽएहिज्योतिष्मद्धेह्यजरन्नऽआयुः ॥ अपैतुमृत्युरमृतंमआगाद्वैवस्वतोनोऽअभयंकृणोतुस्वाहा ॥ इदंवैवस्वतायन० ॥ ४ ॥ दक्षिणस्यांअन्यपात्रेत्यागः ॥ वध्वक्ष्णोर्वस्त्रपटंप्रक्षिप्यतूष्णीं ॥ ॐ परंमृत्योऽअनुपरेहिपंथांयस्तेऽअन्यइतरोदेवयानात् ॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजाꣳरीरिषोमोन्तवीरान्स्वाहा ॥ इदंमृत्यवेनममेतिअग्नौत्यागः ॥ ५ ॥ परंमृत्यवितिचैकेप्राशनांते ॥ परंमृत्यवित्येतामेवाहुतिमेकेआचार्याःसंस्रवप्राशनांतेइच्छंतीत्यर्थः ॥ उदकोपस्पर्शः ॥ अथ

---

१ तिष्ठतीतिष्ठतापत्यागृहं [illegible] सर्वान्प्राङ्मुखीप्रतिमंत्रतः ॥ प्राजापत्येनतोर्थेनदैवेनैवेतिबह्वृचः ॥इ [illegible] वंस्वामिफलयोगादितिगदाधराशयः ॥

लाजाहोमः ॥ कुमार्याभ्रा [illegible] शमीपलाशमिश्रान्लाजानंजलिनांजलावावपति ॥ तान्संहतेनतिष्ठत्यग्नौजुहोतिवधूः ॥ ॐ अर्यमणंदेवंकन्याऽ अग्निमयक्षत॥ सनोऽअर्यमादेवःप्रेतोमुंचतुमापतयेस्वाहा ॥ इदमर्यम्णेनमम ॥ अनेनमंत्रेणांजलिस्थान्लाजान्तृतीयांशंजुहोति ॥ ॐइयन्नार्युपब्रूतेलाजानावपंतिका॥ अयुष्मानस्तुमेपतिरेधन्तांज्ञातयोममस्वाहा ॥ इदमग्नयेनमम ॥ अनेनमंत्रेणांजलिस्थान्लाजानर्धंजुहोति ॥ ॐ इमान्लाजानावपाम्यग्नौसमृद्धिकरणंतव ॥ ममतुभ्यचसंवननंतदग्निरनुमन्यतामियर्ठंस्वाहा ॥ इदमग्नयेनम० इत्यनेनमंत्रेणांजलिस्थान्सर्वांल्लाजांजुहोति ॥ मंत्रत्रयंकन्यायावाचयतिवरः ॥ अथास्यैदक्षिणर्ठंहस्तंवरोगृण्हातिसांगुष्ठं ॥ ॐ गृभ्णामितेसौभगत्वायहस्तंमयापत्याजरदष्ठिर्यथासः ॥ भगोऽअर्यमासवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः॥ अमोहमस्मिसात्वर्ठंसात्वम

स्यमोऽअहं ॥ सामाहमस्मिऽऋक्त्वंद्यौरहंपृथिवीत्वं ॥ तावेवविवहावहैसहरेतोदधावहै ॥ प्रजांप्रजनयावहैपुत्रान्विंद्यावहैबहून् ॥ तेसंतुजरदष्टयःसंप्रियौरोचिष्णूसुमनस्यमानौ ॥ पश्येमशरदःशतञ्जीवेमशरदःशतंꣳशृणुयामशरदःशतम् ॥ १ ॥ इतिहस्तग्रहणेवरस्यमंत्रपाठः ॥ अथैनामश्मानंवरोवाम[1]हस्तेनवधूदक्षिणपादमारोहयत्युत्तरतोऽग्नेः ॥ ॐ आरोहेममश्मानमश्मेवत्वꣳस्थिराभव ॥ अभितिष्ठपृतन्यतोवबाधस्वपृतनायतः॥१॥इत्यश्मारोहणेवरस्यमंत्रपाठः ॥ अथगाथांगायति॥ ॐ सरस्वतिप्रेदमवसुभगेवाजिनीवति ॥ यान्त्वाविश्वस्यभूतस्यप्रजायामस्याग्रतः ॥१॥ यस्यांभूतꣳसमभवद्यस्यांविश्वमिदंजगत् ॥ तामद्यगाथांगास्यामियास्त्रीणामुत्तमं

---

[1] दक्षिणपाणिनेतिरेणुदी

यशः ॥ १ ॥ इत्यंतंवरोगाथांगायति [illegible] थवधूपुरःसरौप्रदक्षिणमग्निंपरिक्रामतौवधूवरौ ॥ ॐ तुभ्यमग्नेपर्यवहन्त्सूर्यांवहतुनासह ॥ पुनःपतिभ्योजायांदाग्नेप्रजयासह ॥ १ ॥ इतिपरिक्रमणेवरस्यमंत्रपाठः ॥ एवंकुमार्याभ्राताशमीपलाशमिश्राँल्लाजानंजलिनांजलावावपति॥ इत्यारभ्यपरिक्रमणांतंपुनर्वारद्वयंकुर्यात् ॥ ततस्तृतीयपरिक्रमणानंतरंकुमार्याभ्राताशूर्पकोणप्रदेशेनसर्वाँल्लाजान्कुमार्याअंजलावावपति ॥ तिष्ठतीकुमारीसर्वाँल्लाजाञ्जुहोति ॥ ॐभगायस्वाहाइदंभगायनमम ॥ इतिमंत्रंकन्ययावाचयतिवरः ॥ ततःसमाचारात्तूष्णींचतुर्थपरिक्रमणं ॥ नेतरथाद्व

---

१ वधूवरावग्निंप्रदक्षिणीकुर्वंतौअंतरागत्वातन्मध्यएवगच्छतामितिगदाधरः ॥ दंपतीगच्छतेस्तत्रब्रह्माग्नीअंतरागतिरितिरेणुदीक्षिताः ॥

त्तिः॥पुनःपश्चादग्नेःप्राग्वदुपविश्यवरोब्रह्मान्वारब्ध्वं ॥ तात्यहोमंकुर्यात् ॥ॐप्रजापतयेस्वाहाइदंप्रजापतयेनममेतिप्रोक्षण्यांत्यागः॥ अग्नेरुत्तरतःअथैनां[1]वधूमुदीचींॅसप्तपदानिप्रक्रामयतिवरोवक्ष्यमाणमंत्रैः॥ शिष्टाह्वाराद्वेद्युत्तरतः वेदीमारभ्यउत्तरोत्तरंहस्तांतरालेधान्यसप्ताचलान्कृत्वावरःप्रतिपदसीत्यनेनमंत्रेणसंपूज्य ॥ तेषुवधूप्रतिज्ञापाठनपुरःसरंमंत्रंपठित्वावध्वादक्षिणपादंस्पर्शयतियाम्यमारभ्यउदक्संस्थंउत्तरतउत्तरं॥ वरःदेशकालकीर्तनांतेप्रतिगृहीतस्वदारसिद्ध्यर्थंसप्ताचलपूजनंकरिष्ये ॥ ॐप्रतिपदसिप्रतिपदेत्वानुपदस्यनुपदेत्वासंपदसिसंपदेत्वातेजोसितेजसेत्वा

---

[1] अग्नेरुत्तरतःएनांवधूंदक्षिणपादेनसप्तवारंपरिक्रमणंकारयतीतिहरिहरगदाधरादयः ॥ कुमार्यादक्षिणंपादंगृहीत्वास्थापयतीत्यन्ये ॥ विष्णुस्त्वानयत्विति षट्मंत्रेष्वनुषज्यतेनसप्तमेइतिकर्कः॥ प्रक्रमेंतुवामपादस्यनाक्रमणमितिरेणुदीक्षितः ॥ अन्येषांभा [illegible] पंचमतेविष्णुपदस्यानुषंगः ॥

ओ

॥ १ ॥इतिमंत्रेणसंपूज्यवधूपरिक्रामति ॥ ॐ एकमिषेविष्णुस्त्वानयतु ॥ इतिवरेणोक्तेनमंत्रेणवधूर्दक्षिणैकपदंदद्यात् [illegible] ऽयथं ॥पुनर्दक्षिणपददानेमंत्रमुक्का ॥एवंसर्वत्र ॥ॐ द्वेऽऊर्ज्जेविष्णुस्त्वानयतुइतिद्वितीयं ॥ॐ त्रीणिरायस्पोषायविष्णुस्त्वानयतु ॥ इतितृतीयं ॥ ॐ चत्वारिमायोभवायविष्णुस्त्वानयतुइतिचतुर्थं ॥ॐ पंचपशुभ्योविष्णुस्त्वानयतु ॥ इतिपंचमं ॥ ॐ षड्रायस्पोषायविष्णुस्त्वानयतुइतिषष्ठं ॥ॐ सखेसप्तपदाभवसामामनुव्रताभवविष्णुस्त्वानयतु ॥इतिसप्तमं ॥ परिक्रमणेनस्वस्थानोपवेशनं ॥ केचित्प्रतिपदेकन्ययैकैकप्रतिज्ञामंत्रः पठनीयस्तेचयथा ॥

सुखदुःखानिसर्वाणित्वयासहविभज्यते ॥ यत्रत्वंतदहंतत्रप्रथमेसाब्रवीदिदं ॥ १ ॥
कुटुंबंरक्षयिष्यामिआवृद्धबालकादिकं ॥ अस्तिनास्तीतिपश्याद्द्वितीये० ॥ २ ॥
भर्तृभक्तिरतानित्यंसदैवप्रियभाषिणी ॥ भविष्यामिपदेचैवतृतीये० ॥३॥ आर्तेआ

र्ताभविष्यामिसुखदुःखविभागिनी ॥ तवाज्ञांपालयिष्यामिकन्यातूर्यपदेब्रवीत् ॥ ॥ ४ ॥ ऋतुकालेशुचिस्नाताक्रीडिष्यामित्वयासह ॥ नाहंपरतरंगच्छेकन्यापंचपदेब्रवीत् ॥ ५ ॥ इहाथसाक्षिणोविष्णुस्त्वयाहंनैववंचिता ॥ उभयोःप्रीतिसंभूताकन्याषष्ठपदेब्रवीत् ॥ ६ ॥ होमयज्ञादिकार्येषुभवामिचसहायिनी ॥ धर्मार्थकामकार्येषुकन्यासप्तपदेब्रवीत् ॥ ७ ॥ इतिकन्यामंत्राः ॥ इतिसप्तपदीक्रमणं ॥ अथवरःगृहान्निष्क्रमणसमयेएकपुरुषस्कंधेकृतादुदकुंभादुदकंदक्षिणहस्तेनादायमंत्रंपठन्वधूंमूर्धन्यभिषिंचति ॥ ॐआपःशिवाःशिव० ॥ १ ॥ इत्यनेनमंत्रेण ॥ पुनस्तस्मादेवकुंभादुदकमादाया [illegible] र्धन्यभिषिंचति ॥ अथदिवा

विवाहश्चेत्तदावधूर्वरेणसूर्यमुदीक्षस्वेतिप्रोक्तासूर्यमीक्षते ॥ तच्चक्षुरित्यनेनमंत्रेणशृणुयामशरदः शतादित्यंतेन ॥ वध्वाएवमंत्रपाठः ॥ अथवरोवध्वादक्षिणांसस्योपरिहस्तंनीत्वातस्याहृदयमालभते ॥ ॐ ममव्रतेतेहृदयंदधामिममचित्तमनुचित्तंतेअस्तु ॥ ममवाचमेकमनाजुषस्वप्रजापतिष्ट्वानियुनक्तुमह्यं ॥ इत्यनेनमंत्रेण स्वपठितेन ॥ ततोवरोऽनामिकाग्रंवधूंशिरसिधृत्वातामभिमंत्रयते ॥ ॐ सुमंगली

---

१ सूर्यावलोकनंदिवाविवाहेभवतीतिरेणुकारिकाहरिहरौ ॥ सूर्यावेक्षणस्यान्यथानुपपत्त्यास्तमितेध्रुवंदर्शयतीत्यत्रास्तमितग्रहणाच्चएतद्गृह्यानुसारिणां ॥ दिवैवविवाहोनरात्राविवितिगदाधरः ॥ २ वध्वाःसीमंतेवरःसिंदूरंददातीतिप्रयोगरत्ने ॥ अनामिकाग्रेणवधूशिरसिअभिमंत्रणमित्यन्ये ॥ अत्राचाराश्चतस्रःस्त्रियोमंगलंकुर्वीरन्पतिपुत्रान्विताभव्याश्चतस्रःसुभगाअपि ॥ सौभाग्यमस्यैदत्तुस्तामंगलाचारपूर्वकमितिरेणुदीक्षिताः ॥

रियंवधूरिमाꣳसमेतपश्यत ॥ सौभाग्यमस्यैदत्वायाथास्त्वंविपरेतना ॥ इत्यनेन मंत्रेणस्वपठितेन ॥ अत्रसमाचाराद्वधूंवरस्यवामभागेउपवेशयंति ॥ अत्रावसरेवध्वाःसीमंतेवरःसिंदूरंददाति ॥ ॐ वाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्मभ्यꣳसावीः ॥ वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजꣳस्याम ॥ १ ॥ दक्षिणतऽउहैकऽउपदधातितदेताःपुण्यालक्ष्मीर्दक्षिणतोदध्मइति तस्माद्यस्यदक्षिणतोलक्ष्मभवतितंपुण्यलक्ष्मीकऽइत्याचक्षतऽउत्तरतःस्त्रियाऽउत्तरतऽआयतनाहिस्त्रीतत्तत्कृतमेवपुरस्तात्त्वेवैनाऽउपदध्याद्यत्राहैवशिरस्तदेवहनूतज्जिह्वाथैताःपुण्यालक्ष्मीर्मुखतोधत्तेतस्माद्यस्यमुखेलक्ष्मभ [illegible] ॥ इतिमंत्रपाठोवरस्य ॥ अथाग्नेः प्रागुद [illegible] वति ॥ तस्मिन्नानडुहं

रोहितचर्मप्रागग्रीवमुपरिलोमास्तीर्णभव[illegible] ॥ कलौतदभावेप्रागग्रानुदगग्रान्वा कुशानास्तरेत् ॥ तदुपरितांवधूंप्रत्यङ्मुखांदृढपुरुषउन्मथ्योत्क्षिप्योपवेशयति ॥ ॐ इहगावोनिषीदंत्विहाश्वाइहपूरुषाः ॥ इहोसहस्रदक्षिणोयज्ञऽइहपूषानिषीदतु ॥ ॥ १ ॥ इत्यनेन[1]दृढपुरुषपठितेनमंत्रेण ॥ केचित्तुजामातरंदृढमाचक्षते ॥ अस्मिन्पक्षेजामातैवोत्क्षिप्यमंत्रमुक्त्वाआस्तृतकुशेषूपवेशयातिवधूं ॥ ततआगत्यपूर्ववद्यथास्थानंवरोदक्षिणतउपविश्यपश्चात्स्विष्टकृद्धोमंकुर्यात् ॥ ॐ अग्नयेस्विष्टकृते स्वाहा ॥ इदमग्नयेस्विष्टकृतेनमम ॥ ततःसंस्रवप्राशनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ अथस्वकीयाचार्यायगोदानंकरोतिब्राह्मणश्चेज्जामात्रेवाक्षत्रियआ

---

[1] दृढपुरुषःकश्चिद्बलवान्पुरुषइतिहरिहरः ॥ दृढपुरुषोजितेंद्रियइतिभर्तृयज्ञः ॥ जामातैवदृढपुरुषइतिरेणुकाशोदीक्षितगंगाधराः ॥

चार्यायग्रामंददाति ॥ वैश्यआचार्यायअश्वंददाति ॥ कृतस्यविवाहहोमाख्यस्यकर्मणःसांगतासिद्ध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये ॥ अथरात्रौविवाहस्तदाएतद्धरदानानंतरंवरोवधूंध्रुवमीक्षस्वेतिप्रेषंदत्वाध्रुवमीक्षयते ॥ ध्रुवमसिध्रुवंत्वापश्यामिध्रुवैधिपोष्येमयिमह्यंत्वादात् ॥ बृहस्पतिर्मयापत्याप्रजावतीसंजीवशरदःशतम् ॥ इतिवरेणमंत्रेपठितेवधूर्ध्रुवमीक्षते ॥ सायद्यपिनपश्येत्तदापश्यामीत्येवब्रूयात् ॥

॥ अथाशीर्वादः ॥ ॐ यद्वेवैतद्वाजप्रसवीयंजुहोति ॥ एताहदेवताःसुताऽएतेनसवेनयेनैतत्सोष्यमाणोभवतिताऽएवैतत्प्रीणातिताऽअस्माऽइष्टाःप्रीताऽएतꣳसवमनुमन्यंतेताभिरनुमतःसूयतेय [illegible] न्यंतेसराजाभवति ॥ १ ॥

---

१ ध्रुवमीक्षस्वेत्यध्येषणानभव [illegible] इतिहरिहरगंगाधरौ ॥

कांड ९ प्रपाठक ३ ब्राह्मण २ मंत्र ५ [illegible]ताराष्ट्रभृतोजुहोति ॥ राजानोवैराष्ट्रभृतस्तेहिराष्ट्राणिबिभ्रत्येताहदेवताःसुताऽएतेनसवेनयेनैतत्सोष्यमाणोभवतिताऽएवैतत्प्रीणातिताऽ अस्माऽइष्टाःप्रीताएतर्ठसवमनुमन्यंतेताभिरनुमतःसूयतेयस्मैवैराजानोराज्यमनुमन्यंतेसराजाभवति ॥२॥ कांड ९ प्र० ३ ब्रा० ३ मं० १ ॥ अथरथशीर्षेंजुहोति ॥ एषवैससवऽएतद्धैतत्सूयतेयस्मैतमेतादेवताःसवमनुमन्यंतेताभिरनुमतःसूयतेयस्मैवैराजानोराज्यमनुमन्यंतेसराजाभवति ॥ ३ ॥ कां० ९ प्र० ३ ब्रा० ३ मं० १३ ॥ तत्वैदेवस्वामेवएतानिहवीर्ठषिनिर्वपेदेताहदेवताःसुताएतेनसवेनयेनैतत्सोष्यमाणोभवतिताऽएवैतत्प्रीणातिताऽअस्माऽइष्टाःप्रीताऽअत२ँस

वमनुमन्यंतेताभिरनुमतःसूयतेयस्मैवैराजानोराज्यमनुमन्यंतेसराजाभवति ॥
॥ ४ ॥ कां० ९ प्र० ३ ब्रा० ५ मं० १२ ॥ अथराजानमभिषुत्याग्नौजुहोति ॥ ए
षवैससवऽएतद्दैतत्सूयतेयमस्मैतमेतादेवताःसवमनुमन्यंतेयाभिरनुमतःसूयतेयस्मै
वैराजानोराज्यमनुमन्यंतेसराजाभवति ॥ ५ ॥ कां० ९ प्र० ४ ब्रा० १ मं० ८ ॥
शतमानंभवति ॥ शतायुर्वैपुरुषःशतेंद्रियऽ आयुरेवेन्द्रियम्वीर्यमात्मन्धते ॥ ६ ॥
दंपत्योरविच्छिन्नाप्रीतिरस्तु ॥ वंशाभिवृद्धिरस्तु ॥ इत्याशीर्वादः ॥ यथाशक्तिब्रा
ह्मणभोजनसंकल्पः ॥ विवाहाग्निंमहानसेप्रक्षिप्य ॥ कर्मेश्वरार्पणंकुर्यात् ॥ कारि
कायां ॥लाजहोमत्रयेमंत्रा [illegible] चैकमंत्रंचकन्यापठतिपंचकं
॥ ध्रुवदर्शनकालेचषष्ठश्चैवव [illegible] त्रपरीधानेतथैवचोत्तरीयके ॥

तथासमीक्षकालेतुपितुर्निष्क्रमणेगृहात् [illegible] १२मनोरोहणेचैवहस्तग्राहेतथैवच ॥ तथासप्तपदेचैववधूमूर्ध्न्यभिषेचने ॥ हृदयालभनेचैवतथैवअभिमंत्रणे ॥ दृढपुरुषेक्रमेणैवएतान्मंत्रान्वरःपठेत् ॥ इति ॥ ॥ अथविवाहेमंत्राधिकारिणः ॥ वधूवरस्यपितरौवधूवरौतथैवच ॥ विवाहेमंत्रपाठीचअपरोन्येकबोधकइति ॥ १ ॥ रौद्रीपैत्रीतथामृत्युर्यमाहुत्याकृतेतथा ॥ अंतर्धानंविनायस्तुअल्पायुर्दंपतीभवेत् ॥ २ ॥ रौद्रीपैत्रीमृत्युयमाहुतीर्हुत्वाह्यपःस्पृशेत् ॥ अपांस्पर्शनकालेतुस्पृशेत्प्रणीतकंजलं ॥ यमायदक्षिणेत्यागंईशान्यांरुद्रमेवच ॥ दक्षिणाग्नेययोर्मध्येपितृत्यागोविधीयते ॥ ३ ॥ एतत्त्यागंस्वयंपात्रेअन्यंदेयात्तुप्रोक्षणीम् ॥ ४ ॥ भृष्टव्रीहिभिर्वल्लाजाशमीदलविमिश्रिता ॥ कन्याहोमंप्रकुर्वीतभर्तुर्भ्रातुश्चसंगमे ॥ ५ ॥ वरेणवामहस्तेनवधूपादंचदक्षिणं ॥ शिलामारोहयेत्प्राज्ञःमंगलानियथाक्रमम् ॥ ६ ॥ शक्तिरूपेण

याशैल्याशिवरूपाशिलापतिः ॥ उभौअंगुष्ठसंस्पर्शात्साकन्याविधवाभवेत् ॥ ७ ॥
कामस्त्वघोषबाणैःस्वैःप्रहरेदतिदारुणैः ॥ तस्मादग्रेभवेत्कन्यातस्यबाणस्यशांत
ये ॥ ८ ॥ कन्यकाग्रेवरंकृत्वाब्राह्मणोज्ञानदुर्बलः ॥ विधवाजायतेनारीनिषिद्धस्त
त्रकारणात् ॥ ९ ॥ अग्रेतुशुभदापत्नीमांगल्येसर्वकर्मणि ॥ पदेपदेश्वमेधंचधनायुः
पुत्रवर्धनं ॥ १ ॥ लाजानाज्यंस्त्रुवंकुंभंब्रह्माणमृत्विजंगुरुं ॥ एतेषांबाह्यतःकृत्वाशेषा
णांतुप्रदक्षिणा ॥ ११ ॥ वध्वादक्षिणपादानिसप्तानिप्रक्रमेत्तुसा ॥ याम्यादुदग्दिक्संस्था
प्यप्रक्रमेदुत्तरोत्तरम् ॥ १२ ॥ गणयेद्दक्षिणपदान्पदवामान्निरर्थकान् ॥ १२ ॥ पति
पुत्रान्विताभव्याश्चतस्रःसुभगाःस्त्रियः ॥ सौभाग्यमस्यैदद्युस्तामंगलाचारपूर्वक
मिति ॥ १३ ॥ पतिपुत्रवतीनारीसुरूपगुणशालिनी ॥ अविच्छिन्नप्रजासाध्वीसद
यासासुमंगली ॥ १४ ॥ इतिकारिकावचनानि ॥ ॥ अथकश्चिद्यदिअभ्रातृकांक

न्यामुद्वहेत्तदास्याःपित्रोःरथाधिक[illegible]द्वहेत् ॥ एतेनपुत्रिकादोषान्मुच्यते ॥ ग्रामवचनंचात्रविवाहेकुर्या[illegible] ॥ विवाहस्मशानयोर्ग्रामःप्रमाणमितिश्रुतेः ॥ ग्रामशब्देनस्वकुलवृद्धाःस्त्रियोभिधीयंते ॥ ताश्चपूर्वपुरुषैरनुष्ठीयमानंसदाचारंस्मरंति ॥ विवाहादारभ्यत्रिरात्रमक्षारालवणाशिनौस्यातां ॥ जायापतीअधःशयीयातांत्रिरात्रमेव ॥ अधःशब्दःखट्वाव्युदासार्थोनतुआस्तरणव्युदासार्थः ॥ संवत्सरंनमिथुनमुपेयातांद्वादशरात्रंवाषड्रात्रंवात्रिरात्रंवेति ॥ मिथुनकरणेशक्त्यपेक्षयाएतेविकल्पाः ॥ संवत्सरादिपक्षाशक्तौत्रिरात्रपक्षेप्याश्रियमाणेचतुर्थ्युत्तरकालंपंचम्यांरात्रावभिगमनंकर्तव्यं ॥ कुत एतत् ॥ चतुर्थीकर्मण्यकृतेभार्यात्वमेवनाद्यापिसंवृत्तंतस्याविवाहैकदेशत्वाच्चतुर्थीकर्मणः ॥ इतिसंस्कारभास्करेविवाहदिनकृत्यप्रयोगः ॥

॥ अथऐरणीप्रदानं ॥

॥ तच्चआचारप्राप्तंविवाहाच्चतुर्थदिनेऽ

पररात्रेकार्यं ॥ तत्स्वरूपं ॥ वंशपात्रमिहैकंचशूर्पैःषोडशभिर्युतं ॥ करकैरुद्रसंख्याकैःसुवर्णपरिपूरितैः ॥ शताच्छिद्रांशुभामेकांगोधूमेनप्रपूरितां ॥ व्यजनैकंतथैवचेतिवापाठभेदः ॥ सवस्त्रंचसदीपंचसौभाग्यद्रव्यसंयुतं ॥ नानापक्वान्नसंयुक्तंफलतांबूलसंयुतं ॥ एतावदैरिणीरूपंकर्तव्यंप्रीतिवर्धनं ॥ उमाशंकरयोःप्रीत्यैऐरिणीदानमुत्तमं ॥ वरमात्रेप्रदास्यामिकन्यादानस्यासिद्धये ॥ ॥ अथऐरिणीपूजा ॥ ततःकन्यापितासपत्नीकः मंडपमध्येप्राङ्मुखः शुभासनेउपविश्य ॥ स्वाग्रेवंशपात्रंनिधायतत्पुरतः वस्त्राच्छादितपीठेवधूवरौप्रत्यङ्मुखावुपवेशयेत् ॥ वरमातरंभर्तृसहितांपीठेउदङ्मुखीमुपवेशयेत् ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्य ॥ एवंगुणविशेष० तिथौमयाचतुर्भिरहोभिःनिष्पादितविवाहाख्यस्यकर्मणःसांगतासिद्ध्यर्थंश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंकन्यादानसंपूर्णफलावाप्तयेवधूवरयोःबव्हायुष्यप्रा

मयेवंशाभिवृद्ध्यर्थंश्रीउमामहेश्वरप्रीतयेचवरमात्रेऐरिणीप्रदानमहंकरिष्ये ॥ तत्रनिर्विघ्नतासिद्ध्यर्थंमहागणपतिपूजनं ॥ मनोजूतिरितिप्रतिष्ठा ॥ ततःश्रीश्चतेतिमंत्रेणषोडशोपचारैःऐरिणींपूजयेत् ॥ प्रार्थना ॥ ऐरिणित्वमुमादेवीमहेशोगिरिजापतिः ॥ अतस्त्वांपूजयिष्यामिऐरिणींसर्वकामदां ॥ ऐरिणित्वमुमादेवीवंशपात्रस्वरूपिणी ॥ कन्यादानस्यसंपूर्णफलंदेहिशिवप्रिये ॥ यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी ॥ तावद्धिवंशवृद्धिंत्वंदेहिमेशंकरप्रिये ॥ अनयापूजयाऐरिणीस्वरूपिणौ उमामहेश्वरौप्रीयेतां ॥ वरमातृहस्तेशिवाआपःसंतु ॥ संतुशिवाआपः ॥ सौमनस्यमस्तु ॥ अस्तुसौमनस्यं ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतम० ॥ गंधाःपांतु ॥ सौमंगल्यंचास्तु ॥ अक्षताःपांतु ॥ आयुष्यमस्तु ॥ पुष्पाणिपांतुसौश्रियमस्तु ॥ यत्पापंरोगंअशुभंअकल्याणंतद्दूरेप्रतिहतमस्तु ॥ दानमंत्रः ॥ वंशोवंशकरःश्रेष्ठोवंशोवं

शसमुद्भवः ॥ वंशपात्रमिदंदानंवंशवृद्धिकरंपरं ॥ वंशपात्रमिदंपुण्यंवंशजातसमुद्भवं ॥ वंशानामुत्तमंदानंकन्यादानफलप्रदम् ॥ वंशपात्राणिसर्वाणिमयासंपादितानिवै ॥ उमाकांतायदास्यामिममवंशाभिवृद्धये ॥ वंशवृद्धिकरंदानंसौभाग्यादिसमन्वितं ॥ नानापक्वान्नसंयुक्तंदंपत्योर्वंशवर्द्धनं॥वस्त्रेणाच्छादितंपूगफलहेमसमन्वितं ॥ ददामिवरमातस्तेपार्वतीशंकरौतथा ॥ दातामहेश्वरोदेवोगृहीतापिमहेश्वरः ॥ दानेनानेनमेदेवप्रसीदपरमेश्वर ॥ इदंऐरिणीवंशपात्रंसदक्षिणाकंवरमात्रेतुभ्यमहंसंप्रददेनमम ॥ ततोवरगोत्रजादीन्गंधवस्त्रादिभिःसंपूज्यप्रार्थयेत् ॥ यच्छत्त्याविहितंस्वगृह्यकथितैर्मंत्रैश्चपौराणिकैर्दानंवस्त्रजलान्नचंदनदलाद्यंवाचतुर्भिर्दिनैः ॥ दंपत्योर्ममवंशवृद्धिमनघांदद्यादुमाशंकरोन्यूनंतत्कृपयाखिलंसफलतांयातुद्विजानांनतिः ॥ १ ॥ ततोवधूगोत्रजाःतत्ऐरिणीवंशपात्रंगृहीत्वावरगोत्रजादीनांशि

रसिधारयेयुः ॥ ॐ घृतव॑तीभुव॑नानामभि॒श्रियो॒र्वी॑पृ॒थ्वीम॑धुदु॒घे॑सुपे॒श॑सा ॥ द्यावा॑पृथिवीवरु॑णस्यधर्म॑णा॒विष्क॑भितेऽअ॒जरे॒भूरि॑रेतसा ॥ १ ॥ इतिमंत्रेण ॥ ततःकन्यांनिवेदयेत् ॥ अष्टवर्षात्वियंकन्यापुत्रवत्पालितामया ॥ इदानींतवपुत्रायदत्तास्नेहेनपाल्यतां ॥ १ ॥ अनेनवरपितुरुत्संगेदद्यात् ॥ पुनरुत्थाप्य ॥ अस्मदादिसुहृद्बंधूंस्त्यक्त्वायातिभवद्गृहं ॥ अतिस्नेहेनवैमातःकन्यांमेपरिपालय ॥ २ ॥ अनेनवरमातुरुत्संगेदद्यात् ॥ अत्रावसरेवध्वावासिष्ठारुंधतीपूजनं ॥ रुक्मपीठेसुविस्तीर्णेमणिविद्रुमशोभिते ॥ तिष्ठत्वत्रासनेदेवीयावत्पूजांकरोम्यहं ॥ इतिआवाह्य ॥ श्रीश्चतेइतिमंत्रेणवासिष्ठारुंधतीभ्यांनमः पंचोपचारैःसंपूज्य ॥ पूजांतेगंधपुष्पफलहिरण्योपेतंअर्घंदद्यात् ॥ तत्रमंत्रः ॥ अरुंधतिमहाभागेवासिष्ठप्रियवादिनि ॥ सौभाग्यंसंततिं

देहिगृहाणार्घंनमोस्तुते ॥ ९ ॥ इत्यर्घंदत्वाप्रार्थयेत् ॥ अरुंधतिमहाभागेवसिष्ठप्रियवल्लभे ॥ सौभाग्यंदेहिसततंपुत्रपौत्रांश्चदेहिमे ॥ पतिव्रतेनमस्तुभ्यंसौभाग्याभरणेशुभे ॥ धनंदेहिसुतंदेहिअरुंधतिनमोस्तुतेइतिप्रार्थ्य ॥ ततोअखंडसौभाग्यादिकामनयावसिष्ठारुंधतीप्रीतयेषोडशाष्टौवावायनानिब्राह्मणेभ्योदद्यात् ॥ अथवावायननिष्क्रयीभूतंयथाशक्तिरजतद्रव्यंअखंडसौभाग्यप्राप्तिकामनयावसिष्ठारुंधतीप्रीतयेअमुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेइति ॥ ततोवरहस्तेकन्यांनिवेदयेत् ॥ इयंकन्यामयादत्तातवविप्रसहायिनी ॥ स्वदेशेपरदेशेवापरिपाहिकुलोचितं ॥ १ ॥ इतिमंत्रेणनिवेदयेत्॥ ब्राह्मणेभ्योदक्षिणांदत्वातैराशिषोगृह्णीयादित्यैरिणीप्रदानम्॥ एतदकरणेदोषोयथा ॥ वंशदानंविनायस्तुमंडपोद्वासनंयदि ॥ अज्ञानात्कुरुतेमूढोदंपत्योःक्षयमायुषां ॥ दंपत्योर्वाससीदत्वापूजयेदैरिणींततः ॥ वंशपात्रंतथाकन्यां

वरमात्रेनिवेदयेत् ॥ वंशदानंचतुर्थेन्हिकन्यादानांगमिष्यते ॥ रात्रौकुर्यात्तृतीयेंशेकुयोगेऽपिनदुष्यति ॥ पातोवावैधृतिर्वास्याच्चतुर्थेहनिचेद्यदि ॥ तत्रैवापररात्रेस्यादैरिणीपूजनादिकमिति॥ एतत्कुयोगेऽपिचतुर्थेन्हिकार्यंनान्यत्रेतितात्पर्यार्थः ॥ वस्तुतस्तुनवीनग्रंथेषुएतस्यादर्शनान्नानादरणीयं ॥ इतिशाकलकारिकायां॥ ॥अथवधूप्रवेशः॥ ॥ वधूप्रवेशःप्रथमेतथैवशुभप्रदःपंचमकेथवान्हि ॥ द्वितीयकेवाथचतुर्थकेवाषष्ठेवियोगामयदुःखदःस्यात् ॥ १ ॥ तथाचसंग्रहे ॥ विवाहमारभ्यवधूप्रवेशोयुग्मेतिथौषोडशवासरांतात् ॥ ऊर्ध्वंततोऽब्देऽयुजिपंचमांतादतःपरस्तान्नियमोनचास्ति ॥ २ ॥ अयुग्मेतृतीयंत्यक्त्वायुग्मेषष्ठंविवर्जयेत् ॥ प्राप्तकालेऽव्यतीपातवैधृतीसंक्रमंतथा ॥ उपरागंश्राद्धदिनंवर्जयित्वाशुभेप्सुभिः ॥ ३ ॥ ज्योतिःशास्त्रोक्तदिवसेशुभकालेतथैवच ॥ रात्रौवधूप्रवेशःस्याद्दिवानैवकदाचनेति ॥ ४ ॥ तत्रज्योतिः

शास्त्रोक्तशुभकालेवरः पित्रादत्तांवधूंगृहीत्वायानेउपविश्यमंगलवाद्यघोषपुरःसरंमंगलगीतपठनपरैः पुरंध्रीजनैराचार्यादिविप्रैःआनोभद्राःस्वस्तिनऽइन्द्रइतिसुमंगलसूक्तपठनपरैश्चसहस्वगृहमागत्यगृहमध्येशुभासनेप्राङ्मुखउपविश्यस्वदक्षिणतःवधूंनिवेश्य ॥ देशकालौस्मृत्वाअस्याःममनवोढाभार्यायाः प्रथमगृहप्रवेशंकरिष्ये ॥तदंगविहितंगणपतिपूजनंस्वस्तिपुण्याहवाचनंचकरिष्येइतिकृत्वा ॥ ततआचारप्राप्तंकांस्यपात्रेतंदुलान्प्रसार्यतदुपरिसुवर्णशलाकयाश्रीकुलदेवताप्रयुक्तमादौअमुकीइतिनामविलिख्यमनोजूतिरितिप्रतिष्ठाप्यश्रोश्चतेइतिमंत्रेणषोडशोपचारैःसंपूज्य ॥ अन्यद्यथाकुलाचारंकुर्यात् ॥ ततोवरेणनामवाचनपुरःसरंवध्वानामप्रतिष्ठितंकुर्यात् ॥ श्रीकुलदेवताप्रयुक्तमादौअमुकनामप्रतिष्ठितंइतित्रिर्वाचयित्वा ॥ ब्राह्मणाःमनोजूतिरितिमंत्रंपठित्वावधूशिरसिमंत्राक्षतान्दद्युः ॥ ब्राह्मणेभ्योगंधतांबूलदक्षिणा

दिदत्वातैराशिषोगृह्णीयात् ॥ इतिवधूप्रवेशः ॥ ॥ अथप्रथमाब्देवधूनिवासः ॥ ॥ ज्योतिर्निबंधे ॥ उद्वाहात्प्रथमेशुचौयादिवसेद्भर्तुर्गृहेकन्यकाहन्यात्तज्जननींक्षयेनिजतनुंज्येष्ठेपतिज्येष्ठकं ॥ पौषेचश्वशुरंपतिंचमलिनेचैत्रेस्वपित्रालयेतिष्ठंतीपितरंनिहंतिनभयंतेषामभावेभवेत् ॥ इतिप्रथमाब्देवधूनिवासः ॥ ॥ अथचतुर्थीकर्मोच्यते ॥ तच्चविवाहाच्चतुर्थदिनेऽपररात्रेऐरिणीप्रदानोत्तरंकार्यं ॥ गृहमध्येग्निस्थापनं तत्रैवचतुर्थीकर्मोक्तंहारिहरादिभिस्तथापितत्‌शिष्टाः बहिःशालायांवेद्यांकुर्वंतीति ॥ तत्रायंक्रमः ॥ कृत्येचातुर्थिकेतुवधुवरउभयोर्मंगलस्नानकार्यंस्थाप्योवैवाहिकाग्निस्तदुत्तरउदकुंभंचरुमग्नौपचेयुः ॥ हुत्वाघाराज्यभागानथघृतहवनमाग्निवायुश्चसूर्यश्चं

---

१ चतुर्थ्यामपररात्रेभ्यंतरतोग्निमुपसमाधायेतिसूत्रात्ग्रहमध्यएवाग्निस्थापनंतत्रैवचतुर्थीकर्मोक्तंहरिहरादिभिस्तथापीदानींतनशिष्टावेद्यांकुर्वंति ॥

द्रोगंधर्वपंचप्रजापतिचरुणाषट्स्रवंचोदपात्रे ॥ १ ॥ शेषैःस्विष्टंनवाज्याहुतिमनुहवनंप्रोक्षणीसंस्रवंतत्प्राश्यंशेषंसमाप्यअथवरवधूमूर्धन्यार्षिंचोदपात्रात् ॥ प्राणैस्तेस्थालिपाकंहुनितमपिवधूंप्राशयित्वावरेणकर्मांदौमंगलासारचितक्रमणिकासर्वसंस्कारमाला ॥ २ ॥ इति ॥ ॥ ततोवरोवध्वासहवधूपितृगृहेमंगलंस्नात्वाऽहतपट्टकूलादिवाससीपरिधायधृतकुंकुमतिलकोवेद्यांशुभासनेउपविश्यदक्षिणतःपत्नींचोपवेश्य ॥ आचम्यप्राणानायम्यदेशकालकीर्तनांतेममास्याभार्यायाः सोमगंधर्वाग्न्युपभुक्तदोषपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंविवाहैकदेशत्वाच्चतुर्थीकर्माहंकरिष्ये ॥ तत्रनिर्विघ्नतार्थंगणपतिपूजनंवास्मरणंकुर्यात् ॥ तत्रगृहाभ्यंतरतोग्निमुपसमाधायस्थंडिलेपंचभूसंस्कारपूर्वकंविवाहाग्निंप्रतिष्ठाप्य ॥ ततोदक्षिणतोब्रह्मासनादिप्रणीतास्थापनानंतरंप्रणीतोत्तरतउदपात्रंप्रतिष्ठाप्य ॥ आज्यं ॥ स्थालीपाक

चरुः ॥ पवित्रीकरणादिआघाराज्यभागांतमाधानवत् ॥ आज्यभागानंतरमाज्येनपंचाहुतयोवक्ष्यमाणमंत्रैः ॥ ॐ अग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामऽउपधावामियास्यैपतिघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदमग्नयेनमम ॥ ॐ वायोप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामऽउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंवायवेनम० ॥ ॐ सूर्य्यप्रायश्चित्तेत्वंदेवानाम्प्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामऽउपाधवीमयास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंसूर्य्यायनम० ॥ ॐ चन्द्रप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामऽउपधावामियास्यैगृहघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंचंद्रमसेन० ॥ ॐ गन्धर्वप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामऽउपधावामियास्यैयशोघ्नीतनूस्तामस्यैनाशयस्वाहा ॥ इदंगंध

वांयनमम ॥ ततःस्थालीपाकेनप्रजापतयइतिएकाहुतिः ॥ ॐ प्रजापतयेस्वाहा॥ इदंप्र० ॥ आसांषडाहुतीनांप्रणीतापात्रस्योत्तरतउदपात्रेसंस्रवप्रासनं ॥ स्विष्टकृतोपिकेचिदिच्छंति ॥ अन्यासामाहुतीनांप्रोक्षणीपात्रेसंस्रवप्रासनं ॥ ततःस्थालीपाकेनास्विष्टकृतं ॥ ॐ अग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृतेनमम ॥ ततआज्येनमहाऽव्याहृत्यादिप्रजापत्यंतानवाहुतयः ॥ ततः प्रोक्षणीपात्रेयेसंस्रवास्तेषांप्रासनं ॥ पवित्राभ्यांमार्जनादिप्रणीताविमोकांतंहोमशेषंसमाप्य ॥ ततःप्रणीतोत्तरस्थादुदपात्रादुदकंपल्लवेनादायवधूमूर्धन्यभिषिंचतिवरः॥ ॐयातेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदितातनूर्जारघ्नींततऽएनांकरोमिसाजीर्यत्वंमयासहासौ ॥ असौस्थानेनामादेशः ॥ अमुकीइत्यनेन ॥ अथैनांवधूंस्थालीपाकंप्राशयतिवरः ॥ ॐ प्राणैस्तेप्राणान्त्सन्दधाम्यस्थिभिरस्थीनिमाꣳसैर्माꣳसानित्वचात्वचम् ॥

॥ १ ॥ इतिमंत्रेणवरपठितेनतांचाचम्यअत्रावसरेवधूवरौबंधनक्रमेणपरस्परंकंकणेविमुंचेताम् ॥ यथाशक्तिब्राह्मणभोजनसंकल्पः॥ब्राह्मणेभ्योभूयसींदत्वातेराशिषोगृण्हीयाद्गुरः ॥ इतिसंस्कारभास्करेचतुर्थीकर्मप्रयोगः ॥ ॥ अथदेवकोत्थापनं ॥ तत्रकालः ॥ समेचदिवसेकुर्याद्देवकोत्थापनंबुधः ॥ षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ ॥ १ ॥ मंडपोद्वासनंकार्यंसमेवाविषमेदिने ॥ समेषष्ठंदिनंवर्ज्यंविषमेत्रिनवंत्यजेदिति ॥ २ ॥ अत्रस्थापनदिनात्परिगणना ॥ तत्राविषमेत्रिनवंसमेषष्ठादिनंवर्ज्यं ॥ चतुर्थपंचमसप्तमातिरिक्तंनात्रेष्टमित्यर्थः ॥ ज्योतिर्ग्रंथेतु ॥ प्रतिष्ठादिनमारभ्ययावत्षोडशवासराः ॥ देवकोत्थापनंकार्यमुद्वाहेचव्रतेदशेति ॥ मुहूर्तमार्तंडटीकायां ॥ विवाहदिनमारभ्यनवत्रिषष्ठादिवसेषूद्वासनमापिनकार्यमित्युक्तंतन्मंडपस्यनतुदेवकादेरितिद्रष्टव्यं ॥ विवाहोत्तरंयुग्मेसमेद्वितीयचतुर्थादिकेघस्रेदिनेषष्ठ

दिवसहीनेतथाविषमेतुपंचमेसप्तमेचाहानिदिवसेमंडपोद्वासनंदेवकोत्थापनंसच्छुभफलदातृस्यात् इतिमूहूर्तचिंतामणौपीयूषधारायां ॥ उक्तदिनेवरवधूसहितःस्वस्वगृहेवरपितावधूपिताचस्वदक्षिणतः पत्न्यासहशुभासनेप्राङ्मुखउपविश्य ॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्यममगृहेषट्सुषट्सुमासेषुशोभनप्राप्त्यर्थंविवाहांगभूतंदेवकोत्थापनमंडपोद्वासनाख्यंकर्मकरिष्ये ॥ तदंगविहितंगणपतिपूजनंस्वस्तिपुण्याहवाचनंचकरिष्येइतिकृत्वा ॥ स्वस्तिवाचनेभोब्राह्मणाःमयाक्रियमाणयोःदेवकोत्थापनमंडपोद्वासनाख्यकर्मणोःपुण्याहंभवंतोब्रुवंतु ॥ ॐपुण्याहं ॥ एवंकल्याणंऋद्धिंस्वस्तिंश्रियंइति ॥ ततःस्थापितदेवतानांपंचोपचारैरुत्तरपूजनंकार्यं ॥ उत्तिष्ठब्रह्मणस्पतेयांतुमातृगणाइतिमंत्रेणस्थापितदेवताःविसृज्य॥ ॐ उत्तिष्ठब्रह्मणस्पतेदेवयन्तंस्त्वेमहे ॥ उपप्रयन्तुमरुतःसुदानवऽइन्द्रंप्राशूर्भवासचां ॥ १ ॥ यांतु

मातृगणाःसर्वेस्वशक्त्यापूजितामया ॥ इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच॥१॥आवाहितदेवताःस्वस्थानेगच्छतेत्युत्थापयेत् ॥ ततआचार्योनांदिन्यादिमंडपमातृणां सूत्रमुन्मुच्यतेनद्वेपूगीफलेवेष्टयित्वा॥ नंदिन्यादिमातृणांपर्णानिशूर्पेनिदध्यात् ॥ ततोयजमानःपत्न्यासहवरोवधूश्चतच्छूर्पेहस्तौगृहीत्वाशूर्पेआचार्यःजलंसिंचतिसोपि शूर्पेणगृहाभ्यंतरमारभ्यमंडपांतंत्रिवारंगत्वाजलधारांपातयेत् ॥ वसोःपवित्रमसि॥ द्यौःशांतिरितिमंत्रेण॥ धरापातनोत्तरंतेनैवमंत्रेणतन्मातृपल्लवैःसपत्नीकंयजमानमभिषिच्यशूर्पस्थमातृपलवानिमंडपोपरिनिक्षिप्य ॥ ईशानकोणप्रदेशेमंडपावितानं विमुच्य ॥ ततःसूत्रवेष्टितेद्वेपूगीफलेआचार्योगृहीत्वायजमानायश्रेयोदानंकुर्यात्॥ तद्यथा ॥ सपत्नीकयजमानस्यांजलौ॥ शिवाआपःसंतु ॥ संतुशिवाआपः ॥सौमनस्यमस्तु॥अस्तुसौमनस्यं ॥ अक्षतंचारिष्टंचास्तु ॥ अस्त्वक्षतमरिष्टंच॥ इतिवच

नप्रतिवचने॥ अत्राःपांतु ॥ सुप्रोक्षितमस्तु ॥ गंधाःपांतु ॥ सौमंगल्यंचास्तु
॥ अक्षताःपांतु ॥ आयुष्यमस्तु ॥ पुष्पंपातुसौश्रियमस्तु॥यत्पापंरोगंअशुभंअक
ल्याणंतद्दूरेप्रतिहतमस्तु ॥ इत्यंजल्युपरिउदकंभ्रामयित्वोदीच्यांनिषिंचेत् ॥ ततो
यजमानः ॥ भोब्राह्मणाःममगृहेषट्सुषट्सुमासेषुशोभनानिभवंतोब्रुवंतु ॥ संतुशोभ
नानीत्याचार्यः ॥ इतित्रिरुक्त्वा ॥ कृतमेतद्विवाहकर्मणिआचार्यत्वंतदुत्पन्नंश्रेयस्त
तुभ्यमहंसंप्रददेइतियजमानहस्तेसाक्षतजलपूगीफलद्वयंप्रक्षिप्यप्रतिगृह्यतामितिव
देत् ॥ यजमानोदेवस्यत्वेतिप्रतिगृण्हाति ॥ ततोवस्त्रालंकारादिभिर्यथाविभवमा
चार्यपूजनंकृत्वातस्मैमहादक्षिणांदत्वाऽन्येभ्योब्राह्मणेभ्योभूयसींदक्षिणांदत्वातैरा
शिषोगृहीत्वा ॥ यस्यस्मृत्येतिकर्मसंपूर्णतांवाचयित्वा ॥ ब्राह्मणान्भोजयित्वा
॥ सुहृद्भिःसहयजमानोभुंजीतेतिदेवकोत्थापनं ॥ इतिसंस्कारभास्करेविवाहसं

स्कारप्रयोगः ॥ ॥ अथद्विरागमः ॥ तत्रमाघफाल्गुनवैशाखाः शुक्लपक्षश्चशुभाः ॥ अश्विनीरोहिणीपुनर्वसुपुष्योत्तरात्रयानुराधाज्येष्ठाहस्तस्वातीचित्राश्रवणशततारकानक्षत्रेषुचंद्रबुधशुक्रवारेषुगुरुशुक्रास्तादिरहितेस्थिरलग्नादिशुभकालेद्वितीयवधूप्रवेशः शुभः ॥ द्विरागमनेऽधिमासविष्णुशयनमासौसमवत्सराः प्रतिशुक्रादिदोषाश्चवर्ज्याः द्विरागमोपियदिविवाहमारभ्यषोडशदिनमध्येक्रियतेतदाप्रतिशुक्रादिदोषोस्तादिदोषश्चनास्ति ॥ यथा ॥ द्विरागमः षोडशवासरांतंएकदशाहेसमवासरेषु ॥ नचात्रऋक्षंनतिथिर्नयोगोनवारशुद्ध्यादिविचारणीयं । केवलांगिरसकेवलभृगुभरद्वाजवसिष्ठकश्यपात्रिवत्सगोत्राणांप्रतिशुक्रदोषोन । रेवत्यश्विनीभरणीकृत्तिकाद्यचरणेषुचंद्रेसतिशुक्रस्यांधत्वात्प्रतिशुक्रदोषोन ॥ दुर्भिक्षेदेशविप्लवेविवाहेतीर्थगमनेएकन [illegible] षोन ॥ इतिद्वि

रागमः ॥ ॥ विवाहेभार्ययासहभोजनमाहांगिराः ॥ ब्राह्मण्यासहयोऽश्नी
याद्दुच्छिष्टंवाकदाचन ॥ तत्रदोषंनमन्यंतेसर्वएवमनीषिणः ॥ १ ॥ एकपात्रे
समश्नीयाद्विवाहेषुवधूवरौ ॥ तत्रदोषंनमन्यंतेआचारभ्रेषनैवचेति ॥ संग्रहे
एकासनंचैकशय्यांएकपात्रेचभोजनं ॥ एकत्रमंगलस्नानंएकवाहनरोहणं ॥ कुर्व
विवाहेएतानिभवेद्विप्रोनदोषभागिति ॥ अथाभ्युदयिकश्राद्धोत्तरंदेवकोत्थापनप
र्यंतंनिषिद्धकर्माणि ॥ गार्ग्यः ॥ नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनं ॥ दर्शश्रा
द्धंक्षयश्राद्धंस्नानंशीतोदकेनच ॥ अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच ॥ ब्रह्मय
ज्ञंचाध्ययनंनदीसीमांतलंघनं ॥ उपवासव्रतंचैवश्राद्धभोजनमेवच ॥ नैवकुर्युःस
पिंडाश्चमंडपोद्वासनावधि ॥ १ ॥ त्रिपुरुषसापिंडयपर्यंतं ॥ अत्रनित्यश्राद्धनिषेधे
नतत्कार्यविहितपितृयज्ञनिषेधसिद्धिः ॥ स्वधाकारग्रहणंतत्सहितवैश्वदेवनिषेधार्थं॥

तथान्यच्च ॥ अभ्यंगेसूतकेरात्रौविवाहेपुत्रजन्मनि ॥ मांगल्येषुचसर्वेषुनधार्यंगोपिचंदनं ॥ १ ॥ इति ॥ ॥ अथमातृविसर्जनानंतरंअब्दपर्यंतंनिषेधमाह ॥ वसिष्ठः ॥ स्नानंसचैलंतिलमिश्रकर्मप्रेतानुयानंकलशप्रदानं ॥ अपूर्वतीर्थामरदर्शनंचविवर्जयेन्मंगलतोब्दमेकं ॥ १ ॥ पितॄणामुद्देशेनकलशदानमित्यर्थः ॥ ॥ अत्रापवादः ॥ तीर्थेसंवत्सरेप्रेतेपितृयज्ञेमहालये ॥ कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसदेति ॥ ॥ मासषट्कंविवाहादौव्रतप्रारंभणेपिच ॥ जीर्णभांडादिनत्याज्यंगृहसंमार्जनीतथेति ॥ ॥ श्मश्रुकरणे ॥ ऊर्ध्वंविवाहात्पुत्रस्यतथाचव्रतबंधनात् आत्मनोमुंडनंचैववर्षवर्षार्धमेवच ॥ त्रिमासंवात्रिपक्षंवानकुर्वीतकदाचनेति ॥ कन्यागृहेभोजननिषेधः ॥ भविष्ये ॥ अप्रजायांतुकन्यायांनभुंजीतकदाचन ॥ दौहित्रस्यमुखंदृष्ट्वाकिमर्थमनुशोचति ॥ नभुंजीतेत्यत्रकन्यागृहेइतिशेषः ॥ अप

राकैंआदित्यपुराणेच ॥ अप्रजायांतुकन्यायांनाश्नीयात्कन्यकागृहे ॥ ब्राह्मादिविधिनाकन्यांदत्वाश्नीयात्कदाचन॥अथभुंजीतमोहाच्चेत्सयातिनरकंध्रुवमिति ॥ ब्राह्मविवाहविधिनादातुंयोग्यांकन्यांदत्वाकदापितस्याःगृहेनैवाश्नीयादित्यर्थः ॥शाकलकारिकास्वपि ॥ दुहित्रन्नंनभुंजीयाद्यावत्तस्याभवेत्सुतः ॥ अन्यथायस्तुभुजीतदन्नंतस्यवृथाभवेत् ॥ कन्यायास्त्वप्रसूतायायस्त्वन्नंभुंजतेयदि ॥ अघंसकेवलंभुंक्तेप्राजापत्येनशुध्यतीति ॥ अथवरस्यमृतभार्यत्वपरिहारोपायः ॥ तदुक्तंबृहद्याज्ञवल्क्येन ॥ परिवेत्तृत्वपापेनमृतभार्यत्वंजायते ॥ तद्दोषपरिहारार्थंप्राजापत्यत्रयंतथा ॥ चांद्रायणत्रयंचैकेअनेकेद्विगुणंचरेत् ॥ एकेएकभार्यामरणेइदंप्रायश्चित्तं॥ अनेकेअनेकभार्यामरणेतुएतत्प्रायश्चित्तंद्विगुणंचरेदित्यर्थः॥गणेशंपूजयेदादौपुण्याहंवाचयेद्द्विजैः ॥ दुर्गाग्निविष्णुप्रतिमाःस्थापयेत्पूजयेत्ततः ॥ त्रिभिस्तुदेव

ताप्रीत्यैहुनेदष्टाधिकायुतं ॥ आहुतिंचरुणाज्येनप्रतिद्रव्योक्तसंख्यया ॥ दुर्गाग्निविष्णुमंत्रैश्चपुनःपुनरितीरितइति॥अथप्रयोगः ॥ सुदिनेसुस्नातोयजमानआसनेउपविश्याचम्यप्राणानायम्यदेशकालकीर्तनांतेमममृतभार्यत्वदोषनिरासद्वाराश्रीपरमेश्वरप्रीत्यर्थंवक्ष्यमाणप्रकारेणअष्टाधिकायुतसंख्ययाचर्वाज्यहवनंकरिष्ये॥ तत्रादौ निर्विघ्नतार्थंगणपतिपूजनंस्वस्तिपुण्याहवाचनंआचार्यादिवरणंदिग्रक्षणंपंचगव्यकरणंभूमिपूजनंअग्निस्थापनंकलशानांस्थापनंदुर्गाग्निविष्णुदेवतानांस्थापनंचका इतिक्रमेणकृत्वा ॥ देवतामंत्रास्तु॥अम्बेअम्बिकेतिदुर्गां ॥ त्वन्नोअग्नेतवदेवेति ॥इदंविष्णुरितिविष्णुं॥ततोदक्षिणतोब्रह्मासनादिपवित्रयोःप्रणीतासुनिधानांतंकृत्वान्वादध्यात् ॥ तद्यथा ॥ अत्रप्रधानं ॥ तत्रप्रजापतिंइंद्रंअग्निंसोमंएताःआघाराज्यभागदेवताःएकैकयाहुत्याआज्येनअत्रप्रधानंदुर्गांअग्निंविष्णुंचस्वस्वमंत्रेणअष्टषष्टित

माधिकषोडशशतसंख्ययाचरुहोमतथाचपुनरन्प्रधानदेवतानांस्वस्वमंत्रेणपूर्वोक्तसंख्ययाआज्यहोमंशेषेणस्विष्टकृतंअग्निंवायुंसूर्यंअग्नीवरुणौअग्नीवरुणौपुनरग्निंवरुणंसवितारंविष्णुंविश्वान्देवान्मरुतःस्वर्कान्वरुणंआदित्यंअदितिंप्रजापतिंएतादेवताआज्येनैकैकयाहुत्याअस्मिन्कर्मण्यहंयक्ष्ये ॥ इत्यन्वाधानं ॥ प्रतिदैवतंतूष्णंनिरूप्यप्रोक्ष्यच ॥ त्यागकालेअष्टोत्तरायुतसंख्याहुतिपर्याप्तंचर्वाज्यद्रव्यंयथामंलिंगंदुर्गायैअग्नयेविष्णवेचनममेतित्यागंकुर्यात् ॥ प्रथमंगणेशायवराहुतिंदत्वाअन्वाधानोक्तरीत्याहवनंकार्यं ॥ पूजास्विष्टेतिक्रमेणहोमशेषंसमाप्यदशविप्रान्भोजयेदिति ॥ हवनाहुतिक्रमोयथा ॥ आज्यभागांतेपूर्वंअम्बेअम्बिकेतिमंत्रेणदुर्गायैचर्वाहुतयः १६६८ ॥ त्वन्नोऽअग्नेइतिअग्नयेचर्वाहुतयः १६६८॥ इदंविष्णुरितिविष्णवेचर्वाहुतयः १३६८ ॥ अनंतरंअम्बे० दुर्गायैआज्याहुतयः १६६८ ॥

त्वन्नो० अग्नयेआज्याहुतयः १६६८ ॥ इदं० विष्णवेआज्याहुतयः ॥ १६६८ ॥ एवमेवप्रकारेणसर्वाहुतयः ॥ १०००८ ॥ अष्टोत्तरायुताभवंति ॥ अथवाकस्यचिद्ब्राह्मणस्यविवाहंकुर्यात् ॥ ॥ इतिमृतभार्यत्वपरिहारोपायः ॥ ॥ ६ ॥ अथभार्याविद्यमानत्वेसतिद्वितीयविवाहेऽधिवेदनीयकारणमाहयाज्ञवल्क्यः ॥ सुरापीव्याधिताधूर्तावंध्यार्थघ्न्याप्रियंवदा ॥ स्त्रीप्रसूश्चाधिवेत्तव्याह्यंतरंकारयेदिति ॥ ॥ अधिवेदनेकालप्रतीक्षामाहमनुः ॥ वंध्याष्टमेऽधिवेत्तव्यादशमेतुमृतप्रजा ॥ एकादशेस्त्रीजननीसद्यस्त्वप्रियवादिनीति ॥ ॥ विवाहांतरेविशेषः ॥ एकामुत्क्रम्यकामार्थमन्यांलब्धुंयइच्छति ॥ समर्थस्तोषयित्वार्थैःपूर्वोढामपरांवहेत् ॥ याज्ञवल्क्यः ॥ आज्ञासंपादिनींदक्षांवीरसूंप्रियवादिनीं ॥ त्यजन्दायतृतीयांशमद्रव्योभरणंस्त्रियः ॥ सधनोधनतृतीयांशमधनोशनाच्छादनात्मकभरणंचदद्यादित्यर्थः ॥

अथस्त्रीनिधनेद्वितीयपरिणयनकालमाह ॥ सिंधौ ॥ प्रमदामृतिवासरादितःपुनरुद्वाहविधिर्वरस्यच ॥ विषमेपरिवत्सरेशुभोयुगुलेचापिमृतिप्रदोभवेदिति ॥ ॥ अथकन्याविषयोगेसमुत्पन्नाचेद्वैधव्ययोगहरकुंभविवाहः ॥ सचविषयोगस्त्रिविधः॥ सूर्यभौमार्किवारेषुतिथिभद्राशताभिधम् ॥ आश्लेषाकृत्तिकानागेतत्रजाताविषांगना ॥ १ ॥ जनुर्लग्नेरिपुक्षेत्रेसंस्थितःपापखेचरः ॥ द्विसाम्यमपियोगेस्मिन्संजाताविषकन्यका ॥ २ ॥ लग्नेशनैश्चरोयस्याःसुतेर्किर्नवमेकुजः ॥ विषाख्यासापिनोद्वाह्यात्रिविधाविषकन्यका ॥ ३ ॥ तद्दोषपरिहारोपायः ॥ सावित्र्यादिव्रतंकृत्वावैधव्यविनिवृत्तये ॥ अश्वत्थादिभिरुद्वाह्यादद्यात्तांचिरजीविनेइति ॥ ॥ अन्यच्च ॥ बालवैधव्ययोगेतुकुंभद्रुप्रतिमादिभिः॥कृत्वालग्नंततःपश्चात्कन्योद्वाह्येतिचापरे ॥ ॥ कुंभःप्रसिद्धः ॥ द्रुप्रतिमेतिस्वर्णमयाश्वत्थद्रुमप्रतिमा ॥ तैःसहअनूढाक

न्योद्वाह्या ॥ पुनर्भूदोषाभावस्तुविधानखंडे ॥ स्वर्णद्रुपिप्पलानांचप्रतिमाविष्णुरूपिणी ॥ तयासहविवाहेतुपुनर्भूत्वंनजायते ॥ सूर्यारुणसंवादे ॥ विवाहात्पूर्वकालेतुचंद्रताराबलान्विते ॥ कुंभंसंस्थाप्यविधिवत्तत्रद्रुप्रतिमांयजेत्॥मधुपर्कादिकंदत्वातदग्रेकन्यकांनयेत्॥विवाहोक्तेनमंत्रेणकुंभेनसहचोद्वहेत् ॥ सूत्रेणवेष्टयेत्पश्चाद्दशतंतुविधानतः॥ कुंकुमालंकृतंदेहंतयोरेकांतमंदिरे ॥ ततःकुंभंचनिःसार्यप्रभज्यसलिलाशये॥ततोभिषेचनंकुर्यात्पंचपल्लववारिभिः ॥ ततोलंकारवस्त्राढ्यांवरायप्रतिपादयेदिति॥अथप्रयोगः॥तत्रपूर्वोक्तादिनेकन्यापिताकन्ययासहएकांतेविष्णुमंदिरेगत्वाआसनेप्राङ्मुखउपविश्यस्वदक्षिणतःकन्यामुपवेश्य॥ देशकालकीर्तनानंतरंकन्यायाः नक्षत्रादियोगेनग्रहयोगेनपुनर्भूदोषाभावेनचविषाख्ययोगसंभववैधव्यारिष्टपरिहारार्थंश्रीपरमेश्वरप्रीतयेकुंभविवाहंकरिष्ये ॥ तत्रादौनिर्विघ्नतार्थंगणपतिपूज

नंस्वस्तिपुण्याहवाचनादिनांदीश्राद्धादिकृत्वामंडला ॥ ततस्तंदुलाष्टदलेमहीद्यौरि
त्यादिक्रमेणकलशंप्रतिष्ठाप्यपूर्णपात्रंनिधायवस्त्रयुग्मेनसंवेष्ट्यतत्रवरुणंसंपूज्य ॥
तत्राग्न्युत्तारणप्राणप्रतिष्ठापूर्वकंस्वर्णमयविष्णुरूपाश्वत्थद्रुमप्रतिमांप्रतिष्ठाप्यषोड
शोपचारैःसंपूज्यप्रार्थयेत् ॥ तत्रमंत्रः ॥ वरुणांगस्वरूपायजीवनानांसमाश्रय
य ॥ पतिंजीवयकन्यायाश्चिरंपुत्रसुखंकुरु ॥ देहिविष्णोवरंदेहिकन्यांपालयदुः
खतइति ॥ ततोमधुपर्कवस्त्रालंकारार्पणं ॥ अंतःपटंकन्यांकुंभांतरालेधृत्वामंगलप
द्याष्टकंपठित्वा ॥ ओंप्रतिष्ठेत्यनंतरंपटंनिःसार्य ॥ कन्यायैवस्त्रोपवस्त्रमंगलतंतुबं
धनसमीक्षणांतंमंत्रपठनेनदत्वा ॥ दशवारंअधस्तादुपरिचकुंभंकन्यांचपरित्वेत्य
नुवाकेनसूत्रंसंवेष्ट्य ॥ कुंभस्यविष्णवेकन्यांसमर्पयेत् ॥ मंत्रस्तु ॥ गौरींकन्यामिमां
श्लक्ष्णांयथाशक्तिविभूषितां ॥ ददामिविष्णवेतुभ्यंसौभाग्यंदेहिसर्वदा ॥ १ ॥ वि

ष्णुरूपिणेश्वत्थकुंभायेमांकन्यांश्रीरूपिणींसंप्रददेइतिसमर्पयेत ॥ ततोवेष्टितसूत्रात्कुंभंनिःसार्यजलेप्रभज्य ॥ ततआचार्यःशुद्धजलेनऐंद्रवारुणपावमानीयमंत्रैःपल्लवेनकन्यामभिषिच्यशुद्धवाससीपरिधाप्य ॥ वैवाह्यवस्त्रादिकंसर्वंआचार्यायदद्यात् ॥ अनघाद्यास्मीतित्रिवारंकन्यावदेत् ॥ एवमस्त्वितिद्विजोब्रूयात् ॥ आचार्यायवरंदत्वातस्मादाशिषोगृहीत्वाकर्मेश्वरायार्पयेत् ॥ इतिकुंभविवाहः ॥ ॥ अथबालवैधव्यहरविष्णुमूर्तिदानं ॥ तत्प्रकारोनारदेनोक्तः ॥ ब्राम्हणंसाधुमामंत्र्यसंपूज्यविविधार्हणैः ॥ तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजां ॥ शुद्धवर्णसुवर्णेनपलस्यैकसुलक्षणां ॥ तदर्धेनतदर्धेनवित्तशक्त्यनुसारतः ॥ निर्मितांरुचिरांशंखगदाचक्राब्जसंयुतां ॥ दधानांवाससीपीतेकुमुदोत्पलमालिकां ॥ सदक्षिणांचतांदद्यान्मंत्रमेतमुदीरयेदिति ॥ प्रयोगस्तु ॥ देशकालकीर्तनांतेममवैधव्यारिष्टनिरसना

थंअखंडसौभाग्यप्राप्तयेचविष्णुप्रतिमादानंकरिष्ये ॥ ताम्रपात्रेतंदुलेनापूर्यतदुपारि
स्वर्णमयींकृताग्न्युत्तारणप्राणप्रतिष्ठांविष्णुप्रतिमांचतुर्भुजायुधान्वितांप्रतिष्ठाप्यषो
डशोपचारैःपूजयेत् ॥ पूजाकालेपीतांबरादिवस्त्राणिकुंडलाद्यलंकारान्कुंकुमादिपुष्प
मालाश्चार्पयित्वाप्रणमेत् ॥ भगवन्कमलाकांतसर्वमंगलदायक ॥ हत्वासर्वाण्य
ष्टानिसौभाग्यंचाभिवर्धय ॥ १ ॥ इतिसंप्रार्थ्य ॥ प्रतिगृहीतारंब्राह्मणंसंपूज्या
र्चितप्रतिमांसोपस्कारांदद्यात् ॥ दानमंत्रस्तु ॥ यन्मयाप्रांच्यजनुषीघ्नंत्यापतिस
मागमं ॥ विषोपविषशस्त्राद्यैर्हतोवातिसुरक्तया ॥ प्राप्यमाणंमहाघोरंयशःसौख्य
धनापहं ॥ वैधव्याद्यतिदुःखौघान्नाशयसुखलब्धये ॥ बहुसौभाग्यदात्रीचमहावि
ष्णोरिमांतनुं ॥ सौवर्णींप्रतिमांशक्त्यात [illegible] संप्रददेद्विज ॥ १ ॥ इमांमयार्चितांवि
ष्णुप्रतिमांसोपस्का [illegible] अखंडसौभाग्यप्राप्तयेचअमुकशर्मणे

ब्राह्मणायतुभ्यमहंसंप्रददेइतिदत्वा ॥ यथाशक्तिसुवर्णदक्षिणांदत्वा तस्मादाशिषो गृहीत्वा ॥ कन्याअनघाद्याहमस्मीतित्रिर्वदेत् ॥ एवमास्त्वितिविप्रोक्तिंगृहीत्वा ॥ ब्राह्मणान्भोजयेत् ॥ ततोवैवाहिकंकुर्यात् ॥ इतिवैधव्ययोगहरविष्णुप्रतिमादानं॥ ॥ ६ ॥

॥ अथतृतीयमानुषीविवाहस्यनिषिद्धत्वात्तस्मिन्कर्तव्येसत्यर्कींविवाहविधिरुच्यते ॥

॥ तत्रतृतीयमानुषीविवाहनिषेधमाह कश्यपः ॥ तृतीयांमानुषीं नैवचतुर्थींयःसमुद्वहेत् ॥ पुत्रपौत्रादिसंपन्नःकुटुंबीसाग्निकोवरः ॥ उद्व [illegible] सिद्ध्यर्थंतृतीयानकदाचन ॥ मोहादज्ञानतोवापिगच्छेत्रींयादिमानुषीं ॥ द्वि [illegible] चसंदेहोगर्गस्यवचनंयथा ॥ ॥ वसिष्ठः ॥ चतुर्थ्याश्चविवाहार्थंतृतीयार्कीं [illegible] त् ॥ आदित्यदिवसेवापिहस्तर्क्षेवाशनैश्चरे ॥ शुभेदिनेवापूर्वाण्हेकुर्यादर्कींविवाहकं ॥ ब्राह्मे ॥ ग्रामात्प्राच्यामुदी [illegible] पंगतां॥ निरीक्ष्ययत्नतोधस्तात्स्थं

डिलंरचयेद्बुधः॥ व्यासः ॥ स्नात[illegible]तः॥सुपुष्पफलशाखं चअर्कीगुल्मंसमाश्रयेत् ॥ सलक्षणेनकुंभस्थामर्कींसंस्थाप्ययत्नतः॥ अर्ककन्याप्रदानार्थंआचार्यंकल्पयेत्पुरा ॥ उभौगोत्रविभिन्नंतंशांतंदांतंदयान्वितं ॥ आचार्येणस्वयंभाव्यंदत्तांसूर्येणकन्यकां ॥ अर्कीसन्निधिमागत्यतत्रस्वस्त्या[illegible] वाचयेत् ॥ नांदीश्राद्धंहिरण्येनअष्टवर्गान्प्रपूजयेत् ॥ ॥ पूजयेन्मधुपर्केण आचार्योरत्नतोवरं ॥ यज्ञोपवीतंवस्त्रंचहस्तकर्णादिभूषितं ॥ उष्णीषंगंधमाल्यादि वरायचप्रदापयेत् ॥ ब्रह्मपुराणे ॥ यथाविधीतिरुच्येतइत्यस्यानंतरंक्रमः॥ कृत्वार्कंपुरतस्तिष्ठन्प्रार्थयेत्तुद्विजोत्तमान् ॥ त्रिलोकवासिन्सप्ताश्वछाययासहितोरवे ॥ तृतीयोद्वाहजंदोषंनिवारयसुखंकुरु॥ १॥ तत्राध्यारोप्यदेवेशंछाययासहितंरविं॥ वस्त्रैर्माल्यैस्तथागंधैस्तन्मंत्रेणप्रपूजयेत् ॥ तन्मंत्रआकृष्णेनेति ॥ अन्यच्च ॥ श्वे

तवस्त्रेणसंवेष्टयतथाकार्पासतंतुभिः ॥ गंधपुष्पैःसमभ्यर्चतल्लिंगैरभिषिच्यतं ॥ गुडौ
दनंतुनैवेद्यंतांबूलंचसमर्पयेत् ॥ व्यासः ॥ अर्कींप्रदक्षिणंकुर्वन्जपेन्मंत्रमिमंबुधः ॥
ममप्रीतिकरायेयंत्वयासृष्टापुरातनी ॥ अर्कजाब्रह्मणासृष्टाअस्माकंपरिरक्षतु ॥
॥ १ ॥ पुनःप्रदक्षिणंकृत्वमंत्रेणानेनमंत्रवित् ॥ ॥ नमस्तेमंगलेदेविनमःसवितु
रात्मजे ॥ त्राहिमांकृपयादेविपत्नीत्वंमेइहागता ॥ अर्कित्वंब्रह्मणासृष्टासर्वप्राणिहि
तायच ॥ वृक्षाणामादिभूतात्वंदेवानांप्रीतिवर्धिनी ॥ तृतीयोद्वाहजंपापंमृत्युंचा
निवारय ॥ ततश्चकन्यावरणात्त्रिपुरुषकुलमुच्चरेत् ॥ आदित्यःसविताचार्कःपु
पौत्रीप्रपौत्रिका ॥ गोत्रंकाश्यपइत्युक्तंलोकेलौकिकमाचरेत् ॥अन्यच्च ॥ वरःकश्य
गोत्रश्चेत्तदाचार्यःस्वपूर्वजान् ॥ उच्चरेन्ममपुत्रीतिस्वगोत्रैःसहतद्विधिः ॥ ॥ व्या
सः ॥ सुमुहूर्तेर्कींनिरीक्ष्यस्वस्तिसूक्तमुदीरयेत् ॥ आशिषश्चततःकुर्यादाचार्यप्रमुखै

र्यैः समाहूयविधिनातन्मुखोन्नत। ह्यततोहं कविधि
र्कीदानमंत्रस्तु ॥ अर्ककन्यामिमांविप्रयथाशक्ति ां
त्रायशर्मणतुभ्यदत्तांविप्रसमाश्रय ॥ १ ॥ ॥ अंजल्यक्षतकर्माणिकृत्वाकक
कं ॥ यावत्पंचावृतंसूत्रंअर्कीवृक्षेप्रवेष्टयेत् ॥ पंचीकृतंपुनःसूत्रंस्कंधेबध्नातिमंत्र
स्वशाखोक्तेनमंत्रेणगायत्र्याचाथवाजपेत् ॥ बृहत्सामेतिमंत्रेणसूत्ररक्षांप्रक
त् ॥ अर्क्याश्चपुरतःपश्चाद्दक्षिणोत्तरयोस्तथा ॥ आग्नेयादिक्रमेणैवविदिक्षु
वहि ॥ अष्टौकुंभान्प्रतिष्ठाप्यक्रमेणैवयथाविधि ॥ प्रस्रवप्रतिकुं
णवेष्टयेत् ॥ हरिद्रागंधसंयुक्तान्पूरयेच्छीतलैर्जलैः ॥ पंचपल्लवसंयु
मन्वितान् ॥ सर्वौषधिसमायुक्तान्पूर्णपात्रसमन्वितान् ॥ प्रतिकुंभेम
परमेश्वरं ॥ पाद्यार्घादीनिनैवेद्यंकुर्यान्नाम्नैवमंत्रवित् ॥ कुंभोदकैर्वरंअर्कीवारुणैराभ

षिंचयेत् ॥ ॥ अत्रहोमप्रकारःशौनकेनदर्शितः ॥ तृतीयेतुविवाहेचसंप्राप्तेपुरुषस्य तु ॥ अर्कविवाहंवक्ष्यामिशौनकोक्तविधानतः ॥ अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत् ॥ नांदीश्राद्धंप्रकुर्वीतआचार्यंवरयेत्ततः ॥ अर्कमभ्यर्च्यसौ[illegible]चगंधपुष्पाक्षतादिभिः ॥ सौर्याएवचसूर्यश्चआकृष्णेनऋचेनच ॥ स्वयंचालंकृतस्तः [illegible] माल्यादिभिःशुभैः ॥ अर्कस्योत्तरदेशेतुस्थंडिलंकारयेत्ततः ॥ उल्लेखनादिकं [illegible] अग्निंसंस्थापयेत्ततः ॥ ब्रह्मासनादिकंकृत्वासमन्वारब्धएतया ॥ एतयाअर्कव[illegible]थया ॥ संस्कृताज्यंस्रुवेणैवआघारांतमतःपरं ॥ आज्याहुतिंचजुहुयात्संगोभिरनकया ॥ यस्मैत्वाकामकामश्चएकयाचततःपरं ॥ व्यस्ताभिश्चसमस्ताभिस्ततश्चास्विष्टकृद्भवेत् ॥ परिवेशनपर्यंत [illegible] दि[illegible]शेषमाह व्यासः ॥ [illegible]नःप्रदक्षिणंकृ[illegible]रेषुजरा

युण[illegible] ॥ अ[illegible]प[illegible]यानिनोदे
प्[illegible]वाचविसृजेत्पुनः ॥ गोयुग्म
भ्योदक्षिणां चापिशक्तितः ॥ तत
च्यविधिनामानुषींपुरा ॥ उद्वहेदन्यथानैवपुत्रपौत्राभि[illegible]द्धिम
ष्ठविधिनासम्यगुद्वहेत् ॥ धनधान्यसमृद्धिंचइच्छाभीष्टवरं
मः ॥ ॥ अथप्रयोगः ॥ ॥ अत्रक्रियमाणविवाहात्प्राक्च
शनिवासरेहस्तनक्षत्रेवाशुभतिथ्यादिदिनेग्रामात्प्राच्यामुदीच
गुल्मंप्रयोज्यतदधोभागेपुरतःस्थंडिलंविरच्य ॥ अर्कीपां
श्य॥ गुल्मस्यसमंतात्प्रागाद्यष्टदिक्षुतंदुलेनाष्टदलानिविरच
यम्यदेशकालकीर्तनांतेममतृतीयमानुषीविवाहजन्यदोषपरि

चश्रीपरमेश्वरप्रीत्यर्थंअर्कीविवाहंकरिष्ये ॥ तदंगविहितंनिर्विघ्नतार्थंगणपतिपूजनं
स्वस्तिपुण्याहवाचनंमातृकापूजनंवसोर्द्धाराआयुष्यमंत्रजपंनांदीश्राद्धंचका
तिकृत्वा ॥ तच्चनांदीश्राद्धंहेम्नाकर्तव्यं ॥ कर्मार्थंस्वकुलाचार्यंवृत्वा न्य
थासूर्योदेवानांचप्रजापतिः ॥ तथात्वर्कंप्रदानार्थमाचार्यत्वंकुरुद्विज अपर
दानाचार्यंवृणुयात् ॥ ततोवरः अर्कीगुल्मस्याग्रेतंदुलाष्टदलेमहीद्य तिक्रमे
र्णपात्रनिधानांतंकलशंप्रतिष्ठाप्यगंगाद्यावाह्याभिमं पूज्य ॥ तदुपरि
ता संपाद्यस्वर्णमयीं छाययासहितास प्रतिष्ठाप्य ॥ वस्त्रोपव
स्व ाकृष्णेनेतिषोडशोपचारैः संपूज गुडौदननैवेद्यंदत्वा ॥ पूजनांते

त्तिरमर्कावाहनाद्युक्तं ॥ शांतिसारमय तं ॥

प्रार्थयेत् ॥ त्रैलोकवासिन्सप्ताश्वच्छा
सुखंकुरु ॥ १ ॥ ततोर्कींआपोहि
पूज्यप्रदक्षिणांकुर्यात् ॥ तत्रमंत्रः ॥
जाब्रह्मणासृष्टावस्माकंपरिरक्षतु ॥
त्मजे ॥ रक्षमांकृपयाशश्वत्पत्नीत्वं
तोर्कींप्रार्थयेत् ॥ अर्कित्वंब्रह्मणास
देवानांप्रीतिवर्धिनी ॥ १ ॥ सर्वारिप्र
पापंमृत्युंचाशुविनाशय ॥ २ ॥ ॥
दित्यस्यप्रपौत्रींसवितुःपौत्रीं अर्कस्
नंकृत्वा ॥ वाग्दानंधर्मसिंधुमयूखयोर्नो

दानाचार्यः देशकालौस्मृत्वा अर्कीविवाह
पूर्वकंस्वशाखोक्तविधिनावरायमधुपर्क
स्कारपूर्वकमग्निंप्रतिष्ठाप्य ॥ अर्कीवरां
लपद्याष्टकंपठित्वाओंप्रतिष्ठेत्युक्त्वाउत्तरत
स्वस्तिनइंद्रेतिमंगलसूक्तंपठेयुः ॥ ततोजरां
तन्नेत्युत्तरीयं ॥ समंजंत्विति अर्कींनिरीक्ष
यात् ॥ ततोगायत्र्याबृहत्सामेनपरित्वे
मुखउपविश्यदेशका
तोशिवाआपःसंत्वि
मुकशर्मणःप्रपौत्रा

अ० श० पुत्राय ॥ अ
ाश्यपगोत्रस्यकाश्यपाव
का० त्रिप्र० सवितुःपौत्रीं
का० गोत्रोत्पन्नांका० प्रित्र० अर्कीनाम्नींइ
वाहदोषनिरासार्थंभार्यात्वेनतुभ्यमहंसंप्रददे
रिसकुशोदकंनिषिंचेत् ॥ एवंत्रिवारंकुर्यात्
र्यःअर्कीनाम्नींइमांकन्यांसूर्यदत्तांविभाव्यस
ममपुत्रींइत्यूहंकुर्यात् ॥ ॥ अर्कीकन्यामि
यशर्मणेतुभ्यंदत्तांविप्रसमाश्रय ॥ १ ॥

कपूर्णानंजलींस्त्रीन्समर्पयेत् ॥ तत्रमं
थमांजलिः ॥ ॐ धर्मोमेकामःसमृ
समृध्यताम् ॥ इतितृतीयां० ॥ ततो
पंचगुणंकृत्वातत्रहरिद्राखंडंबद्धातत्क
बध्नीयात् ॥ तत्रमंत्रः ॥ ॐ बृहत्सा
इंद्रस्तोमेनपंचदशेनमध्यमिदंवातनु
ततोर्कादिग्विदिक्षुकृताष्टदलेषुमही

---

१ अंजलि[illegible]ानंमयूखदर्पणयोरुक्तंकमला
वं[illegible]नमुक्तंकमल[illegible]करादिभिरर्कस्यैवोक्तम् ॥
दर्प[illegible]षुअष्टकुंभ[illegible]थापनमुक्तम् ॥

त्प्रा[illegible]ादिच[illegible]दिक्षुचतुरःकुभान् सूत्रेणावे
निधायतेषुनाम्नाविष्णुमावाह्यषोडशोपचारै
तेअर्कीविवाहांगभूतंहोमंकरिष्ये ॥ ॥
चरुवर्जंकुशकंडिकांसंपाद्य ॥ तत्राघारावाज्य
इदंप्रजा॰नमम ॥ ॐ इंद्रायस्वा॰इदमिन्द्र
सोमायस्वा॰इदंसोमाय॰ ॥ ॥ ततोबृह
तद्यथा ॥ ॐ संगोभिरांगिरसोनक्षमाणोभ
पतीअनक्तिबृहस्पतेवाजयाशुँरिवाजौस्वाह
मकामायवयंसम्राड्यजामहे ॥ तामस्मभ्य
ग्रयेनमम ॥ ॥ ततोव्यस्तसमस्तव्याहृती

ॐ भुवःस्वा०इदंवायवे० ॥ ॐ स्वःस्वा
जापतये० ॥ ततःस्विष्टकृत् ॥ ततोभू
कर्मकृत्वा ॥ ॥ ततःसंस्रवप्राशनादि
येत् ॥ ततोर्कीं प्रार्थयेत् ॥ मयाकृतमिदं
तत्सर्वंक्षंतुमर्हसि ॥ १ ॥ ततआचार्यो
अष्टौब्राह्मणान्भोजयेत् ॥ नानानामग
राशिषोगृहीत्वा ॥ पूजोपकरणादिकंअ
विसृज्य ॥ यस्य
तकलशोदकेनअर्कीं
क्षिताः ॥ दिनच

चतुर्थेदिवसेतीतेपू
द्वहेदन्यथानैवपुत्रप
त्रैक्यात् ॥ अथव
नेअत्रिगोत्रंकन्याविशेषेणसंकीर्त्यआ
दितिकेचित् ॥ अत्रगोत्रैक्यंनदोषाये
त्रिणमाचार्यंपरिकल्प्यतस्मादर्कींप्रति
॥ काश्यपगोत्रस्थानेस्वगोत्रंकन्यावि
पित्रादित्रयंस्वंनामचकीर्तयेत् ॥ ए
तिगोपीनाथदीक्षिताः ॥ एवंकृत्वाविध
महर्षिभट्टविरचितेसंस्कारभास्करेअव

॥ अथानादिष्टप्रायश्चित्त ॥ कालातिक्रमो
तानिकर्माणिनियतकालान्यभिहितानि ॥
षांनियतस्यकालस्यअतिक्रमोभवतितदा
तिक्रमेयस्यसंस्कारकर्मणःशास्त्रनियमितं
नित्यवन्नित्येश्रौतकल्पेयद्विहितंतद्वत्अना
त्तस्यआतिक्रांतकालेसंस्कारकर्मण्याधिकार
ताप्रयोगेवक्ष्यते॥अत्रकालातिक्रमइत्युपलक्ष
नादिष्टमेवप्रायश्चित्तं॥गृह्यकारेणप्रायश्चित्त
तिदेशेप्राप्तेऽविज्ञातेप्रतिमहाव्याहृतिभिः
का ऽतिक्रमे नियतवदित्यनेनातिदेशःकृतं

म[illegible]त्यक्षश्रु[illegible]मूलं ॥ किमिदमागौदिकंय
र्मतस्यभ्रंशे श्रौतकल्पेऽव्याहृतिचतुष्टयपंच
गृह्योक्तकर्मणामपिस्मार्तत्वात्तद्भ्रेषेतस्यै
भ्रेषोपदिष्टता॥कालातिक्रमेनियतवदित्य
र्णाहुतिवदाज्यंसंस्कृत्यअनादिष्टप्रायश्चि
सूत्रे॥पूर्णाहुतिंजुहोतिनिरूप्याज्यंगार्हपत
त्पूयावेक्ष्यगृहीत्वान्वारब्धएवर्ठंसर्वत्र ॥
ष्टंप्राप्नोतितदाग्निःसंभृतएव ॥ यदिनिर
रच्यतत्रपंचभूसंस्कारान्कृत्वालौकिकाग्नि
धिश्रित्यस्रुवंदर्भैःसंमृज्याज्यमुद्वास्यकुर

समिधंनिधायोत्थायस्रुवंसव्यंकृत्वादक्षिणना
णंजान्वाच्यओंभूःस्वाहेतिस्रुवस्थेनाज्येनैकाहुं
गःएवंसर्वत्र ॥ ॐ भुवःस्वाहा ॥ इदंवायवे॰ ॥
भूर्भवःस्वःस्वाहा ॥ इदंप्रजापतये॰ ॐ त्वन्नोऽअः
वरुणाभ्यां॰ ॥ ॐ सत्वन्नोऽअग्ने॰नऽएधिस्वाहा
श्चाग्ने॰भेषजठंस्वाहा ॥ इदमग्नयेअयसे॰ ॥
णायसवित्रेविष्णवेविश्वेभ्योमरुद्भ्यःस्वर्केभ्यश्च॰ ॥
तयेच॰ ॥ एवंस्रुवेणादायाज
यश्चित्तानादेशःकर्मणांनियत
तव्यम् ॥ ॥ इत्यनादिष्ट

ाकृतः ॥ याज्ञिकानांहिताश
प्रमाथिनिशुभेमधौ॥ऋषिसंज्ञे

॥ इति संस्कारभास्कारः

इस पुस्तकका रजिस्टरी सब हक्क सन् १८६७ का ऐक्ट २ केबमूज

इदं पुस्तकं श्रीकृष्णदासात्मज–गङ्गाविष्णु
“श्रीवेङ्कटेश्वर” मुद्रालये मुद्रि
शके १८१४ मिति वैश

पं· १९८९

सूची

भागवतब्रजभाषाटीका५००दृष्टांतोंसहित की०
णिकायाज्ञवल्क्यशिक्षासहित दूसरे मोटे टैपमें शु
निषद्मूल स्थूलाक्षर शांतीसहित की० ३ रु० आ
आ० रुद्री यजुर्वेदी की०४ आ० दंडकयजुर्वेदी की
और श्रीसूक्त की० १ आ० शारीरक (शाङ्करभा
क्तिसूत्र सभाष्य अक्षर बडा की० १० रु० गीता
पदच्छेदसहितभाषाटीका की० ८ रु० गीता भ

श्रीकृष्णदासात्मज-गङ्गाविष्णु, खे

॥ इति संस्कारभास्क [illegible]